Epic

ADHYATMA RAMAYANA.

BY

MAHARSHI VEDAVYASHA

WITH THE COMMENTARY OF RAMAVARMAH

EEDITED BY

PANDIT JIBANANDA VIDYASAGARA B. A.

Superintendent Free Sanskrit College.

CALCUTTA:

Printed at the

New Valmiki Press.

1884.

To be had from Pandit Jibananda Vidyasagara B. A.

Superintendent Free Sanskrit College, Calcutta.

एतानि मुद्रितसंस्कृतपुस्तकानि ।

Adhyatmaramayana

अध्यात्मरामायणम् ।

महर्षि श्रीकृष्ण द्वैपायन विरचितम् ।

श्रीरामवर्म्म विरचित-टीका-समेतम ।

बि, ए, उपाधिधारिणा

श्रीजीवानन्द विद्यासागर भट्टाचार्य्येण

संस्कृतम् प्रकाशितञ्च ।

कलिकाता नगर्य्याम् ।

नूतन बाल्मीकि यन्त्रे मुद्रितम्

१८८४ ।

टीकाकारस्य मुखबन्धः ।

ओं गणेशाय नमः श्रीरामचन्द्राय नमः ।

विसेन वंशजलधौ पूर्णः शीतकरो परः ।
प्रजाह्लादकरो विष्णुभूषणः * कौस्तुभो परः ॥ १ ॥
नाम्ना हिम्मतिवर्माभूद्धैर्येण हिमवानिव ।
रूपेण जितकन्दर्पः क्षमायां क्षमया समः ॥ २ ॥
पराक्रमेऽर्जुनः साक्षात्तेजसा भानुमानिव ।
भूपानां भ्रष्टराज्यानां पुनाराज्यप्रदायकः ॥ ३ ॥
यं दृष्ट्वार्थिसमूहस्य जातेयं निश्चिता मतिः ।
हित्वा पशुत्वं स्त्रीत्वं च कामधुक् भूमिमागता ॥ ४ ॥
तस्माज्जातो रामदत्तश्चन्द्राच्चन्द्र इवापरः ।
मित्राणां च रिपूणां च मानदः † प्रथितः प्रभुः ॥ ५ ॥
आसमुद्रं क्षमा देवी यत्कीर्त्या धवलीकृता ।
हिमाचलेन समतां नीताः सप्तापि चाचलाः ॥ ६ ॥
यद्दानाम्बुप्रवाहेण मेघोदस्यानपेक्षकाः ।
कृषीवलाः प्रतिदिशं प्रहृष्यन्ति दिने दिने ॥ ७ ॥
तेन श्रीरामभक्तेन सर्वविद्याप्रजानता ।
शृङ्गवेरपुरेशेन रिपुकक्षदवाग्निना ॥ ८ ॥
अर्थिनां कल्पवृक्षेण विद्वज्जनसभासदा ।
भट्टनागेशशिष्येण वक्ष्यते रामवर्मणा ॥ ९ ॥
प्रणम्य जानकीजानिं रामं कामातिसुन्दरम् ।
चापबाणधरं देवं मायामानुषविग्रहम् ॥ १० ॥
सेतुः परोपकृतयेऽध्यात्मरामायणाम्बुधौ ।
सुग्रन्थमणिभिः स्वच्छैः प्रीयतां तेन राघवः ॥ ११ ॥

---

* अत्र विष्णुभूषणत्वेन परमभक्ततया सदा भगवद्धृदयारूढताऽस्य ध्वनिता

† मानदः मानदाता मानखण्डकश्च ।

अध्यात्मरामायणम् ।

बालकाण्डम् ।

प्रथमः सर्गः ।

अप्रमेयत्रयातीतनिर्मलज्ञानमूर्त्तये ।
मनोगिरां विदूराय दक्षिणामूर्त्तये नमः ॥ १ ॥

सूत उवाच ।

कदाचिन्नारदो योगी परानुग्रहवाञ्छया ।
पर्य्यटन् सकलान् लोकान् सत्यलोकमुपागमत् ॥ २ ॥

श्रीमता वाल्मीकिना लोकोद्धाराय च कृते रामचरित्रवर्णनरूपे रामायणाख्यकाव्ये भगवतो लीलावतारस्य रावणादीनां दृढमनुष्यत्वबुद्धये नटवदात्मस्वरूपगोपनेन व्यवहरतः स्वरूपं वाल्मीकिना गुप्तमेव तत्र तत्र निरूपितम् तदेतत्परमदयालुर्भगवान् साक्षाद्वेदव्यासो लोकानां स्फुटं बोधयितुं नारदब्रह्मसंवादरूपेण ब्रह्माण्डपुराणे अध्यात्मरामायणाख्यां संहितां चक्रे तस्याश्च वाल्मीकिरूपितार्थज्ञापकत्वं बोधयितुं वाल्मीकिरामायणवदेवकाण्डसर्गोपेतां कृतवान् तां यथामति स्वमतिदोषशुद्धये व्याचक्ष्महे तामेतां संहितां नैमिषेऽरण्ये नैमिषीयान्मुनीन् श्रावयति स्म सूत इत्याह ।

अप्रमेयेति अप्रमेयं त्रयं मायाजीवेश्वरस्वरूपं तदतीतस्ततोऽधिकश्चासौ निर्मलं यत् ज्ञानं तत्स्वरूपाय नमः इति वाङ्मनसामगोचरायेत्यर्थः ॥१॥

कदाचिदिति योगी योगपक्वकषायतया विदितवेदितव्यः तादृशस्य

तत्र दृष्ट्वा मूर्त्तिमद्भिश्छन्दोभिः परिवेष्टितम् ।
बालार्कप्रभया सम्यक् भासयन्तं सभागृहम् ॥ ३ ॥
मार्कण्डेयादिमुनिभिः स्तूयमानं मुहुर्मुहुः ।
सर्वार्थगोचरज्ञानं सरस्वत्या समन्वितम् ॥ ४ ॥
चतुर्मुखं जगन्नाथं भक्ताभीष्टफलप्रदम् ।
प्रणम्य दण्डवद्भक्त्या तुष्टाव मुनिपुङ्गवः ॥ ५ ॥
सन्तुष्टस्तं मुनिं प्राह स्वयम्भूर्वैष्णवोत्तमम् ।
किं प्रष्टुकामस्त्वमसि ? तद्वदिष्यामि ते मुने ! ॥ ६ ॥
इत्याकर्ण्य वचस्तस्य मुनिर्ब्रह्माणमब्रवीत् ।
त्वत्तः श्रुतं मया सर्वं पूर्वमेव शुभाशुभम् ॥ ७ ॥

पर्यटनं विस्तरं तत्राह परेति परेषां तत्तल्लोकवासिनां धर्मज्ञानाद्युपदेशेन यत्नोऽनुग्रहस्तदिच्छयेत्यर्थः सत्यलोकं ब्रह्मलोकम् ॥ २ ॥

तत्र सत्यलोके मुनिपुङ्गवो नारद उच्यमानगुणं चतुर्मुखं दृष्ट्वा तुष्टावेति अपिमहतीयश्लोकस्थेन सम्बन्धः मूर्त्तिमद्भिः स्फोतविग्रहैः छन्दोभिर्वेदैः परितो वेष्टितं तत्तद्वेदाध्येतृव्यवधानमुखे तत्तद्वेदमूर्त्यवस्थानादिति भावः बालार्कप्रभया बालार्कसदृश्या स्वप्रभया ॥ ३ ॥

सर्वार्थगोचरज्ञानं अतीतानागतवर्त्तमानरूपा ये सर्वेऽर्थास्तद्विषयज्ञानयुक्तम् बहुव्रीहिसमासः अतएव तत्तद्ज्ञानरूपया सरस्वत्याख्यशक्त्या युक्तम् ॥ ४ ॥

जगन्नाथं जगत्स्रष्टारम् भक्ताभीष्टफलप्रदत्वेन प्रश्नयोग्यतासूचनम् ॥ ५ ॥

स्वयम्भूरित्यनेन अनाहतज्ञानत्वं सूचितम् वैष्णवोत्तमम् "सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः भूतानि भगवत्यात्मन्येषभागवतोत्तम" इत्युक्तलक्षणम् तत्पृष्टं वक्ष्यत्यर्थः ॥ ६ ॥

शुभं विहितम् अशुभं निषिद्धम् ॥ ७ ॥

इदानीमेकमेवास्ति श्रोतव्यं सुरसत्तम ।
तद्रहस्यमपि ब्रूहि यदि तेऽनुग्रहो मयि ॥ ८ ॥
प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः ।
दुराचाररताः सर्वे सत्यवार्त्तापराङ्मुखाः ॥ ९ ॥
परापवादनिरताः परद्रव्याभिलाषिणः ।
परस्त्रीसक्तमनसः परहिंसापरायणाः ॥ १० ॥
देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयः ।
मातापितृकृतद्वेषाः स्त्रीदेवाः कामकिङ्कराः ॥ ११ ॥
विप्रा लोभग्रहग्रस्ता वेदविक्रयजीविनः ।
धनार्जनार्थमभ्यस्तविद्यामदविमोहिताः ॥१२॥

एकमेव पुण्यहीनानां परलोकप्राप्त्युपायरूपम् तद्रहस्यमपि मत्पृष्टं ब्रूहि अनुग्रहः परोपकारकरणजपुण्येनायं पूज्यतामित्येवं कृपा दया यदि मयीत्यर्थः ॥ ८ ॥

दुराचाररताः निषिद्धकर्मनिरताः तस्यैव प्रपञ्चः सत्यवार्त्तेति“नानृतं वदेत्” इति निषिद्धानृतभाषणशीला इति यावत् ॥ ९ ॥ १० ॥

सर्वपापस्य मूलकारणमाह देहात्मदृष्टय इति देहे एवात्मदृष्टिर्येषां ते इत्यर्थः एवं च देहनाशेनात्मनाशात् पापपुण्यफलभोक्तुरभावात्तयाद्दृष्टीनां विहिताकरणनिषिद्धकरणयोः प्रवृत्तिरितिभावः स्थूलोऽहं गौरोऽहमिति प्रतीतिस्तु शुक्तौ रजतप्रतीतिवद्भ्रम इति तत्त्वं देहस्य परिणामित्वं तु प्रतिक्षणोपचयापचयाभ्यां प्रत्यक्षसिद्धमात्मनोऽविनाशित्वं तु “अविनाशी वारेऽयमात्मा” इति श्रुतिसिद्धम् अत एव नास्तिका नास्ति परलोक इति बुद्धिमन्तः पशुबुद्धयः आहारविहारमात्रपरा विधिनिषेधानभिज्ञा इत्यर्थः स्त्रीदेवाः स्त्रीजिता इत्यर्थः तेषामक्षसाभोक्तृत्वं च श्रुतिसूक्तम् कामकिङ्कराः काम्यकर्ममात्रपराः ॥ ११ ॥

लोभरूपग्रहेण भूतादिना ग्रस्ताः वेदविक्रयजीविनः भृतकाध्यापकाः

त्यक्तस्वजातिकर्म्माणः प्रायशः परवञ्चकाः ।
क्षत्त्रियाश्च तथा वैश्याः स्वधर्म्मत्यागशीलिनः ॥ १३ ॥
तद्वच्छूद्राश्च ये केचिद् ब्राह्मणाचारतत्पराः ।
स्त्रियश्च प्रायशो भ्रष्टा भर्त्तवज्ञाननिर्भयाः ॥ १४ ॥
श्वशुरद्रोहकारिण्यो भविष्यन्ति न संशयः ।
एतेषां नष्टबुद्धीनां परलोकः कथं भवेत् ॥ १५ ॥
इति चिन्ताकुलं चित्तं जायते मम सन्ततम् ।
लघूपायेन येनैषां परलोकगतिर्भवेत् ॥ १६ ॥
तमुपायमुपाख्याहि सर्वं वेत्ति यतो भवान् ।
इत्यृषेर्वाक्यमाकर्ण्य प्रत्युवाचाम्बुजासनः ॥ १७ ॥

धनार्जनफलकतयाऽभ्यस्ता या विद्या तन्मदेन तल्लब्ध्यैव विमोहिताः इतरा-वज्ञाशीलाः ॥ १२ ॥

त्यक्तेति अत्र विप्र इत्यनुवर्त्तते त्यक्तं स्वजातिकर्म ब्राह्मणजात्युचितं कर्माध्ययनादि यैस्ततः परवञ्चकाः परवञ्चना एव धर्मानुष्ठानवन्तः क्षत्रिया-दयोऽप्येवमेवेत्याह क्षत्रिया इति स्वधर्मत्यागरूपं शीलं येषां न तु कदा-चिदपि धर्मशीला इत्यर्थः ॥ १३ ॥

ब्राह्मणाचारतत्परा इत्यनेन धर्मसङ्करो दर्शितः स्त्रियश्चेत्यनेन वर्ण-सङ्करो दर्शितः भर्त्तुरवज्ञाने निर्भयाः निःशङ्काः भर्त्रवज्ञानेति पाठे 'वष्टि भागुरि' इत्यनेनावज्ञादेरकारस्य लोपः ॥ १४ ॥ १५ ॥

परलोकगतिः भूर्लोकगतिः भूर्लोकोर्ध्वं भुवर्लोकान्तगमनम् तच्च दुराचारादिजानर्थनिवृत्तिं विना चित्तशोधकसकलधर्मं विना च दुष्प्रापमिति भावः ॥ १६ ॥

मन्नोद्दशोपायज्ञानं मम कथं स्यादिति चेत्तत्राह सर्वं वेत्तीति यतो भवान् सर्वज्ञ इति भावः ऋषेर्नारदस्य वाक्यमाकर्ण्य अम्बुजासनो ब्रह्मा प्रत्युवाचेति ॥ १७ ॥

ब्रह्मोवाच।

साधु पृष्टं त्वया साधो! वक्ष्ये तच्छृणु सादरम्।
पुरा त्रिपुरहन्तारं पार्वती भक्तवत्सला(१) ॥ १८ ॥
श्रीरामतत्त्वं जिज्ञासुः पप्रच्छ विनयान्विता।
प्रियायै गिरिशस्तस्य गूढ़ं व्याख्यातवान् स्वयम् ॥१९॥
पुराणोत्तममध्यात्मरामायणमिति स्मृतम्।
तत् पार्वती जगद्धात्री पूजयित्वा दिवानिशम् ॥ २० ॥
आलोचयन्ती स्वानन्दमग्ना तिष्ठति साम्प्रतम्।
प्रचरिष्यति तल्लोके प्राग्दृष्टवशाद् यदा ॥ २१ ॥
तस्याश्रवणमात्रेण जना यास्यन्ति सद्गतिम्।
तावद्विजृम्भते पापं ब्रह्महत्यापुरःसरम् ॥ २२ ॥

साधु सर्वजनहितं यतः पृष्टम् अतः सादरं वक्ष्ये तदुत्तरमिति शेषः तच्छृणु तदेवाह पुरेति त्रिपुरहन्तारं शिवं भक्तवत्सलेत्यनेन पार्वतीप्रश्नोऽपि स्वभक्तसकलजनकरुणया तदुद्धारार्थमिति सूचितम् ॥ १८ ॥

गूढ़ं स्वातिरिक्ताज्ञातं वक्ष्यमाणं वस्तु व्याख्यातवान् कथितवानित्यर्थः ॥ १९ ॥

तत् किं तत्राह पुराणोत्तममिति पुराणममादि तच्च तत् उत्तमं च श्रवणेन सर्व्वधर्मजनकत्वाच्चित्तशुद्धिद्वारा तत्त्वज्ञानकरत्वाच्चेति भावः अध्यात्मरामायणमित्यन्वर्थं पन्यनाम आत्मनीत्यध्यात्मम् आत्मनि चित्तेऽन्तर्यामितया वर्त्तमानो यो रामो रमन्ते योगिनोऽत्रेति व्युत्पत्त्याऽन्तर्यामी तस्यायनं चित्तशुद्धिद्वारा प्रापकं तत्प्रतिपादकत्वादिति तदध्यात्मरामायणमुत्तरश्लोकस्थे आलोचने इदमेव कर्म ॥ २० ॥

स्वानन्दमग्ना स्वस्वरूपानन्दमग्ना तिष्ठति यत्तस्मात् युक्तम् एतदालोचनेन स्वस्वरूपानन्दस्य जगदन्तर्यामिरूपस्य सम्यग्भानादिति भावः २१॥२२

---

(१) भक्तिवत्सलं इत्यपि पाठः।

यावज्जगति नाध्यात्मरामायणमुदेष्यति ।
तावत्कलिर्महोत्साहो निःशङ्कं संप्रवर्त्तते ॥ २३ ॥
यावज्जगति नाध्यात्मरामायणमुदेष्यति ।
तावद् यमभटाः शूराः (१) संचरिष्यन्ति निर्भयाः ॥२४॥
यावज्जगति नाध्यात्मरामायणमुदेष्यति ।
तावत् सर्व्वाणि शास्त्राणि विवदन्ते परस्परम् ॥२५॥
तावत् स्वरूपं रामस्य दुर्ब्बोधं महतामपि ।
यावज्जगति नाध्यात्मरामायण-मुदेष्यति ॥२६॥
अध्यात्मरामायणसङ्कीर्त्तनश्रवणादिजम् ।

श्लोकः 'अध्यात्मके तिष्ठति यः परात्मा रामोऽयते यत्र हि तत्त्वविद्भिः । अतोऽभिधानं कथितं भवाब्धौ अध्यात्मरामायणमस्य येन ॥ २२ ॥

येन भवेन मः शिवश्चन्द्रमा वेध इत्यभिधानात् (अयते इत्यार्षम् अय्यते प्राप्यते इत्यर्थः) संप्रवर्त्तते जनेष्विति शेषः ॥ २३ ॥

निर्भयाः सञ्चरिष्यन्ति सर्व्वेषां पापग्रस्तत्वात्कलाविति भावः ॥ २४ ॥

शास्त्राणि न्यायादीनि विवदन्ते विवादं कुर्वते आत्मविषये इत्यर्थः कर्त्ता भोक्ता ज्ञानाश्रय आत्मा परस्परं भिन्न इति काणादा गौतमाश्च षोडशादिपदार्थानां परस्परमात्मनि भेदज्ञानान्मुक्तिरित्यादि च ज्ञान-स्वरूपा अनेके जीवास्तेषां प्रकृत्यादिभ्यो भेदज्ञानान्मोक्ष इति सांख्यादयः एक एव चेतन उपाधिभेदान्नानात्वं प्राप्तः तत्त्वमस्यादिवाक्यजश्रवणमनन-निदिध्यासनैर्ब्रह्मैवाहमिति ज्ञानादुपाधिविलये स्वस्वरूपेणावस्थानमेव मोक्ष इत्युपनिषत्सिद्धान्त अध्यात्मरामायणोदये स्फुटो भविष्यतीति तत्त-त्कालस्ववासनाजन्यो वादो लयमेष्यतीति भावः ॥ २५ ॥

रामस्य स्वरूपं सच्चिदानन्दाद्वयब्रह्मस्वरूपं महतामपि शास्त्रज्ञानामपि दुर्बोधं भवतीति शेषः ॥ २६ ॥ २७ ॥ २८ ॥

---

(१) क्रूरा इति वा पाठः ।

फलं वक्तुं न शक्नोमि कात्स्न्येन मुनिसत्तम ! ॥ २७॥
तथापि तस्य माहात्म्यं वक्ष्ये किञ्चित्तवानघ ! ।
शृणु चित्तं समाधाय शिवेनोक्तं पुरा मम ॥२८॥
अध्यात्मरामायणतः श्लोकं श्लोकार्द्धमेव वा ।
यः पठेद्भक्तिसंयुक्तः स पापान्मुच्यते क्षणात् ॥ २९ ॥
यस्तु प्रत्यहमध्यात्मरामायणमनन्यधीः ।
यथाशक्ति वदेद्भक्त्या स जीवन्मुक्त उच्यते ॥ ३० ॥
यो भक्त्याऽर्चयतेऽध्यात्मरामायणमतन्द्रितः ।
दिने दिनेऽश्वमेधस्य फलं तस्य भवेन्मुने ! ॥ ३१ ॥
यदृच्छयाऽपि योऽध्यात्मरामायणमनादरात् ।
अन्यतः शृणुयान्मर्त्यः सोऽपि मुच्येत पातकात् ॥ ३२ ॥
नमस्करोति योऽध्यात्मरामायणमदूरतः ।
सर्ववेदार्चनफलं संप्राप्नोति न संशयः ॥ ३३ ॥
लिखित्वा पुस्तकेऽध्यात्मरामायणमशेषतः ।
यो दद्याद्रामभक्तेभ्यस्तस्य पुण्यफलं शृणु ॥ ३४ ॥
अधीतेषु च वेदेषु शास्त्रेषु व्याकृतेषु च ।
यत् फलं दुर्लभं लोके तत् फलं तस्य सम्भवेत् ॥ ३५ ॥

अध्यात्मरामायणतः 'सार्व्वविभक्तिकः पञ्चम्यन्तात्तसिः' ॥ २९ ॥

जीवन्मुक्त इति तल्लक्षणं च 'दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते' इत्यादिना गीतायाम् उक्तं वासिष्ठेऽपि 'निद्रादौ जागरस्यान्ते यो भाव उपजायते । तं भावं भावयन् राम जीवन्मुक्तः सदा भवेत्' ॥ ३० ॥ ॥ ३१ ॥

अनादरात् यदृच्छयाऽपि न तु पुराणश्रवणविध्युक्तनियमेनेत्यर्थः ॥३२॥ ३३ ॥ ३४ ॥

एकादशीदिनेऽध्यात्मरामायणमुपोषितः ।
यो रामभक्तः सदसि व्याकरोति नरोत्तमः ।
तस्य पुण्यफलं वक्ष्ये शृणु वैश्यवसत्तम ! ॥ ३६ ॥
प्रत्यक्षरं तु गायत्रीपुरश्चर्य्याफलं भवेत् ।
उपवासव्रतं कृत्वा श्रीरामनवमीदिने ॥ ३७ ॥
रात्रौ जागरितोऽध्यात्मरामायणमनन्यधीः ।
यः पठेत् शृणुयाद्वापि तस्य पुण्यं वदाम्यहम् ॥ ३८ ॥
कुरुक्षेत्रादिनिखिलपुण्यतीर्थेष्वनेकशः ।
आत्मतुल्यं धनं सूर्य्यग्रहणे सर्वतोमुखे ॥ ३९ ॥
विप्रेभ्यो व्यासतुल्येभ्यो दत्त्वा यत् फलमश्नुते ।
तत् फलं सम्भवेत्तस्य सत्यं सत्यं न संशयः ॥ ४० ॥
यो गायते मुदाऽध्यात्मरामायणमहर्निशम् ।
आज्ञां तस्य प्रतीक्षन्ते देवा इन्द्रपुरोगमाः ॥ ४१ ॥
पठन् प्रत्यहमध्यात्मरामायणमनुव्रतः ।
यद्यत्करोति तत्कर्म ततः कोटिगुणं भवेत् ॥ ४२ ॥

अधीतेष्विति साङ्गवेदाध्ययने शास्त्रार्थाध्ययने च यत् पुण्यं दुर्लभं तत् फलं तस्याध्यात्मरामायणपुस्तकदातुर्भवेदित्यर्थः ॥ ३५ ॥ ३६ ॥ ३७ ॥

जागरितः कृतजागरणः ॥ ३८ ॥

आत्मतुल्यं धनम् आत्मप्रियं वस्त्वित्यर्थः सर्व्वतोमुखे जले स्थित इति शेषः 'पुष्करं सर्व्वतोमुखम्' इति जलपर्य्यायेष्वभिधानात् ॥ ३९ ॥

व्यासतुल्येभ्य इत्यनेन देशप्रदेयवस्तुकालसम्प्रदानविशेषाणां पुण्यातिशयजनकत्वं सूचितम् ॥ ४० ॥

गायते इति पाठे तङार्षः यो गायति मुदेति पाठस्तु युक्त एव ॥ ४१ ॥

अनुव्रतः तत्परः ततः स्वभावक्रियमाणकर्मणः ॥ ४२ ॥

तत्र श्रीरामहृदयं यः पठेत् सुसमाहितः ।
स ब्रह्मघ्नोऽपि पूतात्मा त्रिभिरेव दिनैर्भवेत् ॥ ४३ ॥
श्रीरामहृदयं यस्तु हनूमत्प्रतिमाऽन्तिके ।
त्रिः पठेत्प्रत्यहं मौनी स सर्वेप्सितभाग्भवेत् ॥ ४४ ॥
पठन् श्रीरामहृदयं तुलस्यश्वत्थयोर्यदि ।
प्रत्यक्षरं प्रकुर्वीत ब्रह्महत्यां निवर्त्तयेत् ॥ ४५ ॥
श्रीरामगीतामाहात्म्यं कृत्स्नं जानाति शङ्करः ।
तदर्द्धं गिरिजा वेत्ति तदर्द्धं वेद्म्यहं मुने ! ॥४६ ॥
तत्ते किञ्चित् प्रवक्ष्यामि कृत्स्नं वक्तुं न शक्यते ।
यज्ज्ञात्वा तत्क्षणाल्लोकश्चित्तशुद्धिमवाप्नुयात् ॥ ४७ ॥
श्रीरामगीता यत् पापं न नाशयति नारद ! ।
तन्न नश्यति तीर्थादौ लोके क्वापि कदाचन ॥ ४८ ॥
तन्न पश्याम्यहं लोके मार्गमाणोऽपि सर्वदा ।
रामेणोपनिषत्सिन्धुमुन्मथ्योत्पादितां मुदा ॥ ४९ ॥

तत्राध्यात्मरामायणमध्ये सुसमाहितः स्थिरचित्तः ॥ ४३ ॥

प्रतिमान्तिके प्रतिमासमीपे ॥ ४४ ॥

यस्तु अश्वत्थादिसन्निधौ रामहृदयं पठन् प्रकुर्वीत प्रदक्षिणादोतिशेषः स प्रत्यक्षरं प्रत्यक्षरोच्चारणे ब्रह्महत्यां तज्जन्यं पापं निवर्त्तयेत् आत्मनः शोधयेति शेषः ॥ ४५॥

अहं ब्रह्मा ॥ ४६ ॥

यत् रामगीतामाहात्म्यम् ॥ ४७ ॥

रामगीता पठ्यमाना इति शेषः कदाचन रविग्रहादिकालेऽपि स्नाना-दिनेति शेषः ॥ ४८ ॥

मार्गमाणः अन्वेषयन्नपि तत् रामगीतातुल्यतया पापनाशकं वस्तु राम-

लक्ष्मणायार्पितां गीतासुधां पीत्वाऽमरो भवेत् ।
जमदग्निसुतः पूर्वं कार्त्तवीर्य्यबधेच्छया ॥ ५० ॥
धनुर्विद्यामभ्यसितुं महेशस्यान्तिके वसन् ।
अधीयमानां पार्वत्या रामगीतां प्रयत्नतः ॥ ५१ ॥
श्रुत्वा गृहीत्वाऽशु पठन्नारायणकलामगात् ।
ब्रह्महत्यादिपापानां निष्कृतिं यदि वाञ्छति ॥ ५२ ॥
रामगीतां मासमात्रं पठित्वा मुच्यते नरः ।
दुष्प्रतिग्रहदुर्भोज्यदुरालापादिसम्भवम् ॥ ५३ ॥
पापं यत्तत्कीर्त्तनेन रामगीता विनाशयेत् ।
शालग्रामशिलाग्रे च तुलस्यश्वत्थसन्निधौ ॥ ५४ ॥
यतीनां पुरतस्तद्वद्रामगीतां पठेत्तु यः ।
स तत्फलमवाप्नोति यद्वाचोऽपि न गोचरम् ॥ ५५ ॥
रामगीतां पठन् भक्त्या यः श्राद्धे भोजयेत् द्विजान् ।
तस्य ते पितरः सर्वे यान्ति विष्णोः परं पदम् ॥ ५६ ॥
एकादश्यां निराहारो नियतो द्वादशीदिने ।
स्थित्वाऽगस्त्यतरोर्मूले रामगीतां पठेत्तु यः ॥ ५७ ॥

गीतातिरिक्तं न पश्यामीत्यर्थः (इत्यादितो गीतासुधामिति परश्लोकस्थे-नान्वय एवमुत्तरेषु द्रष्टव्यम्) ॥ ४९ ॥

गीतासुधामिति रूपकं अमृतरूपां गीतामित्यर्थः अमरस्तत्तुल्यः ॥५०॥

कार्त्तवीर्य्यः सहस्रबाहुरर्जुनः ॥ ५१ ॥

श्रवणोत्तरं ग्रहणम् नारायणकलां नारायणरूपत्वम् ॥ ५२ ॥ ५३ ॥

दुष्प्रतिग्रहः अतिदुष्प्रतिग्रहः 'तिलधेनुर्गजो वाजी प्रेतान्नमाजनं मणिः मणिः शालग्रामः सुरभिः उभयतोमुखी सूयमाना च घोराः सप्त-प्रतिग्रहा' इत्यादि स्मृत्युक्ताः दुर्भोज्यं निषिद्धभक्षणम् दुरालापोऽनृत-भाषणादि ॥ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

स एव राघवः साक्षात् सर्वदेवैश्च पूज्यते।
विना दानं विना ध्यानं विना तीर्थावगाहनम् ॥५८॥
रामगीतां नरोऽधीत्य तदनन्तफलं लभेत्।
बहुना किमिहोक्तेन शृणु नारद! तत्त्वतः ॥ ५९ ॥
श्रुतिस्मृतिपुराणेतिहासागमशतानि च।
अर्हन्ति नाल्पामध्यात्मरामायणकलामपि ॥ ६० ॥

अध्यात्मरामचरितस्य मुनीश्वराय
माहात्म्यमेतदुदितं कमलासनेन।
यः श्रद्धया पठति वा शृणुयात् स मर्त्यः
प्राप्नोति विष्णुपदवीं सुरपूज्यमानः ॥ ६१ ॥

इत्यध्यात्मरामायणे बालकाण्डे तन्माहात्म्यकथनं नाम
प्रथमः सर्गः।

तत् दानादि अनन्तफलं लभेत् अनन्तफलं दानादिफलं तदध्ययनमा-
त्रेण भवेदित्यर्थः ॥ ५९ ॥

श्रुतिर्वेदः स्मृतिर्मन्वादिप्रणीता पुराणानि पाद्मादीन्यष्टादश इति-
हासो भारतादिः आगमाः पञ्चरात्रादयः अध्यात्मरामायणस्य तदध्ययनस्य
कलां षोडशांशमपि नार्हन्ति तदध्ययनानीत्यर्थः सर्वाध्ययनफलत्वादस्येति
भावः ॥ ६० ॥

पठतीत्यत्र उक्तमाहात्म्याध्यायः कर्म ॥ ६१ ॥

इति श्रीमत्सकलराजविपदुद्धरणसमर्थत्वादिविरुदावलीविराज-
मानस्य हिम्मतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतौ
अध्यात्मरामायणे सेतौ बालकाण्डे तन्माहात्म्य-
कथनं नाम प्रथमः सर्गः।

———

द्वितीयः सर्गः ।

यः पृथ्वीभरवारणाय दिविजैः सम्प्रार्थितश्चिन्मयः
संजातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः ।
निश्चक्रं हतराक्षसः पुनरगाद् ब्रह्मत्वमाद्यं स्थिरां
कीर्त्तिं पापहरां विधाय जगतां तं जानकीशं भजे ॥ १ ॥

शिवपार्वतीसंवादरूपं अध्यात्मरामायणं वक्तुं भगवान् व्यासो निर्विघ्नार्थं भगवत्स्मरणरूपमङ्गलमाचरति य इति पृथ्व्या यो दुष्टराक्षसादिजनितो भरो भारस्तस्य वारणायेत्यर्थः 'परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय सम्भवामि युगे युगे' इति भगवदुक्तेः दिविजैर्देवैः रावणपीड़ितैः सम्प्रार्थितः सन् चिन्मयोऽपि चिद्रूपोऽपि अव्ययोऽपि पृथ्वीतले रविकुले मायामनुष्यः संजातः तत्र देवप्रार्थनयाऽवतार इत्यर्थो वाल्मीकीये बालकाण्डे पञ्चदशषोड़शसर्गयोः स्पष्ट एव अव्ययस्य चिन्मयस्य च कथं अव्ययत्वस्तत्स्वभावस्य नाशावश्यंभावादत उक्तं मायेति माया ताम सत्त्वासत्त्वाभ्यामनिर्वाच्या सत्त्वरजस्तमो गुणघटितघटनासामर्थ्यवती काचिदीश्वरशक्तिः 'देवात्मशक्तिं स्वगुणैर्निगूढ़ां' इति श्रुतेः 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' इति गीतोक्तेश्च एवं चिन्मयस्याघटितोऽपि मनुष्यभावो जन्मव्यवहारश्च मायाकृत इति भावः तदुक्तं रामतापनीयोपनिषदि 'चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना' इति निश्चक्रं निरवशेषं यथा तथा हतराक्षसः जगतां पापहरां स्थिरां कीर्त्तिं विधाय लोके स्थापयित्वा पुनराद्यं ब्रह्मत्वं निरुपाधिब्रह्मरूपमगात् ॥ १ ॥

विश्वोद्भवस्थितिलयादिषु हेतुमेकं
मायाश्रयं विगतमायमचिन्त्यमूर्तिम्।
आनन्दसान्द्रममलं निजबोधरूपं
सीतापतिं विदिततत्त्वमहं नमामि ॥ २ ॥

पठन्ति ये नित्यमनन्यचेतसः शृण्वन्ति चाध्यात्मिकसंज्ञितं शुभम्
रामायणं सर्वपुराणसम्मतं निर्धूतपापा हरिमेव यान्ति ते ॥ ३ ॥

रामस्योक्तं ब्रह्मत्वं तत्त्वं चैवं दर्शयति विश्वेति विश्वस्य संसारस्योत्पत्त्यादिषु एकं हेतुम् 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' इति श्रुतेः प्रयन्ति यत्र लीनानि भवन्तीत्यर्थः अनेन निमित्तकारणत्वमुपादानकारणत्वं ब्रह्मलक्षणं सूचितम् एकमित्यनेनाद्वितीयार्थकं तेन निमित्तकारणाभेदः सूचितः ननु मिथ्याभूतकार्यनिरूपितकारणत्वस्यापि मिथ्यात्वात्तन्मिथ्या सम्बन्धाभावात्कथमस्य लक्षणत्वमत आह मायाश्रयमिति मायाश्रयत्वात्तत्कृतनिखिलस्य कारणत्वमित्यर्थः मायिकेन कारणत्वेन मायिक एव सम्बन्धः सम्भवति इति भावः तदुक्तं श्रुतौ 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं' इति ननु मायाश्रयत्वे जीवं प्रति स्वस्वरूपमिव स्वं प्रत्यपि स्वं मायां च्छादयात्तत्राह विगतमायमिति विगता माया आवरणशक्तिरूपा यस्मात् स्वं प्रति स्वस्वरूपावरणशक्तिरहितमित्यर्थः अचिन्त्यमूर्तिम् 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति श्रुतेः एवं जगदुत्पत्त्यादिकारणत्वरूपं तटस्थलक्षणमुक्तम् तेन रूपेणाज्ञेयत्वात् अथ स्वरूपलक्षणमाह अमलं निजबोधरूपमिति 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः इदमेव च स्वं रूपममलं उपाधिकृतदोषरहितम् जीवरूपमभिव्यक्तकर्तृत्वाद्यभिमानवत् तथा नेश्वर इति भावः किञ्च स्वाभाविकं बोधरूपमेव यस्य तम् अनेन रूपान्तरं सर्वं मायिकमिति सूचितम् विदितं तत्त्वं ज्ञानं यस्य बोधस्वरूपत्वं येन तम् तेन रामावतारे मोहक्रोधादि [illegible] नटवदनुकरणमिति सूचितम् ॥ २ ॥

हरिमेव हरिसायुज्यमेव ॥ ३ ॥

अध्यात्मरामायणमेव नित्यं पठेद्यदीच्छेद्भवबन्धमुक्तिम् ।
गवां सहस्रायुतकोटिदानात् फलं लभेद्यः शृणुयात् स नित्यम्

पुरारिगिरिसम्भूता श्रीरामार्णवसङ्गता ।
अध्यात्मरामगङ्गेयं पुनाति भुवनत्रयम् ॥ ॥ ५ ॥

कैलासाग्रे कदाचिद्रविशतविमले मन्दिरे रत्नपीठे
संविष्टं ध्याननिष्ठं त्रिनयनमभयं सेवितं सिद्धसङ्घैः ।
देवीवामाङ्कसंस्था गिरिवरतनया पार्वती भक्तिनम्रा
प्राहेदं देवमीशं सकलमलहरं वाक्यमानन्दकन्दम्॥६॥

पार्वत्युवाच ।

नमोऽस्तु ते देव! जगन्निवास! सर्वात्मदृक् त्वं परमेश्वरोऽसि ।
पृच्छामि तत्त्वं पुरुषोत्तमस्य सनातनं त्वञ्च सनातनोऽसि(१)॥ ७

यः शृणुयात् स सहस्रगुणितायुतगुणितकोटिसंख्यगोदाना-द्यधिकफलं लभेदित्यन्वयः ॥ ४ ॥

पुरारिगिरीति रामार्णवेति च रूपके अध्यात्मरामगङ्गेति अध्यात्मरामशब्दो अध्यात्मरामायणपरस्तदेव गङ्गेति अनेन रूपकेण सर्वमहापातकारी-नामपि नाश इतिसूचितं गङ्गायास्तन्नाशकत्वस्य सर्वश्रुतिस्मृतिसिद्धत्वात् ॥५

सकलमलहरं वस्तु विषयत्वाद्वाक्यस्य सकलमलहरत्वम् आनन्दक-न्दमितीयविशेषणम् 'एतस्यैवानन्दस्य मात्रामुपजीवन्ति' इति श्रुतेरस्य-सर्वानन्दमूलत्वेनानन्दकन्दत्वम् ॥ ६ ॥

देवो द्योतनात् जगन्निवासत्वमिदं जगति निवसतीति वा जगन्नि-वासस्तस्य बुद्धिः ते तुभ्यं नमः अस्तु यतस्त्वं सर्वात्मदृक् सर्वस्वरूप आत्मा ब्रह्म 'सर्वं खल्विदं ब्रह्म' इति श्रुतेः तमभिन्नमात्मरूपतया पश्यतीति सर्वा-त्मदृक् अतएव परमेश्वरोऽसि अतः पुरुषोत्तमस्य सर्वेभ्यः पुरुषेभ्य उत्तमस्य

---

(१) त्वां च सदातनोऽसि इति वा पाठः ।

गोप्यं यदत्यन्तमनन्यवाच्यं वदन्ति भक्तेषु महानुभावाः ।
तदप्यहोऽहं तव देव ! भक्ता प्रियोऽसि मे त्वं वद यत्तु पृष्टम् ॥ ८
ज्ञानं सविज्ञानमथानुभक्ति वैराग्ययुक्तञ्च मितं विभास्वत् ।
जानाम्यहं योषिदपि त्वदुक्तं यथा तथा ब्रूहि तरन्ति येन ॥ ९ ॥
पृच्छामि चान्यच्च परं रहस्यं तदेव चाग्रे वद वारिजाक्ष ! ।
श्रीरामचन्द्रेऽखिललोकसारे भक्तिर्दृढा नौर्भवति प्रसिद्धा ॥ १० ॥

तस्यैव ब्रह्मणः सनातनं उपाधिरहितं सोपाधिरूपस्य ज्ञानोत्तरं नाशाच्च सनातनत्वं तत्वं पृच्छामि नन्वसनातनेन मया कथं तद्वक्तुं शक्यमत आह त्वञ्च सनातनोऽसि त्वमपि च यथार्थोऽसीति त्वदज्ञातं न किञ्चिदितिभावः ॥ ७ ॥

अत्यन्तगोप्यम् 'इदं तु ते गुह्यतमं' इतिगीतोक्तेः अनन्यवाच्यं भक्तान्येषु वक्तुमयोग्यम् अहो तदपि भक्तेषु वदन्ति अतो मे पृष्टं यत्तत् निश्चयेन वद हे देव! यतोऽहं तव भक्ता ननु मद्भक्ता त्वं कुतस्तत्राह यतस्त्वं मे प्रियोऽसि ॥ ८

ज्ञानमिति येन ज्ञानेन जनास्तरन्ति पुनर्जन्मादिसंसारं न प्राप्नुवन्ति तच्च विज्ञानं ज्ञानं ब्रूहि विज्ञानं निदिध्यासनपरिपाकजमपरोक्षज्ञानं तत्सहितं तद्रूपफलकमिति यावत् ज्ञानं श्रवणमननजं परोक्षं ब्रह्मैव सर्वं ब्रह्मैवाहमिति च इदं 'तरति शोकमात्मवित्' इतिश्रुतेः तद्ब्रूहि तज्जनकवाक्यं ब्रूहीत्यर्थः तज्ज्ञानं न च वैराग्यं विना वैराग्यं च न भक्तिं विनेत्यत आह अनुभक्तिवेति भक्तेः पश्चादनुभक्ति जायमानं यद्वैराग्यं तद्युक्तम् तदुपायबोधकवाक्ययुक्तं वैराग्ययुक्तं चेत्यर्थः तथा च पातञ्जलसूत्रम् 'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्' इति अनुश्रवो वेदस्तद्बोधितः स्वर्गादिरानुश्रविकः भक्तिरीश्वरानुरागः तथा मितं मितशब्दवत् विभास्वत् विशेषेण भास्वत् श्रुतिमात्रेण झटितीत्यर्थः प्रत्यायकशब्दबोधजनकवाक्ययुक्तं पुनः ब्रूहि यथा योषित् अप्यहं त्वदुक्तं जानामि ॥ ९ ॥

अपि प्रथमतः दृढा भक्तिः प्रसिद्धा नौर्भवति भवसागरतरणायेति शेषः ॥ १० ॥

भक्तिः प्रसिद्धा भवमोक्षणाय नान्यत्ततः साधनमस्ति किंचित् ।
तथापि हृत्संशयबन्धनं मे विभेत्तुमर्हस्यमलोक्तिभिस्त्वम् ॥११॥
वदन्ति रामं परमेकमाद्यं निरस्तमायागुणसंप्रवाहम् ।
भजन्ति चाहर्निशमप्रमत्ताः परं पदं यान्ति तथैव सिद्धाः॥१२॥
वदन्ति केचित्परमोऽपि रामः स्वाविद्यया संवृतमात्मसंज्ञम् ।
जानाति नात्मानमतःपरेण संबोधितो वेद परात्मतत्त्वम् ॥१३॥

तदेवाह भक्तिरिति ततोऽन्यत्साधनं नास्ति यज्ञकर्मादि तत्साधनं भवमोक्षजनकतत्त्वज्ञानसाधनं नास्तीत्यर्थः सा मुख्येतरापेक्षितत्वात् भक्तिः परानुरक्तिरीश्वर इति भक्तिमीमांसकशाण्डिल्यसूत्राभ्याम्" इतरेण ज्ञानेन स्वसाधनतयाऽपेक्षितत्वात् सा भक्तिर्मुख्या "इत्याद्यः सूत्रार्थः भक्तिलक्षणपरं च द्वितीयसूत्रम् 'हृत्संशयबन्धनं हृद्गतसंशयविषयं रामस्य जगदीश्वरत्वम्' ॥११॥

निरस्तस्त्यक्तो मायागुणकृतो रागद्वेषादिसंप्रवाहो येन तम् अप्रमत्ताः प्रमादोऽज्ञानं तद्रहिताः 'प्रमादं वै मृत्युमहं ब्रवीमि' इति सनत्सुजातीयोक्तेः तत्र हि 'मृत्युर्वै तम' इति श्रुतेर्मृत्युपदेनाज्ञानमिति बोध्यम् तथैव तेन प्रकारेण भजनेनैव सिद्धास्तत्त्वज्ञाः सन्तः परं पदं मोक्षं यान्तीत्यर्थः ॥ १२ ॥

परमोऽपि रामः स्वाविद्यया मायया संवृतमावृतमात्मसंज्ञं ब्रह्मसंज्ञं आत्मानं स्वस्वरूपं न जानाति अतः परेण ब्रह्मणा सम्बोधितः परात्मा ईश्वरस्वरूपं स्वतत्त्वं वेद जानातीति केचिद्वदन्ति, तथाच वाल्मीकीये रावणवधानन्तरं ब्रह्मवाक्यम् 'ततुवाच ततो देवः स्वयम्भूरमितद्युतिः । प्रगृह्य रुचिरं बाहुं धारयन् पूर्वदैहिकम् । भवान्नारायणः श्रीमान्देवश्चक्रायुधः प्रभुः' इत्यादि उपदेशसाहस्रयां भगवत्पादैरप्युक्तं 'ब्रह्मा दाशरथेर्यद्वदुक्तं रावणवधानन्तरम् । तस्य विष्णुत्वसम्बोधेन यत्नान्तरमास्थित' इति ॥ १२ ॥

---

(१) मुक्तिः इति क्वचित् पाठः ।

यदि स्म जानाति कुतो विलापः सीताकृतेऽनेन कृतः परेण ।
जानाति नैवं यदि केन सेव्यः समो हि सर्वैरपि जीवजातैः ॥१४
अत्रोत्तरं किं विदितं ? भवद्भिस्तद्ब्रूत(१)मे संशयभेदि वाक्यम् ॥१५

श्रीमहादेव उवाच ।

धन्यासि भक्तासि परात्मनस्त्वं यज्ज्ञातुमिच्छा तव रामतत्त्वम् ।
पुरा न केनाप्यभिचोदितोऽहं वक्तुं रहस्यं परमं निगूढम् ॥१६
त्वयाद्य भक्त्या परिनोदितोऽहं वक्ष्ये नमस्कृत्य रघूत्तमन्ते ।
रामः परात्मा प्रकृतेरनादिरानन्द एकः पुरुषोत्तमो हि ॥१७
स्वमायया कृत्स्नमिदं हि सृष्ट्वा नभोवदन्तर्बहिरास्थितो यः ।

सीताकृते सीतानिमित्तं विलापः प्रचारण्यककाण्डकिष्किन्धादौ वाल्मीकीये स्पष्ट एव केन सेव्यः अज्ञस्य जीववत्सेव्यत्वाभावादित्यर्थः ॥१४॥१५॥

परात्मनो ब्रह्मणः ॥ १६ ॥

एवं पार्वत्या पृष्टः शिवो रामस्वरूपमाह राम इति। रामः परात्मा ब्रह्मैवेत्यर्थः प्रकृतेरित्यस्यान्य इति असंसर्गीति च शेषः प्रकृतितत्कार्येभ्योऽन्यत्वात्तैरसंसर्गाच्च रामः परमेश्वर एवेत्यर्थः जीवस्तु तैरुपाधिभिः संसृष्ट तद्धर्मकर्तृत्वाद्यभिमानवानिति भावः अतएवानादिरेक आनन्दः कार्यानन्दव्यावृत्तये अनादिरिति एवञ्च "आनन्दं ब्रह्म एकमेवाद्वितीयं ब्रह्म" इति श्रुतिसिद्धं ब्रह्मेत्यर्थः अतएव पुरुषोत्तमः पुरुषेभ्यो जीवेभ्य उत्तमः हि प्रसिद्धमेतदित्यर्थः ॥ १७ ॥

नन्वीदृशस्य मनुष्यादिदेहधारणं कथमत आह स्वमाययेति अघटितघटनाशक्तिरूपा माया 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं' इति श्रुतिसिद्धात्मीयया इदं कृत्स्नं दृश्यं सृष्ट्वान्तर्बहिरास्थितो यः 'तत् सृष्ट्वा तदेवानुप्राविशत्' इतिश्रुतेः तादृशस्य मनुष्यशरीरपरिग्रहो नाश्चर्याय तदुक्तं गीताभाष्ये भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि स्वमायया देहवानिव जात

(१) ब्रूहि इत्यपि पाठः ।

सर्वान्तरस्थोऽपि निगूढ़ आत्मा स्वमायया सृष्टमिदं विचष्टे ॥ १८
जगन्ति नित्यं परितोभ्रमन्ति यत्सन्निधौ चुम्बकलोहवद्धि।
एतन्न जानन्ति विमूढ़चित्ताः स्वाविद्यया संवृतमानसा ये ॥ १९

इत्येव लोकानुग्रहं कुर्वन् चेष्टते स्वप्रयोजनाभावेऽपि भूतानुजिघृक्षया' इति नन्वेवं सर्वगतत्वे सर्वज्ञेयः किम् नेत्यत आह सर्वान्तरस्थोऽपि निगूढ़ आत्मेति 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तर' इत्यादि श्रुत्या सर्वान्तरस्थत्वेनोक्तोऽपि निगूढ़ः एषु सर्वेषु भूतेषु गूढ़ात्मा न प्रकाशते। दृश्यते त्वग्र्या बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' इति श्रुतेः तादृशस्य सत्वे व्यवहारकालिकमपि मानमाह स्वमाययेति स्वाज्ञानकल्पितया माययेत्यर्थः अयं भावः नित्यशुद्धादिरूपेश्वरस्वरूपाज्ञानेन तस्याघटितघटनासामर्थ्यापरपर्याया मायाख्या त्रिगुणा शक्तिरूपाधिकल्पितावच्छेदैस्तत्स्वरूपैर्जीवैः कल्पिता सा च स्वसजातीयमेव संसारदुःखायचं प्रसूते अतएव तत्स्वरूपज्ञाने सकार्यायास्तस्या नाशः रज्जुज्ञानेनैव रज्जुकल्पितभुजङ्गस्य भयकम्पादिकार्यसहितस्य न च जीवैस्तत्कल्पना तत्कृष्टोपाधिभिश्च जीवते इत्यन्योन्याश्रयः अनादित्वेनापि परिहारात् ननु कस्य तत्त्वज्ञानेन तन्नाशे संसारोच्छेदापत्तिः एकरज्जौ युगपत् दशानां सर्पभ्रमे एकस्य रज्जुज्ञानेन तस्य सर्पभ्रमकार्य्ये भयकम्पादौ निवृत्तेऽपि अन्येषां तद्दर्शनेन तदनिवृत्तिवदुपपत्तेरिति तथा सृष्टमिदं विचष्टे पश्यति एवं च द्रष्टृत्वेन तत्सिद्धिः नान्योऽतोऽस्ति द्रष्टा' इति श्रुतेः एकेनैवाकाशेनोपाधिभेदात् घटाकाशादिव्यवहारवत् एकेनैव चेतनोपाधिभेदादनेकजीवव्यवहारोपपत्तौ चेतनानेकत्वे मानाभावात् द्रष्टृत्वेन तत्सिद्धिरिति भावः नच तत्तदज्ञानरूपोपाधिविशिष्टस्यैव जीवत्वे जीवस्याज्ञानमिति व्यवहारानापत्तिः भार्य्याविशिष्टस्यैव गृहस्थत्वेऽपि गृहस्थभार्य्येतिवदुपपत्तेरिति दिक् ॥ १८ ॥

चेतनस्वीकारे मानान्तरमाह जगन्तीति जगन्ति जगदन्तःकरणानि यत्सन्निधौ नित्यं परितो भ्रमन्ति स्वस्य चेष्टां कुर्व्वन्ति अन्यथा सर्व्वस्य जड़त्वाच्च तन्नाभावे जगदान्ध्यप्रसङ्ग इति भावः ननु 'निष्कलं निष्क्रियं शान्तं' इति श्रुतेः तस्य निष्क्रियतया कथं तेनान्येषां भ्रमणादिव्यापारसम्पादनमत आह

स्वाज्ञानमध्यात्मनि शुद्धबुद्धे स्वारोपयन्तीह निरस्तमाये ।
संसारमेवानुसरन्ति ते वै पुत्रादिसक्ताः पुरुकर्मयुक्ताः ॥२० ॥
जानन्ति नैवं हृदये स्थितं वै चामीकरं कण्ठगतं यथाऽज्ञाः ॥२१॥
यथाऽप्रकाशो न तु विद्यते रवौ ज्योतिःस्वभावे परमेश्वरे तथा ।
विशुद्धविज्ञानघने रघूत्तमे विद्या कथं स्यात्परतः परात्मनि ॥२२

चुम्बकलोहवन्नीति यथा निष्क्रियोऽपि चुम्बकमखिलौहं शक्तिविशेषात्सन्निधिमात्रेण चालयति तथा चेतनो निष्क्रियोऽपि स्वमायया वैचित्र्यादेव तानि सन्निधिमात्राद्व्यापारयतीत्यर्थः तदुक्तमाचार्यैः 'अनापन्नविकारः सन्नयस्कान्तवदेव यः । बुद्ध्यादींश्चालयेत् प्रत्यक् सोऽहमित्यवधारयेत्' इति एतन्मायागुणासंस्पृष्टत्वादिरूपं रामस्वरूपं ये जीवा न जानन्ति अज्ञाने हेतुर्विमूढचेतसः विमूढचेतस्त्वे हेतुः स्वाविद्यया संवृतमानसा इति स्वोपाधिभूतया अविद्यया विद्याविरोधिभावदार्ढ्यरूपया संवृतान्तःकरणाः ॥१९॥

अतस्ते जीवाः शुद्धबुद्धे शुद्धत्वं मायादोषानाक्रान्तत्वेन बुद्धे ज्ञानस्वरूपे निरस्तमाये स्वज्ञानवतां निरस्ता माया येन तादृशे 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इति गीतोक्तेः ईदृशे रामे स्वाज्ञानं सुतरामारोपयन्ति स्वस्याज्ञत्वाद्राममज्ञमिति जानन्तीत्याशयः तेषां दुष्फलमाह संसारमिति ते पुत्रादिसक्ताः पुरुकर्मयुक्ताः भूरियज्ञादिकर्मयुक्ताः संसारमेवानुसरन्ति ॥ २० ॥

यतस्ते यथाऽज्ञाः कण्ठगतं चामीकरं स्वर्णालङ्कारं यथा न जानन्ति एवं हृदये स्थितं रामं ते न जानन्ति अतः संसारमेवानुसरन्तीत्यर्थः ॥२१॥

किञ्च परमात्मन्यज्ञानासम्भव इति दृष्टान्तेनाह यथेति अप्रकाशस्तमो यथा रवौ ज्योतिःस्वभावे ज्योतिःस्वरूपे न विद्यते तथा विशुद्धविज्ञानेन निर्विशेषापरोक्षज्ञानेन घने निबिडे परतः परमात्मनि उत्कृष्टेभ्योऽप्युत्कृष्टे रामे अविद्या कथं स्यात् तादृशे वस्तुन्यविद्यानवकाशादिति भावः तदुक्तमाचार्यैः 'अप्रकाशो यथादित्ये नास्ति ज्योतिःस्वभावतः । नित्यबोधस्वरूपत्वान्नाज्ञानं तद्वदात्मनि' इति ॥ २१ ॥

यथा हि चाक्ष्णा भ्रमता गृहादिकं विनष्टदृष्टेर्भ्रमतीव दृश्यते।
तथैव देहेन्द्रियकर्तुरात्मनः कृतं परेऽध्यस्य जनो विमुह्यति॥२२

नाहो न रात्रिः सवितुर्यथा भवेत्
प्रकाशरूपाव्यभिचारतः क्वचित्।
ज्ञानं तथाज्ञानमिदं द्वयं हरौ
रामे कथं स्थास्यति शुद्धचिद्घने॥ २३॥

तस्मात् परानन्दमये रघूत्तमे
विज्ञानरूपे हि न विद्यते तमः।
अज्ञानसाक्षिण्यरविन्दलोचने
मायाश्रयत्वान्न हि मोहकारणम्॥ २४॥

ननु स्वाज्ञानेन राममन्यं व्यवहरति जन इत्युक्तमयुक्तम् अन्य-
गतस्यान्यत्रारोपासम्भवादित्याशङ्क्य सदृष्टान्ततया मोहं जीव उपपादयति
यथेति विनष्टदृष्टेर्घूर्णियुक्तदृष्टेः पुरुषस्य भ्रमताक्ष्णा गृहादिकं भ्रमती-
वोत्प्रेक्षणीयम् भ्रमतीवेति दृश्यते तेनैव नष्टदृष्टिना पुरुषेणेति शेषः तथैव
देहेन्द्रियावच्छिन्नस्य कर्तुरात्मनोऽन्तःकरणस्याहङ्कारात्मकस्य कृतं परे सर्व-
धर्माऽविशिष्टे तदनवच्छिन्ने चेतनेऽध्यस्य जनो जीवो मुह्यति अहं कर्त्तेति मोहं
प्राप्नोति एवं च यथाऽक्षिगतभ्रमणस्य गृहादावारोपः यथा चान्तःकरण-
धर्मस्य कर्तृत्वादेरात्मन्यारोपस्तथा स्वाज्ञानस्य रामे आरोप इत्याशयः॥२२॥
भगवति रामे स्वतो ज्ञानमसम्भवीति पुनरपि दार्ढ्यायोक्तं युक्तमेवाह नाह
इति सूर्यं प्रति रात्रिदिवसविभागाभावे हेतुः प्रकाशरूपाव्यभिचारतः
क्वचित् कापीत्यर्थः ज्ञानाज्ञानयोर्भगवत्यनवस्थितौ हेतुःशुद्धचिद्घनत्वम्॥२२॥
उपसंहरति तस्मादिति परानन्दमये सर्वभूतैरेवपरानन्दमात्मतया उप-
जीवनात् विज्ञानरूपे निर्विकल्पकज्ञानरूपे तमोऽज्ञानरूपम् तमसः सम्बन्धे
हेतुद्वयम् अज्ञानसाक्षित्वं मायाधिष्ठातृत्वरूपं मायाश्रयत्वं च मोहकारणं
तमोऽज्ञानम् यो ह्यमायाधिष्ठाता स तद्विषयाज्ञानवान् इति लोके दर्शना·

अत्र ते कथयिष्यामि रहस्यमपि दुर्लभम् ।
सीताराममरुत्सूनुसंवादं मोक्षसाधनम् ॥ २५ ॥
पुरा रामायणे रामो रावणं देवकण्टकम् ।
हत्वा रणे रणश्लाघी सपुत्रबलवाहनम् ॥ २६ ॥
सीतया सह सुग्रीवलक्ष्मणाभ्यां समन्वितः ।
अयोध्यामगमद्रामो हनूमत्प्रमुखैर्वृतः ॥ २७ ॥
अभिषिक्तः परिवृतो वशिष्ठाद्यैर्महात्मभिः ।
सिंहासने समासीनः कोटिसूर्यसमप्रभः ॥ २८ ॥
दृष्ट्वा तदा हनूमन्तं प्राञ्जलिं पुरतः स्थितम् ।
कृतकार्यं निराकाङ्क्षं ज्ञानापेक्षं महामतिम् ॥ २९ ॥
रामः सीतामुवाचेदं ब्रूहि तत्त्वं हनूमते ।

दिति भावः नन्वेवं सति "ब्रह्मा दाशरथेर्यद्वुक्त्वा चापादर्शनम्" इत्याद्या-द्यार्थाद्युक्तेः का गतिरिति चेत् शृणु रावणवधार्थं मनुष्यत्वनाटनाय भगवता सङ्कल्पपूर्वं कृतस्य समाहात्म्याच्छादनस्य तत्र तत्र सत्त्वेनोक्तेः अदोषात् उक्तं हि संक्षेपशारीरके 'सङ्कल्पपूर्वकमभूद्रघुनन्दनस्य नाहं विजाने इति वञ्चनकारणमेतत् ब्रह्मोपदेशमुपलभ्य निमित्तमात्रम् तथो-त्सर्गं च कृते सति देवकार्ये' इति भागवतेऽप्युक्तम् 'लौकिकानां गति-रिति प्रथयांचकार' इति ॥ २४ ॥

मरुत्सूनुर्वायुपुत्रो हनूमान् ॥ २५ ॥

रामायणे रामायणप्रवर्त्तके रामावतारकाले इत्यर्थः देवकण्टकं देवद्रोहिणम् ॥ २६ ॥ २७ ॥

परिवृतः सीतादिभिरिति शेषः ॥ २८ ॥

पुरतः स्थितं अग्रे स्थितम् अनेन गुरूपसदनं दर्शितम् निराकाङ्क्षं ज्ञानेतरधनादिनिरपेक्षम् ॥ २९ ॥

निष्कल्मषोऽयं ज्ञानस्य पात्रं नौ नित्यभक्तिमान् ॥ ३० ॥
तथेति जानकी प्राह तत्त्वं रामस्य निश्चितम् ।
हनूमते प्रपन्नाय सीता लोकविमोहिनी ॥ ३१ ॥

सीतोवाच ।

रामं विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम् ।
सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरम् ॥ ३२ ॥
आनन्दं निर्मलं शान्तं निर्विकारं निरञ्जनम् ।

तत्त्वं मद्रूपतत्त्वं निष्कल्मषोऽयमित्यनेन ज्ञानाधिकारित्वं सूचितम् नौ आवयोः ॥ ३० ॥

रामस्य तत्त्वं श्रोतुर्निश्चितं यथा भवति तथा प्राह लोकविमोहिनीत्यनेन मोहनकर्त्र्या एव मोचनेऽपि सामर्थ्यमिति दर्शितम् राजाज्ञया बद्धो हि तदाज्ञयैव मुच्यत इति लोके प्रसिद्धम् एवं च भगवतीकृपैव मुक्तं मोक्षकारणमिति दर्शितम् ॥ ३१ ॥

जानकी प्राहेत्युक्तं तदाह राममिति रामं परं ब्रह्म विद्धि 'रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि । इति रामपदेनेदं परं ब्रह्माभिधीयते' इति तापनीये पाद्मे चोक्तेः सत् बाधहीनं 'सत्यत्वं बाधराहित्यं जगद्बाधैकसाक्षिणः बाधः किं साक्षिको ब्रूहि नत्वसाक्षिक ईष्यते' इत्युक्तेः चित् ज्ञानस्वरूपमानन्दं तद्रूपमद्वयम् 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतेः सर्वोपाधिविनिर्मुक्तम् स्थूलसूक्ष्मं सकलोपाधिनिर्मुक्तं विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः । ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्पदं विदुः' इति वार्त्तिकम् किञ्च सर्वोपाधिभिर्धर्मैर्विनिर्मुक्तमस्पृष्टमित्यर्थः सत्तामात्रं वस्तुमात्रे सदिति व्यवहारनियामकमित्यर्थः एतत्सम्बन्धादेव सर्वत्र सदिति व्यवहार इति भावः अगोचरं मनोवचसोरप्यविषयमित्यर्थः 'यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह' इति श्रुतेः ॥ ३२ ॥

आनन्दं तत्त्वेन विपुलत्वसुखमुच्यते 'यो वै भूमा तत् सुखं नाल्पे सुखमस्ति' इति श्रुतेः निर्मलं रजोहीनं शान्तम् प्रपञ्चोपशमत्वात् 'प्रपञ्चोप-

सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषम् ॥ २३ ॥
मां विद्धि मूलप्रकृतिं सर्गस्थित्यन्तकारिणीम्।
तस्य सन्निधिमात्रेण सृजामीदमतन्द्रिता ॥ २४ ॥

शान्तं शिवं शान्तम्' इति श्रुतेः निर्विकारं जायतेऽस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीति षड्भावविकारहीनम् "न जायते म्रियतेवा" इति गीतोक्तेः अनेनापरिणामित्वं सूचितम् निरञ्जनं अविद्यातत्का-र्यरूपतमोहीनम् 'आदित्यवर्णं तमसः परस्तात्' इत्युक्तेः सर्वव्यापित्वा-देवात्मानं अतति व्याप्नोतीत्यात्मा 'सर्वव्यापी सर्वभूतान्तरात्मा' इति श्रुतेः स्वप्रकाशम् 'अत्रायं पुरुषः स्वयं ज्योतिः' इति 'तस्य भासा सर्वमिदं विभाति' इति श्रुतेः अकल्मषम् 'आत्मापहतपाप्मा' इति श्रुतेः षडा-दिशब्दानां कल्पितप्रवृत्तिनिमित्तभेदादिपर्य्यायत्वेन न पुनरुक्तिदोषः यानि स्वभावकथनेन बोधकानि तेषु न काप्यनुपपत्तिः एवं चापाततः कल्पित-प्रवृत्तिनिमित्तप्रकारकबोधे इत्थं पुनर्विचारे श्रुतौ सर्वधर्मरहितत्वेन प्रत्येकत्या धर्मांशे कल्पितत्वप्रत्यये शुद्धनिर्धर्मकब्रह्मबोधः सर्वैः पदैर्भवतीति बोध्यम् तत्र दुर्बोधत्वात्तत्त्वस्य बोधार्थं पुनःपुनः यत्नतोऽर्चितव पर-मकरुणावती भगवती सीता हनूमते बोधयामासेति हृदयम् ॥ २३ ॥

नन्वेवंविधो रामश्चेज्जगत्कारणत्वाद्यस्य कथमिति कृतो जगदु-त्पत्त्यादि इत्यत आह। मामिति। मूलप्रकृतिं सर्वजगदुपादानकारण-मित्यर्थः प्रकृतिशब्दस्योपादानकारणप्रसिद्धेः तत्तदुपादानकारणानां मह-दादीनामप्युपादानकारणत्वात् मूलप्रकृतित्वमस्याः मां मायान्तु प्रकृतिं वि-द्यात् इति श्रुतिप्रसिद्धं ब्रह्मणश्चध्यस्ताम् ततो भेदाभेदाभ्यां अनिर्वचनीयामनादिमैश्वरीं मायामेश्वरीत्वं चास्या ईश्वरसङ्कल्पा-धानरूपत्वेनेति बोध्यम् एता च जीवान्वितैवेश्वरसन्निधानात्तद्वेव वि-वर्त्तते इति बोध्यम् मूलप्रकृतित्वमेव स्फुटयति सर्गस्थित्यन्तकारिणीमिति उत्पत्तिस्थिति प्रलयकर्त्रीम् नन्वेवं 'तदैक्षत बहु स्यां प्रजायेय' इति श्रुतेः 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभि-संविशन्ति' इति [illegible] जगत्कारणत्वं [illegible]

तत्सान्निध्यान्मया सृष्टं तस्मिन्नारोप्यतेऽबुधैः ।
अयोध्यानगरे जन्म रघुवंशेऽतिनिर्मले ॥ २५ ॥
विश्वामित्रसहायत्वं मखसंरक्षणं ततः ।
अहल्याशापशमनं चापभङ्गो महेशितुः ॥ २६ ॥
मत्पाणिग्रहणं पश्चाद्भार्गवस्य मदक्षयः ।
अयोध्यानगरे वासो मया द्वादशवार्षिकः ॥ २७ ॥
दण्डकारण्यगमनं विराधवध एव च ।

कथमेतेत्यत आह तस्य सन्निधीति अचेतनाया मायायाश्चैतन्यसन्निधानं विना निष्ठायां चै-
तन्याधिष्ठानं विना न सृष्टौ सामर्थ्यं तथाप्यस्याः यत्तत्सन्निधाने नैव जगत्-
कर्तृत्वमिति तत्र तदुपचारः यथा स्फटिकस्योपाधिसम्बन्धेनैव भिन्नस्वरूपस्य स्व-
रूपस्य रक्तत्वजपाकुसुमप्रवर्तिनी प्रतिभा तथा मायावैशिष्ट्येनैव चिद-
ब्रह्मणश्च स्वरूपतत्त्वकुसुमप्रवर्तित्वमहमित्याह अतन्द्रिता तत्सृष्टिरेवं
निराकारेऽर्थः तदुक्तं वाल्मीकीये रामं प्रति ब्रह्मवचनेन 'संक्षिप्येह पुरान्
लोकानेकत्वं मायया सह । भार्यया शुभया देव्या मां त्वं पूर्वमजीजन-
त्' इति एवञ्च मयतजगत् कर्तृत्वादेस्तत्रारोप इति भावः ॥ २४ ॥

यद्यपि मायाशबले ईश्वरे एव जगदुपादानत्वं निमित्तं च 'जगत-
स्तदुपादानं मायामादाय तामसीम् । निमित्तं शुद्धसत्त्वां तामुच्यते ब्रह्म
तद्गिरा' इति अभियुक्तोऽतः तत्राऽपि विशिष्टस्य विशेषणविशेष्योभयानति-
रेकेण मायागतस्य तस्य भगवत्यारोपेणैव तथा व्यवहार इत्याह तदिति
अतः तत्सान्निध्यान्मया सृष्टमतस्तत्कर्तृत्वादि अबुधैस्तत्स्वरूपानभिज्ञैस्त-
स्मिन्नारोप्यते रज्जौ सर्प इवेति भावः एतदेव द्रढयितुं कानिचित्स्वकृतानि
मदारोप्याणि दर्शयति अयोध्येत्यादि ॥ २५ ॥ २६ ॥ २७ ॥

मायामारीचमरणं मायाम्प्रदीतकनकमृगरूपमारीचमरणमित्यर्थः माया-
सीताहृतिरिति तदुक्तं कूर्मपुराणे उत्तरखण्डे चतुस्त्रिंशेऽध्याये रामस्य
सुभगां भार्यां रावणो राक्षसेश्वरः । सीतां विशालनयनां चकमे कालनो-
दितः । गृहीत्वा मायया वेषं चरन्तीं विजने वने । समाहर्तुं मनश्चक्रे

मायामारीचमरणं मायासीताहृतिस्तथा ॥ ३८ ॥
जटायुषो मोक्षलाभः कबन्धस्य तथैव च ।
शबर्याः पूजनं पश्चात् सुग्रीवेण समागमः ॥ ३९ ॥
वालिनश्च वधः पश्चात् सीतान्वेषणमेव च ।
सेतुबन्धश्च जलधौ लङ्कायाश्च निरोधनम् ॥ ४० ॥

किल कामिनीम् । विज्ञाय सा च तद्भावं स्मृत्वा दाशरथिं पतिम् । जगाम शरणं वह्निमावसथ्यं शुचिस्मिता । प्रपद्ये पावकं देवं साक्षिणं विश्वतोमुखम् आत्मानं दीप्तवपुषं सर्वभूतहृदिस्थितम्' इत्यादचष्ट श्लोकात्मकं इति वह्न्यष्टकं जप्त्वा रामपत्नी यशस्विनी । ध्यायन्ती मनसा तस्थौ राममुन्मीलितेक्षणा । अथावसथ्याद्भगवान् हव्यवाहो महेश्वरः । आविरासीत् सुदीप्तात्मा तेजसा निर्दहन्निव । सृष्ट्वा मायामयीं सीतां स रावणवधेच्छया । सीतामादाय धर्मिष्ठां पावकोऽन्तरधीयत । कृत्वा तु रावणवधं रामो लक्ष्मणसंयुतः । समादायाभवत्सीतां शङ्काकुलितमानसः । सा प्रत्ययाय भूतानां सीता मायामयी पुनः । विवेश पावकं दीप्तं ददाह ज्वलनोऽपि ताम् । दग्ध्वा मायामयीं सीतां भगवानुग्रदीधितिः । रामायादर्शयत् सीतां पावकोऽसौ सुरप्रियः । एतत्पतिव्रतानां वै माहात्म्यं कथितं मया । स्त्रीणां सर्वाघशमनं प्रायश्चित्तं परं स्मृतं" इति अनेन स्त्रीणामेवंविधोऽग्निप्रवेशो न दोषाय विपरीतं सर्वपापहरत्वेति सूचितम् वाल्मीकीयेऽपि मारीचवधार्थं गते रामे रामकृतेन रामशब्दसदृशशब्देनाक्रोशे कृते लक्ष्मणस्य राम सहायार्थं गमनाय प्रेषणावसरे अरण्यकाण्डे 'अपि त्वा सह रामेण पश्येयं पुनरागतः । लक्ष्मणेनैव मुक्ता तु रुदन्ती जनकात्मजा । प्रत्युवाच ततो वाक्यं तीव्रबाष्पपरिप्लुता । गोदावरीं प्रवेक्ष्यामि हीना रामेण लक्ष्मण ! आबन्धिष्येऽथवा त्यक्ष्ये विषमे देहमात्मनः' विषमे शृङ्गादौ स्थित्वा ततः प्रपातेनेत्यर्थः 'पिबामि वा विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनम् । नत्वहं राघवादन्यं कदाऽपि पुरुषं स्पृशे' इति सीतोक्त्या सूचितोऽयमर्थः अन्यथैवं प्रतिज्ञाय रावणशरीरस्पर्शाङ्गमनात् प्रतिज्ञाहानिः स्यात् तस्मात् 'प्रवेक्ष्यामि हुताशनं' इत्यनेन स्वकर्तव्यार्थ एवोक्त इति मन्तव्यम् एतत्प्रवेशादेव हनूमत्प्रभृतयस्तदा-

रावणस्य वधो युद्धे सपुत्रस्य दुरात्मनः।
विभीषणे राज्यदानं पुष्पकेण मया सह ॥ ४१ ॥
अयोध्यागमनं पश्चाद्राज्ये रामाभिषेचनम्।
एवमादीनि कर्माणि मयैवाचरितान्यपि।
आरोपयन्ति रामेऽस्मिन् निर्विकारेऽखिलात्मनि ॥ ४२ ॥

रामो न गच्छति न तिष्ठति नानुशोच-
त्याकाङ्क्षते त्यजति नो न करोति किञ्चित्।
आनन्दमूर्त्तिरचलः परिणामहीनो
मायागुणाननुगतो हि तथा विभाति ॥ ४३ ॥

श्रीमहादेव उवाच।

ततो रामः स्वयं प्राह हनूमन्तमुपस्थितम्

त्मिना वक्ष्यादाहोपपत्तिः अन्यथा रावणवधीलठेन लोकपालात्मिना कथं तन्नगरदाहः स्यात् एतच्छक्तिप्रवेशे तु तस्य स्वातन्त्र्यहान्या तदुपपत्तिरित्यर्थम् ॥ २८—४१ ॥

एवमादीनि अज्ञानेभ्यो दानादीन्यादिशब्दात् यान्याणि निर्विकारे जन्मादिरहिते आरोपयन्ति एवं जगत्कर्तृत्वादिकमपि मत्समेन रामे आरोपयन्तीत्यर्थः ॥ ४२ ॥

निर्विकारत्वमेव रामस्योपपादयति राम इति 'निष्कलं निष्क्रियं शान्तम्' इत्यादि श्रुतेः आनन्दमूर्त्तिरानन्दस्वरूपः अचलः कूटस्थोऽतएव परिणामहीनः मायागुणान् मायया सृष्टपदार्थाननुगतः तदधिष्ठानत्वेन स्थितस्तथा विभाति सृष्ट्यादिरूपो भाति यथा रज्ज्ववच्छेदेन सर्पाकारोऽन्तःकरणपरिणाम इति रज्जुः सर्पात्मना भाति एतदेव विवर्त्तोपादानत्वमित्याहुः स च सर्पाकारोऽन्तःकरणपरिणामः सत्त्वासत्त्वाभ्यामनिर्वचनीय इत्युच्यते एवं प्रपञ्चोऽप्यनिर्वचनीय इति दिक् ॥ ४३ ॥

उपस्थितमात्मनोऽद्वितीयत्वे जीवेश्वरादिव्यवस्था कथमिति जिज्ञास-

शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनाम् ॥ ४४ ॥
आकाशस्य यथा भेदस्त्रिविधो दृश्यते महान् ।
जलाशये महाकाशस्तदवच्छिन्न एव हि ।
प्रतिबिम्बाख्यमपरं दृश्यते त्रिविधं नभः ॥ ४५ ॥
बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णमथापरम् ।
आभासस्त्वपरं बिम्बभूतमेवं त्रिधा चितिः ॥ ४६ ॥
साभासबुद्धेः कर्तृत्वमविच्छिन्ने विकारिणि ।

योपपन्नम् आत्मा ईश्वरः अनात्मा चिदाभासो जीवः परमात्मा शुद्ध-चैतन्यम् ॥ ४४ ॥

तेषां तत्त्वमेव सदृष्टान्तमाह आकाशस्येति एकस्याकाशस्य त्रिविधो भेदः महाकाशो जलाशयावच्छिन्न आकाशः प्रतिबिम्बाकाशश्चेति भेदात् तदेवाह महानिति महाकाश इत्यर्थः स एव महाकाशो जलाशये तदवच्छिन्न एव भवति तत्रैव जलाशये परं प्रतिबिम्बाख्यं दृश्यते एवं नभस्त्रिविधं इत्यर्थः ॥ ४५ ॥

एवं दृष्टान्तमुपपाद्य दार्ष्टान्तिकमाह बुद्धीति सर्वबुद्ध्यवच्छिन्नतया बुद्ध्युपहितं चैतन्यं पूर्णमुपाधिमहत्त्वस्य विभुत्वाद्विभुः सकलबुद्धिसमष्टिरेव मायेति तदवच्छिन्नचैतन्यमीश्वर इत्यर्थः अथापरमाभासस्तत्तद्बुद्धिप्रतिबिम्बभूतो जीव इत्यर्थः अपरं बिम्बभूतं एवं चितिस्त्रिधा इत्यर्थः आभासस्त्वपरं बिम्बभूतमिति पाठे बुद्ध्यवच्छिन्नं चैतन्यमेकमित्यनेनेश्वरः पूर्णमथापरं इत्यनेन शुद्धमाभासस्त्वपरमिति जीवः जीवत्वमेव स्फुटयति बिम्बभूतमिति बिम्बशब्देन जाग्रदवस्थाभिमानी विशति देहेन्द्रियादिष्विति व्युत्पत्तेः एतत् प्रतिबिम्बाकाशस्थानीयमिति त्रिधा चितिरित्यर्थ इत्याहुः तत्र द्वौ मिथ्याभूतौ उपाध्योर्मिथ्यात्वात् ॥ ४६ ॥

नन्वेवं शुद्धचैतन्ये साक्षीति व्यवहारानुपपत्तिः साक्षाद् द्रष्टा हि साक्षी न च शुद्धचैतन्ये द्रष्टृत्वमित्यत आह साभासेति आभासेन चेतनप्रतिबिम्बेन सहितायाः बुद्धेरन्तःकरणस्येत्यर्थः तदुक्तं कर्तृत्वमनुष्ठे

साक्षिण्यारोप्यते भ्रान्त्या जीवत्वञ्च तथाऽबुधैः ॥ ४७ ॥
आभासस्तु मृषा बुद्धिरविद्याकार्य्यमुच्यते ।
अविच्छिन्नन्तु तद्ब्रह्म विच्छेदस्तु विकल्पतः ॥ ४८ ॥
अवच्छिन्नस्य पूर्णेन एकत्वं प्रतिपाद्यते ।
तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा ॥ ४९ ॥

साक्षिणि आरोप्यते तेनायं साक्षिपदवाच्य इत्यर्थः अयमाशयः जानातीत्यादावन्तःकरणवृत्तिविशेषरूपा क्रिया धात्वर्थवाच्या आभासविशिष्टस्य तिङर्थ आश्रयः परस्पराध्यासेनाभासबुद्ध्योर्विवेकाग्रहात् तदुक्तमाचार्यैः 'आत्माभासस्तु तिङ्वाच्यो धात्वर्थश्च धियः क्रिया । उभयञ्चाविवेकेन जानातीत्युच्यते मृषा । बुद्धेः कर्तृत्वमध्यस्य जानातीति स उच्यते । तथा चैतन्यमध्यस्य सत्यं बुद्धेरिहोच्यत' इति आत्माभास इति बहुव्रीहिः धियोऽन्तःकरणस्य तदेवाह उभयञ्चेति मृषेति आभासबुद्धितत्क्रियाणां मिथ्यात्वात् अयं व्यवहारोऽपि मिथ्येत्यर्थः एवञ्च साभासबुद्धिगतद्रष्टृत्वस्याविच्छिन्ने परिच्छिन्ने विकारिणि साक्षिणि बुद्धितादात्म्यापन्नाभासतादात्म्याध्यासेनारोपः तथा जीवो नित्यः सत्य इत्यादिव्यवहारात् जीवत्वमपि तत्रारोप्यत इत्यर्थः ॥ ४७ ॥

आत्माभासमादाय नूनं तथा व्यवहारसम्भव इत्याह आभासस्त्विति तस्य मृषात्वादविद्याकार्य्यत्वाच्च तथा व्यवहारस्य तमादाय नोपपत्तिरित्यर्थः न दर्पणे मुखमस्ति मिथ्यैवात्र दर्पणे मुखमभादित्येवं सर्वसिद्धबाधानुभवात् अतएवासावविद्याकार्य्यं ग्रीवास्थमुखे आदर्शस्थत्वं त्वाध्यासिकम् न तु वास्तवमिति बोध्यम् आभासासत्यत्वञ्चाकरे प्रपञ्चितम् विस्तरभयान्नेहोच्यते ननूक्तं तं यथ्यं किञ्चितेर्वास्तवं नेत्याह अविच्छिन्नं विच्छेदो भेदस्तद्रहितम् नन्वेवं त्रिधा चितिरित्यसङ्गतं तत्राह विच्छेद इति भेद इत्यर्थः विकल्पतः उपाध्यध्यासकृत इत्यर्थः एवं जीवानां परस्परं भेदोऽप्यध्यासकृत एवेति बोध्यम् ॥ ४८ ॥

कल्पितभेदसत्त्वे प्रमाणमाह अवच्छिन्नस्येति अवच्छेदो भेदस्तद्वतः [illegible]भेदवतः साभासस्याहमस्त्वमस्यादिवाक्यैः पूर्णेनेश्वरेण एकत्वं

ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनोः ।
तदा विद्या स्वकार्य्यैश्च नश्यत्येव न संशयः ॥ ५० ॥
एतद्विज्ञाय मद्भक्तो मद्भावायोपपद्यते ।

प्रतिपाद्यते तथा सति कल्पितभेदे सति उपपद्यत इति शेषः सर्वथा-भेदाभावे तदानर्थक्यं वास्तवेऽपि भेदे तदानर्थक्यं वास्तवस्य वचनशते-नाप्यनिवृत्तिरिति भावः बुद्ध्यवच्छिन्नस्य साभासस्याहम इत्यनेन त्वं पदार्थो दर्शितः पूर्णेनेत्यनेन तत्पदार्थो दर्शितः ॥ ४९ ॥

एतदेव स्पष्टयन् तदुपदेशफलमाह ऐक्येति आत्मनोर्जीवेश्वरयोरैक्यज्ञानमहं ब्रह्मेति ज्ञानं यदेति कर्मानुष्ठानात्पापक्षये समुत्पन्ने 'कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्त्तते' इति स्मृतेः अयं भावः जीवेश्वरयोरुपाधिभिन्नयो रैक्यश्रुत्योच्यमानं बाधितं सत्तत्त्वं पदयोरुपाधिरहिते लक्षणया बिम्बभूतं शुद्धब्रह्मैक्यपरतया पर्य्यवस्यतीति बोध्यम् एतच्चाकरे विस्तरेण प्रपञ्चितं ब्रह्मैक्यज्ञानफलमाह तदेति तादृशज्ञाने सति निर्द्धर्मकत्वेन चिन्मात्रतया तत् स्वरूपज्ञानात् तत् स्वरूपाज्ञानरूपा विद्या स्वकार्य्यैः प्रपञ्चैः सह नश्यत्येव न संशय एतेन भ्रष्टबीजवत् कार्य्यजननासामर्थ्यमेव तस्याज्ञानेन क्रियत इति पक्षोऽपास्तः तदुक्तमाचार्य्यैः 'सोऽयमित्यादिवाक्येषु विरोधात् तदिदं तयोः । त्यागेन भागयोरेक आश्रयो लक्ष्यते यथा । मायाविद्ये विहायैवमुपाधी परजीवयोः । अखण्डसच्चिदानन्दं परं ब्रह्मैव लक्ष्यते' यथा सोऽयं देवदत्त इत्यादौ पूर्वानुभूतत्वरूपतत्ताया इदानीमनुभूयमानत्वरूपेदन्तायाश्च त्यागेन देवदत्तस्वरूपमात्रं लक्ष्यते मायाबुद्धिसमष्टिरविद्या व्यष्टिरूपेति बोध्यम् अपरोक्षज्ञानं मननादिसंस्कृतान्तःकरणादेव 'दृश्यते त्वग्र्यया बुद्ध्या' इति श्रुतेः अग्र्ययामननादिसंस्कृतया 'शास्त्राचार्य्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणं' इति गीताभाष्योक्तश्चेति दिक् उक्तञ्च नारदीये 'तत्त्वमस्यादिवाक्योत्थज्ञानं मोक्षस्य साधनम्' इति श्रुतिरपि 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति ॥ ५० ॥

ऐक्यज्ञानस्य मुख्यं साधनमाह एतदिति मद्भक्त इति हेतुगर्भं विशेषणम् मद्भावो मत्सायुज्यं भक्तेः कारणत्वदर्शनाच भक्तिव्यतिरेके

मद्भक्तिविमुखानां हि शास्त्रगर्त्तेषु मुह्यताम्।
न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि॥ ५१॥

इदं रहस्यं हृदयं ममात्मनो
मयैव साक्षात्कथितं तवानघ!।
मद्भक्तिहीनाय शठाय न त्वया
दातव्यमैन्द्रादपि राज्यतोऽधिकम्॥ ५२॥

श्रीमहादेव उवाच।

एतत्तेऽभिहितं देवि! श्रीरामहृदयं मया।
अतिगुह्यतमं हृद्यं पवित्रं पापशोधनम्॥ ५३॥
साक्षाद्रामेण कथितं सर्ववेदान्तसंग्रहम्।
यः पठेत् सततं भक्त्या स मुक्तो नात्र संशयः॥ ५४॥
ब्रह्महत्यादिपापानि बहुजन्मार्जितान्यपि।
नश्यन्त्येव न सन्देहो रामस्य वचनं यथा॥ ५५॥
(१)योऽतिभ्रष्टोऽतिपापी परधनपरदारेषु नित्योद्यतो वा
स्तेयी ब्रह्मघ्न मातापितृवधनिरतो योगिवृन्दापकारी।
यः सम्पूज्याभिरामं पठति च हृदयं रामचन्द्रस्य भक्त्या

कार्य्यव्यतिरेकमाह मद्भक्तीति शास्त्रगर्त्तेषु शास्त्रबोधितक्रियाकलापरूप-गर्त्तेषु॥ ५१॥

ममात्मनः मद्रूपस्य चेतनस्य॥ ५२। ५३॥

सर्ववेदान्तसंग्रहं सर्ववेदान्तप्रतिपाद्यार्थसारसंग्रहरूपम्॥५४।५५॥

---

(१) नातिभ्रष्टो इत्यपि पाठः।

योगीन्द्रैरप्यलभ्यं पदमिह लभते सर्वदेवैः सपूज्यम् ॥ ५६ ॥

इत्यध्यात्मरामायणे उमामहेश्वरसंवादे बालकाण्डे श्रीरामहृदयं
नाम द्वितीयः सर्गः ।

अतिभ्रष्टत्वोपपादकमतिपापीत्यादि सर्वदेवैः पूज्यं पदं ब्रह्मलोकं स
लभत इत्यन्वयः ॥ ५६ ॥

इति श्रीमन्मुकलराजविपदुद्धरणसमर्थेत्यादिविरुदावलीविराज-
मानस्य हिम्मतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतौ
अध्यात्मरामायणसेतौ बालकाण्डे
श्रीरामहृदयकथनं नाम
द्वितीयः सर्गः ।

तृतीयः सर्गः।

पार्वत्युवाच।

धन्यास्म्यनुगृहीतास्मि कृतार्थास्मि जगत्प्रभो!।
विच्छिन्नो मेऽतिसन्देहग्रन्थिर्भवदनुग्रहात्॥ १॥
त्वन्मुखाद्गलितं रामतत्त्वामृतरसायनम्।
पिबन्त्या मे मनो देव! न तृप्यति भवापहम्॥ २॥
श्रीरामस्य कथा त्वत्तः (१) श्रुता संक्षेपतो मया।
इदानीं श्रोतुमिच्छामि विस्तरेण स्फुटाक्षरम्॥ ३॥

श्रीमहादेव उवाच।

शृणु देवि! प्रवक्ष्यामि गुह्याद्गुह्यतरं महत्।
अध्यात्मरामचरितं रामेणोक्तं पुरा मम॥ ४॥

अथ पार्वती प्रियोक्तमभिनन्दति धन्यास्मीति अतिसन्देहग्रन्थिः यदि रामः परं ब्रह्म तर्हि कथं तस्य शोकादि यदि शोकादिमत्त्वाज्जीवः कथं तदोपास्यत्वमित्याकारो महान् सन्देहरूपो ग्रन्थिः विच्छिन्नः निवृत्तः॥ १॥

भवः संसारस्तमपहन्ति नाशयति तादृशरामतत्त्वामृतरसायनं रामतत्त्वरूपममृतजनकं रसायनं पिबन्त्या मे मनो न तृप्यति॥ २॥

पुनर्विस्तरेण रामकथां पृच्छति श्रीरामस्येति स्फुटाक्षरमिति क्रियाविशेषणम्॥ ३॥

अथ महादेवस्तां कथां विवक्षुस्तस्य श्रोतृप्रवृत्तये तत्प्रशंसामाह

(१) कथा तत्त्वं इति पाठे कथायास्तत्त्वं इत्यर्थः।

तदहं कथयिष्यामि शृणु तापत्रयापहम् ।
यच्छ्रुत्वा मुच्यते जन्तुरज्ञानोत्थमहाभयात् ।
प्राप्नोति परमामृद्धिं दीर्घायुः पुत्रसन्ततिम् ॥ ५ ॥

भूमिर्भारेण मग्ना दशवदनमुखाशेषरक्षोगणानां
धृत्वा गोरूपमादौ दिविजमुनिजनैः साकमब्जासनस्य ।
गत्वा लोकं रुदन्ती व्यसनमुपगतं ब्रह्मणे प्राह सर्वं
ब्रह्मा ध्यात्वा मुहूर्तं सकलमपि हृदा वेद शेषात्मकत्वात्

तस्मात् क्षीरसमुद्रतीरमगमद्ब्रह्माथ देवैर्वृतो
देव्या चाखिललोकहृत्स्थमजरं सर्वज्ञमीशं हरिम् ।
अस्तौषीच्छ्रुतिसिद्धनिर्मलपदैः स्तोत्रैः पुराणोद्भवै-
र्भक्त्या गद्गदया गिरातिविमलैरानन्दबाष्पैर्वृतः ॥ ७ ॥

इहेवेति आत्मनि इत्यध्यात्मं सर्वात्मनि अन्तर्यामितया स्थितस्य रामस्य चरितं तद्वर्णनरूपं काव्यम् ॥ ४ ॥

तापत्रयं आध्यात्मिकाधिभौतिकाधिदैविकाख्यदुःखत्रयम् तत्राद्यं रोगादिजं कामक्रोधादिजं च द्वितीयम् चोरादिनिमित्तं तृतीयं ग्रहा-द्यावेशनिमित्तम् ॥ ५ ॥

कथां प्रस्तौति भूमिरिति । रक्षोगणानां भारेण मग्ना स्वाधारजले इति शेषः मग्ना गोरूपं धृत्वा देवादिभिः सहाब्जासनस्य ब्रह्मणो लोकं गत्वा ब्रह्मणे उपगतं स्वयं प्राप्तं सर्वं व्यसनं प्राह स च मुहूर्तं ध्यात्वा सकलं दुःखकारणं तन्निवृत्तिकारणञ्च हृदा वेद अजानात् तत्र हेतुः अशेषात्मकत्वात् सर्वस्य हृज्ज्ञस्य तच्छेषरूपत्वादित्यर्थः ॥ ६ ॥

तस्मादिति अनन्तरमिति शेषः तदनन्तरं ध्यानानन्तरमित्यर्थः देव्या च भूम्या च सहित इति शेषः अखिललोकहृत्स्थं सर्वान्तर्यामिणमित्यर्थः 'स वा एष आत्मा हृदि' इति श्रुतेः अजरं 'एष महानात्मा अजर' इति श्रुतेः सर्वज्ञं 'यः सर्वज्ञः सर्ववित्' इति श्रुतेः ईशं 'एष सर्वेश्वर' इति श्रुतेः

ततः स्फुरत्सहस्रांशुसहस्रसदृशप्रभः ।
आविरासीद्धरिः प्राच्यान्दिशि व्यपनयंस्तमः ॥ ८ ॥
कथञ्चिद्दृष्टवान् ब्रह्मा दुर्दर्शमकृतात्मनाम् ॥
इन्द्रनीलप्रतीकाशं स्मितास्यं पद्मलोचनम् ॥ ९ ॥
किरीटहारकेयूरकुण्डलैः कटकादिभिः ।
विभ्राजमानं श्रीवत्सकौस्तुभप्रभयान्वितम् ॥ १० ॥
स्तुवद्भिः सनकाद्यैश्च पार्षदैः परिवेष्टितम् ।
शङ्खचक्रगदापद्मवनमालाविराजितम् ॥ ११ ॥
स्वर्णयज्ञोपवीतेन स्वर्णवर्णाम्बरेण च ॥ १२ ॥
श्रिया भूम्या च सहितं गरुडोपरिसंस्थितम ।
हर्षगद्गदया वाचा स्तोतुं समुपचक्रमे ॥ १३ ॥

ब्रह्मोवाच ।

नतोऽस्मि ते पदं देव ! प्राणबुद्धीन्द्रियात्मभिः ।
यच्चिन्त्यते कर्मपाशात् हृदि नित्यं मुमुक्षुभिः ॥ १४ ॥

हरिं 'हराम्यघं हि वक्तॄणां हविर्भागं क्रतौ तथा। वर्णश्च मे हरिर्यस्मा-त्तस्माद्धरिरहं स्मृत' इति श्रुतेः स्तुतिसिद्धनिर्मलहरिविष्णुप्रभृतिपदयुक्तैः पुराणोद्भवैः स्तोत्रैरित्यर्थः भक्तिमूर्त्तिश्चैव च गद्गदवाणी भक्तिजत्वादेवा-स्मद्व्याख्याया विमलत्वम् ॥ ७ ॥

सहस्रांशुसहस्रं सूर्य्यसहस्रम् ॥ ८ ॥

अकृतात्मनां ध्यानहीनानां तेजोराशित्वात् कथञ्चिद्दर्शनम् ॥९।१०॥

पार्षदगणाः ॥ ११ ॥

स्वर्णवर्णाम्बरं पीताम्बरम् ॥ १२ । १३ ॥

प्राणः क्रियाशक्तिप्रधानोऽयः तेन कर्मेन्द्रियसंघः बुद्धीन्द्रियाणि श्रोत्रादीनि आत्मा मनस्तैः कारणभूतैर्नतोऽस्मि कर्मपाशान्मुमुक्षुभि-र्यत् हृदि चिन्त्यते इत्यन्वयः ॥ १४ ॥

मायया गुणमय्या त्वं सृजस्यवसि लुम्पसि।
जगत्तेन न ते लेप आनन्दानुभवात्मनः॥ १५ ॥
तथा शुद्धिर्न दुष्टानां दानाध्ययनकर्मभिः।
शुद्धात्मता ते यशसि सदा भक्तिमतां यथा॥ १६ ॥
अतस्तवाङ्घ्रिर्मे दृष्टश्चित्तदोषापनुत्तये।
सद्योऽन्तर्हृदये नित्यं मुनिभिः सात्वतैर्धृतः॥ १७ ॥
ब्रह्माद्यैः स्वार्थसिद्ध्यर्थमस्माभिः पूर्वसेवितः।
अपरोक्षानुभूत्यर्थं ज्ञानिभिर्हृदि भावितः॥ १८ ॥
तवाङ्घ्रिपूजानिर्माल्यतुलसीमालया विभो!।
स्पर्द्धते वक्षसि पदं लब्ध्वापि श्रीः सपत्निवत्॥ १९ ॥
अतस्त्वत्पादभक्तेषु तव भक्तिः श्रियोऽधिका।
भक्तिमेवाभिवाञ्छन्ति त्वद्भक्ताः सारवेदिनः॥ २० ॥

गुणमय्या सत्त्वरजस्तमोगुणयुक्तया मायया अविद्यया जगत् सृजसि तेन स्रष्टृत्वादिना ते लेपोऽहं स्रष्टेत्याद्यभिमानो न तत्र हेतुगर्भं विशेषणम् आनन्दानुभवात्मनः आनन्दाभिन्नानुभवरूप आत्मा यस्य तस्य एवं च स्वस्वरूपापरोक्षेण सर्वत्र मिथ्या दृष्ट्वा तदभिमानरहित इति भावः ॥ १५ ॥

दुष्टानां मलिनान्तःकरणानां शुद्धात्मता शुद्धान्तःकरणता ते यशसि तव गुणकीर्त्तने ॥ १६ ॥

सात्वतैर्भक्तैः धृतोऽन्तर्हृदये सद्यो दृष्टश्चाङ्घ्रिर्मे चित्तदोषापनुत्तये अस्त्विति शेषः ॥ १७ ॥

स्वार्थसिद्ध्यर्थं स्वकर्त्तव्यसृष्ट्यादिसिद्ध्यर्थं ज्ञानिभिः ज्ञानेच्छुभिः ॥ १८ ॥

सपत्निवत् आर्षो ह्रस्वः सपत्नीवदित्यर्थः ॥ १९ ॥

अतः त्वच्चरणभक्तेषु तव लक्ष्मीतोऽप्यधिका भक्तिः प्रीतिः अतः सारवेदिनस्त्वद्भक्तास्त्वच्चरणयोर्भक्तिमेव वाञ्छति ॥ २०

अतस्त्वत्पादकमले भक्तिरेव सदाऽस्तु मे ।
संसारामयतप्तानां भेषजं भक्तिरेव ते ॥ २१ ॥
इति ब्रुवन्तं ब्रह्माणं बभाषे भगवान् हरिः ।
किं करोमीति तं वेधाः प्रत्युवाचातिहर्षितः ॥ २२ ॥

ब्रह्मोवाच ।

भगवन् ! रावणो नाम पौलस्त्यतनयो महान् ।
राक्षसानामधिपतिर्मद्दत्तवरदर्पितः ॥ २३ ॥
त्रिलोकीं लोकपालांश्च बाधते विश्वबाधकः ।
मानुषेण मृतिस्तस्य मया कल्याणकल्पिता ।
अतस्त्वं मानुषो भूत्वा जहि देव ! रिपुं प्रभो ! ॥ २४ ॥

श्रीभगवानुवाच ।

कश्यपस्य वरो दत्तस्तपसा तोषितेन मे ॥ २५ ॥
याचितः पुत्रभावाय तथेत्यङ्गीकृतं मया ।
स इदानीं दशरथो भूत्वा तिष्ठति भूतले ॥ २६ ॥

अत इति यतस्ते भक्तिरेव संसाररोगभेषजमत इत्यन्वयः ॥ २१ ॥

ब्रह्माणं हरिः किं करोमीति बभाषे अथ तं हरिं वेधाः प्रत्युवाचेति सम्बन्धः ॥ २२ ॥

रावण इति 'रावयामास लोकान्यस्तस्माद्रावण उच्यते' इति भारतोक्तेः मया ब्रह्मणा दत्तेन वरेण दर्पितोऽहंकृतः वरश्च मनुष्यातिरिक्तावध्यत्वरूपः ॥ २३ ॥

तदेवाह मानुषेणेति ॥ २४ ॥

कश्यपस्य तपसा तोषितेन मे मया तस्मै वरो दत्तः यत्त्वं याचिष्यसि तत्तुभ्यं दास्यामीति कृतवरदानप्रतिज्ञ इत्यर्थः ॥ २५ ॥

ततस्तेनाहं पुत्रभावाय याचितो मया च तत्तथेत्यङ्गीकृतमित्यर्थः ॥ २६ ॥

तस्याहं पुत्रतामेत्य कौशल्यायां शुभे दिने (१) ।
चतुर्द्धात्मानमेवाहं सृजामीतरयोः पृथक् ॥ २७ ॥
योगमायापि सीतेति जनकस्य गृहे तदा ।
उत्पत्स्यते तया सार्द्धं सर्वं सम्पादयाम्यहम् ।
इत्युक्त्वान्तर्दधे विष्णुर्ब्रह्मा देवानथाऽब्रवीत् ॥ २८ ॥

ब्रह्मोवाच ।

विष्णुर्मानुषरूपेण भविष्यति रघोः कुले ॥ २९ ॥
यूयं सृजध्वं सर्वेऽपि वानरेष्वंशसम्भवान् ।
विष्णोः सहायं कुरुत यावत् स्थास्यति भूतले ॥ ३० ॥
इति देवान् समादिश्य समाश्वास्य च मेदिनीम् ।
ययौ ब्रह्मा स्वभवनं विज्वरः सुखमास्थितः ॥ ३१ ॥
देवाश्च सर्वे हरिरूपधारिणः
स्थिताः सहायार्थमितस्ततो हरेः ।

अहं तस्य पुत्रतामेत्य पुत्रतां प्राप्स्यामीति सङ्कल्प्य कौशल्यायामितरयोः सुमित्राकैकेय्योरहमेवात्मानं चतुर्द्धा चतुःप्रकारावयवसंस्थानै रामलक्ष्मणभरतशत्रुघ्नेतिचतुःप्रकारनामभिश्च सृजामि स्रक्ष्यामि वर्त्तमानसामीप्ये लट् ॥ २७ ॥

योगमायेति योगो मत्सङ्कल्पस्तद्वशवर्त्तिनी मायेत्यर्थः 'नाहं प्रकाशः सर्वस्य योगमायासमावृत' इति गीतोक्तेः तया सार्द्धं तां सहकारिणीं प्राप्य ॥ २८ । २९ ॥

अंशसम्भवान् स्वस्वांशसम्भवान् वानरानित्यर्थः ॥ ३० । ३१ ॥

(१) शुभोदये इति केचित् पठन्ति ।

महाबलाः पर्व्वतवृक्षयोधिनः
प्रतीक्षमाणा भगवन्तमीश्वरम् ॥ ३२ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे बालकाण्डे
तृतीयः सर्गः ।

इतस्ततः पर्व्वतवनेषु ॥ ३२ ॥

इति श्रीमत्तुकजराजविपद्गुहरचन्द्रसमर्थैत्यादिवि० श्रीराम-
वर्म्मणः कृतौ अध्यात्मरामायणे सेतौ
बालकाण्डे तृतीयः सर्गः ।

चतुर्थः सर्गः ।

श्रीमहादेव उवाच ।

अथ राजा दशरथः श्रीमान् सत्यपरायणः(१) ।
अयोध्याधिपतिर्वीरः सर्वलोकेषु विश्रुतः ॥ १ ॥
सोऽनपत्यत्वदुःखेन(२) पीड़ितो गुरुमेकदा ।
वशिष्ठं स्वकुलाचार्यमभिवाद्येदमब्रवीत् ॥ २ ॥
स्वामिन् ! पुत्राः कथं मे स्युः ? सर्वलक्षणलक्षिताः ।
पुत्रहीनस्य मे राज्यं सर्वं दुःखाय कल्पते । ३ ॥
ततोऽब्रवीद्वशिष्ठस्तं भविष्यन्ति सुतास्तव ।
चत्वारः सत्त्वसंपन्ना लोकपाला इवापराः ॥ ४ ॥
शान्ताभर्त्तारमानीय (३) ऋष्यशृङ्गं तपोधनम् ।
अस्माभिः सहितः पुत्रकामेष्टिं शीघ्रमाचर ॥ ५ ॥
तथेति मुनिमानीय मन्त्रिभिः सहितः शुचिः ।

अथ रामजन्माह अथेति ॥ १ । २ ॥

सर्वं दुःखायेति 'मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा' इति श्रुतेः ॥ २ । ४ ॥

शान्ताभर्त्तारं शान्ता लोमपाददशरथसखाङ्गपतेरेतद्दशरथमित्रस्य कन्या तेन राज्ञा अस्मात्ऋष्यशृङ्गात् स्वदुहितृत्वेन कल्पितेत्याख्यायिका पुत्रः कामस्य कर्त्तव्येष्टिः पुत्रकामेष्टिः ॥ ५ ॥

---

(१) सत्यपराक्रम इत्यपि पाठः ।

(२) अनपत्यः स दुःखेन इति केचित् पठन्ति ।

(३) शान्तं ऋषिं समानीय इति पाठः पुस्तकान्तरे ।

यज्ञकर्म समारेभे मुनिभिर्वीतकल्मषैः ॥ ६ ॥
श्रद्धया हूयमानेऽग्नौ तप्तजाम्बूनदप्रभः ।
पायसं स्वर्णपात्रस्थं गृहीत्वोवाच हव्यवाट् ॥ ७ ॥
गृहाण पायसं दिव्यं पुत्रीयं देवनिर्मितम् ।
लप्स्यसे परमात्मानं पुत्रत्वेन न संशयः ॥ ७ ॥
इत्युक्त्वा पायसं दत्त्वा राज्ञे सोऽन्तर्दधेऽनलः ।
ववन्दे मुनिशार्दूलौ राजा लब्धमनोरथः ॥ ८ ॥
वशिष्ठऋष्यशृङ्गाभ्यामनुज्ञातो ददौ हविः ।

मुनिं ऋष्यशृङ्गं मुनिभिर्वशिष्ठाद्यैः ॥ ६ ॥

तप्तजाम्बूनदं कृतमलापहरणं स्वर्णं तद्वत्कान्तिर्हव्यवाडग्निः स्वयमेव 'प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप' इति वाल्मीकीये प्राजापत्यशब्देनोक्तः ॥ ७ ॥

पुत्रीयं पुत्राय हितम् ॥ ८ ॥

मुनिशार्दूलौ वशिष्ठऋष्यशृङ्गौ ॥ ९ । १० ॥

जागृध्नुः अयं तदिच्छावती गृधु अभिकाङ्क्षायामित्यतो यङ्लुगन्ता-दागमशास्त्रस्यानित्यत्वेन इडभावे त्रसिगृधिधृषिक्षिपेः क्नुरिति क्नोरूपं पौत्रिकं चरुमिति भावः आर्थः पुत्रः प्रयोजनं यस्य तादृशं चरुमि-त्यर्थः स्वभागार्धं स्वशब्द आत्मीयवाची स्वीयस्य भागः स्वभागस्तदर्धं स्वद-त्तस्य चतुर्थांशमित्यर्थः एवमग्रेऽपि वाल्मीकीयेऽपि 'कौसल्यायै नरपतिः पायसार्धं ददौ तदा । अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः । कैके-य्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् । प्रददौ चावशिष्टार्धं पायसस्या-मृतोपमम् । अनुचिन्त्य सुमित्रायै पुनरेव महीपतिः' इति श्लोकयोः कौसल्यायै दत्तार्धस्यार्धादर्धं चतुर्थांशरूपं सुमित्रायै ददौ कौसल्यया दापितवानित्यर्थः कार्यः अर्धादित्यत्र कस्या अर्धादित्याकाङ्क्षायामुपस्थित-कौसल्यादत्तपायसार्धान्वयस्यैवोचितत्वात् अन्तर्भावितण्यर्थत्वे भानञ्चैतदेक-

कौशल्यायै स कैकेय्यै अर्द्धमर्द्धं प्रयत्नतः ॥ १० ॥
ततः सुमित्रा सम्प्राप्ता जगृभ्रुः पौत्त्रिकं चरुम् ।
कौशल्या तु स्वभागार्द्धं ददौ तस्यै मुदान्विता ॥ ११ ॥
कैकेयी च स्वभागार्धं ददौ प्रीतिसमन्विता ।
उपभुज्य चरुं सर्वाः स्त्रियो गर्भसमन्विताः ॥ १२ ॥
देवता इव रेजुस्ताः स्वभासा राजमन्दिरे ।
दशमे मासि कौशल्या सुषुवे पुत्त्रमद्भुतम् ॥ १३ ॥

वाक्यतैव एवं कैकेय्यै कौशल्यादत्तार्द्धादवशिष्टमर्द्धं ददौ ततः कौशल्यादत्तावशिष्टस्य कैकेय्यै दत्तस्य यदर्द्धं तदर्द्धं विचार्य पुनरपि सुमित्रायै ददौ प्रापयामास इत्यर्थः अत्र चार्द्धपदावृत्तिर्बोध्या एवं हि एतद्वचनेन तस्यैकवाक्यता भवति तत्तद्दत्तभागजन्यस्य तत्तत्पुत्त्राधीनतौचित्येनैवमेवोचितं सेव्यसेवकभावलाभार्थं ततस्ततो न्यूनांशत्वस्य लक्ष्मणशत्रुघ्नयोरौचित्यात्स्वात्म स्वभागार्द्धमिति यथाश्रुतं न व्याख्यातम् कालिदासोऽपि 'सतेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम् । द्यावा पृथिव्योः प्रत्यग्रमहर्पतिरिवातपम् । अर्चिता तस्य कौशल्या प्रिया केकयवंशजा । अतः सम्भाविताः ताभ्यां सुमित्रामैच्छदीश्वरः । ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः । चरोरर्द्धार्द्धभागाभ्यां तामयोजयतामुभे । सा हि प्रणयवत्यासीत्सपत्न्योरुभयोरपि' इत्याह चरोरर्द्धार्द्धभागाभ्यामित्यस्य स्व स्व लब्धचरुभागाभ्यामित्यर्थः एवं च रामभरतौ त्रिलंशौ लक्ष्मणशत्रुघ्नावष्टमांशाविति सिद्धम् वाल्मीकीयव्याख्यातारौ कतकाचार्यश्रीरामाचार्यावप्येवमेवोचतुः अन्ये तु तद्व्याख्यातारः कौशल्यायै सम्पूर्णं पायसार्द्धं ददौ ततः पात्रस्थादर्धादर्द्धं सर्वपायसचतुर्थांशं सुमित्रायै दत्तवान् स्वयमेव ततः पात्रेऽवशिष्टस्य चतुर्थांशस्यार्द्धमष्टमांशं कैकेय्यै दत्तवान् ततः पुनरवशिष्टमर्द्धमष्टमांशरूपं पुनरपि सुमित्रायै दत्तवानिति यथाश्रुतग्राहिणो व्याचक्षते तेषामेतद्विरोधो रामलक्ष्मणयोरेव भरतशत्रुघ्नयोरेवैकवाक्यताया बीजालाभश्चावशिष्टार्धपदे क्वचित् षष्ठीतत्पुरुषः क्वचित्कर्मधारय इति वैषम्यञ्च ॥ ११ ॥

स्वभागार्द्धमिति प्राग्वत् ॥ १२ । १३ ॥

मधु मासे सिते पक्षे नवम्यां कर्कटे शुभे ।
पुनर्वस्वृक्षसहिते उच्चस्थे ग्रहपञ्चके ॥ १४ ॥
मेषं पूषणि संप्राप्ते पुष्पवृष्टिसमाकुले ।
आविरासीज्जगन्नाथः परमात्मा सनातनः ॥ १५ ॥
नीलोत्पलदलश्यामः पीतवासाश्चतुर्भुजः ।
जलजारुणनेत्रान्तः स्फुरत्कुण्डलमण्डितः ॥ १६ ॥
सहस्रार्कप्रतीकाशः किरीटी कुञ्चितालकः ।
शङ्खचक्रगदापद्मवनमालाविराजितः ॥ १७ ॥
अनुग्रहाख्यहृत्स्थेन्दुसूचितस्मितचन्द्रिकः ।
करुणारससम्पूर्णविशालोत्पललोचनः ।
श्रीवत्सहारकेयूरनूपुरादिविभूषणः ॥ १८ ॥
दृष्ट्वा तं परमात्मानं कौशल्या विस्मयाकुला ।
हर्षाश्रुपूर्णनयना नत्वा प्राञ्जलिरब्रवीत् ॥ १९ ॥

मधुमासे चैत्रे सिते शुक्ले कर्कटे कर्कलग्ने पुनर्वस्वृक्षसहिते पुनर्वसुनक्षत्रसहिते इति कर्कलग्नविशेषणम् ग्रहपञ्चके चन्द्रबुधव्यतिरिक्ते रविभौमगुरुशुक्रशनिरूपे तदुच्चस्थानानि च क्रमेण मेषमकरकर्कमीनतुलाख्यानि ॥ १४ ॥

सर्वग्रहाणोदयस्य रव्यधीनत्वात् तदुच्चं स्थानं स्फुटयति मेषमिति तेन सर्वेषामनन्तमत्वं सूचितम् पुष्पवृष्टिसमाकुले काले इत्यर्थः ॥१५ ॥

तत्र कौशल्यानुग्रहाय प्रथमं येन रूपेण प्रादुर्भूतस्तद्रूपमाह नीलोत्पलेति ॥ १६ । १७ ॥

अनुग्रहाख्येति भक्तानुग्रहाख्यो यो हृदयस्य इन्दुस्तस्य सूचिका स्मितरूपा चन्द्रिका यस्य सः स्मितं च ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः 'अलक्षितद्विजं धीरस्योत्तमानां स्मितं भवेत्' इति लक्षणम् ॥१८।१९

कौशल्योवाच ।

देवदेव ! नमस्तेऽस्तु शङ्खचक्रगदाधर ! ।
परमात्माच्युतोऽनन्तः पूर्णस्त्वं पुरुषोत्तमः ॥ २० ॥
वदन्त्यगोचरं वाचां बुद्ध्यादीनामतीन्द्रियम् ।
त्वां वेदवादिनः सत्तामात्रं ज्ञानैकविग्रहम् ॥ २१ ॥
त्वमेव मायया विश्वं सृजस्यवसि हंसि च ।
सत्त्वादिगुणसंयुक्तस्तुर्य एवामलः सदा ॥ २२ ॥

परमात्मा शुद्धबुद्धमुक्तस्वभावः अच्युतः स्वस्वरूपात्कदाऽपि न च्युतः 'शाश्वतं शिवमच्युतं' इति श्रुतेः अनन्तः अनन्तगुणः नित्यत्वाद्-न्तरहित इति पूर्णः देशकालापरिच्छेद्यः पुरुषेभ्य उत्तमः सर्वाधिष्ठान-त्वात् ॥ २० ॥

वाचां बुद्ध्यादीनामिन्द्रियाणां वागोचरं वदन्ति 'यतो वाचो निव-र्त्तन्ते अप्राप्य मनसा सह' इत्यादि श्रुतयः वागादिसर्वद्रष्टृत्वाच्च न तासां विषयः न हि घटादिप्रकाशको दीपो घटादिविषयो भवति अतएव त्वामतीन्द्रियं वेदवादिनो वेदज्ञा वदन्ति ते त्वां सत्तामात्रं सर्वत्र सत्सम्ब-न्धात् सदिति व्यवहारोपपादकं 'सर्वाः प्रजाः सदायतना' इति श्रुतेः ज्ञानैकविग्रहं सत्यं ज्ञानं इति श्रुतेः वदन्ति ॥ २१ ॥

त्वमिति त्वमेव मायया सत्त्वादिगुणसंयुक्तः तत्तद्गुणसंयुक्तब्रह्मवि-ष्णुरुद्रात्मकः सन् सृष्ट्यादि करोषि तत्र रजःप्रधानो ब्रह्मा सत्त्वप्रधानो विष्णुः तमःप्रधानो रुद्रः विष्णोर्हन्त्रादिकर्तृत्वमपि पालकार्थमेव दुष्ट-निग्रहं विना शिष्टपालनायोगात् परमार्थतस्तु निर्गुण एव त्वमित्याह तुर्य एवेति तत्तद्गुणसंयुक्तोक्तमूर्त्तित्रयापेक्षया चतुर्थः इत्यर्थः यद्वा जाग्रत्स्वप्नसुषुप्त्यवस्थाभ्यो विश्वतैजसप्राज्ञेभ्यस्तुर्य्य इत्यर्थः 'न बहिःप्रज्ञं नान्तःप्रज्ञं नानुभयतः प्रज्ञं' इति श्रुतेः इयं हि क्रमेण जाग्रत्स्वप्नसुषु-प्त्यवस्थाः निरूपयति अतएव सदामलः मायागुणास्पृष्टत्वादित्यर्थः ॥२२॥

करोषीव न कर्त्ता त्वं गच्छसीव न गच्छसि ।
न शृणोषि शृणोषीव पश्यसीव न पश्यसि ॥ २३ ॥
अप्राणो ह्यमनाः शुभ्र इत्यादि श्रुतिरब्रवीत् ।
समः सर्वेषु भूतेषु तिष्ठन्नपि न लक्ष्यसे ॥ २४ ॥
अज्ञानध्वान्तचित्तानां व्यक्त एव सुमेधसाम्
जठरे तव दृश्यन्ते ब्रह्माण्डाः परमाणवः ॥ २५ ॥
त्वं ममोदरसम्भूत इति लोकान् विडम्बसे ।
भक्तेषु पारवश्यन्ते दृष्टं मेऽद्य रघूत्तम ! ॥ २६ ॥

अमलत्वं सूचितं निर्विकारत्वमेव स्फुटयति करोषीवेति माया-गतकृतिगत्यादिभिस्तद्वानिव भासि वस्तुतो विकारहीनत्वान्न कर्त्तेत्यादि 'अकुर्वन् सर्वकृच्छुद्धस्तिष्ठत्त्वेति धावतः । मायया सर्वशक्तित्वादजः स बहुधा मत' इति अभियुक्तिः ॥ २३ ॥

निर्विकारत्वे हेतुः श्रुतिदर्शित इत्याह अप्राण इति 'दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रोऽक्षरात्परतः पर' इति मुण्डकश्रुतिः प्राणाद्युपाधिरहितः अतएव कृतिगत्यादिरहित इति भावः अक्षरमत्र माया ततः परतरः तद्गुणास्पृष्टः सर्वतः पर उत्कृष्ट इति श्रुत्यर्थः सर्वभूतेषु समः सन् घट इत्यादि प्रतीतेः सर्वत्रानुस्यूतत्वात् अतः सर्वत्र तिष्ठन्नपि ॥ २४ ॥

अज्ञानध्वान्तचित्तानां अज्ञानरूपान्धकारवच्चित्तैः शेषे षष्ठी तैर्न लक्ष्यसे सुमेधसान्तत्त्वज्ञानां व्यक्त एव 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि' इति श्रुतेः यस्य तव जठरे ब्रह्माण्डाः परमाणव इव दृश्यन्ते ॥ २५ ॥

स त्वं ममोदरसम्भूत इति लोकान् मम माहात्म्यं विडम्बसे ख्यापयसि एतत्सर्वं भक्तपारवश्यादित्याह भक्तेष्विति ॥ २६ ॥

संसारसागरे मग्ना पतिपुत्रधनादिषु।
भ्रमामि मायया तेऽद्य पादमूलमुपागता॥ २७॥
देव! त्वद्रूपमेतन्मे सदा तिष्ठतु मानसे।
आवृणोतु न मां माया तव विश्वविमोहिनी॥ २८॥
उपसंहर विश्वात्मन्नदो रूपमलौकिकम्।
दर्शयस्व महानन्द! बालभावं सुकोमलम्॥ २९॥
ललितालिङ्गनालापैस्तरिष्याम्युत्कटं तमः।

श्रीभगवानुवाच।

यद्यदिष्टं तवास्त्यम्ब! तत्तद्भवतु नान्यथा॥ ३०॥
अहन्तु ब्रह्मणा पूर्व्वं भूमेर्भारापनुत्तये।
प्रार्थितो रावणं हन्तुं मानुषत्वमुपागतः॥ ३१॥
त्वया दशरथेनाहं तपसाऽऽराधितः पुरा।
मत्पुत्रत्वाभिकाङ्क्षिण्या तथा कृतमनिन्दिते!॥ ३२॥

यद्यपि ते माययाऽपत्यादिषु मग्ना तद्विषयोत्कटेच्छावती संसारसागरे भ्रमामि तथाप्यद्य ते पादमूलमागता तरिष्यामीति मन्ये इति शेषः॥ २७॥

एतत्स्वरूपं शङ्खचक्रगदाधरत्वविशिष्टम् आशास्यान्तरमाह आवृणोत्विति॥ २८॥

उपसंहारे हेतुरलौकिकमिति सर्वलोकैर्दुर्दर्शं तेजोमयत्वादित्यर्थः॥ २९॥

ननु त्वत्तारणार्थमेवं रूपपरिग्रह इति चेत्तत्राह ललितेति तमः अज्ञानमूलं संसारम्॥ ३०॥

तदिष्टरूपभजने हेतुमाह अहं त्विति मानुषत्वमुपागतः मानुषत्वं प्राप्तुं कृतमतिः॥ ३१॥

तर्हि प्रथममेव किं तथा रूपं न कृत मत आह त्वयेति अहं पुत्रो यस्यास्तद्भावो मत्पुत्रत्वमतस्तत्प्रकटीकर्त्तुं तथा कृतमित्यर्थः॥ ३२॥

रूपमेतत्त्वया दृष्टं प्राक्तनं तपसः फलम्।
मद्दर्शनं विमोक्षाय कल्पते ह्यन्यदुर्लभम्॥ २३॥
संवादमावयोर्यस्तु पठेद्वा शृणुयादपि।
स याति मम सारूप्यं मरणे मत्स्मृतिं लभेत्॥ २४॥
इत्युक्त्वा मातरं रामो बालो भूत्वा रुरोद ह।
बालत्वेऽपीन्द्रनीलाभो विशालाक्षोऽतिसुन्दरः॥ २५॥
बालारुणप्रतीकाशो लालिताखिललोकपः।
अथ राजा दशरथः श्रुत्वा पुत्रोद्भवोत्सवम्।
आनन्दार्णवमग्नोऽसावाययौ गुरुणा सह॥ २६॥
रामं राजीवपत्राक्षं दृष्ट्वा हर्षाश्रुसंप्लुतः।
गुरुणा जातकर्माणि कर्तव्यानि चकार सः॥ २७॥
कैकेयी चाथ भरतमसूत कमलेक्षणा।
सुमित्रायां यमौ जातौ पूर्णेन्दुसदृशाननौ॥ २८॥
तदा ग्रामसहस्राणि ब्राह्मणेभ्यो मुदा ददौ।
सुवर्णानि च रत्नानि वासांसि सुरभीः शुभाः॥ २९॥

प्राक्तन तपसः फलभूतमेतद्रूपं त्वया दृष्टम् ननु त्वद्दर्शनमात्रं न पुरुषार्थोऽत आह मदिति एवं रूपस्य मम दर्शनमन्यैस्तपोहीनैर्दुर्लभं विमोक्षाय कल्पते चित्तशुद्धिद्वारा तत्त्वमस्यादिवाक्यज्ञानसम्पादकत्वेनेति भावः॥ २२। २४॥

भक्तानुग्रहार्थं तद्ध्येयं मायिकं भगवतो रूपमाह बालत्वेऽपीति॥२

लालिताखिललोकपः स्वावतरणेन लालिता तोषिता अखिललोकपा इन्द्रादयो येन सः पुत्रोद्भवः पुत्रोत्पत्तिस्तद्रूपमुत्सवम्॥ २६॥

राजीवं कमलं गुरुणेति करणे तृतीया जातकर्माणि बहुवचनेन नामकरणपर्य्यन्तकर्त्तव्यषष्ठीपूजादिसंग्रहः॥ २८। २८॥

सुरभीर्गाः॥ २९

यस्मिन् रमन्ते मुनयो विद्यया ज्ञानविप्लवे।
तं गुरुः प्राह रामेति रमणाद्राम इत्यपि ॥ ४० ॥
भरणाद्भरतो नाम लक्ष्मणं लक्षणान्वितम्।
शत्रुघ्नं शत्रुहन्तारमेवं गुरुरभाषत ॥ ४१ ॥
लक्ष्मणो रामचन्द्रेण शत्रुघ्नो भरतेन च।
द्वन्द्वीभूय चरन्तौ तौ पायसांशानुसारतः ॥ ४२ ॥
रामस्तु लक्ष्मणेनाथ विचरन् बाललीलया।
रमयामास पितरौ चेष्टितैर्मुग्धभाषितैः ॥ ४३ ॥
भाले स्वर्णमयाश्वत्थपर्णमुक्ताफलप्रभम्।
कण्ठे रत्नमणिव्रातमध्यद्वीपिनखाञ्चितम् ॥ ४४ ॥
कर्णयोः स्वर्णसम्पन्नरत्नार्जुनजटालुकम्।

अथ नामकरणे नाम्नामन्वर्थत्वं दर्शयति यस्मिन्निति विद्यया तत्त्व-ज्ञानेन अज्ञानविप्लवे अज्ञाननाशे तन्निमित्तं यस्मिन् योगिनो रमन्ते-इत्येकः योगान्तरमाह रमणात् भक्तानां चक्षुःसौन्दर्येण रमणाद्राम इत्यपि योग इति शेषः रमणं रामः भावे घञ् तं करोति राम-यति तत्करोतीति णिच् रमयतीति रामः णिजन्तादच् तथा च भक्तान् रमयतीति फलितोऽर्थः ॥ ४० । ४१ ॥

पायसांशानुसारतः कौसल्यापायसांशत्वाल्लक्ष्मणो रामानुचरः कैकेयीपायसांशत्वाच्छत्रुघ्नो भरतानुचर इत्यर्थः ॥ ४२ । ४३ ॥

स्वर्णमयाश्वत्थपर्णस्य प्रान्ते संलग्नानि यानि मुक्ताफलानि तैः प्रभा शोभा यस्य तम् रत्नमणीनां व्रातः समूहस्तन्मध्ये वर्तमानं द्वीपिनखं व्याघ्रनखं तेनाञ्चितं भूषितम् यत्तु 'व्याघ्रव्याघ्राननाक्षौ सिंहाननोद्गमनिकेतनात् इत्यम्। भूषणेषु बालेऽदृष्टौ यदीच्छे चिरजीवितं' इति तत्तु भूषणेषु व्याघ्राद्याकारचितनिषेधपरम् नतु तत्तद्व्याघ्रादयव-वनिषेधकमित्याहुः ॥ ४४ ॥

कर्णे सम्पन्नानि घटितानि रत्नानि यस्मिन् तद् अर्जुनवृक्षस्य जटालुकमपक्वफलं तदाकारं भूषणं यस्य रत्नार्जुनजटालुकमिति पाठान्-

सिञ्जानमणिमञ्जीरकटिसूत्राङ्गदैर्वृतम् ॥ ४५ ॥
स्मितवक्त्राल्पदशनमिन्द्रनीलमणिप्रभम् ।
अङ्गणे रिङ्गमाणन्तन्तर्णकाननु सर्वतः ॥ ४६ ॥
दृष्ट्वा दशरथो राजा कौशल्या मुमुदे तदा ।
भोक्ष्यमाणो दशरथो राममेहीति चासकृत् ॥ ४७ ॥
आह्वयत्यतिहर्षेण प्रेम्णा नायाति लीलया ।
आनयेति च कौशल्यामाह सा सस्मिता सुतम् ॥ ४८ ॥
धावत्यपि न शक्नोति स्प्रष्टुं योगिमनोगतिम् ।
प्रहसन् स्वयमायाति कर्दमाङ्कितपाणिना ॥ ४९ ॥
किञ्चिद्गृहीत्वा कवलं पुनरेव पलायते ।
कौशल्या जननी तस्य मासि मासि प्रकुर्वती ॥ ५० ॥
वायनानि विचित्राणि समलङ्कृत्य राघवम् ।
अपूपान्मोदकान् कृत्वा कर्णशष्कुलिकास्तथा ।
कर्णपूरांश्च विविधा वर्षवृद्धौ च वायनम् ॥ ५१ ॥

रम् अर्थस्तुल्यः सिञ्जानाः शब्दयुक्ताः ये मणयस्तद्युक्तैः मञ्जीरकटि-सूत्राङ्गदैर्वृतं मञ्जीरः पादभूषणं अङ्गदो बाहुभूषणम् । ४५ ॥

स्मितं स्मितयुक्तं वक्त्रं यस्य स चासावल्पदशनश्च तं तर्णकान् गोव-त्सानन्वनु तत्पुच्छप्रान्तधरणपूर्वं सर्वतोरिङ्गमाणं परितो जानुगत्या खेल-न्तम् ॥ ४६ ॥

इहेति तात्पर्यं तस्य क्रीडाभीत्वर्थः ॥ ४७ ॥

प्रेम्णा आहूतोऽपीति शेषः लीलया क्रीडावक्रया नायाती-त्यर्थः ॥ ४८ ॥

योगिमनोगतिं योगिमनोविषयं कर्दमाङ्कितपाणिनोपलक्षित इति शेषः ॥ ४९ । ५० ॥

पुत्रादिकल्याणमुद्दिश्य सधवाभ्यो दीयमानभक्ष्यविशेषवायनानि प्रकुर्वतीव बभूवेतिशेषः कर्णशष्कुलीः कर्णपूरादयो भक्ष्यविशेषाः वर्षवृद्धिः वर्षारम्भदिनकर्त्तव्यं कर्म ॥ ५१ ॥

स्तहकृत्यं तया त्यक्तं तस्य चापल्यकारणात् ।
एकदा रघुनाथोऽसौ गतो मातरमन्तिके ॥ ५२ ॥
भोजनं देहि मे मातः ! न श्रुतं कार्यसक्तया ।
ततः क्रोधेन भाण्डानि लगुडेनाहनत्तदा ॥ ५३ ॥
शिक्यस्थं पातयामास गव्यं च नवनीतकम् ।
लक्ष्मणाय ददौ रामो भरताय यथाक्रमम् ॥ ५४ ॥
शत्रुघ्नाय ददौ पश्चाद्दधिदुग्धं तथैव च ।
सूदेन कथितं मात्रे हास्यं कृत्वा प्रधावति ॥ ५५ ॥
आगतां तां विलोक्याथ ततः सर्वैः पलायितम् ।
कौशल्या धावमानापि प्रस्खलन्ती पदे पदे ॥ ५६ ॥
रघुनाथं करे धृत्वा किञ्चिन्नोवाच भामिनी ।
बालभावं समाश्रित्य मन्दं मन्दं रुरोद ह ॥ ५७ ॥
ते सर्वे लालिता मात्रा गाढमालिङ्ग्य यत्नतः ।
एवमानन्दसन्दोहजगदानन्दकारकः ॥ ५८ ॥
मायाबालवपुर्धृत्वा रमयामास दम्पती ।
अथ कालेन ते सर्वे कौमारं प्रतिपेदिरे ॥ ५९ ॥
उपनीता वशिष्ठेन सर्वविद्याविशारदाः ।
धनुर्वेदे च निरताः सर्वशास्त्रार्थवेदिनः ॥ ६० ॥

स्वगृहकृत्यत्यागकारणं चापल्यमेव दर्शयति एकदेति मातरमन्तिके मातुःसमीपे इत्यर्थः द्वितीया छान्दसी ॥ ५२ ॥

अहनत् अहन्नित्यर्थः गणकार्य्यस्यानित्यत्वाच्छपो लुक् ॥ ५३ ॥

गव्यं दधिदुग्धम् ॥ ५४ ॥

सूदः सूपकारः मात्रे कौशल्यायै ॥ ५५—५८ ॥

दम्पती कौशल्यादशरथौ कौमारं पञ्चवर्षाधिकत्वम् ॥ ५९—६१ ॥

बभूवुर्जगतां नाथा लीलया नररूपिणः ।
लक्ष्मणस्तु सदा राममनुगच्छति सादरम् ॥ ६१ ॥
सेव्यसेवकभावेन शत्रुघ्नो भरतं तथा ।
रामस्त्वापधरो नित्यं तूणीबाणान्वितः प्रभुः ॥ ६२ ॥
अश्वारूढो वनं याति मृगयायै सलक्ष्मणः ।
हत्वा दुष्टमृगान् सर्वान् पित्रे सर्वं न्यवेदयत् ॥ ६३ ॥
प्रातरुत्थाय सुस्नातः पितरावभिवाद्य च ।
पौरकार्याणि सर्वाणि करोति विनयान्वितः ॥ ६४ ॥
बन्धुभिः सहितो नित्यं भुक्त्वा मुनिभिरन्वहम् ।
धर्मशास्त्ररहस्यानि शृणोति व्याकरोति च ॥ ६५ ॥
एवं परात्मा मनुजावतारो मनुष्यलोकाननुसृत्य सर्वं ।
चक्रेऽविकारी परिणामहीनो विचार्यमाणो न करोति किञ्चित् ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे बालकाण्डे
चतुर्थः सर्गः ।

न करोतीत्यत्र हेतुरविकारी परिणामहीन इति अविकारीत्यस्यैव व्याख्यानं परिणामहीन इति ॥ ६६ ॥

इति श्रीमन्मुकुन्दराजविप्रदुरवसमर्थैत्यादिवि० श्रीरामवर्मणः कृतौ अध्यात्मरामायणसेतौ बालकाण्डे
चतुर्थः सर्गः ।

अथ पञ्चमः सर्गः ।

श्रीमहादेव उवाच ।

कदाचित्कौशिकोऽभ्यागादयोध्यां ज्वलनप्रभः(१) ।
द्रष्टुं रामं परात्मानं जातं ज्ञात्वा स्वमायया ॥ १ ॥
दृष्ट्वा दशरथो राजा प्रत्युत्थायाचिरेण तु ।
वशिष्ठेन समागम्य पूजयित्वा यथाविधि ॥ २ ॥
प्रत्युवाच(२) मुनिं राजा प्राञ्जलिर्भक्तिनम्रधीः ।
कृतार्थोऽस्मि मुनीन्द्राहं त्वदागमनकारणात् ॥ ३ ॥
त्वद्विधा यद्गृहं यान्ति तत्रैवायान्ति सम्पदः ।
यदर्थमागतोऽसि त्वं ब्रूहि सत्यं करोमि तत् ॥ ४ ॥
विश्वामित्रोऽपि तं प्रीतः प्रत्युवाच महामतिः ।
अहं पर्वणि संप्राप्ते दृष्ट्वा यष्टुं सुरान् पितॄन् ॥ ५ ॥
यदारभे तदा दैत्या विघ्नं कुर्वन्ति नित्यशः ।
मारीचश्च सुबाहुश्च परे चानुचरास्तयोः ॥ ६ ॥

अथ रामं नेतुं विश्वामित्रागमनमाह कदाचिदिति रामं स्वमायया जातं ज्ञात्वा तं द्रष्टुमभ्यगात् इत्यन्वयः ॥ १ ॥

अचिरेण शीघ्रं प्रदर्शनाव्यवहितोत्तरकाले प्रत्युत्थाय वशिष्ठेन समागम्य सहितो भूत्वेति यावत् पूजने मुनिः कर्म ॥ २ ॥

नम्रशरीरत्वेन नम्रधीत्वानुमानं त्वदागमनरूपात्कारणादित्यर्थः ॥ ३ ॥

तत्रैव तद्गृह एव भवदाद्यागमनस्य सकलसम्पत्प्रतिबन्धकदुरितनाशकत्वादिति भावः तत्करोमीति सत्यं ब्रवीमीति शेषः ॥ ४ ॥

दृष्ट्वा पर्वप्राप्तिं ज्ञात्वा सुरादीन्यष्टुम् ॥ ५ ॥

यदारभे तदेत्यन्वयः ॥ ६ ॥

---

(१) ज्वलदग्निप्रभां इत्यपि पाठः । (२) अभिवाद्य इति वा पाठः ।

अतस्त्वयोर्वधार्थाय ज्येष्ठं रामं प्रयच्छ मे ।
लक्ष्मणेन सह भ्राता तव श्रेयो भविष्यति ॥ ७॥
वशिष्ठेन सहामन्त्र्य दीयतां यदि रोचते ।
पप्रच्छ गुरुमेकान्ते राजा चिन्तापरायणः ॥ ८ ॥
किं करोमि ? गुरो ! राममत्यक्तुं नोत्सहते मनः ।
बहुवर्षसहस्रान्ते कष्टेनोत्पादिताः सुताः ॥ ९ ॥
चत्वारोऽमरतुल्यास्ते तेषां रामोऽतिवल्लभः ।
रामस्त्वितो गच्छति चेन्न जीवामि कथञ्चन ॥ १० ॥
प्रत्याख्यातो ? यदि मुनिः शापं दास्यत्यसंशयम् ।
कथं श्रेयो भवेन्मह्यमसत्यञ्चापि न स्पृशेत् ॥ ११ ॥

वशिष्ठ उवाच ।

शृणु राजन् ! देवगुह्यं गोपनीयं प्रयत्नतः ।
रामो न मानुषो जातः परमात्मा सनातनः ॥ १२ ॥
भूमेर्भारावताराय ब्रह्मणा प्रार्थितः पुरा ।
स एव जातो भवने कौशल्यायां तवानघ ! ॥ १३ ॥

तवेति तदैव तव श्रेय इत्यर्थः ॥ ७ ॥

पप्रच्छेत्यस्य विश्वामित्रवचोऽनन्तरमित्यादि ॥ ८ । ९

इतः मत्सन्निधानात् ॥ १० ॥

प्रत्याख्यातो यदीति भविष्यतीति शेषः श्रेयो रामवियोगकृतमरणा-भावरूपं असत्यं मुनिप्रत्याख्यानजपापं तत्स्पर्शाभावं च ॥ ११ ॥

महर्षिरिति रामः पूर्वमपि मानुष एवेदानीं पुनरपि मानुषो जात इति न किन्तु सनातनो निर्विकारत्वात्सदैकरूपो यः परमात्मा स एव ब्रह्मणा पुरा प्रार्थितः सन् तव भवने जात इत्यन्वयः ॥ १२ । १३ ॥

त्वन्तु प्रजापतिः पूर्वं काश्यपो ब्रह्मणः सुतः।
कौशल्या चादितिर्देवमाता पूर्वं यशस्विनी।
भवन्तौ तप उग्रं वै तेपाथे बहुवत्सरम् ॥ १४ ॥
अग्राम्यविषयौ विष्णुपूजाध्यानैकतत्परौ।
तदा प्रसन्नो भगवान् वरदो भक्तवत्सलः ॥ १५ ॥
वृणीष्व वरमित्युक्ते त्वं मे पुत्रो भवामल!।
इति त्वया याचितोऽसौ भगवान् भूतभावनः ॥ १६ ॥
तथेत्युक्त्वाद्य पुत्रस्ते जातो रामः स एव हि।
शेषस्तु लक्ष्मणो राजन्! राममेवान्वपद्यत ॥ १७ ॥
जातौ भरतशत्रुघ्नौ शङ्खचक्रगदाश्रितः।
योगमायापि सीतेति जाता जनकनन्दिनी ॥ १८ ॥
विश्वामित्रोऽपि रामाय तां योजयितुमागतः।
एतद्गुह्यतमं राजन्न वक्तव्यं कदाचन ॥ १९ ॥
अतः प्रीतेन मनसा पूजयित्वाथ कौशिकम्।
प्रेषयस्व रमानाथं राघवं सहलक्ष्मणम् ॥ २० ॥
वशिष्ठेनैव मुक्तस्तु राजा दशरथस्तदा।
कृतकृत्यमिवात्मानं मेने प्रमुदितान्तरः ॥२१ ॥

भगवदवतारयोग्यतामाह त्वन्त्विति भवन्तौ तेपाथे तपः कृतवन्तौ ॥१४।
अग्राम्यविषयौ ग्राम्यविषयाणामभक्तौ तेन ब्रह्मचर्यं सूचितम् ॥।१५।१६।
शेषो लक्ष्मणः शेषांशो लक्ष्मणः इत्यर्थः ॥ १७ ॥
शङ्खचक्रगदाश्रितः शङ्खभिन्नौ चक्रगदयोरावितिं शेषः तौ भरतशत्रुघ्नौ आत्मविदर्थः ॥ १८ । १९ । २० ॥
प्रमुदितान्तरः हृष्टचित्तः ॥ २१ ॥

आहूय रामरामेति लक्ष्मणेति च सादरम् ।
आलिङ्ग्य मूर्ध्न्यवघ्राय कौशिकाय समर्पयत् ॥ २२ ॥
ततोऽतिहृष्टो भगवान्विश्वामित्रः प्रतापवान् ।
आशीर्भिरभिनन्द्याथ आगतौ रामलक्ष्मणौ ॥ २३ ॥
गृहीत्वा चापतूणीरबाणखड्गधरौ ययौ ।
किञ्चिद्देशमतिक्रम्य राममाहूय भक्तितः ॥ २४ ॥
ददौ बलां चातिबलां विद्ये द्वे देवनिर्मिते ।
ययोर्ग्रहणमात्रेण क्षुत्क्षामादि न जायते ॥ २५ ॥
तत उत्तीर्य गङ्गां ते ताडकावनमागमन् ।
विश्वामित्रस्तदा प्राह रामं सत्यपराक्रमम् ॥ २६ ॥
अत्रास्ति ताडका नाम राक्षसी कामरूपिणी ।
बाधते लोकमखिलं जहि तामविचारयन् ॥ २७ ॥
तथेति धनुरादाय सगुणं रघुनन्दनः ।
टङ्कारमकरोत्तेन शब्देनापूरयद्वनम् ॥ २८ ॥

मूर्ध्न्यवघ्रायेति 'प्रजापतेस्त्वां हिङ्कारेणावजिघ्रामि सहस्रायुषोऽसौ जीव शरदः शतम्' इत्यवघ्राणमन्त्रलिङ्गेन तस्य पुत्राद्यायुर्वृद्धिकरत्वात्तत्कार्यमिति बोध्यम् ॥ २२ ॥

आगतौ समीपं प्राप्तौ रामलक्ष्मणौ ॥ २३ ॥

गृहीत्वा ययौ जगामेत्यन्वयः ॥ २४ ॥

बलामिति बला विद्या शरीरसामर्थ्यसम्पादनद्वारेण बाधिका 'बलमेऽस्तु तनूषु न' इति मन्त्रलिङ्गात् अतिबला तु क्षुत्पिपासादिद्वन्द्वनिवर्तकाख्या ॥ २५ । २६ ॥

अविचारयन् स्त्रिया अवध्यत्वमविचारयन्नित्यर्थः ॥ २७ ॥

सगुणं आरूढज्यं तेन शब्देन धनुःशब्देन ॥ २८ ॥

तच्छ्रुत्वासहमाना सा ताड़का घोररूपिणी।
क्रोधसंमूर्छिता राममभिदुद्राव मेघवत्॥ २९ ॥
तामेकेन शरेणाशु ताड़यामास वक्षसि।
पपात विपिने घोरा वमन्ती रुधिरं बहु॥ ३० ॥
ततोऽतिसुन्दरी यक्षी सर्वाभरणभूषिता।
शापान्निशाचरतां प्राप्ता मुक्ता रामप्रसादतः॥ ३१ ॥
नत्वा रामं परिक्रम्य गता रामाज्ञया दिवम्॥ ३२ ॥
ततोऽतिहृष्टः परिरभ्य रामं मूर्द्धन्यवघ्राय विचिन्त्य किञ्चित्।
सर्वास्त्रजालं सरहस्यमन्त्रं प्रीत्याऽभिरामाय ददौ मुनीन्द्रः ३३

इत्यध्यात्मरामायणे उमामहेश्वरसंवादे बालकाण्डे
पञ्चमः सर्गः।

असहमानेति छेदः क्रोधसंमूर्च्छिता अतिक्रुद्धा॥ २९—३२।

ततस्ताड़कावधकर्मवशादतिहृष्टो विश्वामित्रः किञ्चिद्विचिन्त्य रामगुरुत्वेन स्वस्यान्तकाले मुक्तिपदप्राप्तियोग्यतालाभं विचार्येत्यर्थः अभिरामाय रामाय सरहस्यमन्त्रमस्त्रजालं ददाविव्यन्वयः॥ ३३॥

इति श्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिवि० श्रीरामवर्मणः
कृतौ अध्यात्मरामायणे सेतौ बालकाण्डे
पञ्चमः सर्गः।

षष्ठः सर्गः ।

श्रीमहादेव उवाच ।

तत्र कामाश्रमे रम्ये कानने मुनिसङ्कुले ।
उषित्वा रजनीमेकां प्रभाते प्रस्थिताः शनैः ॥ १ ॥
सिद्धाश्रमं गताः सर्वे सिद्धचारणसेवितम् ।
विश्वामित्रेण सन्दिष्टा मुनयस्तन्निवासिनः ॥ २ ॥
पूजां च महतीं चक्रू रामलक्ष्मणयोर्द्रुतम् ।
श्रीरामः कौशिकं प्राह मुने ! दीक्षां प्रविश्यताम् ॥ ३ ॥
दर्शयस्व महाभाग ! कुतस्तौ राक्षसाधमौ ।
तथेत्युक्त्वा मुनिर्यष्टुमारेभे मुनिभिः सह ॥ ४ ॥
मध्याह्ने दृदृशाते तौ राक्षसौ कामरूपिणौ ।
मारीचश्च सुबाहुश्च वर्षन्तौ रुधिरास्थिनी ॥ ५ ॥
रामोऽपि धनुरादाय द्वौ बाणौ सन्दधे सुधीः ।
आकर्णान्तं समाकृष्य विससर्ज तयोः पृथक् ॥ ६ ॥

तत्र कामाश्रमे ताड़कावधस्थानभूते कामाश्रमाख्ये कामस्य रुद्र-ध्यानकृतासस्मादके वने ताड़काभयादेव मुनिसङ्कुले ॥ १ ॥

सिद्धाश्रमं विश्वामित्रवासस्थानं वामनाश्रमाख्यं तन्निवासिनः सिद्धाश्रमवासिनः ॥ २ । ३ ॥

कुतः आगच्छतः कस्मिन् काले इति शेषः ॥ ४ ॥

दृदृशाते दृष्टौ ॥ ५ ॥

द्वौ बाणौ सन्दधे ईषत्कालान्तरेऽपि युगपदिव ॥ ६ ॥

तथोरेवास्तु मारीचं भ्रामयन् शतयोजनम्।
पातयामास जलधौ तदद्भुतमिवाभवत्॥ ७॥
द्वितीयोऽग्निमयो बाणः सुबाहुमजयत् क्षणात्।
अपरे लक्ष्मणेनाशु हतास्तदनुयायिनः॥ ८॥
पुष्पौघैराकिरन्देवा राघवं सहलक्ष्मणम्।
देवदुन्दुभयो नेदुस्तुष्टुवुः सिद्धचारणाः॥ ९॥
विश्वामित्रस्तु संपूज्य पूजार्हं रघुनन्दनम्।
अङ्के निवेश्य चालिङ्ग्य भक्त्या बाष्पाकुलेक्षणः॥ १०॥
भोजयित्वा सह भ्रात्रा रामं पक्वफलादिभिः।
पुराणवाक्यैर्मधुरैर्निनाय दिवसत्रयम्॥ ११॥
चतुर्थेऽहनि सम्प्राप्ते कौशिको राममब्रवीत्।
राम! राम! महायज्ञं द्रष्टुं गच्छामहे वयम्॥ १२॥
विदेहराजनगरे जनकस्य महात्मनः।
तत्र माहेश्वरं चापमस्ति न्यस्तं पिनाकिना॥१३॥
द्रक्ष्यसि त्वं महासत्त्वं पूज्यसे जनकेन च।
इत्युक्त्वा मुनिभिस्ताभ्यां ययौ गङ्गासमीपगम्॥ १४॥
गौतमस्याश्रमं पुण्यं यत्राहल्या स्थिता तपः।

जलधौ तत्समीपे सम्पूर्णं शतयोजनम् 'क्षिप्तः सागरतोयषि' इति वाल्मीक्युक्तेः॥ ७॥

अग्निमय आग्नेयास्त्रयुक्तः अजयत् हतवानिति यावत्॥८-१२॥

न्यस्तं तन्नगराधिपे राज्ञि कस्मिंश्चित् न्यासत्वेन स्थापितम्॥१३॥

महासत्त्वमिति इदं गङ्गासमीपमिति गौतमाश्रमविशेषणम्॥१४॥

दिव्यपुष्पफलोपेतपादपैः परिवेष्टितम्॥ १५ ॥
मृगपक्षिगणैर्हीनं नानाजन्तुविवर्जितम्।
दृष्ट्वोवाच मुनिं श्रीमान् रामो राजीवलोचनः॥ १६ ॥
कस्यैतदाश्रमपदं भाति भास्वच्छुभं महत्।
पत्रपुष्पफलैर्युक्तं जन्तुभिः परिवर्जितम्॥ १७ ॥
आह्लादयति मे चेतो भगवन्! ब्रूहि तत्त्वतः॥ १८ ॥

विश्वामित्र उवाच।

शृणु राम! पुरावृत्तं गौतमो लोकविश्रुतः।
सर्वधर्मभृतां श्रेष्ठस्तपसाराधयन् हरिम्॥ १९ ॥
तस्मै ब्रह्मा ददौ कन्यामहल्यां लोकसुन्दरीम्।
ब्रह्मचर्येण सन्तुष्टः शुश्रूषणपरायणाम्॥ २० ॥
तया सार्द्धमिहावात्सीत् गौतमस्तपतां वरः।
शक्रस्तु तां धर्षयितुमन्तरं प्रेप्सुरन्वहम्॥ २१ ॥
कदाचिन्मुनिवेशेन गौतमे निर्गते गृहात्।
धर्षयित्वाऽथ निरगात्त्वरितं मुनिरप्यगात्॥ २२ ॥
दृष्ट्वा यान्तं स्वरूपेण मुनिः परमकोपनः।

यत्राहल्या तप आस्थितेत्यन्वयः॥ १५ ॥

नानाजन्तुभिः नानाप्रकारैः क्षुद्रप्राणिभिरपि हीनं गौतमशापा-
दिति भावः॥ १६ ।१७ । १८ ॥

तपसा हरिमाराधयन् स्थित इति शेषः॥ १९ । २० ॥

अवात्सीत् वासं कृतवान् तामहल्यां धर्षयितुमुपभोक्तुमन्तरं शुश्रू-
षादिच्छद्रूपं प्रेप्सुरासीदिति शेषः॥ २१ ॥

गौतमे गृहान्निर्गते सति मुनिवेशेन तद्गृहं प्रविश्य तामहल्यां
धर्षयित्वोपभुज्य निरगात् मुनिरपि स्वगृहमगात्॥ २२ ॥

पप्रच्छ कस्त्वं? दुष्टात्मन्! मम रूपधरोऽधमः । ॥ २३ ॥
सत्यं ब्रूहि न चेद्भस्म करिष्यामि न संशयः ।
सोऽब्रवीद्देवराजोऽहं पाहि मां कामकिङ्करम् ॥ २४ ॥
कृतं जुगुप्सितं कर्म मया कुत्सितचेतसा ।
गौतमः क्रोधताम्राक्षः शशाप दिविजाधिपम् ॥ २५ ॥
योनिलम्पट! दुष्टात्मन्! सहस्रभगवान् भव ।
शप्त्वा तं देवराजानं प्रविश्य स्वाश्रमं द्रुतम् ॥ २६ ॥
दृष्ट्वाऽहल्यां वेपमानां प्राञ्जलिं गौतमोऽब्रवीत् ।
दुष्टे! त्वं तिष्ठ दुर्वृत्ते! शिलायामाश्रमे मम ॥ २७ ॥
निराहारा दिवारात्रं तपः परममास्थिता ।
आतपानिलवर्षादिसहिष्णुः परमेश्वरम् ॥ २८ ॥
ध्यायन्ती राममेकाग्रमनसा हृदि संस्थितम् ।
नानाजन्तुविहीनोऽयमाश्रमो मे भविष्यति ॥ २९ ॥
एवं वर्षसहस्रेषु ह्यनेकेषु गतेषु च ।
रामो दाशरथिः श्रीमानागमिष्यति सानुजः ॥ ३० ॥
यदा त्वदाश्रयशिलां पादाभ्यामाक्रमिष्यति ।
तदैव धूतपापा त्वं रामं संपूज्य भक्तितः ॥ ३१ ॥
परिक्रम्य नमस्कृत्य स्तुत्वा शापाद्विमोक्ष्यसे ।
पूर्ववन्मम शुश्रूषां करिष्यसि यथा सुखम् ॥ ३२ ॥

स्वरूपेण स्वस्यात्मनो गौतमस्य रूपेण दुष्टात्मत्वे हेतुर्मद्रूपधरत्वम् ॥ २२ ॥

कामकिङ्करं कामपरवशतयाऽयुक्तकर्मकरमित्यर्थः ॥ २४ । २५ । २६ ॥
शिलायामिति लीना भूत्वेति शेषः ॥ २७ । २८ । २९ ॥
इयता स्वयमेव शापान्तमाह एवमिति ॥ ३० ॥
त्वदाश्रयशिलां त्वदाश्रमवसिताम् ॥ ३१ । ३२ ॥

इत्युक्त्वा गौतमः प्रागाद्धिमवन्तं नगोत्तमम् ।
तदाप्रभृत्यहल्या भूतानामदृश्या स्वाश्रमे शुभे ॥ ३३ ॥
तव पादरजःस्पर्शं काङ्क्षते पवनाशना ।
आस्तेऽद्यापि रघुश्रेष्ठ ! तपो दुष्करमास्थिता ॥ ३४ ॥
पावयस्व मुनेर्भार्यामहल्यां ब्रह्मणः सुताम् ।
इत्युक्त्वा राघवं हस्ते गृहीत्वा मुनिपुङ्गवः ॥ ३५ ॥
दर्शयामास चाहल्यामुग्रेण तपसा स्थिताम् ।
रामः शिलां पदा स्पृष्ट्वा तां चापश्यत्तपोधनाम् ॥ ३६ ॥
ननाम राघवोऽहल्यां रामोऽहमिति चाब्रवीत् ।
ततो दृष्ट्वा रघुश्रेष्ठं पीतकौशेयवाससम् ॥ ३७ ॥
चतुर्भुजं शङ्खचक्रगदापङ्कजधारिणम् ।
धनुर्बाणधरं रामं लक्ष्मणेन समन्वितम् ॥ ३८ ॥
स्मितवक्त्रं पद्मनेत्रं श्रीवत्साङ्कितवक्षसम् ।
नीलमाणिक्यसङ्काशं द्योतयन्तं दिशो दश ॥ ३९ ॥
दृष्ट्वा रामं रमानाथं हर्षविस्फारितेक्षणा ।
गौतमस्य वचः स्मृत्वा ज्ञात्वा नारायणं परम् ॥ ४० ॥
सम्पूज्य विधिवद्राममर्घ्यादिभिरनिन्दिता ।
हर्षाश्रुजलनेत्रान्ता दण्डवत्प्रणिपत्य सा ॥ ४१ ॥

तदादि तत्प्रभृति शुभे स्वाश्रमे अदृश्या आस्ते इति शेषः ॥ ३३ । ३४ ॥

चतुर्भुजमिति स्वस्य भगवदवतारत्वख्यापनाय मध्ये मध्ये चतुर्भुजरूपं कौशल्यामिव दर्शयित्वा पुनर्द्विभुजरूपेणैव स्थित इत्याह धनुरिति ॥ ३८ । ३९ । ४० ॥

हर्षजन्यं यदश्रुरूपं जलं तद्युक्ते नेत्रान्ते यस्याः सा ॥ ४१ ॥

उत्थाय च पुनर्दृष्ट्वा रामं राजीवलोचनम्।
पुलकाङ्कितसर्वाङ्गो गिरा गद्गदयैलत ॥ ४२ ॥

अहल्योवाच।

अहो! कृतार्थाऽस्मि जगन्निवास! ते
पादाब्जसंलग्नरजःकणादहम्।
स्पृशामि यत्पद्मजशङ्करादिभि-
र्विमृग्यते रन्धितमानसैः सदा ॥ ४३ ॥
अहो! विचित्रं तव राम! चेष्टितं
मनुष्यभावेन विमोहयन्(१) जगत्।
चलस्यजस्रं चरणादिवर्जितः
संपूर्ण आनन्दमयोऽतिमायिकः ॥ ४४ ॥

ऐलत अस्तौषीत् ईड स्तुतावित्यस्माल्लङि व्यत्ययेन शपो लुगभावः डलयोरेकस्मृतित्वाल्लकारोच्चारणम् ॥ ४२ ॥

अहो इति ते तव पादाब्जसंलग्नरजःकणात् तत्सम्बन्धादहं कृतार्थाऽस्मि शुद्धपापाऽस्मि अहो इत्याश्चर्यं अपरं स्वस्य कृतार्थत्वे हेतुमाह यत्ते पादपद्मं पद्मजशङ्करादिभिस्त्वदलाभात् रन्धितमानसैः पीडितमानसैः सदा स्प्रष्टुं विमृग्यते तदहं स्पृशामि च कृतार्थाऽस्मि ॥ ४२ ॥

अहो इति आश्चर्यं विचित्रम् वास्तवस्वरूपाननुगुणं तव चेष्टितं यतः 'अपाणिपादो जवनो ग्रहीता' इति श्रुतेर्वस्तुतः चरणादिवर्जितोऽपि सन् संपूर्णः सर्वव्याप्तोऽपि सन् आनन्दमयः तत्स्वरूपोऽपि सन् जगत् आत्मनि मनुष्यगुणत्वादिना विमोहयन् मनुष्यभावेन चलसि क्रियामात्रोपलक्षणमिदम् विरोधाभासोऽयं औपाधिकत्वेन तत्परिहारात् नन्वीदृशस्य मनुष्यभावः कथं तत्राह अतिमायिक इति सकलमायावद्भ्यो-ऽत्युत्कृष्टः सकलजगद्रूपेण परिणमनसमर्थः महामायावानित्यर्थः एवं च शुद्धमायिकमेवेदं तव शरीरं चलनादिकं च नेतरवदिति भावः ॥ ४४ ॥

---

(१) विमोहितम् इत्यपि पाठः।

यत्पादपङ्कजपरागपवित्रगात्रा
भागीरथी भवविरिञ्चिमुखान् पुनाति ।
साक्षात् स एव मम दृग्विषयो यदास्ते
किं वर्ण्यते मम पुराकृतभागधेयम् ॥ ४५ ॥
मर्त्यावतारे मनुजाकृतिं हरिं
रामाभिधेयं रमणीयदेहिनम् ।
धनुर्धरं पद्मविशाललोचनं
भजामि नित्यं न परान् भजिष्ये ॥ ४६ ॥
यत्पादपङ्कजरजः श्रुतिभिर्विमृग्यं
यन्नाभिपङ्कजभवः कमलासनश्च ।
यन्नामसाररसिको भगवान् पुरारिः
तं रामचन्द्रमनिशं हृदि भावयामि ॥ ४७ ॥
यस्यावतारचरितानि विरिञ्चिलोके
गायन्ति नारदमुखा भवपद्मजाद्याः ।

यत्पादेति विष्णोः पादप्रसूतेति पुराणोक्तेः ॥ ४५ ॥

रमणीयदेहिनमित्यार्षम् ॥ ४६ ॥

यस्य पादो विश्वं 'पादोऽस्य विश्वाभूतानि' इतिश्रुतेः तदेव पङ्कजं तस्य रजः रज इव सारांशः यथा कमले सौगन्ध्यसम्पादकतयान्तर्विद्यमानरजः एव सारं एवं विश्वस्य सत्ताभानसम्पादकतया ब्रह्मैव सारांशत्वात् रजस्तच्छ्रुतिभिर्विमृग्यम् श्रुति शिरोरूपोपनिषद्गम्यत्वात्तस्येति भावः यन्नाम्नां मध्ये सारं नाम रामेति तस्य रसिकस्तद्विषयप्रीतिमान् भगवान् ऐश्वर्य-धर्मयशोलक्ष्मीज्ञानवैराग्यवान् षण्णामेषाम् 'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भगसंज्ञक' इत्युक्तेः 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति' उक्तो वा ॥ ४७ ॥

विरिञ्चिलोके ब्रह्मलोके नारदप्रमुखा ऋषयः भवपद्मजाद्या देवाश्च त्वच्च-

आनन्दजाश्रुपरिषिक्तकुचाग्रसीमा
वागीश्वरी च तमहं शरणं प्रपद्ये ॥ ४८ ॥
सोऽयं परात्मा पुरुषः पुराण
एषः स्वयं ज्योतिरनन्त आद्यः ।
मायातनुं लोकविमोहिनीं यो
धत्ते परानुग्रह एष रामः ॥ ४९ ॥
अयं हि विश्वोद्भवसंयमाना-
मेकः स्वमाया गुणबिम्बितो यः ।
विरिञ्चिविष्णीश्वरनामभेदान्
धत्ते स्वतन्त्रः परिपूर्ण आत्मा ॥ ५० ॥
नमोऽस्तु ते राम ! तवाङ्घ्रिपङ्कजं
श्रिया धृतं वक्षसि लालितं प्रियात् ।

रितवरणजानन्दाश्रुभिः सिक्ते कुचाग्रे चूचुके तथा सीमनि प्रान्तभागे च यया वागीश्वरी सरस्वती च गायतीति विपरिणामेनान्वयः ॥ ४८ ॥

सोऽयं रामः परात्मा परः सर्वजीवेभ्यः प्रकृतेश्च अधिक आत्मा पुरुषः पुरिशयनात्पुरुषः पुराणः सर्वदा विद्यमान इत्यर्थः एषः स्वयं ज्योतिः स्वप्रकाशः अनन्तोऽविनाशी आद्यः सर्वकारणं यः परानुग्रहे परेषां भक्तजनानामनुग्रहे कर्त्तव्यतया बुद्धिस्थे सति परमसुन्दरत्वादिगुणैर्लोकविमोहिनीं मायातनुं मत्वितरजनवत्पाञ्चभौतिकीं धत्ते स एव एषः रामः 'उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना' इति श्रुतेः ॥ ४९ ॥

अयं हीति विश्वस्य जगत उद्भव उत्पत्तिः संयमो नाशः ताभ्यां पालनमप्युपलक्ष्यते तेषां 'स्वतन्त्रः कर्त्ता' इति पाणिन्युक्तेः य एक एव परिपूर्णो व्यापक आत्मा स्वमायागुणेषु रजःसत्त्वतमःसु बिम्बितः प्रतिबिम्बितः सन् विरिञ्च्यादिनामभेदान् धत्ते रजगुणोपहितचैतन्यमेव ब्रह्मा सत्त्वगुणोपहितं विष्णुः तमोगुणयुक्तं रुद्र इति भावः ॥ ५० ॥

आक्रान्तमेकेन जगत्त्रयं पुरा
ध्येयं मुनीन्द्रैरभिमानवर्जितैः ॥ ५१ ॥

जगतामादिभूतस्त्वं जगत्त्वं जगदाश्रयः ।
सर्वभूतेष्वसंयुक्त एको भाति भवान् परः ॥ ५२ ॥

ओङ्कारवाच्यस्त्वं राम ! वाचामविषयः पुमान् ।
वाच्यवाचकभेदेन भवानेव जगन्मयः ॥ ५३ ॥

हे राम ! यत्तवांघ्रिपङ्कजं प्रियात् प्रियत्वाच्छ्रिया वक्षसि धृतं लालितं च येनैकेन जगत्त्रयमाक्रान्तम् 'इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं' इति श्रुतेः यच्च त्यक्ताभिमानैर्मुनिभिर्ध्येयम् 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय' इति श्रुतेः तस्मै नमोऽस्त्वित्यर्थः ॥ ५१ ॥

जगतामिति आदिभूतः कारणत्वादिति भावः जगत्त्वं जगदनुवादेन त्वत्पदोपात्तब्रह्मात्मत्वं विधीयते 'सर्वं खल्विदं ब्रह्म' इति वत् तत्र जगतो मिथ्याभूतत्वेन ब्रह्मसामानाधिकरण्यानुपपत्तावपि तस्य बाध्यत्वेन ज-गद्बाधफलकत्वान्न दोषः एवञ्च जगदारोपाधिष्ठानं त्वमित्यर्थः तदेवाह जगदाश्रय इति 'इमाः प्रजाः सदायतनाः सत्प्रतिष्ठा' इति श्रुतेः वास्तव आश्रयाश्रयिभावो नास्त्येवेत्याह सर्वभूतेष्वसंयुक्त इति एवं च श्रुत्युक्तं तदधिष्ठानत्वमध्यारोपितमेवेति भावः अतएव भवानेकोऽद्वितीयो भाति प्रकाशते ॥ ५२ ॥

'ओंकारवाच्यस्त्वं तस्य वाचकः प्रणव' इति पातञ्जलसूत्रात् अव-तीत्योमिति निरुपाधिकरक्षकत्वगुणेन च तद्वाच्यः यद्वा अव उव मव ओमिति ब्रह्मविष्णुशिवात्मत्वेन च तद्वाच्यः तूर्यश्च नादाख्यध्वनिना च शुद्धं ब्रह्मस्वरूपमत एव तत्र निबद्धं पद्यद्वयेऽपि सदापि सोऽहमिति शब्दे 'सकारार्णं हकारार्णं लोपयित्वा ततः परम् । सन्धिं कुर्यात्पूर्वरूपं ततोऽसौ प्रणवो भवेत्' इति रीत्या प्रणवसाधनं तदापि स्वरूपमनुवादेन तत्त्वंपदार्थयोरभेदप्रतिपादनात् सगुण एव तदर्थः यद्वा सकारहका-रलोपेन तत्त्वाहंत्वयोस्त्यागाच्छुद्धमेव ब्रह्म तदर्थः अत्र पक्षिपक्षादिप्रका-रोऽन्यत्र विस्तरेण प्रपञ्चितः तर्हि किं सगुण एवाहं नेत्याह वाचाम-

कार्य्यकारणकर्त्तृत्वं फलसाधनभेदतः।
एको विभासि राम! त्वं मायया बहुरूपया ॥ ५४ ॥
त्वन्मायामोहितधियस्त्वां न जानन्ति तत्त्वतः।
मानुषं त्वाभिमन्यन्ते मायिनं परमेश्वरम् ॥ ५५ ॥
आकाशवत्त्वं सर्वत्र वहिरन्तर्गतोऽमलः।
असङ्गो ह्यचलो नित्यः शुद्धो बुद्धः सदव्ययः ॥ ५६ ॥
योषिन्मूढाऽहमज्ञा ते तत्त्वं जाने कथं? विभो!।
तस्मात्ते शतशो राम! नमस्कुर्य्यामनन्यधीः ॥ ५७ ॥

विषय इति निर्धर्मकत्वाच्छब्दाद्यसम्भवेन स्वरूपतस्तज्जन्यबोधाविषय इत्यर्थः नन्वेवं 'तस्य वाचकः प्रणव' इति पातञ्जलसूत्रासङ्गतिस्तत्राह वाच्येति वाच्यवाचकभेदेन तत्कल्पनया भवानेव मायया जगन्मय इति कल्पितभेदेन कल्पितगुणैश्च तव वाच्यत्वं गृहीत्वा पारमर्षसूत्रोपपत्तिरिति भावः ॥ ५३ ॥

उक्तं जगन्मयत्वं मायिकमित्याह कार्येत्यादि कार्यं महत्तत्त्वादि कारणं मायारूपा मूलप्रकृतिः कर्तृत्वं तत्तदुपादानगोचरापरोक्षज्ञान-चिकीर्षाकृतिमत्त्वम् फलं स्वर्गनरकादिसाधनं क्रत्वादि वेदादि एतद्भेदतः एकोऽपि त्वं बहुरूपया मायया उक्तभेदैर्युक्त इव भासि उक्तञ्च विष्णु-पुराणे 'स एव मूलप्रकृतिर्व्यक्तरूपी जगच्च सः। तस्मिन्नेव लयं सर्वं याति तत्र च तिष्ठति। कर्त्ता क्रियाणां स च ईज्यते क्रतुः स एव तत्क-र्मफलञ्च तस्य यत्। स्रगादिवत्साधनमप्यशेषतो हरेर्न किञ्चिद्व्यतिरिक्त-मस्ति' इति ॥ ५४ ॥

नन्वीदृशो यद्यहं तर्हि लोको मां तथा किमिति न जानातीत्य-त्राह त्वन्मायेति त्वद्विषयया माययेत्यर्थः तदुक्तं विष्णुपुराणे 'सोऽहं सत्त्वं जगच्चेदं सदेवासुरमानुषम्। अविद्यामोहितात्मानः पुरुषा भिन्न-दर्शिन' इति ॥ ५५ ॥

ननु तर्हि तादृश एवाहं नेत्याह आकाशवदिति अचलोऽक्रियः बुद्धो ज्ञानरूपः सत् सत्तारूपः नित्यत्वमनादित्वं अव्ययत्वमनन्तत्वम् ॥ ५६ ॥

देव ! मे यत्र कुत्रापि स्थिताया अपि सर्वदा ।
त्वत्पादकमले सक्ता भक्तिरेव सदास्तु मे ॥ ५८ ॥
नमस्ते पुरुषाध्यक्ष ! नमस्ते भक्तवत्सल ! ।
नमस्तेऽस्तु हृषीकेश ! नारायण ! नमोऽस्तु ते ॥ ५९ ॥

भवभयहरमेकं भानुकोटिप्रकाशं
करधृतशरचापं कालमेघावभासम् ।
कनकरुचिरवस्त्रं रत्नवत्कुण्डलाढ्यं
कमलविशदनेत्रं सानुजं राममीडे ॥ ६० ॥

स्तुत्वैवं पुरुषं साक्षाद्राघवं पुरतः स्थितम् ।
परिक्रम्य प्रणम्याशु सानुज्ञाता ययौ पतिम् ॥ ६१ ॥
अहल्यया कृतं स्तोत्रं यः पठेद्भक्तिसंयुतः ।
स मुच्यतेऽखिलैः पापैः परं ब्रह्माधिगच्छति ॥ ६२ ॥

मूढाः तमोगुणप्रधाना अतएवाज्ञा नमस्कुर्यां त्वद्रूपज्ञानायेति भावः ॥ ५७ ॥

सक्ता निरन्तरा ॥ ५८ ॥

पुरुषाध्यक्ष ! सकलपुरुषसाक्षिन् हृषीकेश हृषीकाणामिन्द्रियाणामधिष्ठातः हृष्यन्ति विषयैरिति 'हृषीकाणि इन्द्रियाणि हृषीकेशं भवेत्तु च' इति विष्णुधर्मोक्तेः ततोऽहल्ययैतन्नाम स्मृतं नारं जीवसमूहोऽयनं स्थानम् यस्यान्तर्यामित्वात्तत्रस्थितत्वात् नारायणः 'नयतीति नरः प्रोक्तः परमात्मा सनातनः । नराज्जातानि तत्त्वानि नाराणीनि ततो विदुः । तान्येव चायनं तस्य तेन नारायणः स्मृत' इति तु मनुः आपो नारास्तत्र स्थितत्वाद्वा नारायणः अस्य मन्त्रस्य संसारभयनाशकत्वात् स्मरणम् तदुक्तं नृसिंहपुराणे 'नारायणाय नम इत्ययमेव सत्यः संसारघोरविषसंहरणाय मन्त्र' इति ॥ ५९ ॥

तदेवाह भवभयेति भवभयं संसारभयम् कालमेघो नीलमेघः ॥ ६० ॥

साऽहल्या पतिं गौतमम् ॥ ६१ । ६२ । ६३ । ६४ ॥

पुत्रार्थं पठेद्भक्त्या रामं हृदि निधाय च।
संवत्सरेण लभते वन्ध्या अपि सुपुत्रकम्॥ ६३ ॥
सर्वान् कामानवाप्नोति रामचन्द्रप्रसादतः॥ ६४ ॥
ब्रह्मघ्नो गुरुतल्पगोऽपि पुरुषः स्तेयी सुरापोऽपि वा
मातृभ्रातृविहिंसकोऽपि सततं भोगैकबद्धातुरः।
नित्यं स्तोत्रमिदं जपन् रघुपतिं भक्त्या हृदिस्थं स्मरन्
ध्यायन्मुक्तिमुपैति किं पुनरसौ स्वाचारयुक्तो नरः॥६५॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे बालकाण्डे
षष्ठः सर्गः।

मातृभ्रातृविहिंसकोऽपीत्यत्रानङ्भाव आर्षः भोगैकबद्धः आतुर इति च्छेदः सन्धिरार्षः॥ ६५॥

इति श्रीमत्युवराजविपद्गुद्धरणसमर्थत्वादिबि० श्रीरामवर्मणः
कृताध्यात्मरामायणटीकायां सेतौ बालकाण्डे
षष्ठः सर्गः।

सूत उवाच ।

विश्वामित्रोऽथ तं प्राह राघवं सहलक्ष्मणम् ।
गच्छामो वत्स ! मिथिलां जनकेनाभिपालिताम् ॥१॥
दृष्ट्वा क्रतुवरं पश्चादयोध्यां गन्तुमर्हसि ।
इत्युक्त्वा प्रययौ गङ्गामुत्तर्तुं सहराघवः ।
तस्मिन् काले नाविकेन निषिद्धो रघुनन्दनः ॥ २ ॥

नाविक उवाच ।

क्षालयामि तव पादपङ्कजं नाथ ! दारुदृषदोः किमन्तरम् ।
मानुषीकरणचूर्णमस्ति ते पादयोरिति कथा प्रथीयसी ॥३॥
पादाम्बुजं ते विमलं हि कृत्वा पश्चात्परन्तीरमहं नयामि ।
नोचेत्तरिः सद्युवती मलेन स्याच्चेद्विभो ! विद्धि कुटुम्बहानिः(१)
इत्युक्त्वा क्षालितौ पादौ परं तीरं ततो गताः ।
कौशिको रघुनाथेन सहितो मिथिलां ययौ ॥ ५ ॥
विदेहस्य पुरं प्रातर्कृषिवाटं समाविशत् ।

विश्वामित्र इति । वयं गच्छाम इति प्राहेत्यन्वयः बहुवचनादेव रामलक्ष्मणयोरपि गमनकर्तृत्वम् ॥ १ ॥

उत्तर्तुमित्यागमशासनानित्यत्वादिड्भावः नाविकेन नौतारकेण ॥२

दारुदृषदोः काष्ठपाषाणयोः मानुषीकरणचूर्णमिति शिलारूपा-ऽहल्यायाः पादस्पर्शमात्रेण मानुषदेहसम्पादनात् ॥ ३—५ ॥

प्रातर्विदेहस्य पुरं गत्वेति शेषः ऋषिवाटं ऋषिवासस्थानमार्गम् ॥६॥

---

(१) श्लोकोऽयमधिकः कुत्रचित् दृश्यते ।

प्राप्तं कौशिकमाकर्ण्य जनकोऽतिमुदान्वितः ॥ ६ ॥
पूजाद्रव्याणि संगृह्य सोपाध्यायः समाययौ ।
दण्डवत्प्रणिपत्याथ पूजयामास कौशिकम् ॥ ७ ॥
पप्रच्छ राघवौ दृष्ट्वा सर्वलक्षणसंयुतौ ।
द्योतयन्तौ दिशः सर्वाश्चन्द्रसूर्याविवापरौ ॥ ८ ॥
कस्येतौ नरशार्दूलौ पुत्रौ देवसुतोपमौ ।
मनः प्रीतिकरौ मेऽद्य नरनारायणाविव ॥ ९ ॥
प्रत्युवाच मुनिः प्रीतो हर्षयन् जनकं तदा ।
पुत्रौ दशरथस्येतौ भ्रातरौ रामलक्ष्मणौ ॥ १० ॥
मखसंरक्षणार्थाय मया नीतौ पितुः पुरात् ।
आगच्छन् राघवो मार्गे ताड़कां विघ्नघातिनीम् ॥ ११ ॥
शरेणैकेन हतवांश्चोदितो मेऽतिविक्रमः ।
ततो ममाश्रमं गत्वा मम यज्ञविहिंसकान् ॥ १२ ॥
सुबाहुप्रमुखान् हत्वा मारीचं सागरेऽक्षिपत् ।
ततो गङ्गातटे पुण्ये गौतमस्याश्रमे शुभे ॥ १३ ॥
गत्वा तत्र शिलारूपा गौतमस्य वधू स्थिता ।
पादपङ्कजसंस्पर्शात् कृता मानुषरूपिणी ॥ १४ ॥
दृष्ट्वाऽहल्यां नमस्कृत्य तया सम्यक् प्रपूजितः ।
इदानीं द्रष्टुकामस्ते यज्ञे माहेश्वरं धनुः ॥ १५ ॥

सोपाध्यायः गौतमपुत्रशतानन्दसहितः ॥ ७-११ ॥
मे चोदितः मया प्रेरित इत्यर्थः ॥ १२—१४ ॥
ते यज्ञे पूजितं धनुर्द्रष्टुकाम इदानीमागत इत्यन्वयः ॥ १५ ॥
तत्र सर्वैः राजभिर्दृष्टं दृष्टमेव मत्वाऽद्भुतत्वं कृतमित्यनुयुङ्क्ते अनेन स्तुतमित्यर्थः ॥ १६ ॥

पूजितं राजभिः सर्वैर्दृष्टमित्यनुशुश्रुवे।
अतो दर्शय राजेन्द्र! शैवञ्चापमनुत्तमम्॥ १६॥
दृष्ट्वाऽयोध्यां जिगमिषुः पितरं द्रष्टुमिच्छति।
इत्युक्तो मुनिना राजा पूजार्हाविति पूजया॥ १७॥
पूजयामास धर्मज्ञो विधिदृष्टेन कर्मणा।
ततः संप्रेषयामास मन्त्रिणं बुद्धिमत्तरम्॥ १८॥

जनक उवाच।

शीघ्रमानाय विश्वेशचापं रामाय दर्शय।
ततो गते मन्त्रिवरे राजा कौशिकमब्रवीत्।
यदि रामो धनुर्धृत्वा कोट्यामारोपयेद्गुणम्॥ १९॥
तदा मयाऽऽत्मजा सीता दीयते राघवाय हि।
तथेति कौशिकोऽप्याह रामं संवीक्ष्य सस्मितम्॥ २०॥
शीघ्रं दर्शय चापाग्र्यं रामायामिततेजसे।
एवं ब्रुवति मौनीशे आगताश्चापवाहकाः॥ २१॥
चापं गृहीत्वा बलिनः पञ्चसाहस्रसंख्यकाः।
घण्टाशतसमायुक्तं मणिवज्रादिभूषितम्॥ २२॥
दर्शयामास रामाय मन्त्री मन्त्रवतां वरः।
दृष्ट्वा रामः प्रहृष्टात्मा बध्वा परिकरं दृढम्॥ २३॥

दृष्टेत्यस्य धनुः कर्म यतः पितरं द्रष्टुमिच्छत्यतोऽयोध्यां जिगमिषुरित्यन्वयः॥ १७॥

मन्त्रिणं सुदामाख्यम्॥ १८। १९॥

कौशिकोऽपि तथेति उक्त्वा वक्ष्यमाणमाहेत्यन्वयः॥ २०॥

मौनीशे ऋषिश्रेष्ठे॥ २१। २२॥

परिकरं कटिवस्त्रबन्धम्॥ २३॥

गृहीत्वा वामहस्तेन लीलया तोलयन् धनुः ।
आरोपयामास गुणं पश्यत्स्वखिलराजसु ॥ २४ ॥
ईषदाकर्षयामास पाणिना दक्षिणेन सः ।
बभञ्जाखिलहृत्सारो दिशः शब्देन पूरयन् ॥ २५ ॥
दिशश्च विदिशश्चैव स्वर्गं मर्त्यं रसातलम् ।
तदद्भुतमभूत्तत्र देवानां दिवि पश्यताम् ॥ २६ ॥
आच्छादयन्तः कुसुमैर्देवाः स्तुतिभिरीडिरे ।
(१)देवदुन्दुभयो नेदुः ननृतुश्चाप्सरोगणाः ॥ २७ ॥
त्रिधा भग्नं धनुर्दृष्ट्वा राजालिङ्ग्य रघूद्वहम् ।
विस्मयं लेभिरे सीतामातरोऽन्तःपुराजिरे ॥ २८॥
सीता स्वर्णमयीं मालां गृहीत्वा दक्षिणे करे ।
स्मितवक्त्रा स्वर्णवर्णा सर्वाभरणभूषिता ॥ २९ ॥
मुक्ताहारैः कर्णपत्रैः क्वणच्चरणनूपुरा ।
दुकूलपरिसंवीता वस्त्रान्तर्व्यञ्जितस्तनी ॥ ३० ॥

गुणं ज्याम् ॥ २४ ॥

अखिलहृत्सारः अखिलप्राणिनां हिरण्यगर्भादीनां सकलब्रह्माण्ड-स्थानां हृत्सारो बलं यस्य सः ॥ २५ ॥

मर्त्यं मनुष्यलोकम् ॥ २६ । २७ ॥

रघूद्वहमालिङ्ग्य राजाऽतिहृष्टो जात इति शेषः सीतामातरो जनकपत्न्यः अन्तःपुराजिरे तदङ्गणे आगताः किमिदमिति विस्मयवशा-दिति भावः विस्मयमद्भुतरसं लेभिरे प्राप्ताः ॥ २८ ॥

स्मितवक्त्रा स्मितपदे कर्माण्यच् स्मितयुक्तं वक्त्रं यस्याः सा ॥ २९ ॥

कर्णपत्रैः कर्णभूषणैः उपलक्षितेति शेषः चलितेन क्वणत् नूपुरं यस्याः सा आर्षः समासः ॥ ३० ॥

---

(१) देवाः इत्यशुद्धः पाठः क्वचित् दृश्यते ।

रामस्योपरि निक्षिप्य स्मयमाना मुदं ययौ ।
ततो मुमुदिरे सर्वे राजदाराः स्वलङ्कृतम् ॥ ३१ ॥
गवाक्षजालरन्ध्रेभ्यो दृष्ट्वा लोकविमोहनम् ।
ततोऽब्रवीन्मुनिं राजा सर्वशास्त्रविशारदः ॥ ३२ ॥
भो ! कौशिक मुनिश्रेष्ठ ! पत्रं प्रेषय सत्वरम् ।
राजा दशरथः शीघ्रमागच्छतु सपुत्रकः ॥ ३३ ॥
विवाहार्थं कुमाराणां सदारः सह मन्त्रिभिः ।
तथेति प्रेषयामास दूतांस्त्वरितविक्रमान् ॥ ३४ ॥
ते गत्वा राजशार्दूलं रामश्रेयो न्यवेदयन् ।
श्रुत्वा रामकृतं राजा हर्षेण महताप्लुतः ॥ ३५ ॥
मिथिलागमनार्थाय त्वरयामास मन्त्रिणः ।
गच्छन्तु मिथिलां सर्वे गजाश्वरथपत्तयः ॥ ३६ ॥
रथमानय मे शीघ्रं गच्छाम्यद्यैव मा चिरम् ।
वशिष्ठस्त्वग्रतो यातु सदारः सहितोऽग्निभिः ॥ ३७ ॥
राममातॄः समादाय मुनिर्मे भगवान् गुरुः ।

निक्षिप्येत्यस्य मालाकर्मस्वलंकृतं लोकविमोहनं रामं दृष्ट्वा मुमुदिरे इत्यन्वयः ॥ ३१ । ३२ ॥

पत्रं सन्देशप्रापकलेखवत्पत्रसहितं दूतमित्यर्थः शीघ्रं यथागच्छति तथा पत्रं प्रेषयेत्यन्वयः सपुत्रकः भरतादिसहितः ॥ ३३ । ३४ ॥

राजशार्दूलं दशरथं रामश्रेयः विवाहरूपम् रामकृतं धनुर्भङ्गम् ॥ ३५ ॥

गजाश्वरथपत्तय इति 'मध्यमपदलोपी समासः द्वन्द्वश्च' इति स्वत्वेनाङ्गशब्देन रथिकादीनामेव ग्रहणं न रथादीनामतोऽत्र न दोषः अतएव 'संग्रामं हस्त्यश्वरथपदातिभिः' इति श्रुत्वाच् तरुत्वस्यभाष्यप्रयोगः सङ्गच्छत इत्यन्ये ॥ ३६ । ३७ ॥

एवं प्रस्थाप्य सकलं राजर्षिर्विपुलं रथम् ॥ ३८ ॥
महत्या सेनया सार्द्धमारुह्य त्वरितो ययौ।
आगतं राघवं श्रुत्वा राजा हर्षसमाकुलः ॥ ३९ ॥
प्रत्युज्जगाम जनकः शतानन्दपुरोधसा।
यथोक्तपूजया पूज्यं पूजयामास सत्कृतम् ॥ ४० ॥
रामस्तु लक्ष्मणेनाशु ववन्दे चरणौ पितुः।
ततो हृष्टो दशरथो रामं वचनमब्रवीत् ॥ ४१ ॥
दिष्ट्या पश्यामि ते राम! मुखं फुल्लाम्बुजोपमम्।
मुनेरनुग्रहात् सर्वं सम्पन्नं मम शोभनम् ॥ ४२ ॥
इत्युक्त्वाघ्राय मूर्द्धानमालिङ्ग्य च पुनः पुनः।
हर्षेण महता विष्टो ब्रह्मानन्दं गतो यथा ॥ ४३ ॥
ततो जनकराजेन मन्दिरे सन्निवेशितः।
शोभने सर्वभोगाढ्ये सदारः ससुतः सुखी ॥ ४४ ॥
ततः शुभे दिने लग्ने सुमुहूर्त्ते रघूत्तमम्।
आनयामास धर्मज्ञो रामं सभ्रातृकं तदा ॥ ४५ ॥
रत्नस्तम्भसुविस्तारे सुविताने सुतोरणे।
मण्डपे सर्वशोभाढ्ये मुक्तापुष्पफलान्विते ॥ ४६ ॥

रामामातृः कौशल्याद्याः प्रस्थाप्य नगराद्बहिः संप्रेष्य रथमारुह्य तत्रैव सेनया सार्द्धं ययावित्यन्वयः ॥ ३८ ॥ ॥३९ ॥

शतानन्दपुरोधसा सहित इति शेषः यथोक्तपूजया यथाशास्त्रोक्तपूजया ॥ ४० ॥ ४१ ॥

फुल्लाम्बुजोपमं विकसितकमलसदृशम् ॥ ४२ ॥

ब्रह्मानन्दं गतः प्राप्तः समाधाविति शेषः ॥ ४३ ॥ ४४ ॥ ४५ ॥

वितानं चाव: [illegible] मण्डपोऽत्र विवाहशाला ॥ ४६ ॥

वेदविद्भिः सुसम्बाधे ब्राह्मणैः स्वर्णभूषितैः ।
सुवासिनीभिः परितो निष्ककण्ठीभिरावृते ॥ ४७ ॥
भेरीदुन्दुभिनिर्घोषैर्गीतनृत्यैः समाकुले ।
दिव्यरत्नान्विते स्वर्णपीठे रामं न्यवेशयत् ॥ ४८ ॥
वशिष्ठं कौशिकं चैव शतानन्दः पुरोहितः ।
यथाक्रमं पूजयित्वा रामस्योभयपार्श्वयोः ॥ ४९ ॥
स्थापयित्वा स तत्राग्निं ज्वालयित्वा यथाविधि ।
सीतामानीय शोभाढ्यां नानारत्नविभूषिताम् ॥ ५० ॥
सभार्यो जनकः प्रायाद्रामं राजीवलोचनम् ।
पादौ प्रक्षाल्य विधिवत्तदपो मूर्ध्न्यधारयत् ॥ ५१ ॥
या धृता मूर्ध्नि शर्वेण ब्रह्मणा मुनिभिः सदा ।
ततः सीतां करे धृत्वा साक्षतोदकपूर्वकम् ॥ ५२ ॥
रामाय प्रददौ प्रीत्या पाणिग्रहविधानतः ।
सीता कमलपत्राक्षी स्वर्णमुक्तादिभूषिता ॥ ५३ ॥

सुसम्बाधे संकीर्णे सुवासिन्यो जीवद्भर्तृकाः 'पदकोऽस्त्रीप्रकोष्ठको निष्क वक्षोविभूषणे' इति कोशाद्वक्षोविभूषणं निष्कं तत्कण्ठे यासां ताभिः॥४७॥

भेरीदुन्दुभी वाद्यविशेषौ वितस्तिद्वितयदीर्घा ताम्रनिर्मिता चर्मच्छन्ना चतुर्विंशत्यङ्गुलवदनद्वया भेरी वस्तुतस्समवहुकाननो दुन्दुभिरिति वदन्ति रत्नान्विते रत्नघटिते ४८ ॥

रामस्योभयपार्श्वयोः स्थितं वशिष्ठं कौशिकं च यथाक्रमं पूर्वं वशिष्ठं ततः कौशिकमिति क्रमेण पूजयित्वेत्यन्वयः ॥ ४९ ॥

सीतामानीय अग्रे कृत्वा ॥ ५० ॥

सभार्यो जनको रामं प्रति प्रायात् इत्यन्वयः ॥ ५१ ॥

याः गङ्गारूपाः ॥ ५२ ॥

दीयते मे सुता तुभ्यं प्रीतो भव रघूत्तम ।
इति प्रीतेन मनसा सीतां रामकरेऽर्पयन् ॥ ५४ ॥
मुमोद जनको लक्ष्मीं क्षीराब्धिरिव विष्णवे ।
ऊर्मिलां चौरसीं कन्यां लक्ष्मणाय ददौ मुदा ॥ ५५ ॥
तथैव श्रुतकीर्त्तिञ्च माण्डवीं भ्रातृकन्यके ।
भरताय ददावेकां शत्रुघ्नायापरां ददौ ॥ ५६ ॥
चत्वारो दारसम्पन्ना भ्रातरः शुभलक्षणाः ।
विरेजुः प्रभया सर्वे लोकपाला इवापरे ॥ ५७ ॥
ततोऽब्रवीद्वसिष्ठाय विश्वामित्राय मैथिलः ।
जनकः स्वसुतोदन्तं नारदेनाभिभाषितम् ॥ ५८ ॥
यज्ञभूमिविशुद्ध्यर्थं कर्षतो लाङ्गलेन मे ।
सीतामुखात् समुत्पन्ना कन्यका शुभलक्षणा ॥ ५९ ॥
तामद्राक्षमहं प्रीत्या पुत्रिकाभावभाविताम् ।
अर्पिता प्रियभार्य्यायै शरच्चन्द्रनिभानना ॥ ६० ॥
एकदा नारदोऽभ्यागाद्विविक्ते मयि संस्थिते ।
रणयन्महतीं वीणां गायन्नारायणं विभुम् ॥ ६१ ॥

सीतानाम्नी मे सुता तुभ्यं दीयते प्रीतो भवेति अनेन निष्कामतया भगवत्प्रीतये दानं कृतवानिति सूच्यते ॥ ५४ ॥

रामकरे सीतामर्पयन् जनको लक्ष्मीं विष्णवेऽर्पयन् समुद्र इव मुमोद ॥ ५५ ॥

भ्रातृकन्यके कुशध्वजकन्यके ॥ ५६ ॥ ५७ ॥ ५८ ॥

सीतामुखात् लाङ्गलाग्रकृतभूविवरात् ॥ ५९ ॥

पुत्रिकाभावेन भाविता ध्याताम् ॥ ६० ॥

महतीं महतीसंज्ञां "विश्वावसोस्तु बृहती तुम्बरोस्तु कलावती कच्छपी

पूजितः सुखमासीनो मामुवाच सुखान्वितः ।
शृणुष्व वचनं गुह्यं तवाभ्युदयकारणम् ॥ ६२ ॥
परमात्मा हृषीकेशो भक्तानुग्रहकाम्यया ।
देवकार्य्यार्थसिद्ध्यर्थं रावणस्य बधाय च ॥ ६३ ॥
जातो राम इति ख्यातो मायामानुषवेशधृक् ।
आस्ते दाशरथिर्भूत्वा चतुर्धा परमेश्वरः ॥ ६४ ॥
योगमायापि सीतेति जाता वै तव वेश्मनि ।
अतस्त्वं राघवायैव देहि सीतां प्रयत्नतः ॥ ६५ ॥
नान्येभ्यः पूर्वभार्य्यैषा रामस्य परमात्मनः ।
इत्युक्त्वा प्रययौ देवगतिं देवमुनिस्तदा ॥ ६६ ॥
तदारभ्य मया सीता विष्णोर्लक्ष्मीर्विभाव्यते ।
कथं मया राघवाय दीयते जानकी शुभा ॥ ६७ ॥
इति चिन्तासमाविष्टः कार्य्यमेकमचिन्तयम् ।
मत्पितामहगेहे तु न्यासभूतमिदं धनुः ॥ ६८ ॥
ईश्वरेण पुरा क्षिप्तं पुरदाहादनन्तरम् ।
धनुरेतत्पणं कार्य्यमितिचिन्त्य कृतं तथा ॥ ६९ ॥
सीतापाणिग्रहार्थाय सर्वेषां माननाशनम् ।

नारदस्य स्यात् रसत्यास्तु कच्चपि" इत्युक्तेः ॥ ६१ ॥ ६२ ॥ ६३ ॥

चतुर्धा रामलक्ष्मणभरतशत्रुघ्नरूपेण ॥ ६४ ॥ ६५ ॥

पूर्वभार्य्या अनादिशक्तिः सैव विराड्रूपभरणादस्य भार्या देवगतिं देवलोकमार्गम् ॥ ६६ ॥ ६७ ॥

पितामहशब्देन तदादयो वंश्याः ॥ ६८ ॥

इतिचिन्त्येत्येकं पदमिति ल्यपो नाहुपपत्तिः इति विचार्य्य तथाकृतं पणभूतं तत्कृतमित्यर्थः ॥ ६९ ॥ ७० ॥

त्वत्प्रसादान्मुनिश्रेष्ठ ! रामो राजीवलोचनः ॥ ७० ॥
आगतोऽत्र धनुर्द्रष्टुं फलितो मे मनोरथः ।
अद्य मे सफलं जन्म राम ! त्वां सह सीतया ॥ ७१ ॥
एकासनस्थं पश्यामि भ्राजमानं रविं यथा ।
त्वत्पादाम्बुधरो ब्रह्मा सृष्टिचक्रप्रवर्त्तकः ॥ ७२ ॥
बलिस्त्वत्पादसलिलं धृत्वाभूद्दिविजाधिपः ।
त्वत्पादपांशुसंस्पर्शादहल्या भर्तृशापतः ॥ ७३ ॥
सद्य एव विनिर्मुक्ता कोऽन्यस्त्वत्तोऽधिरक्षिता ॥ ७४ ॥

यत्पादपङ्कजपरागसुरागयोगि-
वृन्दैर्जितं भवभयं जितकालचक्रैः ।
यन्नामकीर्त्तनपराजितदुःखशोकाः
देवास्तमेव शरणं सततं प्रपद्ये ॥ ७५ ॥

इति स्तुत्वा नृपः प्रादाद्राघवाय महात्मने ।
दीनाराणां कोटिशतं रथानामयुतं तदा ॥ ७६ ॥

यत्पश्यामि तन्मे जन्मसफलमित्यन्वयः ॥ ७१ ॥

त्वत्पादाम्बु गङ्गारूपम् ॥ ७२ ॥ ७३ ॥

अधिरक्षिता अधिको रक्षितेत्यर्थः ॥ ७४ ॥

यस्य रामस्य पादपङ्कजपरागेषु सुतरां रागो येषां तैर्योगिवृन्दैर्भवभयं संसारभयं जितं देवाः यन्नामकीर्त्तनपराजितदुःखशोकाः जाता इति शेषः ॥ ७५ ॥

दीनाराणामिति 'दीनारो रूपकैरष्टाभिर्मत्वा परिकीर्त्तितः । सुवर्णसप्ततितमो भागो रूपक ईष्यत' इति विष्णुगुप्तोक्तेः कात्यायनस्तु 'कार्षापणैः षड्भिस्तु विज्ञेयो धान्यको बुधैः । ते द्वादश सुवर्णस्तु दीनारस्तु त्रिकः स्मृत' इति 'कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रवर्त्तते । पणैर्निबद्धः

अश्वानां नियुतं प्रादात् गजानां षट्शतं तथा ।
पत्तीनां लक्षमेकं तु दासीनां त्रिशतं ददौ ॥ ७७ ॥
दिव्याम्बराणि हारांश्च मुक्तारत्नमयोज्ज्वलान् ।
सीतायै जनकः प्रादात्प्रीत्या दुहितृवत्सलः ॥ ७८ ॥
वशिष्ठादीन् सुसम्पूज्य भरतं लक्ष्मणं तथा ।
पूजयित्वा यथा न्यायं तथा दशरथं नृपम् ॥ ७९ ॥
प्रस्थापयामास नृपो राजानं रघुसत्तमम् ।
सीतामालिङ्ग्य रुदतीं मातरः साश्रुलोचनाः ॥ ८० ॥
श्वश्रुशुश्रूषणपरा नित्यं राममनुव्रता ।
पातिव्रत्यमुपालम्ब्य तिष्ठ वत्से ! यथासुखम् ॥ ८१ ॥
प्रयाणकाले रघुनन्दनस्य भेरीमृदङ्गानकतूर्य्यघोषः ।
स्वर्वासिभेरीघनतूर्य्यशब्दैः संमूर्च्छितो भूतभयङ्करोऽभूत् ॥८२॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे
बालकाण्डे सप्तमः सर्गः ।

पूर्वेषां षोड़शैवपष्याः स तु' इति षोडशपण्यष्य' दक्षिणस्यः कार्ष.पण इत्यर्थः अयुतं दशसहस्रम् ॥ ७६ ॥

नियुतं दशलक्षम् ॥ ७७ ॥

मुक्तारत्नमयोज्ज्वलान् हारानित्यन्वयः ॥ ७८ ॥

पूजयित्वा यथोचितधनदानैरित्यर्थः ॥ ७९ ॥ ८० ॥

पातिव्रत्यं पुराणाद्युक्तपतिव्रताधर्मम् भर्त्रादिवाक्यानुल्लङ्घनादिरूपम् वत्स तिष्ठ त्वेवं शिक्षयामासुरित्यर्थः ॥ ८१ ॥

आनको दुन्दुभिः तत्प्रभृतितूर्य्यसम्बन्धिघोषः स्वर्वासिभेर्य्यादिशब्दैः संमूर्च्छितो मिश्रितः सन् प्राणिनां भयङ्करोऽभूत् घनं कांस्यतालादि ॥ ८२॥

बालकाण्डे सप्तमः सर्गः ।

———

अष्टमः सर्गः ।

सूत उवाच ।

अथ गच्छति श्रीरामे मैथिल्याद्योजनत्रयम् ।
निमित्तान्यतिघोराणि ददर्श नृपसत्तमः ॥ १ ॥
नत्वा वशिष्ठं पप्रच्छ किमिदं ? मुनिपुङ्गव !
निमित्तानीह दृश्यन्ते विषमाणि समन्ततः ॥ २ ॥
वशिष्ठस्तमथो प्राह भयमागामि सूच्यते ।
पुनरप्यभयं तेऽद्य शीघ्रमेव भविष्यति ॥ ३ ॥
मृगाः प्रदक्षिणं यान्ति पश्य त्वां शुभसूचकाः ।
इत्येवं वदतस्तस्य ववौ घोरतरोऽनिलः ॥ ४ ॥
मुष्णंश्चक्षूंषि सर्वेषां पांशुवृष्टिभिरर्दयन् ।
ततो व्रजन्ददर्शाग्रे तेजोराशिमुपस्थितम् ॥ ५ ॥
कोटिसूर्य्यप्रतीकाशं विद्युत्पुञ्जसमप्रभम् ।
तेजोराशिं ददर्शाथ जामदग्न्यं प्रतापवान् ॥ ६ ॥
नीलमेघनिभं प्रांशुं जटामण्डलमण्डितम् ।
धनुःपरशुपाणिं च साक्षात्कालमिवान्तकम् ॥ ७ ॥
कार्त्तवीर्य्यान्तकं रामं दृप्तक्षत्रियमर्दनम् ।
प्राप्तं दशरथस्याग्रे कालमृत्युमिवापरम् ॥ ८ ॥

मैथिलात् मैथिलपुरात् घोराणि निमित्तानि अशुभसूचका उत्पाताः ॥ १ ॥ २ ॥ ३ ॥

मृगास्त्वां प्रदक्षिणं यान्ति पश्येत्यन्वयः ॥ ४ ॥

मुष्णन् दर्शनशक्तिरहितानि कुर्वन् ॥ ५ ॥ ६ ॥ ७ ॥

तं दृष्ट्वा भयसंत्रस्तो राजा दशरथस्तदा।
अर्घ्यादिपूजां विस्मृत्य त्राहि त्राहीति चाब्रवीत् ॥ ९ ॥
दण्डवत्प्रणिपत्याह पुत्रप्राणं प्रयच्छ मे।
इति ब्रुवन्तं राजानमनादृत्य रघूत्तमम् ॥ १० ॥
उवाच निष्ठुरं वाक्यं क्रोधात्प्रचलितेन्द्रियः।
त्वं राम इति नाम्ना मे चरसि क्षत्रियाधम! ॥ ११ ॥
द्वन्द्वयुद्धं प्रयच्छाशु यदि त्वं क्षत्रियोऽसि वै।
पुराणं जर्जरं चापं भङ्क्त्वा त्वं कत्थसे मुधा ॥ १२ ॥
अस्मिंस्तु वैष्णवे चापे आरोपयसि चेद् गुणम्।
तदा युद्धं त्वया सार्द्धं करोमि रघुवंशज! ॥ १३ ॥
नोचेत् सर्वान् हनिष्यामि क्षत्रियान्तकरोह्यहम्।
इति ब्रुवति वै तस्मिन् चचाल वसुधा भृशम् ॥ १४ ॥
अन्धकारो बभूवाथ सर्वेषामपि चक्षुषाम्।
रामो दाशरथिर्वीरो वीक्ष्य तं भार्गवं रुषा ॥ १५ ॥
धनुराच्छिद्य तद्धस्तादारोप्य गुणमञ्जसा।
तूणीराद्बाणमादाय सन्धायाकृष्य वीर्य्यवान् ॥ १६ ॥

अन्तकं अन्तकर्त्तारं कालमिव ॥ ८ ॥ ९ ॥ १० ॥

राजानमनादृत्य रघूत्तममुवाचेत्यन्वयः मे नाम्ना मदीयनाम्ना प्रसिद्धः सन् पृथ्वीं चरसि अतो मन्नामधारकत्वात्क्षत्रियस्तर्हि एवमपि क्षत्रियत्वा-भिमानश्चेत् द्वन्द्वयुद्धं प्रयच्छ ॥ ११ ॥ १२ ॥

त्वयि युद्धायोद्यतेऽपि तावन्न योत्स्ये यावत्ते परीक्षां न प्राप्स्ये वैष्णव-चापारोपणेन तु त्वद्बलं विज्ञाय त्वया योत्स्यामीत्याह तदा युद्धमिति तत्र तवासामर्थ्ये तु त्वदीयसकलवधः प्रयत्न इति भावः ॥ १३ ॥ १४ ॥

सर्वेषामपि [illegible] सर्वसम्बन्धिचक्षुषामित्यर्थः ॥ १५ ॥ १६ ॥

उवाच भार्गवं रामं शृणु ब्रह्मन्! वचो मम।
लक्ष्यं दर्शय बाणस्य ह्यमोघो मम सायकः॥ १७॥
लोकान् पादयुगं वापि वद शीघ्रं ममाज्ञया।
अयं लोकः परो वाथ त्वया गन्तुं न शक्यते॥ १८॥
एवं त्वां हि प्रकर्त्तव्यं वद शीघ्रं ममाज्ञया।
एवं वदति श्रीरामे भार्गवो विकृताननः॥ १९॥
संस्मरन् पूर्ववृत्तान्तमिदं वचनमब्रवीत्।
राम! राम! महाबाहो! जाने त्वां परमेश्वरम्॥२०॥
पुराणपुरुषं विष्णुं जगत्सर्गलयोद्भवम्।
बाल्येऽहं तपसा विष्णुमाराधयितुमञ्जसा॥ २१॥
चक्रतीर्थं शुभं गत्वा तपसा विष्णुमन्वहम्।
अतोषयं महात्मानं नारायणमनन्यधीः॥ २२॥
ततः प्रसन्नो देवेशः शङ्खचक्रगदाधरः।
उवाच मां रघुश्रेष्ठ! प्रसन्नमुखपङ्कजः॥ २३॥

लक्ष्यं भेद्यम्॥ १७॥

लोकान् तपोऽर्जितान् परलोकगतिर्मिति यावत् पादयुगं चरणयुगलम् इह लोके तीर्थादिगतिमिति यावत् ममाज्ञयेत्यनेन स्वस्य स्वरूपाविर्भावं सूचयति उक्तमेवार्थं स्फुटमाह अयमिति यथा त्वया अथैतदनन्तरमयं लोकः परो वा गन्तुं न शक्यते एवं तथा त्वां प्रतिकर्त्तव्यं मम वर्त्तते तच्छीघ्रं वदेत्यर्थः॥ १८॥

विकृताननः प्राप्तपराभवत्वादिति शेषः॥ १९॥ २०॥

पुराणपुरुषम् अनादित्वात् नवद्वारात्तु सर्वपूर्णं शयनाच्च विष्णुं व्यापकम् अन्तर्बहिश्च सर्वत्र प्रविष्टं वा जगत्सर्गलयोद्भवं जगतः सृष्टिसंहारस्थितयो यस्मात्तम्॥ २१॥ २२॥ २३॥

श्रीभगवानुवाच ।

उत्तिष्ठ तपसो ब्रह्मन् ! फलितं ते तपो महत् ।
मच्चिदंशेन युक्तस्त्वं जहि हैहयपुङ्गवम् ॥ २४ ॥
कार्त्तवीर्य्यं पितृहणं यदर्थं तपसः श्रमः ।
ततस्त्रिःसप्तकृत्वस्त्वं हत्वा क्षत्रियमण्डलम् ॥ २५ ॥
कृत्स्नां भूमिं कश्यपाय दत्वा शान्तिमुपावह ।
त्रेतामुखे दाशरथिर्भूत्वा रामोऽहमव्ययः ॥ २६ ॥
उत्पत्स्ये परया शक्त्या तदा द्रक्ष्यसि मां ततः ।
मत्तेजः पुनरादास्ये त्वयि दत्तं मया पुरा ॥ २७ ॥
तदा तपश्चरंल्लोके तिष्ठ त्वं ब्रह्मणो दिनम् ।
इत्युक्त्वान्तर्दधे देवस्तथा सर्वं कृतं मया ॥ २८ ॥
स एव विष्णुस्त्वं राम ! जातोऽसि ब्रह्मणार्थितः ।
मयि स्थितं तु त्वत्तेजस्त्वयैव पुनराहृतम् ॥ २९ ॥
अद्य मे सफलं जन्म प्रीतोऽसि मम प्रभो ! ।
ब्रह्मादिभिरलभ्यस्त्वं प्रकृतेः पारगो मतः ॥ ३० ॥

फलितं फलसमर्थं जातं मच्चिदंशेन मद्रूपचिदाभ्यवशक्त्यंशेन ॥ २४ ॥

कार्त्तवीर्य्यं पितृहणमिति तपसः श्रमः तपोरूपश्रमः राहोः शिर इति वत् ॥ २५ ॥ २६ ॥

परया शक्त्या त्वयि विद्यमानशक्त्यंशादधिकया शक्त्या ततो दर्शनानन्तरं मया त्वयि दत्तं मत्तेजः पुरा यदा पुनरादास्ये तदेत्यन्वयः ॥ २७ ॥

ब्रह्मणो दिनं चतुर्युगसहस्राख्यम् ॥ २८ ॥

स एव पुरा मम वरद एव ॥ २९ ॥

मम प्रीतोऽसि मया प्रत्यभिज्ञातोऽसीत्यर्थः ननु मत्प्रत्यभिज्ञायाः किमेतः दौर्लभ्यं येनैवं संभ्रमस्तत्राह ब्रह्मादिभिरिति तदलभ्यत्वे हेतुः प्रकृतेः पारग इति ॥ ३० ॥

त्वयि जन्मादिषड्भावा न सन्त्यज्ञानसम्भवाः ।
निर्विकारोऽसि पूर्णस्त्वं गमनादिविवर्जितः ॥ २१ ॥
यथा जले फेनजालं धूमो वह्नौ तथा त्वयि ।
त्वदाधारा त्वद्विषया माया कार्यं सृजत्यहो ॥ २२ ॥
यावन्मायावृता लोकास्तावत्त्वां न विजानते ।
अविचारितसिद्धैषाविद्या विद्याविरोधिनी ॥ २३ ॥
अविद्याकृतदेहादिसंघाते प्रतिबिम्बिता ।
चिच्छक्तिर्जीवलोकेऽस्मिन् जीव इत्यभिधीयते ॥ २४ ॥
यावद्देहमनःप्राणबुद्ध्यादिष्वभिमानवान् ।

जन्मादिषड्भावाः जायतेऽस्ति विपरिणमतेऽपक्षीयते वर्द्धते नश्यतीत्येवं रूपाः षड्भावविकारास्ते यतस्त्वं पूर्णो ज्ञानेनातोऽज्ञानसम्भवास्ते त्वयि न सन्ति अतस्त्वं निर्विकारो गमनादिविवर्ज्जितश्चासि ॥ २१ ॥

ननु तेजोहरणादिक्रियाया इदानीमेवोक्तेः कथं निष्क्रियत्वमत आह यथेति यथा शुद्धे एव जलादौ फेनजालादि औपाधिकं तथा त्वयि क्रियौपाधिकीत्यर्थः उपाधिमेवाह त्वदाधारेति अन्यान् प्रति त्वामावृणोतीति त्वद्विषया अस्वतन्त्रतया त्वदधीनत्वात् त्वदधारा चेति भावः ॥ २२ ॥

उक्तं त्वद्विषयत्वमेव दर्शयति यावदिति सा कुतस्तत्राह अविचारितसिद्धेति अनादिसिद्धा विचारेणैव सिद्धेति अनादिः इति भावः सैव मायाविद्या ब्रह्मज्ञानं तद्विरोधिनी तस्मिन् सति नश्यति तदुत्पत्तिं प्रतिबध्नाति च अतोऽविद्यापदेनोच्यत इत्यर्थः 'विद्याविद्ये श्रुतिप्रोक्ते एकत्वान्यधियौ हि ते' इति अभियुक्ताः ॥ २३ ॥

कार्यं सृजत्यहो इत्युक्तं तत्कार्यं दर्शयति अविद्येति देहादिसङ्घाते स्थूलादिनेन्द्रियादितत्सङ्घातावच्छिन्नेऽन्तःकरणे प्रतिबिम्बिता अनिर्वाच्यसम्बन्धेन सम्बद्धा चिच्छक्तिः प्राणादिप्रेरकत्वेन प्राणधारकतया जीव इत्युच्यते जीवप्राणधारणे इति धातोः ॥ २४ ॥

ननु चिच्छक्तेरक्रियत्वेन जीवे कर्त्तृत्वादिव्यवहारः कथमत आह याव-

तावत्कर्तृत्वभोक्तृत्वसुखदुःखादिभाग्भवेत् ॥ २५ ॥
आत्मनः संसृतिर्नास्ति बुद्धेर्ज्ञानं न जात्विति ।
अविवेकाद्द्वयं युङ्क्त्वा संसारीति प्रवर्त्तते ॥ २६ ॥
जडस्य चित्समायोगाच्चित्त्वं भूयाच्चितेस्तथा ।
जडसङ्गाज्जडत्वं हि जलाग्न्योर्मेलनं यथा ॥ २७ ॥
यावत् त्वत्पादभक्तानां सङ्गसौख्यं न विन्दति ।
तावत् संसारदुःखौघान्न निवर्त्तेन्नरः सदा ॥ २८ ॥

दिति अभिमानोऽहमिति बुद्धिः यावद्विवेकाभावमूलको देहादिष्वात्मने-ऽहमिति अभिमानस्तावत्कर्त्तृत्वाद्यारोपेण तद्भागित्यर्थः ॥ २५ ॥

विशिष्ट एव कर्त्तृत्वादीत्युक्तमर्थं प्रत्येकं तन्निषेधेन द्रढयति आत्मन इति संसृतिः कर्त्तृत्वभोक्तृत्वाद्यभिमानकृतः संसारो नास्ति अपरिणामित्वा-दिति भावः एवं बुद्धेर्ज्ञानं न जडत्वादिति भावः तस्मात्तत् द्वयं युङ्क्त्वाह-मिति बुद्ध्या गृहीत्वा तत्र हेतुरविवेकः संसारी जीव इति अहं कर्त्ता भोक्तेत्यादिरूपेण प्रवर्त्तते व्यवहरति तदुक्तम् "न बुद्धेरेव बोधोऽस्ति नात्मनो विद्यते क्रिया। अतो नान्यतरस्यापि जानातीति तु युज्यते" इति ॥ २६ ॥

नन्वेवं बुद्धेश्चितोर्मध्ये न इति धातुनिष्पन्नविषयव्यवहारानुपपत्तिरत आह जडस्येति नन्वेवं "अहमज्ञ" इति व्यवहारानुपपत्तिरत आह तथा चितेर्जडसंयोगाज्जडत्वम् संमेलने मिथोऽन्योन्यधर्मतिरोभावे दृष्टान्त-माह जलाग्न्योर्मेघे विद्युज्जलयोर्यथेत्यर्थः विद्युतः प्रकाशं जातमपि जलं आप्नोति जलस्वरूपं जडमपि अग्निसंयोगाद्विद्युद्रूपेण प्रकाशरूपतां प्राप्नोतीत्यर्थः ॥ २७ ॥

नन्वेवं यदि संसृतस्तर्हि कथं मुच्यते नत्राह यावदिति सङ्गसौख्यं सङ्गाज्जायमानं सुखं न विन्दति न प्राप्नोति तावदित्यर्थः सौख्यमिति स्वार्थे ष्यञ् निवर्त्तेदिति परस्मैपदमार्षम् ॥ २८ ॥

सत्सङ्गलब्धया भक्त्या यदा त्वां समुपासते ।
तदा माया शनैर्याति तानवं प्रतिपद्यते ॥ ३९ ॥
ततस्त्वज्ज्ञानसम्पन्नः सद्गुरुस्तेन लभ्यते ।
वाक्यज्ञानं गुरोर्लब्ध्वा त्वत्प्रसादाद्विमुच्यते ॥ ४० ॥
तस्मात् त्वद्भक्तिहीनानां कल्पकोटिशतैरपि ।
न मुक्तिशङ्का विज्ञानशङ्का नैव सुखं तथा ॥ ४१ ॥
अतस्त्वत्पादयुगले भक्तिर्मे जन्मजन्मनि ।
स्यात् त्वद्भक्तिमतां सङ्गोऽविद्या याभ्यां विनश्यति ॥४२॥
लोके त्वद्भक्तिनिरताः त्वद्धर्मामृतवर्षिणः ।
पुनन्ति लोकमखिलं किं पुनः स्वकुलोद्भवान् ॥ ४३ ॥
नमोऽस्तु जगतां नाथ ! नमस्ते भक्तिभावन ! ।
नमः कारुणिकानन्त ! रामचन्द्र ! नमोस्तु ते ॥ ४४ ॥

सतां सङ्गेन लब्धया भक्त्या त्वां यदा जनाः समुपासते तदा तेभ्यः माया शनैर्मन्दं याति अपसरति विक्षेपशक्तिं त्यजतीत्यर्थः अतएव सा तानवं प्रतिपद्यते ॥ ३९ ॥

तव ज्ञानमभेदेन यत् तद्युक्तः सद्गुरुस्त्वद्भक्तियोगात्तेन लभ्यते तदनन्तरं तादृशगुरोः सकाशाद्वाक्यज्ञानं तत्त्वमसीतिवाक्यार्थाखण्डार्थज्ञानं त्वत्प्रसादाल्लब्ध्वा विमुच्यते 'आचार्य्यवान् पुरुषो वेद' इति श्रुतेः 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः' इति स्मृतेश्च ॥ ४० ॥

मुक्तिशङ्का मुक्तिप्राप्तिसम्भावनापि न तथा सुखं नैवेत्यर्थः ॥ ४१ ॥

भक्तिकारणं भक्तिमत्सङ्गः याभ्यां भक्तिमत्सङ्गतज्जन्यभक्तिभ्यामविद्या-साक्षात्परम्परया च मिलित्वा नश्यति ॥ ४२ ॥

त्वद्धर्मस्तत्त्वज्ञानं तद्रूपामृतवर्षणशीलास्तदुपदेष्टारस्तेन तेषां तत्त्वमर्थ-विदम् ॥ ४२ ॥

कारुणिकेति सम्बोधनम् प्रकृतोपयोगाय ॥ ४४ ॥

देव ! यद्यत् कृतं पुण्यं मया लोकजिगीषया ।
तत्सर्वं तव बाणाय भूयाद्राम ! नमोऽस्तु ते ॥ ४५ ॥
ततः प्रसन्नो भगवान् श्रीरामः करुणामयः ।
प्रसन्नोऽस्मि तव ब्रह्मन् ! यत्ते मनसि वर्त्तते ॥ ४६ ॥
दास्ये तदखिलं कामं मा कुरुष्वात्र संशयम् ।
ततः प्रीतेन मनसा भार्गवो राममब्रवीत् ॥ ४७ ॥
यदि मेऽनुग्रहो राम ! तवास्ति मधुसूदन ! ।
त्वद्भक्तसङ्गस्त्वत्पादे दृढ़ाभक्तिः सदास्तु मे ॥ ४८ ॥
स्तोत्रमेतत्पठेद्यस्तु भक्तिहीनोऽपि सर्वदा ।
त्वद्भक्तिस्तस्य विज्ञानं भूयादन्ते स्मृतिस्तव ॥ ४९ ॥
तथेति राघवेणोक्तः परिक्रम्य प्रणम्य तम् ।
पूजितस्तदनुज्ञातो महेन्द्राचलमन्वगात् ॥ ५० ॥
राजा दशरथो हृष्टो रामं मृतमिवागतम् ।

तव बाणाय भूयात् त्वद्बाणनाशार्थं भूयादित्यर्थः अनेन सर्वकर्मसमर्पणेन मुक्तिं देहीति व्यङ्गम् ॥ ४५ ॥

तद्व्यङ्ग्यं बुद्ध्वा तद्दानं भगवान् प्रतिजानीते तत इत्यादि ॥ ४६ ॥

अत्र त्वत्कामदाने ॥ ४७ ॥

सोऽपि मुक्तिकारणमस्मदं प्रार्थयते यदीति मधुसूदनेत्यनेन मोक्षप्रति-बन्धकमत्कर्मनाशने त्वं समर्थ इति व्यज्यते ॥ ४८ ॥

विज्ञानं त्वदभेदसाक्षात्कारः इदं भक्तिफलं यदि कदाचिदिदं न स्यात्तर्हि अन्ते मरणकाले तव स्मृतिरवश्यं भूयादिति लोकोपकाराय प्रार्थयते अन्ते या मतिः सा गतिरिति न्यायात्तत्स्मृतौ तल्लाभोऽवश्यं भावीति भावः ॥ ४९ ॥ ५० ॥

मृतमिवागतं क्षत्रियकुलान्तकाभरावर्त्तनेन तथा सम्भावना उत्प्रेक्ष-

आलिङ्ग्यालिङ्ग्य हर्षेण नेत्राभ्यां जलमुत्सृजत् ॥ ५१ ॥
ततः प्रीतेन मनसा स्वस्थचित्तः पुरं ययौ ।
रामलक्ष्मणशत्रुघ्नभरता देवसम्मिताः ॥ ५२ ॥
स्वां स्वां भार्य्यामुपादाय रेमिरे स्वस्वमन्दिरे ।
मातापितृभ्यां संहृष्टो रामः सीता समन्वितः ॥ ५३ ॥
रेमे वैकुण्ठभवने श्रिया सह यथा हरिः ।
युधाजिन्नाम कैकेयीभ्राता भरतमातुलः ।
भरतं नेतुमागच्छत् स्वराज्यं प्रीतिसंयुतः ॥ ५४ ॥
प्रेषयामास भरतं राजा स्नेहसमन्वितः ।
शत्रुघ्नञ्चापि सम्पूज्य युधाजितमरिन्दमः ॥ ५५ ॥
कौशल्या शुशुभे देवी रामेण सह सीतया ।
देवमातेव पौलोम्या शच्या शक्रेण शोभना ॥ ५६ ॥

साकेते लोकनाथप्रथितगुणगणो लोकसङ्गीतकीर्त्तिः
श्रीरामः सीतयास्तेऽखिलजननिकरानन्दसन्दोहमूर्त्तिः ।
नित्यश्रीर्निर्विकारो निरवधिविभवो नित्यमायानिरासो

दित्यर्थः अहमाव आर्षः ॥ ५१ ॥

देवसंमिता देवतुल्याः ॥ ५२ ॥ ५३ ॥ ५४ ॥

युधाजितं सम्पूज्य भरतं शत्रुघ्नं चापि प्रेषयामासेत्यन्वयः ॥ ५५ ॥

पौलोम्या पुलोमापत्यभूतया शच्या शक्रेण च देवमातेवेत्यर्थः ॥ ५६ ॥

साकेते अयोध्यायाम् लोकनाथेषु प्रथिताः प्रसिद्धगुणगणा यस्य सः लोकैः सम्यग्गीता कीर्त्तिर्यस्य सकलजनसमूहस्यानन्दसमूहरूपा मूर्त्तिर्यस्य सतगुणानन्दत्वात्तस्येति भावः नित्यं श्रीः पराशक्तिर्यस्य अतएव निरवधिविभवः नित्यं मायाया आवरणशक्तिरूपाया निरासो यस्मात् माया सर्वथा

मायाकार्य्यानुसारी मनुज इव सदा भाति देवोऽखिलेशः ॥५७

इति श्रीमदध्यात्मरामायणे बालकाण्डे
अष्टमः सर्गः ।

अयं काण्डः समाप्तः ।

यं प्रत्यगभावरिकेति भावः माया कार्य्यं सर्वमनुसरति सत्तास्फूर्त्तिभ्यां व्याप्नोति तादृशः देवोऽपि अखिलेशोऽपि माययैव यो मनुज इव भाति ॥ ५७ ॥

इति श्रीमत्सकलराजविपदुद्धरणसमर्थत्वादिविरुदावलिविराजमानस्य
श्रीहिम्मतिवर्म्मणः पुत्रस्य श्रीरामवर्म्मणः कृतावध्यात्मरामायण
सेतौ बालकाण्डे अष्टमः सर्गः ।

अयोध्याकाण्डम् ।

प्रथमः सर्गः ।

श्रीमहादेव उवाच ।

एकदा सुखमासीनं रामं स्वान्तःपुराजिरे ।
सर्वाभरणसम्पन्नं रत्नसिंहासने स्थितम् ॥ १ ॥
नीलोत्पलदलश्यामं कौस्तुभामुक्तकन्धरम् ।
सीतया रत्नदण्डेन चामरेणाथ वीजितम् ॥ २ ॥
विनोदयन्तं ताम्बूलचर्वणादिभिरादरात् ।
नारदोऽवातरत्(१) द्रष्टुमम्बराद्यत्र राघवः ॥ ३ ॥

प्रथमे त्वथ सर्गेऽत्र रामो नारदसंस्तुतः प्रतिज्ञां रावणवधे कृतवानिति वर्ण्यते ॥ १ ॥

अथ काण्डे द्वितीये नारदसुखेन रावणवधप्रवृत्तिरित्याह भगवान् शिवः । श्रीमहादेव उवाच

एकदेति ॥ १ ॥

कौस्तुभेनामुक्ताः युक्ताः भूषिताः वा कन्धराः यस्य तम् कौस्तुभशब्दं नाम तन्नामकतदाकारो भूषणविशेषः ॥ २ ॥

ताम्बूलचर्वणादिभिर्विनोदयन्तं क्रीडयन्तं सीतामिति शेषः द्रष्टुमर्था-

---

(१) अवतरत् इत्यसङ्गतः पाठः ।

शुद्धस्फटिकसङ्काशः शरच्चन्द्र इवामलः ।
अतर्कितमुपायातो नारदो दिव्यदर्शनः ॥ ४ ॥
तं दृष्ट्वा सहसोत्थाय रामः प्रीत्या कृताञ्जलिः ।
ननाम शिरसा भूमौ सीतया सह भक्तिमान् ॥ ५ ॥
उवाच नारदं रामः प्रीत्या परमया युतः ।
संसारिणां मुनिश्रेष्ठ ! दुर्लभं तव दर्शनम् ॥ ६ ॥
अस्माकं विषयासक्तचेतसां नितरां मुने ! ।
अवाप्तं मे पूर्वजन्मकृतपुण्यमहोदयैः ।
संसारिणापि हि मुने ! लभ्यते सत्समागमः ॥ ७ ॥
अतस्त्वद्दर्शनादेव कृतार्थोऽस्मि मुनीश्वर ! ।
किं कार्य्यं ? ते मया कार्य्यं ब्रूहि तत्करवाणि भो ! ॥८॥
अथ तं नारदोऽप्याह राघवं भक्तवत्सलम् ।
किं मोहयसि मां राम ! वाक्यैर्लोकानुसारिभिः ॥९॥
संसार्य्यहमिति प्रोक्तं सत्यमेतत्त्वया विभो ! ।
जगतामादिभूता या सा माया गृहिणी तव ॥ १० ॥

राघवम् यत्र राघवस्तत्र देशेऽम्बरात् आकाशात् अवातरदित्यर्थः ॥३॥४॥५॥

संसारिणामेव दुर्लभम् ॥ ६ ॥

तत्रापि विषयासक्तचेतसां नितरामित्यर्थः तादृशमपि तव दर्शनं पूर्वजन्मकृतानि यानि पुण्यानि पुण्यकर्माणि तज्जन्यमहोदयैः शुभादृष्टैर-वाप्तमित्यर्थः महतः फलस्योदयो येभ्यस्तैरिति वाच्योऽर्थः ननु संसारिणां दुर्लभं वस्तु कथं त्वया लब्धं तत्राह संसारिणेति काकतालीयन्यायेनेति भावः ॥ ८ ॥ ९ ॥

आदिभूता मूलप्रकृतिः 'मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति श्रुतेः ॥ १० ॥

त्वत्सन्निकर्षाज्जायन्ते तस्यां ब्रह्मादयः प्रजाः।
त्वदाश्रया सदा भाति माया या त्रिगुणात्मिका ॥११॥
सूतेऽजस्रं शुक्लकृष्णलोहिताः सर्वदा प्रजाः।
लोकत्रयमहागेहे गृहस्थस्त्वमुदाहृतः ॥ १२ ॥
त्वं विष्णुर्जानकी लक्ष्मीः शिवस्त्वं जानकी शिवा।
ब्रह्मा त्वं जानकी वाणी सूर्य्यस्त्वं जानकी प्रभा ॥ १३ ॥
भवान् शशाङ्कः सीता तु रोहिणी शुभलक्षणा।
शक्रस्त्वमेव पौलोमी सीता स्वाहानलो भवान् ॥ १४ ॥
यमस्त्वं कालरूपश्च सीता संयमनी प्रभो !।
निर्ऋतिस्त्वं जगन्नाथ ! तामसी जानकी शुभा ॥ १५
राम ! त्वमेव वरुणो भार्गवी जानकी शुभा।
वायुस्त्वं राम ! सीता तु सदागतिरितीरिता ॥ १६॥
कुवेरस्त्वं राम ! सीता सर्वसम्पत्प्रकीर्त्तिता।
रुद्राणी जानकी प्रोक्ता रुद्रस्त्वं लोकनाशकृत् ॥ १७ ॥
लोके स्त्रीवाचकं यावत्तत्सर्वं जानकी शुभा।
पुन्नामवाचकं यावत्तत् सर्वं त्वं हि राघव ! ॥ १८ ॥

त्वत्सन्निकर्षादिति अचेतनत्वेन तस्याश्चेतनसन्निकर्षापेक्षत्वादिति भावः अतएव सा त्वदाश्रयेति त्वत्सन्निकर्षेण तस्याः सृष्टत्वात्सा त्वदाश्रयेत्यर्थः त्रिगुणात्मिका सुखदुःखमोहस्वभावा सत्त्वरजस्तमोरूपगुणत्रयात्मिका ॥ ११॥

अतएव स्वगुणानुरूपास्तथा गुणाः प्रजाः सूते तादृश्या स्त्रीरूपया युक्तः लोकत्रयरूपगेहे गृहस्थस्त्वमित्युदाहृतः ॥ १२ ॥

इदानीं एवं स्त्रीरूपं सीतैव सर्वं पुंरूपं त्वमेवेति सर्वात्मना स्तुवन् त्वमेव गृहस्थ इत्यर्थमुपपादयति त्वमित्यादिना ॥ १३ ॥

पौलोमी शची अनलोऽग्निः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

विशिष्य किञ्चिदुक्त्वा सामान्येनोपसंहरति लोके इति ॥ १८ ॥

तस्माल्लोकत्रये देव ! युवाभ्यां नास्ति किञ्चन ॥ १९ ॥
त्वदाभासोदितात्ज्ञानमव्याकृतमितीर्य्यते ।
तस्मान्महांस्ततः सूत्रं लिङ्गं सर्वात्मकं ततः ॥ २० ॥
अहङ्कारश्च बुद्धिश्च पञ्चप्राणेन्द्रियाणि च ।
लिङ्गमित्युच्यते प्राज्ञैर्जन्ममृत्युसुखादिमत् ॥ २१ ॥
स एव जीवसंज्ञश्च लोके भाति जगन्मयः ।
अवाच्यानाद्यविद्यैव कारणोपाधिरुच्यते ॥ २२ ॥
स्थूलं सूक्ष्मं कारणाख्यमुपाधित्रितयं चितेः ।
एतैर्विशिष्टो जीवः स्याद्वियुक्तः परमेश्वरः ॥ २३ ॥

लोकत्रयस्य दृश्यत्वमुपसंहरति तस्मादिति युवाभ्यामन्यदिति शेषः 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति श्रुत्या सर्वत्रेश्वरचैतन्येनैव चेतनत्वमिति भावः ॥ १९ ॥

तदेवोपपादयति त्वदिति त्वदाभासेन तत्सम्बन्धेनोदितं सृष्ट्युन्मुखत्व-प्राप्तमोहशमज्ञानं मायैवाव्याकृतपदेनोच्यते महान् बुद्धितत्त्वं ततः सूत्र-महङ्कारः ततः सर्वात्मकं सर्वकार्य्यात्मकं लिङ्गं लिङ्गदेहः ॥ २० ॥

सर्वात्मकत्वमाह अहङ्कारश्च बुद्धिश्चेत्यादि पञ्चेत्यस्य सूक्ष्मभूतानीति शेषः प्राणेन्द्रियाणि पञ्च प्राणाः पञ्चेन्द्रियाणि मनस्त्वहङ्कारे चैव संश्ले-षितम् तत्राहङ्कारोऽहमित्याकारवृत्तिविशेषः बुद्धिरध्यवसायात्मकं मह-त्तत्त्वम् कर्मेन्द्रियाणि भूतेष्वन्तर्भूतानि तल्लिङ्गं लिङ्गदेह एव प्राज्ञैः जन्म-मृत्युसुखादिमदुच्यते इत्यर्थः ॥ २१ ॥

स एव लिङ्गदेहाभिमान्येवेत्यर्थः जगन्मयो हिरण्यगर्भः तत्समष्टिरूप-त्वात्तस्येत्यर्थः अवाच्या सत्त्वासत्त्वाभ्यामनिर्वाच्याऽनादिरुत्पत्तिरहिता कारणोपाधिः संसारकारणरूपकूटस्थस्य ब्रह्मण उपाधिः ॥ २२ ॥

स्थूलं स्थूलदेहः तत्समष्ट्युपाधिर्विराट् सूक्ष्मं लिङ्गदेहस्तत्समष्ट्युपा-धिर्हिरण्यगर्भः कारणोपाधिरीश्वरः एतैर्विशिष्टो जीवः अन्तर्यामित्वा

जाग्रत्स्वप्नसुषुप्त्याख्या संसृतिर्या प्रवर्त्तते।
तस्या विलक्षणः साक्षी चिन्मात्रस्त्वं रघूत्तम ॥ २४ ॥
त्वत्त एव जगज्जातं त्वयि सर्वं प्रतिष्ठितम्।
त्वय्येव लीयते कृत्स्नं तस्मात् त्वं सर्वकारणम् ॥ २५ ॥
रज्जावहिमिवात्मानं जीवं ज्ञात्वा भयं भवेत्।
परात्माऽहमिति ज्ञात्वा भयदुःखैर्विमुच्यते ॥ २६ ॥
चिन्मात्रज्योतिषा सर्वाः सर्वदेहेषु बुद्धयः।
त्वया यस्मात्प्रकाश्यन्ते सर्वस्यात्मा ततो भवान् ॥ २७ ॥

ईशस्यापि तत्रान्तर्भावात् उपाधित्रयविमुक्तो यः स परमेश्वरः तुरीय इत्यर्थः 'विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः। ईशस्य यस्त्रिभिर्हीनं तुरीयं तत्पदं विदुः' इति वार्त्तिकोक्तेः ॥ २३ ॥

तत्र स्थूलसूक्ष्मोपाधिभ्यां कारणोपाधेः साक्षिणो भेदकमाह जाग्रदिति इन्द्रियादिवृत्तिमती जाग्रदवस्था विश्वसाक्षिणी इन्द्रियवृत्त्यभावकालिकी अन्तःकरणवासनानिमित्तार्थोपलम्भरूपा तैजससाक्षिणी स्वप्नावस्था प्राज्ञसाक्षिणी निद्रावृत्त्यतिरिक्तसर्ववृत्त्यभावरूपा सुषुप्त्यवस्था एतत्त्रयात्मिकायाः संसृतेरविद्यात्मकत्वात् ततो विलक्षणश्चिन्मात्ररूपः साक्षी कारणोपाधिस्त्वमित्यर्थः ॥ २४ ॥

जगज्जन्मादिकारणमपि त्वमेवेत्याह त्वत्त इति कृत्स्नमविद्यासहितम् ॥ २५ ॥

रज्जाविति रज्जोरहित्वेन ज्ञानाद्यथा भयं तथात्मानं जीवत्वेन ज्ञानतो भयं संसाररूपम् तस्या एव रज्जो रज्जुत्वेन ज्ञानाद्यथा भयनिवृत्तिः तथा स्वस्य परमात्मत्वेन ज्ञानात्तन्निवृत्तिरित्यर्थः ॥ २६ ॥

चिन्मात्रज्योतिरूपेण भवता सर्वदेहेषु वर्त्तमानाः सर्वाः बुद्धयोऽन्तःकरणानि यस्मात्प्रकाश्यन्ते तत्तद्वृत्तिमन्ति क्रियन्ते अतो भवान् सर्वस्यात्माऽन्तर्यामीत्यर्थः ॥ २७ ॥

अज्ञानाध्यस्यते सर्वं त्वयि रज्जौ भुजङ्गवत् ।
त्वज्ज्ञानाल्लीयते सर्वं तस्मात् ज्ञानं सदाऽभ्यसेत् ॥ २८ ॥
त्वत्पादभक्तियुक्तानां विज्ञानं भवति क्रमात् ।
तस्मात्त्वद्भक्तियुक्ता ये मुक्तिभाजस्त एव हि ॥ २९ ॥
अहं त्वद्भक्तभक्तानां तद्भक्तानां च किङ्करः ।
अतो मामनुगृह्णीष्व मोहयस्व न मां प्रभो ! ॥ ३० ॥
त्वन्नाभिकमलोत्पन्नो ब्रह्मा मे जनकः प्रभो ! ।
अतस्तवाहं पौत्रोऽस्मि भक्तं मां पाहि राघव ! ॥३१॥
इत्युक्त्वा बहुशो नत्वा स्वानन्दाश्रुपरिप्लुतः ।
उवाच वचनं राम! (१) ब्रह्मणा नोदितोऽस्म्यहम् ॥३२॥

अज्ञानात्त्वत्स्वरूपाज्ञानात्त्वयि इदं सर्वं जगत् अध्यस्यते आरोप्यते जगद्रूपेण त्वं गृह्यसे इत्यर्थः यथा च रज्जुतत्त्वाज्ञानाद्भासमानस्य भुजङ्गस्य रज्जुज्ञानाल्लयः एवं त्वत्स्वरूपज्ञानाज्जगतो लयः अतस्त्वज्ज्ञानं सदाभ्यसेत् 'तच्चिन्तनं तत्कथनमन्योऽन्यं तत्प्रबोधनम्। एकान्ते तत्परत्वं च तदभ्यासं विदुर्बुधाः' इत्युक्तमभ्यासं कुर्यात् ॥ २८ ॥

त्वत्पादभक्तियुक्तानाम् 'श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्' इत्येवं नवविधा भक्तियुक्तानां क्रमात् वैराग्यश्रवणादिक्रमेण विज्ञानमपरोक्षसाक्षात्कारो भवत्यतस्त एव मुक्तिभाज इत्यर्थः ॥ २९ ॥

न मोहयस्व स्वमाययेत्यर्थः ॥ ३० ॥ ३१ ॥

नोदितोऽस्मि त्वन्निकटे सन्देशं वक्तुं प्रेरितोऽस्मि ॥ ३२ ॥ ३२ ॥

---

(१) रामं इति केचित् पठन्ति ।

रावणस्य वधार्थाय जातोऽसि रघुसत्तम ! ।
इदानीं राज्यरक्षार्थं पिता त्वामभिषेक्ष्यति ॥ ३३ ॥
यदि राज्याभिसंसक्तो रावणं न हनिष्यसि ।
प्रतिज्ञा ते कृता राम ! भूभारहरणाय वै ॥ ३४ ॥
तत् सत्यं कुरु राजेन्द्र ! सत्यसन्धस्त्वमेव हि ।
श्रुत्वैतद्गदितं रामो नारदं प्राह सस्मितम् ॥ ३५ ॥
शृणु नारद मे किञ्चिद्विद्यतेऽविदितं क्वचित् ? ।
प्रतिज्ञातं च यत्पूर्वं करिष्ये तन्न संशयः ॥ ३६ ॥
किन्तु कालानुरोधेन तत्तत्प्रारब्धसंक्षयात् ।
हरिष्ये सर्वभूभारं क्रमेणासुरमण्डलम् ॥ ३७ ॥
रावणस्य विनाशार्थं श्वोगन्ता दण्डकाननम् ।
चतुर्दशसमास्तत्र ह्युषित्वा मुनिवेशधृक् ॥ ३८ ॥
सीतामिषेण तं दुष्टं सकुलं नाशयाम्यहम् ।
एवं रामे प्रतिज्ञाते नारदः प्रमुमोद ह ॥ ३९ ॥
प्रदक्षिणत्रयं कृत्वा दण्डवत्प्रणिपत्य तम् ।
अनुज्ञातश्च रामेण ययौ देवगतिं मुनिः ॥ ४० ॥

भूभारहरणाय कृता ते प्रतिज्ञा व्यर्था स्यादिति शेषः ॥ ३४ ॥

तस्मात् तत् प्रतिज्ञातं वचः सत्यं कुरु यतस्त्वमेव सत्यसन्धः सत्यप्रतिज्ञः ॥ ३५ ॥

अविदितमिति छेदः विद्यते इत्यत्र काकुः । क्वचिद्देशे काले वा किञ्चिदपि वस्तु मेऽविदितं विद्यते अपि तु नेत्यर्थः सर्वं विदितमेवास्ते इत्यर्थः ॥३६॥

कालानुरोधेनेति कालस्य सुपक्वतायां मयैव स्वाभिमतत्वादिति भावः असुरमण्डलं रक्षोमण्डलरूपं भूभारम् ॥ ३७ ॥ ३८ ॥ ३९ ॥

देवगतिं देवलोकमार्गम् ॥ ४ ॥

शरीरं जडमत्यर्थमपवित्रं विनश्वरम् ।
विचार्य्यमपि शोकस्य नावकाशः कथञ्चन ॥ ९६ ॥
पिता वा तनयो वापि यदि मृत्युवशं गतः ।
मूढास्तमनुशोचन्ति स्वात्मताडनपूर्वकम् ॥ ९७ ॥
निःसारे खलु संसारे वियोगो ज्ञानिनां यदा ।
भवेद्वैराग्यहेतुः स शान्तिसौख्यं तनोति च ॥ ९८ ॥
जन्मवान् यदि लोकेऽस्मिन् तर्हि तं मृत्युरन्वगात् ।
तस्मादपरिहार्य्योऽयं मृत्युर्जन्मवतां सदा ॥ ९९ ॥
स्वकर्मवशतः सर्वजन्तूनां प्रभवाप्ययौ ।
विजानन्नप्यविद्वान्यः कथं शोचति बान्धवान् ॥ १०० ॥
ब्रह्माण्डकोटयो नष्टाः सृष्टयो बहुशो गताः ।
शुष्यन्ति सागराः सर्वे कैवास्था क्षणजीविते ॥ १०१ ॥
चलपत्रान्तलग्नाम्बुबिन्दुवत् क्षणभङ्गुरम् ।

च्यत्वमाह आत्मेति नित्योऽव्यय इत्यस्यैव जन्मनाशादिवर्जित इति विवरणम् ॥ ९५ ॥

शरीरस्य जडत्वान्नश्वरत्वादेव चाशोच्यता इत्याह शरीरमिति ॥९६॥

स्वात्मताडनपूर्वकं स्वशरीरताडनपूर्वकमित्यर्थः ॥ ९७ ॥

ज्ञानिनां संसारस्यासारत्वेन ज्ञाततस्य यदा केनचिद्वियोगो भवति तदा स वैराग्यहेतुः भवेत् भवतीत्यर्थः शान्त्यादिकर्त्ता च ॥ ९८ ॥

अथ जातस्य ध्रुवो मृत्युरित्याह जन्मवानिति अन्वगात् अनुगच्छत्ये-वेत्यर्थः ॥ ९९ ॥

यः अविद्वानपि अतत्त्वज्ञोऽपि स्वोत्पत्तिप्रलययोः सर्वजन्तूनां कर्मा-धीनत्वं विजानन् कथं बान्धवान् शोचति किं पुनस्तत्त्वज्ञ इति भावः ॥१००

शुष्यन्ति वर्त्तमानसामीप्ये लट् क्षणजीविते क्षणभङ्गुरे जीविते इत्यर्थः ॥ १०१ ॥

आयुस्त्यजत्यवेलायां कस्तत्र प्रत्ययस्तव ॥ १०२ ॥
देही प्राक्तनदेहोत्थकर्मणा देहवान् पुनः।
तद्देहोत्थेन च पुनरेवं देहः सदात्मनः ॥ १०३ ॥
यथा त्यजति वै जीर्णं वासो गृह्णाति नूतनम्।
तथा जीर्णं परित्यज्य देही देहं पुनर्नवम् ॥ १०४ ॥
भजत्येव सदा तत्र शोकस्यावसरः कुतः।
आत्मा न म्रियते जातु जायते न च वर्द्धते ॥ १०५ ॥
षड्भावरहितोऽनन्तः सत्यप्रज्ञानविग्रहः।
आनन्दरूपो बुद्ध्यादिसाक्षी लयविवर्जितः ॥ १०६ ॥
एक एव परो ह्यात्मा ह्यद्वितीयः समस्थितः।
इत्यात्मानं दृढं ज्ञात्वा त्यक्त्वा शोकं कुरु क्रियाम् ॥१०७॥
तैलद्रोण्याः पितुर्देहमुद्धृत्य सचिवैः सह।

यद्वं यद्वूर्ण यत्फलं तदन्ते यन्नो योऽम्बुबिन्दुस्तद्वत् क्षणभङ्गुरम् अवेलायां बाल्येऽपि प्रत्ययो विश्वासः ॥ १०२ ॥

देही जीवः प्राक्तनदेहसम्पादितकर्मणाऽयं देह एतद्देहसम्पादितकर्मणा च पुनर्देह इति देहवियोगो न कदाचिदात्मन इति देहशोको वृथेति भावः ॥ १०३ ॥

पुनर्देहप्राप्तौ दृष्टान्तमाह यथेति नवं भजत्येवेत्युत्तरेणान्वयः ॥१०४॥

आत्मनस्तु न मरणादीत्याह आत्मा नेति ॥ १०५ ॥

आदिमध्यान्तभावविकाराभावेन सर्वभावविकाररहित्यमित्याह षड्भिति भावरहितः अनन्तः देशतः परिच्छेदरहितः प्रज्ञानं निर्विषयज्ञानं तदेव विग्रहः शरीरं यस्य सः बुद्ध्यादिसाक्षी निश्चयादिरूप यकवान्तःकरणवृत्तिसाक्षी लयो नाशस्तद्रहितः ॥ १०६ ॥

समास्थितः सर्वत्र समतया स्थितः स एवाहमित्यात्मानं ज्ञात्वा शोकं त्यक्त्वा क्रियां कुरु ॥ १०७ ॥

कृत्यं कुरु यथा न्यायमस्माभिः कुलनन्दन ॥ १०८ ॥
इति सम्बोधितः साक्षाद्गुरुणा भरतस्तदा।
विसृज्याज्ञानजं शोकं चक्रे स विधिवत्क्रियाम् ॥१०९॥
शुरुणोक्तप्रकारेण आहिताग्नेर्यथाविधि।
संस्कृत्य स पितुर्देहं विधिदृष्टेन कर्मणा ॥ ११० ॥
एकादशेऽहनि प्राप्ते ब्राह्मणान् वेदपारगान्।
भोजयामास विधिवच्छतशोऽथ सहस्रशः ॥ १११ ॥
उद्दिश्य पितरं तत्र ब्राह्मणेभ्यो धनं बहु।
ददौ गवां सहस्राणि ग्रामान् रत्नाम्बराणि च ॥ ११२ ॥
अवसत् स्वगृहे तत्र राममेवानुचिन्तयन्।
वशिष्ठेन सह भ्रात्रा मन्त्रिभिः परिवारितः ॥ ११३ ॥
रामेऽरण्यं प्रयाते सह जनकसुतालक्ष्मणाभ्यां सुघोरं
माता मे राक्षसीव प्रदहति हृदयं दर्शनादेव सद्यः।
गच्छाम्यारण्यमद्य स्थिरमतिरखिलं दूरतोऽपास्य राज्यं
रामं सीतासमेतं स्मितरुचिरमुखं नित्यमेवानु सेवे ॥११४॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अयोध्याकाण्डे
सप्तमः सर्गः

तैलद्रोणी तैलपूर्णा काष्ठाम्बुवाहिनी ॥ १०८। १०९ ॥

गुरुणा वशिष्ठेन ॥ ११०। १११। ११२। ११३।

स्वानुचिन्तनप्रकारमेवाह रामे इति सुघोरमरण्यं प्रयाते इत्यन्वयः मे माता राक्षसीव दर्शनात् हृदयं प्रदहति अत आरण्यं अरण्यवन्तं देशं रामवासभूतं गच्छामीत्यन्वयः ॥ ११४ ॥

इति श्रीमत्यकलराजाधिपद्वारभ्समयाद्वादिवि० श्रीरामवर्मणः कृतावध्यात्मरामायणे टीकौ अयोध्याकाण्डे
सप्तमः सर्गः।

अष्टमः सर्गः ।

श्रीमहादेव उवाच ।

वसिष्ठो मुनिभिः सार्धं मन्त्रिभिः परिवारितः ।
राज्ञः सभां देवसभासन्निभामविशद्विभुः ॥ १ ॥
तत्रासने समासीनश्चतुर्मुख इवापरः ।
आनीय भरतं तत्र उपवेश्य सहानुजम् ॥ २ ॥
अब्रवीद्वचनं देशकालोचितमरिन्दमम् ।
वत्स ! राज्येऽभिषेक्ष्यामस्त्वमद्य पितृशासनात् ॥ ३ ॥
कैकेय्या याचितं राज्यं त्वदर्थे पुरुषर्षभ ! ।
सत्यसन्धो दशरथः प्रतिज्ञाय ददौ किल ॥ ४ ॥
अभिषिक्तो भवत्वद्य मुनिभिर्मन्त्रपूर्वकम् ।
तच्छ्रुत्वा भरतोऽप्याह मम राज्येन किं मुने ! ॥ ५ ॥
रामो राजाधिराजश्च वयं तस्यैव किङ्कराः ।
श्वः प्रभाते गमिष्यामो राममानेतुमञ्जसा ॥ ६ ॥
अहं यूयं मातरश्च कैकेयीं राक्षसीं विना ।

अष्टमे तु वसिष्ठेन प्रोक्तोऽपि भरतः किल अनादृत्याधिराज्यं च जगाम भ्रातृसन्निधौ ॥ १ ॥

देवसभासन्निभां तत्सदृशीम् ॥ १ ॥

चतुर्मुखो ब्रह्मा ॥ २ । २ ॥

प्रतिज्ञाय अस्मान् सर्वान् प्रतिज्ञापयित्वा ददौ ॥ ४ ॥

मुनिभिः क्रियमाणोऽभिषेकोऽद्य भवत्वित्यन्वयः ॥ ५ ॥

अञ्जसा शीघ्रम् ॥ ६ ॥

हनिष्याम्यधुनैवाहं कैकेयीं मातृगन्धिनीम् ॥ ७ ॥
किन्तु मां नो रघुश्रेष्ठः स्त्रीहन्तारं सहिष्यते।
तच्छोभूते गमिष्यामि पादचारेण दण्डकान् ॥ ८ ॥
शत्रुघ्नसहितस्तूर्णं यूयमायान्तु वा नवा।
रामो यथा वने यातस्तथाऽहं वल्कलाम्बरः ॥ ९ ॥
फलमूलकृताहारः शत्रुघ्नसहितो मुने !।
भूमिशायी जटाधारी यावद्रामो निवर्त्तते॥ १० ॥
इति निश्चित्य भरतस्तूष्णीमेवावतस्थिवान्।
साधु साध्विति तं सर्वे प्रशशंसुर्मुदान्विताः ॥ ११ ॥
ततः प्रभाते भरतं गच्छन्तं सर्वसैनिकाः।
अनुजग्मुः सुमन्त्रेण नोदिताः साश्वकुञ्जराः ॥ १२ ॥
कौशल्याद्या राजदारा वशिष्ठप्रमुखा द्विजाः।
छादयन्तो भुवं सर्वे पृष्ठतः पार्श्वतोऽग्रतः ॥ १३ ॥
शृङ्गिवेरपुरं गत्वा गङ्गाकूले समन्ततः।
उवास महती सेना शत्रुघ्नपरिचोदिता ॥ १४ ॥
आगतं भरतं श्रुत्वा गुहः शङ्कितमानसः।

हनिष्यामीति तादृशवधस्यैवौचित्यादिति भावः मातृगन्धिनीं तादृशी-मपि मातृसम्बन्धवतीमपीत्यर्थः ॥ ७ ॥

नो इति प्रतिषेधे नोसहिष्यत इत्यन्वयः पादचारेण न तु वाहनेने-त्यर्थः ॥ ८ ॥

यावद्रामो निवर्त्तते तावदेवं तत्समानव्रतो भविष्यामीत्यर्थः ॥ ९ । १० । ११ । १२ ॥

पृष्ठतः पार्श्वतोऽग्रतो वभुरिति शेषः ॥ १३ । १४ ॥

महत्या सेनया सार्धमागतो भरतः किल ॥ १५ ॥
पारं गन्तुं न वा याति रामस्याविदितात्मनः ।
मत्वा तद्धृदयं ज्ञेयं यदि शुद्धस्तरिष्यति ॥ १६ ॥
शङ्का नो चेत् समालक्ष्य नावस्तिष्ठन्तु सायुधाः ।
ज्ञातयो मे समायत्ताः पश्यन्तः सर्वतो दिशम् ॥ १७ ॥
इति सर्वान् समादिश्य गुहो भरतमागतः ।
उपायनानि संगृह्य विविधानि बहून्यपि ॥ १८ ॥
प्रययौ ज्ञातिभिः सार्द्धं बहुभिर्विविधायुधैः ।
निवेद्योपायनान्यग्रे भरतस्य समन्ततः ॥ १९ ॥
दृष्ट्वा भरतमासीनं सानुजं सह मन्त्रिभिः ।
चीराम्बरं घनश्यामं जटामुकुटधारिणम् ॥ २० ॥
राममेवानुशोचन्तं रामरामेति वादिनम् ।
ननाम शिरसा भूमौ गुहोऽहमिति चाब्रवीत् ॥ २१ ॥
शीघ्रमुत्थाप्य भरतो गाढमालिङ्ग्य सादरम् ।
पृष्ट्वाऽनामयमव्यग्रः सखायमिदमब्रवीत् ॥ २२ ॥

शङ्कितमानसः किमर्थं वने स्थितस्यापि रामस्य वधार्थं यातीति शङ्का तदेवाह महत्येति ॥ १५ ॥

अविदितात्मनः अविदितैतद्वृत्तान्तस्य रामस्य पारं गन्तुं याति न वा यातीति शङ्कितमानस इत्यर्थः यदि शुद्धः तदा तरिष्यति गङ्गामित्यन्वयः ॥ १६ ॥

नो चेत् यद्यशुद्धस्तदा मे ज्ञातयो नाव आलक्ष्य सर्वतो दिशं पश्यन्तः समायत्ताः सायुधाश्च तिष्ठन्तु तदुत्तरणप्रतिबन्धायेति शेषः ॥ १७ । १८ ॥

उपायनानि राजयोग्यानि भक्ष्यादीनि स्वदेशस्थानि भरतस्याग्रे निवेद्य समन्ततो दृष्ट्वेति शेषः सैनिकेषु विकाराविकारपरीक्षणाय समन्ततो निरीक्षणम् ॥ १९ । २० । २१ ॥

अनामयमारोग्यम् ॥ २२ ॥

भ्रातस्त्वं राघवेणाच समेतः समवस्थितः।
रामेणालिङ्गितः सार्द्रनयनेनामलात्मना ॥ २३ ॥
धन्योऽसि कृतकृत्योऽसि यत्त्वया परिभाषितः।
रामो राजीवपत्राक्षो लक्ष्मणेन च सीतया ॥ २४ ॥
यत्र रामस्त्वया दृष्टस्तत्र मां नय सुव्रत !।
सीतया सहितो यत्र सुप्तस्तद्दर्शयस्व मे ॥ २५ ॥
त्वं रामस्य प्रियतमो भक्तिमानसि भाग्यवान्।
इति संस्मृत्य संस्मृत्य रामं साश्रुविलोचनः ॥ २६ ॥
गुहेन सहितस्तत्र यत्र रामः स्थितो निशि।
ययौ ददर्श शयनस्थलं कुशसमास्तृतम् ॥ २७ ॥
सीताभरणसंलग्नस्वर्णबिन्दुभिरञ्चितम्।
दुःखसन्तप्तहृदयो भरतः पर्य्यदेवयत् ॥ २८ ॥
अहोऽतिसुकुमारी या सीता जनकनन्दिनी।
प्रासादे रत्नपर्य्यङ्के कोमलास्तरणे शुभे ॥ २९ ॥
रामेण सहिता शेते सा कथं कुशविष्टरे।
सीता रामेण सहिता दुःखेन मम दोषतः ॥ ३० ॥
धिङ्मां जातोऽस्मि कैकेय्यां पापराशिसमानतः।

यतो रामेणालिङ्गितोऽतो धन्योऽसि ॥ २३। २४। २५ ॥

यतो रामस्य प्रियतमोऽतो भाग्यवान् ॥ २६। २७ ॥

सीताऽभरणघर्षणेन संलग्ना ये स्वर्णबिन्दवः तदाकारचिह्नानि तैरञ्चितं कुशं शयनस्थलं दृष्ट्वा पर्य्यदेवयत् शुशोचेत्यर्थः ॥ २८। २९ ॥

सा कथं मम दोषतः कुशविष्टरे शेते रामेण सहितेति पुनरुक्तिः शोकमेव पुष्णाति ॥ ३० ॥

पापराशिसमानतः पापराशिसमानायाम् सार्वविभक्तिकस्तसिः ताद्दृश्यां कैकेय्यां यज्जातोऽस्मि तन्मां धिक् इदं कथं कथयन्त्योऽर्धे चादिः ॥३१॥

कृष्टधीः कृष्टचित्तः ॥ ३२ ॥

मन्निमित्तमिदं क्लेशं रामस्य परमात्मनः ॥ ३१ ॥
अहोऽति सफलं जन्म लक्ष्मणस्य महात्मनः ।
राममेव सदान्वेति वनस्थमपि हृष्टधीः ॥ ३२ ॥
अहं रामस्य दासा ये तेषां दासस्य किङ्करः ।
यदि स्यां सफलं जन्म मम भूयान्न संशयः ॥ ३३ ॥
भ्रातर्जानासि यदि तत्कथयस्व ममाखिलम् ।
यत्र तिष्ठति तत्राहं गच्छाम्यानेतुमञ्जसा ॥ ३४ ॥
गुहस्तं शुद्धहृदयं ज्ञात्वा सस्नेहमब्रवीत् ।
देव ! त्वमेव धन्योऽसि यस्य ते भक्तिरीदृशी ॥ ३५ ॥
रामे राजीवपत्राक्षे सीतायां लक्ष्मणे तथा ।
चित्रकूटाद्रिनिकटे मन्दाकिन्याविदूरतः ॥ ३६ ॥
मुनीनामाश्रमपदे रामस्तिष्ठति सानुजः ।
जानक्या सहितो नन्दात् सुखमास्ते किल प्रभुः ॥ ३७ ॥
तत्र गच्छामहे शीघ्रं गङ्गां तर्त्तुमिहार्हसि ।
इत्युक्त्वा त्वरितं गत्वा नावः पञ्चशतानि ह ॥ ३८ ॥
समानयत् ससैन्यस्य तर्त्तुं गङ्गां महानदीम् ।

आत्मानं निन्दन् रामं स्तौति अहमिति ॥ ३३ । ३४ । ३५ ॥

मन्दाकिन्या अविदूरत इति छेदः आर्षो दीर्घः समीप इत्यर्थः चित्रकूटमन्दाकिन्योर्मध्ये इति यावत् ॥ ३६ ॥

नन्दात् समृद्धेः फलमूलादिसमृद्धेरिति यावत् टुनदि समृद्धाविति धात्वनुसारात् ॥ ३७ ॥

पञ्चशतानि समानयदित्यन्वयः ह इति पादपूरणे ॥ ३८ ॥

स्वयमेवानिनायैकां राजनावं गुहस्तदा ॥ ३९ ॥
आरोप्य भरतं तत्र शत्रुघ्नं राममातरम् ।
वशिष्ठं च तथाऽन्यच्च कैकेयीं चान्ययोषितः ॥ ४० ॥
तीर्त्वा गङ्गां ययौ शीघ्रं भरद्वाजाश्रमं प्रति ।
दूरे स्थाप्य महासैन्यं भरतः सानुजो ययौ ॥ ४१ ॥
आश्रमे मुनिमासीनं ज्वलन्तमिव पावकम् ।
दृष्ट्वा ननाम भरतः साष्टाङ्गमतिभक्तितः ॥ ४२ ॥
ज्ञात्वा दाशरथिं प्रीत्या पूजयामास मौनिराट् ।
पप्रच्छ कुशलं दृष्ट्वा जटावल्कलधारिणम् ॥ ४३ ॥
राज्यं प्रशासतस्तेऽद्य किमेतद्वल्कलादिकम् ।
आगतोऽसि किमर्थं त्वं विपिनं मुनिसेवितम् ॥ ४४ ॥
भरद्वाजवचः श्रुत्वा भरतः साश्रुलोचनः ।
सर्वं जानासि भगवन् ! सर्वभूताशयस्थितः ॥ ४५ ॥
तथापि पृच्छसे किञ्चित्तदनुग्रह एव मे ।

ससैन्यस्य भरतस्य तत्तुं तरणार्थं अत्यादरप्रदर्शनाय भरतोत्तरणाय राजनावं राजयोग्यां नावं स्वयमेवानिनाय ॥ ३९ ॥

तथा कैकेयीमन्ययोषितश्चान्यश्चान्यराजनारीश्च रामे दुष्टाचरण-प्रवृत्तोऽयं कैकेय्या अनादरः मा भूदितारयदिति शेषः ॥ ४० ॥

भरद्वाजाश्रमपर्य्यन्तं सेनया सह गत्वा ततः सैन्याश्रमोपरोधो मा भूदिति किञ्चित् दूरे संस्थाप्य स्वयं सानुजो ययौ भरद्वाजाश्रमद्वारं प्रतीति शेषः ॥ ४१ । ४२ ॥

जटादिधारिणं दृष्ट्वा वक्ष्यमाणं पप्रच्छ ॥ ४३ ॥

सर्वभूताशयस्थितः सर्वभूताशयस्थेनान्तर्य्यामिणा तत्त्वरूपतया भेदादिति भावः ॥ ४५ ॥ ४६ ॥

कैकेय्या यत् कृतं कर्म रामराज्यविघातनम्॥ ४६ ॥
वनवासादिकं वापि न हि जानामि किञ्चन।
भवत्पादयुगं मेऽद्य प्रमाणं मुनिसत्तम! ॥ ४७ ॥
इत्युक्त्वा पादयुगलं मुनेः स्पृष्ट्वार्त्तमानसः।
ज्ञातुमर्हसि मां देव! शुद्धो वाशुद्ध एव वा ॥ ४८ ॥
मम राज्येन किं स्वामिन्! रामे तिष्ठति राजनि।
किङ्करोऽहं मुनिश्रेष्ठ! रामचन्द्रस्य शाश्वतः ॥ ४९ ॥
अतो गत्वा मुनिश्रेष्ठ! रामस्य चरणान्तिके।
पतित्वा राज्यसम्भारान् समर्प्यानैव राघवम् ॥ ५० ॥
अभिषेक्ष्ये वशिष्ठाद्यैः पौरजानपदैः सह।
नेष्येऽयोध्यां रमानाथं दासः सेवेऽतिनीचवत् ॥ ५१ ॥
इत्युदीरितमाकर्ण्य भरतस्य वचो मुनिः।
आलिङ्ग्य मूर्ध्न्यवघ्राय प्रशशंस सविस्मयः ॥ ५२ ॥
वत्स! ज्ञातं पुरैवैतद्भविष्यं ज्ञानचक्षुषा।
मा शुचस्त्वं परो भक्तः श्रीरामे लक्ष्मणादपि ॥ ५३ ॥
आतिथ्यं कर्त्तुमिच्छामि ससैन्यस्य तवानघ!।
अद्य भुक्त्वा ससैन्यस्त्वं श्वो गन्ता रामसन्निधिम् ॥ ५४॥

यथाज्ञापयति भवांस्तथेति भरतोऽब्रवीत्।

न जानामीत्यर्थं शपथेन प्रत्याययति भवत्पादेति ॥ ४७ ॥

ज्ञातुमर्हसीति इत्याहेति शेषः ॥ ४८ ॥

शाश्वतः किङ्कर इत्यनेन तस्य चक्रावतारत्वं सूचितम् ॥ ४९ । ५० ॥

दासोऽहमतिनीचवत् अतिनम्रः सन् सेवे सेविष्ये इत्यर्थः वर्त्तमान-सामीप्ये लट् ॥ ५१ ॥

भरतस्येत्युदीरितं वच इत्यन्वयः शेषे षष्ठी ॥ ५२ ॥

लक्ष्मणादपि परोऽधिक इत्यर्थः रामे इति विषयसप्तमी ॥ ५३ । ५४॥

भरद्वाजस्तपः स्पृष्ट्वा मौनी होमगृहे स्थितः ॥ ५५ ॥
दध्यौ कामदुघां कामवर्षिणीं कामदो मुनिः ।
असृजत्कामधुक् सर्वं यथाकाममलौकिकम् ॥ ५६ ॥
भरतस्य ससैन्यस्य यथेष्टं च मनोरथम् ।
तथा ववर्ष सकलं तृप्तास्ते सर्वसैनिकाः ॥ ५७ ॥
वशिष्ठं पूजयित्वाऽग्रे शास्त्रदृष्टेन कर्मणा ।
पश्चात् ससैन्यं भरतं तर्पयामास योगिराट् ॥ ५८ ॥
उषित्वा दिनमेकन्तु आश्रमे स्वर्गसन्निभे ।
अभिवाद्य पुनः प्रातर्भरद्वाजं सहानुजः ।
भरतस्तु कृतानुज्ञः प्रययौ रामसन्निधिम् ॥ ५९ ॥
चित्रकूटमनुप्राप्य दूरे संस्थाप्य सैनिकान् ।
रामसन्दर्शनाकाङ्क्षी प्रययौ भरतः स्वयम् ॥ ६० ॥
शत्रुघ्नेन सुमन्त्रेण गुहेन च परन्तपः ।
तपस्विमण्डलं सर्वं विचिन्वानो न्यवर्त्तत ॥ ६१ ॥
अदृष्ट्वा रामभवनमपृच्छदृषिमण्डलम् ।
कुत्रास्ते सीतया सार्द्धं लक्ष्मणेन रघूत्तमः ॥ ६२ ॥
ऊचुरग्रे गिरेः पश्चाद्गङ्गाया उत्तरे तटे ।

यथा आज्ञापयतीति छन्दोभङ्ग आर्षः ॥ ५५ ॥

यस्य यन्मनोरथविषयमिष्टं तत्सर्वमलौकिकं लौकिकसामग्रीजन्य-विलक्षणमसृजत् ॥ ५६ । ५७ । ५८ । ५९ ॥

प्रययौ भरतः रामाश्रमद्वारं प्रतीति शेषः ॥ ६० ॥

शत्रुघ्नादिभिः सह सर्वं तपस्विमण्डलं तपस्विनामाश्रममण्डलं विचिन्वानो रामाश्रममलब्ध्वा न्यवर्त्तत निवृत्तव्यापार इवासीत् ॥ ६१ ॥

तत ऋषिमण्डलमपृच्छत् ॥ ६२ ॥

विविक्तं रामसद्मं रम्यं काननमण्डितम् ॥६३॥
सफलैराम्रपनसैः कदलीखण्डसंवृतम् (१)।
चम्पकैः कोविदारैश्च पुन्नागैर्विपुलैस्तथा ॥६४॥
एवं दर्शितमालोक्य मुनिभिर्भरतोऽग्रतः।
हर्षाद्ययौ रघुश्रेष्ठभवनं मन्त्रिणा सह ॥६५॥

ददर्श दूरादतिभासुरं शुभं
रामस्य गेहं मुनिवृन्दसेवितम्।
वृक्षाग्रसंलग्नसुवल्कलाजिनं
रामाभिरामं भरतः सहानुजः ॥६६॥

इति अध्यात्मरामायणे सेतौ अयोध्याकाण्डे
अष्टमः सर्गः।

विविक्तमेकान्तदेशवर्त्ति ॥६३॥
कदलीखण्डः कदलीसमूहः ॥६४॥
एवं मुनिभिर्दर्शितं रघुश्रेष्ठभवनं अग्रतो भरतः समालोक्य मन्त्रिणा सह हर्षाद्ययाविति सम्बन्धः ॥६५॥
रामाभिरामम् रामेण रामवासेनाभिरामम् ॥६६॥
इति श्रीमन्मकबरराजविपद्दुरर्घसमर्थत्वादिवि० श्रीरामवर्मणः
कृतावध्यात्मरामायणे अयोध्याकाण्डे
अष्टमः सर्गः

---

(१) कदलीषण्डमण्डितं इत्यपि पाठः

नवमः सर्गः ।

श्रीमहादेव उवाच ।

अथ गत्वाऽऽश्रमपदसमीपं भरतो मुदा ।
सीतारामपदैर्युक्तं पवित्रमतिशोभनम् ॥ १ ॥

स तत्र वज्राङ्कुशवारिजाञ्चित-
ध्वजादिचिह्नानि पदानि सर्वतः ।
ददर्श रामस्य भुवोऽतिमङ्गला-
न्यचेष्टयत्पादरजः स सानुजः ॥ २ ॥

अहो सुधन्योऽहममूनि राम-
पादारविन्दाङ्कितभूतलानि ।
पश्यामि यत्पादरजो विमृग्यं
ब्रह्मादिदेवैः श्रुतिभिश्च नित्यम् ॥ ३ ॥

इत्यद्भुतप्रेमरसाप्लुताशयो
विगाढचेता रघुनाथभावने ।

नवमे भरतो गत्वा श्रीरामस्यैव सन्निधौ ।
तेन सार्द्धं गन्तुमना नागमद्गुरुबोधितः ॥ १ ॥

सीतारामपदयुक्तत्वादिविशिष्टं आश्रमपदसमीपं आश्रमस्थानसमीपदेशं गत्वा ॥ १ ॥

तत्र वज्राङ्कुशकमलपूजितध्वजादिचिह्नयुतानि पदानि ददर्श ध्वजे पूजितत्वं सुष्ठुरेखत्वं दृष्ट्वा तत्पादचिह्नितदेशरजः तु अचेष्टयत् लुलुठे ॥२॥

यत्पादरज इत्यादि व्याख्यातं प्राक् ॥ ३ ॥

आमन्दजाश्रुस्नपितस्तनान्तरः
शनैरवापाश्रमसन्निधिं हरेः ॥ ४ ॥
स तत्र दृष्ट्वा रघुनाथमास्थितं
दूर्वादलश्याममलमायतेक्षणम्।
जटाकिरीटं नववल्कलाम्बरं
प्रसन्नवक्त्रं तरुणारुणद्युतिम् ॥ ५ ॥
विलोकयन्तं जनकात्मजां शुभां
सौमित्रिणा सेवितपादपङ्कजम्।
तदाभिदुद्राव रघूत्तमं शुचा
हर्षाच्च तत्पादयुगं त्वराग्रहीत् ॥ ६ ॥
रामस्तमाकृष्य सुदीर्घबाहु-
र्दोर्भ्यां परिष्वज्य सिषिच्च (१) नेत्रजैः।
जलैरथाङ्कोपरि सन्न्यवेशयत्
पुनःपुनः सम्परिषस्वजे विभुः ॥ ७ ॥
अथ ता मातरः सर्वाः समाजग्मुस्त्वरान्विताः।
राघवं द्रष्टुकामास्तास्तृषार्त्ता गौर्यथा जलम् ॥ ८ ॥
रामः स्वमातरं वीक्ष्य द्रुतमुत्थाय पादयोः।

आढ्रुतो यः प्रेमरसः प्रीतिरससेनाप्लुतो आश्रम आशयोऽन्तःकरणं यस्य रघुनाथभावने विगाढ़चेताः तत्परचित्त इत्यर्थः ॥ ४ । ५ ॥
त्वरा त्वरयेत्यर्थः ॥ ६ । ७ ॥
तृषार्त्ता गौर्यथा जलं प्रति गच्छति एवं मातरो राघवं प्रति जग्मुः ॥ ८ ॥

(१) विषिच्य इति वा पाठः।

ववन्दे साश्रु सा पुत्रमालिङ्ग्यातीव दुःखिता ॥ ९ ॥
इतराश्च तथा नत्वा जननी रघुनन्दनः ।
ततः समागतं दृष्ट्वा वशिष्ठं मुनिपुङ्गवम् ॥ १० ॥
साष्टाङ्गप्रणिपत्याह धन्योऽस्मीति पुनःपुनः ।
यथार्हमुपवेश्याह सर्वानेव रघूद्वहः ॥ ११ ॥
पिता मे कुशली किंवा मां किमाहातिदुःखितः ।
वशिष्ठस्तमुवाचेदं पिता ते रघुनन्दन ! ॥ १२ ॥
त्वद्वियोगाभितप्तात्मा त्वामेव परिचिन्तयन् ।
राम ! रामेति सीतेति लक्ष्मणेति ममार ह ॥ १३ ॥
श्रुत्वा तत्कर्णशूलाभं गुरोर्वचनमञ्जसा ।
हा हतोऽस्मीति पतितो रुदन् रामः सलक्ष्मणः ॥१४॥
ततोऽनु रुरुदुः सर्वा मातरश्च तथापरे ।
हा तात ! मां परित्यज्य क्व गतोऽसि घृणाकर ! ॥१५॥
अनाथोऽस्मि महाबाहो ! मां को वा लालयेदितः ।

साश्रु यथा तथा ववन्दे सा च पुत्रमालिङ्ग्य भर्तृवियोगस्मरणेना-
तीव दुःखिता आसीत् इति शेषः ॥ ९ ॥

इतराश्च जननीस्तथा साश्रु नत्वा स्थित इति शेषः ॥ १० ॥

धन्योऽस्मि त्वद्दर्शनादिति भावः यथार्हं यथायोग्यम् ॥ ११ ॥

पिता मे कुशलीति प्रश्नः स्ववियोगे कुशलमसम्भाव्यमित्याशयेनाह
किंवेति तथैव सम्भावनयाहातिदुःखितः प्राणवियोगजनकपीड़या पीड़ितः
किमाह ॥ १२ ॥

राम रामेतीत्यादेर्वदन्निति शेषः ॥ १३ ॥

कर्णशूलाभं कर्णयोः शूलरोगतुल्यम् ॥ १४ ॥

घृणाकर दयासमुद्र ॥ १५ ॥

सीता च लक्ष्मणश्चैव विलेपतुरतो भृशम् ॥ १६ ॥
वशिष्ठः शान्तवचनैः शमयामास तां शुचम्।
ततो मन्दाकिनीं गत्वा स्नात्वा ते वीतकल्मषाः ॥ १७ ॥
राज्ञे ददुर्जलं तत्र सर्वे ते जलकाङ्क्षिणे।
पिण्डान्निर्वापयामास रामो लक्ष्मणसंयुतः ॥ १८ ॥
इङ्गुदीफलपिण्याकरचितान्मधुसंप्लुतान्।
वयं यदन्नाः पितरस्तदन्नाः स्मृतिनोदिताः ॥ १९ ॥
इति दुःखाश्रुपूर्णाक्षः पुनः स्नात्वा गृहं ययौ।
सर्वे रुदित्वा सुचिरं स्नात्वा जग्मुस्तथाश्रमम् ॥ २० ॥
तस्मिंस्तु दिवसे सर्वे उपवासं प्रचक्रिरे।
ततः परेद्युर्विमले स्नात्वा मन्दाकिनीजले ॥ २१ ॥
उपविष्टं समागम्य भरतो राममब्रवीत्।
राम राम महाभाग ! स्वात्मानमभिषेचय ॥ २२ ॥
राज्यं पालय पित्र्यन्ते ज्येष्ठस्त्वं मे पिता तथा।
क्षत्रियाणामयं धर्मो यत्प्रजापरिपालनम् ॥ २३ ॥

अतो भृशं रामविलापादप्यधिकमित्यर्थः ॥ १६ ॥

शान्तवचनैः पूर्वराजवियोगचरितैः संसारानित्यताप्रतिपादकैर्वचनैः शान्त्वज्ञानोपदेशैश्च ॥ १७ ॥

जलकाङ्क्षिणे राज्ञ इत्यादि ॥ १८ ॥

इङ्गुदो तापसतरुः ननु राजायोग्यमेतत्तत्राह वयमिति ॥ १९ । २० । २१ । २२ ॥

पित्र्यं पितृरागतं यथा पिता ज्येष्ठस्त्वं मे तथा पितृवद्वयः एवं च पितरि जीवति यथा राज्यानधिकारस्तथा त्वयि जीवत्यपीति भावः किञ्च क्षत्रियाणामयमेव धर्म इत्याह क्षत्रियाणामिति ॥ २३ ॥

इष्ट्वा यज्ञैर्बहुविधैः पुत्रानुत्पाद्य तन्तवे।
राज्ये पुत्रं समारोप्य गमिष्यसि ततो वनम्॥ २४॥
इदानीं वनवासस्य कालो नैव प्रसीद मे।
मातुर्मे दुष्कृतं किञ्चित् स्मर्तुं नार्हसि पाहि नः॥२५॥
इत्युक्त्वा चरणौ भ्रातुः शिरस्याधाय भक्तितः।
रामस्य पुरतः साक्षाद्दण्डवत्पतितो भुवि॥ २६॥
उत्थाप्य राघवः शीघ्रमारोप्याङ्केऽतिभक्तितः।
उवाच भरतं रामः स्नेहार्द्रनयनः शनैः॥ २७॥
शृणु वत्स! प्रवक्ष्यामि त्वयोक्तं यत्तथैव तत्।
किन्तु मामब्रवीत्तातो नव वर्षाणि पञ्च च॥ २८॥
उषित्वा दण्डकारण्ये पुरं पश्चात् समाविश।
इदानीं भरतायेदं राज्यं दत्तं मयाखिलम्॥ २९॥
ततः पित्रैव सुव्यक्तं राज्यं दत्तं तवैव हि।
दण्डकारण्यराज्यं मे दत्तं पित्रा तथैव च॥ ३०॥
अतः पितुर्वचः कार्य्यमावाभ्यामतियत्नतः।
पितुर्वचनमुल्लङ्घ्य स्वतन्त्रो यस्तु वर्त्तते॥ ३१॥
स जीवन्नेव मृतको देहान्ते निरयं व्रजेत्।

तस्मादिहेति तन्तवे वंशाविच्छेदाय॥ २४॥

यन्मे मातुः किञ्चिद्दुष्कृतं तत् स्मर्तुं नार्हसीति सम्बन्धः॥ २५। २६॥

अतिभक्तितः भरतस्यातिभक्तिं दृष्ट्वेत्यर्थः॥ २७॥

त्वदुक्तं तथैव सत्यमेव तथापि पित्राज्ञापालनं मे आवश्यकमित्याह किन्त्विति नवपञ्च चतुर्दश॥ २८॥

अखिलं दत्तमित्यब्रवीदित्यन्वयः॥ २९। ३०॥

तस्माद्राज्यं प्रशाधि त्वं वयं दण्डकपालकाः ॥ २२ ॥
भरतस्त्वब्रवीद्रामं कामुको मूढधीः पिता ।
स्त्रीजितो भ्रान्तहृदय उन्मत्तो यदि वक्ष्यति ।
तं सत्यमिति न ग्राह्यं भ्रान्तवाक्यं यथा सुधीः ॥२३॥

राम उवाच ।

न स्त्रीजितः पिता ब्रूयान्न कामी नैव मूढधीः ।
पूर्वं प्रतिश्रुतं तस्यै सत्यवादी ददौ भयात् ॥ २४ ॥
असत्याद्भीतिरधिका महतां नरकादपि ।
करोमीत्यहमप्येतत् सत्यं तस्यै प्रतिश्रुतम् ॥ २५ ॥
कथं वाक्यमहं कुर्य्यामसत्यं राघवो हि सन् ? ।
इत्युदीरितमाकर्ण्य रामस्य भरतो (१)ऽब्रवीत् ॥ २६ ॥
तथैव चीरवसनो वने वत्स्यामि सुव्रत ! ।

प्रतियत्नतः पितृवचनकर्त्तव्यत्वे हेतुमाह पितुरिति स्वतन्त्रः स्वेच्छाचारी ॥ २१ । २२ ॥

कामुकत्वादेव मूढधीः यदि वक्ष्यति वदिष्यतीत्यर्थः सुधीः पुरुषो यथा भ्रान्तवाक्यं सत्यमिति न गृह्णाति तथा त्वयोक्तविशिष्टपितृवाक्यं न ग्राह्यमित्यर्थः ॥ २२ ॥

ब्रूयात् उक्तवानित्यर्थः नञ्त्रयमेकैकमपि तत्रासम्भावि किं पुनः समुदितमिति बोधयितुं प्रतिश्रुतं प्रतिज्ञातं भयात् प्रतिज्ञाभङ्गभयात् ॥ २४ ॥

यतो महतां नरकादप्यधिका असत्याद्भीति तेषां पततोऽप्युपायेति भयमित्यर्थः अहमपि राघव एव सन् तस्यै कैकेय्यै सत्यं करोमि वनवासादिकमित्येतत्प्रतिश्रुतं वाक्यम् ॥ २५ ॥

कथमसत्यं कुर्य्यामित्यर्थः ॥ २६ ॥

---

(१) पुरतो इत्यपि पाठः ।

चतुर्दशसमास्त्वं तु राज्यं कुरु यथा सुखम् ॥ ३७ ॥

राम उवाच।

पित्रा दत्तं तवैवैतद्राज्यं मह्यं वनं ददौ।

व्यत्ययं यद्यहं कुर्य्यामसत्यं पूर्ववत् स्थितम् ॥ ३८ ॥

भरत उवाच।

अहमप्यागमिष्यामि सेवे त्वां लक्ष्मणो यथा।

नो चेत्प्रायोपवेशेन त्यजाम्येतत्कलेवरम् ॥ ३९ ॥

इत्येवं निश्चयं कृत्वा दर्भानास्तीर्य्य चातपे।

मनसापि विनिश्चित्य प्राङ्मुखोपविवेश सः ॥ ४० ॥

भरतस्यापि निर्बन्धं दृष्ट्वा रामोऽतिविस्मितः।

नेत्रान्तसंज्ञां गुरवे चकार रघुनन्दनः ॥ ४१ ॥

एकान्ते भरतं प्राह वशिष्ठो ज्ञानिनां वरः।

वत्स ! गुह्यं शृणुष्वेदं मम वाक्यात् सुनिश्चितम् ॥४२॥

रामो नारायणः साक्षाद्ब्रह्मणा याचितः पुरा।

रावणस्य बधार्थाय जातो दशरथात्मजः ॥ ४३ ॥

योगमायापि सीतेति जाता जनकनन्दिनी।

शेषोऽपि लक्ष्मणो जातो राममन्वेति सर्वदा ॥ ४४ ॥

तथैव त्वत्प्रतिनिधितया त्वद्देवेत्यर्थः ॥ ३७ ॥

व्यत्ययं राज्यवनवासयोरित्यर्थः ॥ ३८ ॥

आगमिष्यामि वनमिति शेषः ॥ ३९ ॥

निश्चयं कृत्वोवाचेति शेषः आतपे इत्यनेन सर्वथा जीविताशापरित्यागः प्राङ्मुख उपविवेश सन्निरार्थः ॥ ४० ॥

नेत्रान्तसंज्ञां नेत्रान्तेनाश्वोत्थापनं कुर्विति सूचनाम् ॥ ४१ ॥ ४२ ॥

साक्षात् नारायणः सर्वान्तर्य्यामीत्यर्थः ॥ ४३ ॥

योगमाया तच्छक्तिरूपा ॥ ४४ ॥ ४५ ॥

रावणं हन्तुकामास्ते गमिष्यन्ति न संशयः ।
कैकेय्या वरदानादि यद्यन्निष्ठुरभाषणम् ॥ ४५ ॥
सर्वं देवकृतं नो चेदेवं सा भाषयेत्कथम् ? ।
तस्मात्त्यजाग्रहं तात ! रामस्य विनिवर्त्तने ॥ ४६ ॥
निवर्त्तस्व महासैन्यैर्भ्रातृभिः सहितः पुरम् ।
रावणं सकुलं हत्वा शीघ्रमेवागमिष्यति ॥ ४७ ॥
इति श्रुत्वा गुरोर्वाक्यं भरतो विस्मयान्वितः ।
गत्वा समीपं रामस्य विस्मयोत्फुल्ललोचनः ॥ ४८ ॥
पादुके देहि राजेन्द्र ! राज्याय तव पूजिते ।
तयोः सेवां करोम्येव यावदागमनं तव ॥ ४९ ॥
इत्युक्त्वा पादुके दिव्ये योजयामास पादयोः ।
रामस्य ते ददौ रामो भरतायातिभक्तितः ॥ ५० ॥
गृहीत्वा पादुके दिव्ये भरतो रत्नभूषिते ।
रामं पुनः परिक्रम्य प्रणनाम पुनः पुनः ॥ ५१ ॥
भरतः पुनराहेदं भक्त्या गद्गदया गिरा ।
नवपञ्चसमान्ते तु प्रथमे दिवसे यदि ? ॥ ५२ ॥
नागमिष्यसि चेद्राम ! प्रविशामि महानलम् ।
बाढ़मित्येव तं रामो भरतं सन्न्यवर्त्तयत् ॥ ५३ ॥
ससैन्यः स वशिष्ठश्च शत्रुघ्नसहितः सुधीः ।
मातृभिर्मन्त्रिभिः सार्द्धं गमनायोपचक्रमे ॥ ५४ ॥

सा दशरथस्त्री अत्यन्तं रामे प्रीतिमती च ॥ ४६ । ४७ । ४८ ॥
राज्याय राज्यपालनसामर्थ्यलाभाय ॥ ४९ । ५० । ५१ ॥
नवपञ्चसमान्ते ॥ ५२ । ५३ । ५४ ॥

कैकेयी राममेकान्ते स्रवन्नेत्रजलाकुला ।
प्राञ्जलिः प्राह हे राम ! तव राज्यविघातनम् ॥ ५५ ॥
कृतं मया दुष्टधिया मायामोहितचेतसा ।
क्षमस्व मम दौरात्म्यं क्षमासारा हि साधवः ॥ ५६ ॥
त्वं साक्षाद्विष्णुरव्यक्तः परमात्मा सनातनः ।
मायामानुषरूपेण मोहयस्यखिलं जगत् ।
त्वयैव प्रेरितो लोकः कुरुते साध्वसाधु वा ॥ ५७ ॥
त्वदधीनमिदं विश्वमस्वतन्त्रं करोति किम् ? ।
यथा कृत्रिमनर्त्तक्यो नृत्यन्ति कुहकेच्छया ॥ ५८ ॥
त्वदधीना तथा माया नर्त्तकी बहुरूपिणी ।
त्वयैव प्रेरिताहं च देवकार्य्यं करिष्यता ॥ ५९ ॥

स्रवन्नेत्रजला सती व्याकुला कृतापराधत्वादतिव्याकुलेत्यर्थः राज्यविघातनं राज्यविघातः ॥ ५५ ॥

मायामोहितचेतसेत्यनेन वस्तुतो ममापराध एव नेति सूचिताङ्गीकृत्यापि स्वापराधमाह क्षमस्वेति क्षमैव सारः सर्वगुणप्रधानं येषामित्यर्थः ॥ ५६ ॥

सम्प्रति मायापगमं ध्वनयति त्वमिति नन्वहं मनुष्यो न परमात्मेति चेत्तत्राह मायेति एषा ते माययेति भावः त्वयैवेति तस्मादन्तर्याम्येव त्वमिति भावः एवं च त्वत्प्रेरणयैव तथा कृतवत्या मे नापराध इति ध्वनिः ॥ ५७ ॥

तदेवोपपादयति त्वदिति स्वतोऽस्वतन्त्रं त्वत्प्रेरणां विना किं करोति न किमपि करोतीति भावः कुहको विस्मापकः गुप्ततया तत्सूत्रचालनेन तन्नर्त्तनादिविस्मयोत्पादक इति यावत् ॥ ५८ ॥

त्वदधीनेति अनेन मायातत्कार्य्यजातजडत्वं सूचितम् नन्वेवं स्वदुःखफलकं त्वत्प्रेरणं मया कथं कर्त्तव्यं तत्राह देवकार्य्यं करिष्यतेति ॥ ५९ ॥

पापिष्ठं पापमनसा कर्माचरमरिन्दम ।
अद्य प्रतीतोऽसि मम देवानामप्यगोचरः ॥ ६० ॥
पाहि विश्वेश्वरानन्त ! जगन्नाथ ! नमोऽस्तु ते ।
छिन्धि स्नेहमयं पाशं पुत्रवित्तादिगोचरम् ॥ ६१ ॥
त्वज्ज्ञानानलखड्गेन त्वामहं शरणं गता ।
कैकेय्या वचनं श्रुत्वा रामः सस्मितमब्रवीत् ॥ ६२ ॥
यदाह (१) मां महाभागे नानृतं सत्यमेव तत् ।
मयैव प्रेरिता वाणी तव वक्त्राद्विनिर्गता ॥ ६३ ॥
देवकार्यार्थसिद्ध्यर्थमत्र दोषः कुतस्तव ? ।
गच्छ त्वं हृदि मां नित्यं भावयन्ती दिवानिशम् ॥ ६४ ॥
सर्वत्र विगतस्नेहा मद्भक्त्या मोक्ष्यसेऽचिरात् ।
अहं सर्वत्र समदृक् द्वेष्यो वा प्रिय एव वा ॥ ६५ ॥

मम मया येयं भक्तौ प्रतीतोऽसि वाक्यस्वरूपेण ज्ञातोऽसि इदमपि त्वदनुग्रहादेवेति भावः अन्यथा देवानामप्यविषयस्य वचनज्ञानविषयता स्यादिति भावः ॥ ६० ॥

अतः प्रार्थयते पाहीति पुत्रवित्तादिविषयस्नेहरूपं पाशमित्यर्थः ॥ ६१ ॥

त्वज्ज्ञानानलखड्गेनेति पूर्वान्वयि ॥ ६२ । ६२ ॥

मद्भक्त्या सर्वविषयेषु स्नेहत्यागपूर्वकं निरन्तरं मद्भावनयैव मद्भक्तिस्तया मम रागद्वेषाभावात्ततो भयं नास्तीति आह अहमिति मम द्वेष्यो वा प्रियो वा नास्ति कल्पकस्येव मायाविनो यथा स्वमायाकल्पितपदार्थेषु

---

(१) यदात्थ इत्यपि पाठः ।

नास्ति मे कल्पकस्येव भजतोऽनुभजाम्यहम् ।
मन्मायामोहितधियो मामम्ब ! मनुजाकृतिम् ॥ ६६ ॥
सुखदुःखाद्यनुगतं जानन्ति न तु तत्त्वतः ।
दिष्ट्या मद्गोचरं ज्ञानमुत्पन्नं ते भयापहम् ॥ ६७ ॥
स्मरन्ती तिष्ठ भवने लिप्यसे न च कर्मभिः ।
इत्युक्ता सा परिक्रम्य रामं सानन्दविस्मया ॥ ६८ ॥
प्रणम्य शतशो भूमौ ययौ गेहं मुदान्विता ।
भरतस्तु सहामात्यैर्मातृभिर्गुरुणा सह ॥ ६९ ॥
अयोध्यामगमच्छीघ्रं राममेवानुचिन्तयन् ।
पौरजानपदान् सर्वानयोध्यायामुदारधीः ॥ ७० ॥
स्थापयित्वा यथान्यायं नन्दिग्रामं ययौ स्वयम् ।
तत्र सिंहासने नित्यं पादुके स्थाप्य भक्तितः ॥ ७१ ॥

द्वेषप्रीतिराहित्यम् तथा ममापि सर्वत्र मिथ्यात्वनिश्चयात् न द्वेषरागा-
विति भावः न मत्तस्ते भयमिति तथाप्ययं मे स्वभाव इत्याह भजतोऽ-
न्विति अतो न वैषम्यनैर्घृण्ये ॥ ६५ । ६६ ॥

न तु तत्त्वतः अहं तादृश इति शेषः भयापहमित्यनेन भयान्तर-
स्यावकाश एव नेति सूचितम् ॥ ६७ ॥

मां स्मरन्ती तिष्ठ मां जगत्प्रेरकत्वेन स्मरन्ती तिष्ठ एवं च स्वस्मिन्
स्वतन्त्रत्वाभिमानापगमान्न कर्मभिर्लिप्यसे सोऽभिमान एव कर्मलेपक इति
भावः ॥ ६८ । ६९ । ७० ॥

स्थाप्य स्थापयित्वा आर्षो ल्यप् ॥ ७१ ॥

पूजयित्वा यथा रामं गन्धपुष्पाक्षतादिभिः।
राजोपचारैरखिलैः प्रत्यहं नियतव्रतः॥ ७२॥
फलमूलाशनो दान्तो जटावल्कलधारकः।
अधःशायी ब्रह्मचारी शत्रुघ्नसहितस्तदा॥ ७३॥
राजकार्याणि सर्वाणि यावन्ति पृथिवीतले।
तानि पादुकयोः सम्यक् निवेदयति राघवः॥ ७४॥
गणयन् दिवसान्येव रामागमनकाङ्क्षया।
स्थितो रामार्पितमनाः साक्षाद्ब्रह्ममुनिर्यथा॥ ७५॥
रामस्तु चित्रकूटाद्रौ वसन् मुनिभिरावृतः।
सीतया लक्ष्मणेनापि किञ्चित्कालमुपावसत्॥ ७६॥
नागराश्च सदा यान्ति रामदर्शनलालसाः।
चित्रकूटस्थितं ज्ञात्वा सीतया लक्ष्मणेन च॥ ७७॥
दृष्ट्वा तज्जनसम्बाधं रामस्तत्याज तं गिरिम्।
दण्डकारण्यगमने कार्यमप्यनुचिन्तयन्॥ ७८॥
अन्वगात् सीतया भ्रात्रा ह्यत्रेराश्रममुत्तमम्।

राजोपचारैः राजयोग्यैः पुष्पादिभी राममिव ते पूजयित्वेत्यर्थः॥ ७२॥
भरतस्यापि रामसमव्रतत्वमाह फलेति दान्तो जितेन्द्रियः॥ ७३॥ ७४
ब्रह्ममुनिः ब्रह्मर्षिः॥ ७५॥
रामः चित्रकूटाद्रौ मुनिभिः सीतया लक्ष्मणेनावृतो वसन्नपि किञ्चित्कालमेवोपावसदित्यन्वयः एवेत्यस्याध्याहारः च[illegible]॥ ७६
तत्र हेतुमाह नागराश्चेति लक्ष्मणेन चेति वदेति शेषः॥ ७७॥
कार्यं रावणवधरूपम्॥ ७८॥

सर्वत्र सुखसंवासं जनसम्बाधवर्जितम् ॥ ७९ ॥
गत्वा मुनिमुपासीनं भासयन्तं तपोवनम् (१) ।
दण्डवत्प्रणिपत्याह रामोऽहमभिवादये ॥ ८० ॥
पितुराज्ञां पुरस्कृत्य दण्डकानहमागतः ।
वनवासमिषेणापि धन्योऽहं दर्शनात्तव ॥ ८१ ॥
श्रुत्वा रामस्य वचनं रामं ज्ञात्वा हरिं परम् ।
पूजयामास विधिवद्भक्त्या परमया मुनिः ॥ ८२ ॥
वन्यैः फलैः कृतातिथ्यमुपविष्टं रघूत्तमम् ।
सीतां च लक्ष्मणञ्चैव सन्तुष्टो वाक्यमब्रवीत् ॥ ८३ ॥
भार्या मेऽतीव संहृष्टा ह्यनसूयेति विश्रुता ।
तपश्चरन्ती सुचिरं धर्मज्ञा धर्मवत्सला ॥ ८४ ॥
अन्तास्तिष्ठति तां सीता पश्यत्वरिनिषूदन ! ।
तथेति जानकीं प्राह रामो राजीवलोचनः ॥ ८५ ॥

जनसंबाधवर्जितं नागरजनसंबाधहीनम् ॥ ७९ ॥
गत्वा आत्रमाश्रममिति शेषः अत्रिं दण्डवत्प्रणम्य रामोऽहमभिवा-
दये इत्याहेत्यन्वयः ॥ ८० ।
प्रसङ्गादागत्यापि त्वद्दर्शनेनाहं धन्यः किं वक्तव्यं त्वद्दर्शनोद्देशेन
आगतो धन्य इति ॥ ८१ ॥
परं हरिमन्तर्यामिरूपम् उपासनाभिस्तत्स्वरूपं ये गताः तद्रूप-
भेदाय परमिति ॥ ८२ ॥
लक्ष्मणं चैवेति इहेति शेषः वाक्यमब्रवीत् राममिति शेषः ॥८३ ॥
अतीव संहृष्टा अत्यन्तहृष्टतरा धर्मवत्सला धर्मप्रिया ॥ ८४ । ८५ ॥

---

(१) तपोधनं इति क्वचित् पाठः ।

गच्छ देवीं नमस्कृत्य शीघ्रमेहि पुनः शुभे ! ।
तथेति रामवचनं सीता चापि तथाऽकरोत् ॥ ८६ ॥
दण्डवत्पतितामग्रे सीतां दृष्ट्वाऽति हृष्टधीः ।
अनसूया समालिङ्ग्य वत्से ! सीतेति सादरम् ॥ ८७ ॥
दिव्ये ददौ कुण्डले द्वे निर्मिते विश्वकर्मणा ।
दुकूले द्वे ददौ तस्यै निर्मले भक्तिसंयुता ॥ ८८ ॥
अङ्गरागं च सीतायै ददौ दिव्यं शुभानना ।
न त्यक्ष्यत्यङ्गरागेण शोभा त्वां कमलानने ! ॥ ८९ ॥
पातिव्रत्यं पुरस्कृत्य राममन्वेहि जानकि ! ।
कुशली राघवो यातु त्वया सह पुनर्गृहम् ॥ ९० ॥
भोजयित्वा यथा न्याय्यं रामं सीतासमन्वितम् ।
लक्ष्मणं च तदा रामं पुनः प्राह कृताञ्जलिः ॥ ९१ ॥
राम ! त्वमेव भुवनानि विधाय तेषां
संरक्षणाय सुरमानुषतिर्य्यगादीन् ।

सीतारामवचनं तथा अस्त्वित्यङ्गीकृत्य तथाकरोत् तत्समीपगमन-मकरोत् ॥ ८६ ॥

सीते इति च्छेदः सन्धिरार्षः ॥ ८७ ॥

भक्तिसंयुता साक्षादीश्वरोऽयमिति भक्तिमती ॥ ८८ ॥

न त्यक्ष्यते कदाचिदपीति शेषः ॥ ८९ ॥

अथ चिन्तयति पातिव्रत्यमिति अथाशिषमाह कुशलीति ॥ ९० ॥

९१ ॥

देहान् बिभर्षि न च देहगुणैर्विलिप्त-
स्त्वत्तो बिभेत्यखिलमोहकरी च माया॥६२

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अयोध्याकाण्डे
नवमः सर्गः।

अयंकाण्डः समाप्तः।

सुरदेहो वामनादिः मानुषो देहो रामादिः तिर्यक् देहो मत्स्यादिः न च देहेति मायिकत्वादिति भावः त्वत्तो बिभेतीति त्वज्ज्ञाननाश्यत्वादिति भावः॥ ६२॥

इति श्रीमत्युक्तराजविपदुद्धरणसमर्थत्यादिवि० श्रीरामवर्मणः कृतौ
श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अयोध्याकाण्डे
नवमः सर्गः।

अरण्यकाण्डम् ।

—⁂—

प्रथमः सर्गः ।

श्रीमहादेव उवाच ।

अथ तत्र दिनं स्थित्वा प्रभाते रघुनन्दनः ।
स्नात्वा मुनिं समामन्त्र्य प्रयाणायोपचक्रमे ॥ १ ॥
मुने ! गच्छामहे सर्वे मुनिमण्डलमण्डितम् ।
विपिनं दण्डकं यत्र त्वमाज्ञातुमिहार्हसि ॥ २ ॥
मार्गप्रदर्शनार्थाय शिष्यानाज्ञप्तुमर्हसि ।
श्रुत्वा रामस्य वचनं प्रहस्यात्रिर्महायशाः ॥ ३ ॥
सर्वस्य मार्गद्रष्टा त्वं तव को मार्गदर्शकः ।
तथापि दर्शयिष्यन्ति तव लोकानुसारिणः ॥ ४ ॥

अथेति दिनं दिनशेषम् ॥ १ ॥

यत्र दण्डकं विपिनं मुनिमण्डलमण्डितम् तत्र गच्छामहे त्वमाज्ञातु कृतार्थं कर्त्तुम् ॥ २ । २ ॥

मार्गद्रष्टा मार्गदर्शयिता लोकानुसारिणः लोकवदनुवर्त्तं नाटयतः ॥ ४ ॥

इति शिष्यान् समादिश्य स्वयं किञ्चित्समन्वगात्।
रामेण वारितः प्रीत्या अग्निः स्वभवनं ययौ॥ ५॥
क्रोशमात्रं ततो गत्वा ददर्श महतीं नदीम्।
अत्रेः शिष्याग्नुवाचेदं रामो राजीवलोचनः॥ ६॥
नद्याः सन्तरणे कश्चिदुपायो विद्यते न वा।
ऊचुस्ते विद्यते नौका सुदृढ़ा रघुनन्दन!॥ ७॥
तारयिष्यामहे युष्मान् वयमेव क्षणादिह।
ततो नावि समारोप्य सीतां राघवलक्ष्मणौ॥ ८॥
क्षणात् सन्तारयामासुर्नदीं मुनिकुमारकाः।
रामाभिनन्दिताः सर्वे जग्मुरत्रेरथाश्रमम्॥ ९॥
तावेत्य विपिनं घोरं झिल्लीझङ्कारनादितम्।
नानामृगगणाकीर्णं सिंहव्याघ्रादिभीषणम्॥ १०॥
राक्षसैर्घोररूपैश्च सेवितं रोमहर्षणम्।
प्रविश्य विपिनं घोरं रामो लक्ष्मणमब्रवीत्॥ ११॥
इतः परं प्रयत्नेन गन्तव्यं सहितेन मे।
धनुर्गुणेन संयोज्य शरानपि करे दधत्॥ १२॥
अग्रे यास्याम्यहं पश्चात्त्वमन्वेहि धनुर्धरः।

वारितः निवर्त्तध्वमिति प्रार्थितः॥ ५। ६। ७। ८॥

रामाभिनन्दिताः रामेणानन्दपूर्वकं गच्छतेति दत्तानुमतयः॥ ९॥

झिल्लीझङ्कारो झिल्लीशब्दः॥ १०। ११॥

सहितेन युवाभ्यां मिलितेन गन्तव्यमित्युक्तमिति शेषः दधत् आदधदित्यर्थः॥ १२॥

साहित्यप्रकारमेवाह अग्र इति आत्मपरात्मनोर्जीवेशयोर्मध्यगा आश्रयत्वविषयत्वाभ्यां सम्बद्धा मायेवेत्यर्थः॥ १२॥

आवयोर्मध्यगा सीता मायेवात्मपरात्मनोः ॥ १३ ॥
पश्चारय सर्वत्र दृष्टं रक्षोभयं महत् ।
विद्यते दण्डकारण्ये श्रुतपूर्वमरिन्दम ! ॥ १४ ॥
इत्येवं भाषमाणौ तौ जग्मतुः सार्धयोजनम् ।
तत्रैका पुष्करिण्यास्ते कह्लारकुमुदोत्पलैः ॥ १५ ॥
अम्बुजैः शीततोयेन शोभमाना व्यदृश्यत ।
तत्समीपमथो गत्वा पीत्वा तत्सलिलं शुभम् ॥ १६ ॥
ऊषुस्ते सलिलाभ्याशे घनच्छायामुपाश्रिताः ।
ततो ददृशुरायान्तं महासत्त्वं भयानकम् ॥ १७ ॥
करालदंष्ट्रवदनं भीषयन्तं स्वगर्जितैः ।
वामांसे न्यस्तशूलाग्रग्रथितानेकमानुषम् ॥ १८ ॥
भक्षयन्तं गजव्याघ्रमहिषं वनगोचरम् ।
ज्यारोपितं धनुर्धृत्वा रामो लक्ष्मणमब्रवीत् ॥ १९ ॥
पश्य भ्रातर्महाकायो राक्षसोऽयमुपागतः ।

इष्टमपशकुनैः सूचितम् ननु शकुनादिषु को विश्वास इत्याह श्रुत-
पूर्वमिति दण्डकारण्ये पूर्वमृषीणां मुखात् श्रुतं रक्षोभयं विद्यते शकु-
नैश्च तत्सूचितमित्यर्थः ॥ १४ ॥

कह्लारशीतोदकादियुक्ता पुष्करिणी तत्रास्ते ॥ १५ ॥

सा शोभमाना तैर्व्यदृश्यतेत्यर्थः ॥ १६ ॥

महासत्त्वं महाशरीरं प्राणिनम् ॥ १७ ॥

करालदंष्ट्रायुतं वदनं यस्य तत् वामांसे वामस्कन्धे न्यस्तशूलाग्रे
ग्रथिता अनेकमानुषा येन तत् ॥ १८ ॥

गजव्याघ्रमहिषमितिसमाहारद्वन्द्वः ज्या आरोपिता यस्मिन् तत् ॥ १९

अयं सम्मुखदेशे वर्त्तमानोऽस्मदभिमुखमायाति भीरुत्वां भक्षाय-
इच्छितमनेन मामाकं भयमिति ध्वनितम् ॥ २० ॥

आयात्यभिमुखं नोऽग्रे भीरूणां भयमावहन् ॥ २० ॥
सज्जीकृतधनुस्तिष्ठ मा भैर्जनकनन्दिनि ! ।
इत्युक्त्वा बाणमादाय स्थितो राम इवाचलः ॥ २१ ॥
स तु दृष्ट्वा रमानाथं लक्ष्मणं जानकीं तदा ।
अट्टहासं ततः कृत्वा भीषयन्निदमब्रवीत् ॥ २२ ॥
कौ युवां बाणतूणीरजटावल्कलधारिणौ ।
मुनिवेशधरौ बालौ स्त्रीसहायौ सुदुर्मदौ ॥ २३ ॥
सुन्दरौ वन मे वक्त्रप्रविष्टकवलोपमौ ।
किमर्थमागतौ घोरं वनं व्यालनिषेवितम् ॥ २४ ॥
श्रुत्वा रक्षोवचो रामः स्मयमान उवाच तम् ।
अहं रामस्त्वयं भ्राता लक्ष्मणो मम सम्मतः ॥ २५ ॥
एषा सीता मम प्राणवल्लभा वयमागताः ।
पितृवाक्यं पुरस्कृत्य शिक्षणार्थं भवादृशाम् ॥ २६ ॥
श्रुत्वा तद्रामवचनमट्टहासमथाकरोत् ।
व्यादाय वक्त्रं बाहुभ्यां शूलमादाय सत्वरः ॥ २७ ॥
मां न जानासि राम ! त्वं विराधं लोकविश्रुतम् ।
मद्भयान्मुनयः सर्वे त्यक्त्वा वनमितो गताः ॥ २८ ॥
यदि जीवितुमिच्छास्ति ? त्यक्त्वा सीतां निरायुधौ ।
पलायतं न चेत् शीघ्रं भक्षयामि युवामहम् ॥ २९ ॥

अचल इव रामः स्थित इत्यन्वयः ॥ २१ । २२ । २३ ॥

वक्त्रप्रविष्टकवलोपमा विलम्बेन शुकरवधत्वं ध्वनयति व्याला दुष्टा हिंस्रजीवाः ॥ २४ । २५ । २६ । २७ । २८ ॥

जीवितुमिच्छास्ति युवयोरिति शेषः शीघ्रं पलायतं नोचेद्भक्षयामी-

(१) सज्जीकृत्य इति वा पाठः ।

इत्युक्त्वा राक्षसः सीतामादातुमभिदुद्रुवे ।
रामश्चिच्छेद तद्बाहू शरेण प्रहसन्निव ॥ ३० ॥
ततः क्रोधपरीतात्मा व्यादाय विकटं मुखम् ।
राममभ्यद्रवद्रामश्चिच्छेद परिधावतः ॥
पदद्वयं विराधस्य तदद्भुतमिवाभवत् ॥ ३१ ॥
ततः सर्प इवास्येन ग्रसितुं राममापतत् ।
ततोऽर्द्धचन्द्राकारेण बाणेनास्य महच्छिरः ॥ ३२ ॥
चिच्छेद रुधिरौघेण पपात धरणीतले ।
ततः सीता समालिङ्ग्य प्रशशंस रघूत्तमम् ॥ ३३ ॥
ततो दुन्दुभयो नेदुर्दिवि देवगणेरिताः ।
ननृतुश्चाप्सरो हृष्टा जगुर्गन्धर्वकिन्नराः ॥ ३४ ॥

विराधकायादतिसुन्दराकृति-
र्विभ्राजमानो विमलाम्बरावृतः ।
प्रतप्तचामीकरचारुभूषणो
व्यदृश्यताग्रे गगने रविर्यथा ॥ ३५ ॥
प्रणम्य रामं प्रणतार्त्तिहारिणं
भवप्रवाहोपरमं घृणाकरम् ।

त्यन्वयः ॥ २९ । ३० । ३१ ॥

सर्प इवेति उरसैवेति भावः ॥ ३२ ॥

रुधिरौघेण सह तच्छिरो भूतले पपातेत्यन्वयः ॥ ३३ । ३४ ॥

विराधकायाद्विस्तृत इति शेषः विमलाम्बरं निर्मलवस्त्रं तेनावृतः चामीकरं सुवर्णम् ॥ ३५ ॥

भवप्रवाहस्य संसारप्रवाहस्योपरमो नाशो यस्मात्तम् घृणायाः दयायाः

प्रणम्य भूयः प्रणनाम दण्डवत्
प्रपन्नसर्वार्त्तिहरं प्रसन्नधीः ॥ २६ ॥

विराध उवाच ।

श्रीराम ! राजीवदलायताक्ष !
विद्याधरोऽहं विमलप्रकाशः ।
दुर्वाससा कारणकोपमूर्त्तिना
शप्तः पुरा सोऽद्य विमोचितस्त्वया ॥ २७ ॥
इतःपरं त्वच्चरणारविन्दयोः
स्मृतिः सदा मेऽस्तु भवोपशान्तये ।
त्वन्नामसंकीर्त्तनमेव वाणी
करोतु मे कर्णपुटं त्वदीयम् ॥ २८ ॥
कथामृतं पातु करद्वयं ते
पादारविन्दार्चनमेव कुर्य्यात् ।
शिरश्च ते पादयुगप्रणामं
करोतु नित्यं भवदीयमेवम् ॥ २९ ॥
नमस्तुभ्यं भगवते विशुद्धज्ञानमूर्त्तये ।
आत्मारामाय रामाय सीतारामाय वेधसे ॥ ४० ॥
प्रपन्नं पाहि मां राम ! यास्यामि त्वदनुज्ञया ।

आकरस्थलमित्याशम् प्रपन्नानां शरणागतानां सर्वपीडानाशकम् ॥ २६ ॥

राजीवं कमलम् अकारणकोपमूर्त्तिना निर्निमित्तकोपमूर्त्तिना ॥ २७

मे कर्णपुटं त्वदीयं कथामृतं पात्वित्यन्वयः पिबत्वित्यर्थः वारंवारं ह्योत्वित्यर्थः पिबादेशाभाव आर्षः ॥ २८ ॥

एवं मदङ्गजातं सर्वं भवदीयमेवास्तु भवत्सेवापरमेवास्त्वित्यर्थः ॥२९

आत्मनि स्वस्वरूपे आरमते यः सर्वदा तदनुसन्धानपरे इत्यर्थः ॥ ४०

देवलोकं रघुश्रेष्ठ! माया मां मा वृणोतु ते ॥ ४१ ॥
इति विज्ञापितस्तेन प्रसन्नो रघुनन्दनः।
ददौ वरं तदा प्रीतो विराधाय महामतिः ॥ ४२ ॥
गच्छ विद्याधराशेषमायादोषगुणा जिताः।
त्वया मद्दर्शनात् सद्यो मुक्तो ज्ञानवतां वरः ॥ ४३ ॥
मद्भक्तिर्दुर्लभा लोके जाता चेन्मुक्तिदा यतः।
अतस्त्वं भक्तिसम्पन्नः परं याहि ममाज्ञया ॥ ४४ ॥

रामेण रक्षोनिधनं सुघोरं
शापाद्विमुक्तिर्वरदानमेवम्।
विद्याधरत्वं पुनरेव लब्धं
रामं स्मरन्नेति नरोऽखिलार्थान् ॥ ४५ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अरण्यकाण्डे

प्रथमः सर्गः।

इदानीं प्रार्थयते मायेत्यादि ॥ ४१ ॥ ४२ ॥

अशेषमायादोषरूपा लोके गुणास्त्वत्तेन लोके प्रसिद्धास्त्वया मद्दर्शनाज्जिताः अत त्वं ज्ञानवतां वरो भूत्वा मुक्तो भविष्यसीति शेषः ॥४३

परं मोक्षं याहि प्राप्नुहि ॥ ४४ ॥

रामेण रक्षोनिधनं कृतं तेन निधनेन तस्य रक्षसः शापाद्विमुक्तिः कृता तस्मै वरदानं च कृतं यतस्तेन पुनरेव विद्याधरत्वं लब्धम् अतो रामं स्मरन्नरोऽखिलार्थानेति प्राप्नोति ॥ ४५ ॥

इति श्रीमदध्यात्मरामायणे अरण्यकाण्डे श्रीरामवर्मणः कृतौ सेतौ

प्रथमः सर्गः।

द्वितीयः सर्गः ।

विराधे स्वर्गते रामो लक्ष्मणेन च सीतया ।
जगाम शरभङ्गस्य वनं सर्वसुखावहम् ॥ १ ॥
शरभङ्गस्ततो दृष्ट्वा रामं सौमित्रिणा सह ।
आयातं सीतया सार्द्धं सम्भ्रमादुत्थितः सुधीः ॥ २ ॥
अभिगम्य सुसम्पूज्य विष्टरेषूपवेशयत् ।
आतिथ्यमकरोत् तेषां कन्दमूलफलादिभिः ॥ ३ ॥
प्रीत्याह शरभङ्गोऽपि रामं भक्तपरायणम् ।
बहुकालमिहैवासं तपसे कृतनिश्चयः ॥ ४ ॥
तव सन्दर्शनाकाङ्क्षी राम ! त्वं परमेश्वरः ।
अद्य मत्तपसा सिद्धं यत् पुण्यं बहु विद्यते ।
तत् सर्वं तव दास्यामि ततो मुक्तिं व्रजाम्यहम् ॥ ५ ॥

समर्प्य रामस्य महत्सुपुण्य-
फलं विरक्तः शरभङ्गयोगी ।
चितिं समारोहयदप्रमेयं
रामं ससीतं सहसा प्रणम्य ॥ ६ ॥

विराधे इति ॥ १ ॥
आयातमागतम् ॥ २ ॥
अभिगम्य सु सुखागमनपूर्वकं तमानीय उपवेशयत् अडभाव आर्षः ३
आसंस्थितः तपसे तपः कर्त्तुं कृतनिश्चयः ॥ ४ ॥
तव संदर्शनकाङ्क्षी इहैवासमिति पूर्वेणान्वयः यतस्त्वं परमेश्वरः मोक्षदः ॥ ५ ॥
विरक्तः सन् शोभनं पुण्यं हिंसारहितत्वात्तपस्तत्फलं रामस्य समर्प्य दत्त्वा सहसा तत्क्षणमेव चितिं समारोहयत् समारुहत् निष्कृत्तमेषणा निच् ॥ ६ ॥

ध्यायंश्चिरं राममशेषहृत्स्थं
दूर्वादलश्यामलमम्बुजाक्षम् ।
चीराम्बरं स्निग्धजटाकलापं
सीतासहायं सहलक्ष्मणं तम् ॥ ७ ॥

को वा दयालुः स्मृतकामधेनु-
रन्यो जगत्यां रघुनायकादहो ।
स्मृतौ मया नित्यमनन्यभाजा
ज्ञात्वा स्मृतिं (१) मे स्वयमेव यातः ॥ ८ ॥

पश्यत्विदानीं देवेशो रामो दाशरथिः प्रभुः ।
दग्ध्वा स्वदेहं गच्छामि ब्रह्मलोकमकल्मषः ॥ ९ ॥
अयोध्याधिपतिर्मेऽस्तु हृदये राघवः सदा ।
यद्वामाङ्के स्थिता सीता मेघस्येव तडिल्लता ॥ १० ॥
इति रामं चिरं ध्यात्वा दृष्ट्वा च पुरतः स्थितम् ।
प्रज्वाल्य सहसा वह्निं दग्ध्वा पञ्चात्मकं वपुः ॥ ११ ॥
दिव्यदेहधरः साक्षाद् ययौ लोकपतेः पदम् ।
ततो मुनिगणाः सर्वे दण्डकारण्यवासिनः ।

अशेषहृत्स्थं सर्वान्तर्यामिणं सहलक्ष्मणं समस्तत्वेऽपि चोपसर्जनस्येति सादेशाभावः ॥ ७ ॥

स्मृतकामधेनुः स्मृतः सन् कामधेनुस्तत्तुल्यः सर्वमनोरथपूरकत्वाद् यातः आगतः ॥ ८ ॥

ब्रह्मलोकम् उपासकत्वान्मोक्षद्वारभूतम् ॥ ९ ॥ १० ॥

पुरतः स्थितं दृष्ट्वा तादृशमेव हृदये ध्यात्वा ॥ ११ ॥

---

(१) स्तुतिम् इति च पाठः ।

आजग्मू राघवं द्रष्टुं शरभङ्गनिवेशनम् ॥ १२ ॥
दृष्ट्वा मुनिसमूहं तं जानकीरामलक्ष्मणाः।
प्रणेमुः सहसा भूमौ मायामानुषरूपिणः ॥ १३ ॥
आशीर्भिरभिनन्द्याथ रामं सर्वहृदि स्थितम्।
ऊचुः प्राञ्जलयः सर्वे धनुर्बाणधरं हरिम् ॥ १४ ॥
भूमेर्भारावताराय जातोऽसि ब्रह्मणार्थितः।
जानीमस्त्वां हरिं लक्ष्मीं जानकीं लक्ष्मणं तथा ॥ १५॥
शेषांशं शङ्खचक्रे द्वे भरतं सानुजं तथा।
अतस्त्वादौ ऋषीणां त्वं दुःखं मोक्तुमिहार्हसि ॥ १६ ॥

आगच्छ यामो मुनिसेवितानि
वनानि सर्वाणि रघूत्तम ! क्रमात्।
द्रष्टुं सुमित्रासुतजानकीभ्यां
तदा दयाऽतस्तु दृढा भविष्यति ॥ १७ ॥

इति विज्ञापितो रामः कृताञ्जलिपुटैर्विभुः।
जगाम मुनिभिः सार्द्धं द्रष्टुं मुनिवनानि सः ॥ १८ ॥

लोकपतेः कार्यब्रह्मणः हिरण्यगर्भस्य शरभङ्गनिवेशनं तदाश्रम-मुपाजग्मुरित्यन्वयः ॥ १२ ॥

भूमौ दण्डवत्पतिताः प्रणेमुः ॥ १३ ॥ १४ ॥

लक्ष्मणं शेषांशमित्यन्वयः ॥ १५ ॥

अतः भूमिदुःखहरणार्थमवतीर्णत्वात् आदौ खरादिवधेनास्मद्दुःखं मोक्तुमर्हसि ॥ १६ ॥

सुमित्रासुतजानकीभ्यां सह वनानि द्रष्टुमागच्छ तदा तद्दर्शने सति ॥ १७ ॥ १८ ॥

दृदर्श तत्र पतितान्यनेकानि शिरांसि सः ।
अस्थिभूतानि सर्वत्र रामो वचनमब्रवीत् ॥ १९ ॥
अस्थीनि केषामेतानि किमर्थं पतितानि वै ।
तमूचुर्मुनयो राम ! ऋषीणां मस्तकानि हि ॥ २० ॥
राक्षसैर्भक्षितानीश ! प्रमत्तानां समाधितः ।
अन्तरायं मुनीनां ते पश्यन्तोऽनु चरन्ति हि ॥ २१ ॥
श्रुत्वा वाक्यं मुनीनां स भयदैन्यसमन्वितम् ।
प्रतिज्ञामकरोद्रामो वधायाशेषरक्षसाम् ॥ २२ ॥
पूज्यमानः सदा तत्र मुनिभिर्वनवासिभिः ।
जानक्या सहितो रामो लक्ष्मणेन समन्वितः ॥ २३ ॥
उवास कतिचित्तत्र वर्षाणि रघुनन्दनः ।
एवं क्रमेण सम्पश्यन् ऋषीणामाश्रमान् विभुः ॥ २४ ॥
सुतीक्ष्णस्याश्रमं प्रागात्प्रख्यातमृषिसंकुलम् ।
सर्वर्त्तुगुणसम्पन्नं सर्वकालसुखावहम् ॥ २५ ॥
राममागतमाकर्ण्य सुतीक्ष्णः स्वयमागतः ।
अगस्त्यशिष्यो रामस्य मन्त्रोपासनतत्परः ॥
विधिवत् पूजयामास भक्त्युत्कण्ठितलोचनः ॥ २६ ॥

अस्थिभूतानि अतिशुष्काणि ॥ १९ ॥ २० ॥

समाधितः समाधिना प्रमत्तानां तद्दर्शने पलायनाद्यसमर्थानाम् अन्तरायं समाधिरूपं अप्रावत्यमिति पाठे समाधितः प्रमत्तानां क्षीणानां अल्पसमाधीनामित्यर्थः अप्रावत्यं समाधित्यागरूपं समाधौ हि भगवदेकरूपत्वाद्रक्षांसि नाक्रमन्तीति भावः ॥ २१ ॥ २२ ॥ २२ ॥ २४ ॥

सर्वैः ऋतुगुणैः सम्पन्नत्वादेव सर्वकाले सुखजनकम् ॥ २५ ॥

भक्त्या प्रेम्णा उत्कण्ठिते रामस्य पुनः पुनर्दर्शनेच्छावती लोचने यस्य सः ॥ २६ ॥

सुतीक्ष्ण उवाच ।

त्वन्मन्त्रजाप्यहमनन्तगुणाप्रमेय ! ।
सीतापते ! शिवविरिञ्चिसमाश्रिताङ्घ्रे ! ।
संसारसिन्धुतरणामलपोतपाद !
रामाभिराम ! सततं तव दासदासः ॥ २७ ॥
मामद्य सर्वजगतामविगोचरस्त्वं
त्वन्मायया सुतकलत्रगृहान्धकूपे ।
मग्नं निरीक्ष्य मलमुद्गलपिण्डमोह-
पाशानुबद्धहृदयं स्वयमागतोऽसि ॥ २८ ॥
त्वं सर्वभूतहृदयेषु कृतालयोऽपि
त्वन्मन्त्रजाप्यविमुखेषु तनोषि मायाम् ।
त्वन्मन्त्रसाधनपरेष्वपयाति माया
सेवानुरूपफलदोऽसि यथा महीपः ॥ २९ ॥

हे अभिराम ! परमसुन्दरराम ! त्वन्मन्त्रजापी अहं सततं तव दासदासो भूयामिति शेषः अप्रमेय ! देशकालापरिच्छेद्य ! शिवब्रह्म-समाश्रितचरण ! संसारसमुद्रतरणे अमलपोतरूपौ पादौ यस्य तच्चरणा-श्रितानां संसारसागरोत्तरणमकिञ्चित्करमेवेति भावः ॥ २७ ॥

सर्वजगतामगोचरोऽपि त्वं मलभूतो यः मुद्गलपिण्डः शरीरं तत्र यो मोहः अहङ्कार इत्याद्यहन्ता बुद्धिस्तद्रूपपाशेनानुबद्धं चित्तं यस्य तं माम् अद्य त्वन्मायया सुतकलत्रगृहरूपेऽन्धकूपे निमग्नं निरीक्ष्य स्वयमागतोऽसि इत्याश्चर्यं तेन करुणावत्त्वमित्याशयः ॥ २८ ॥

जाप्यं जपस्तद्विमुखेषु यथा महीपो राजा सेवानुरूपफलदस्तथा त्वमसीत्यर्थः ॥ २९ ॥

विश्वस्य सृष्टिलयसंस्थितिहेतुरेक-
स्त्वं मायया त्रिगुणया विधिरीशविष्णू ।
भासीश ! मोहितधियां विविधाकृतिस्त्वं
तद्वद्रविः सलिलपात्रगतो ह्यनेकः ॥ २० ॥
प्रत्यक्षतोऽद्य भवतश्चरणारविन्दं
पश्यामि राम ! तमसः परतः स्थितस्य ।
दृग्रूपतस्त्वमसतामविगोचरोऽपि ।
त्वन्मन्त्रपूतहृदयेषु सदा प्रसन्नः ॥ २१ ॥
पश्यामि राम ! तव रूपमरूपिणोऽपि
मायाविडम्बनकृतं सुमनुष्यवेशम् ।
कन्दर्पकोटिसुभगं कमनीयचाप-
बाणं दयार्द्रहृदयं स्मितचारुवक्त्रम् ॥ २२ ॥
सीतासमेतमजिनाम्बरमप्रधृष्यं
सौमित्रिणा नियतसेवितपादपद्मम् ।

विश्वसृष्ट्यादिहेतुस्त्वमेक एव त्रिगुणया माययोपाधिभूतया त्वमेव विधिरिति ईशः शिव इति विष्णुरिति भासीत्यन्वयः विविधाकृतिस्त्वं तत्तद्ध्यानादौ प्रसिद्धमेव तेषां तथा त्वं तद्भेदमनेकत्वं तव मिथ्यैवेत्याह यद्वदिति ॥ २० ॥

तमसः परतः तद्धीने शुद्धसत्त्वप्रधानचित्ते स्थितस्येत्यर्थः दृग्रूपतः दृग्रूपस्य दृष्टेरित्यर्थः "सार्वविभक्तिकस्तसिः" प्रसन्नः दृग्विषयः भवसीति शेषः ॥ २१ ॥

अरूपिणः अरूपस्यापि छान्दसत्वेन सिद्धं मायाविडम्बनेन मायाव्यवहारेण कृतम् । स्पष्टमन्यत् ॥ २२ ॥

नियतसेवितेति नियमेन सेवितेत्यर्थः मन्नागधेयं मदृष्टारब्ध-

नीलोत्पलद्युतिमनन्तगुणं प्रशान्तं
तन्नामधेयमनिशं प्रणमामि रामम् ॥ २२ ॥
जानन्तु राम ! तव रूपमशेषदेश-
कालाद्युपाधिरहितं घनचित्प्रकाशम् ।
प्रत्यक्षतोऽद्य मम गोचरमेतदेव
रूपं विभातु हृदये न परं विकाङ्क्षे ॥ २४ ॥
इत्येवं स्तुवतस्तस्य रामः सस्मितमब्रवीत् ।
मुने ! जानामि ते चित्तं निर्मलं मदुपासनात् ॥ २५ ॥
अतोऽहमागतो द्रष्टुं मदृते नान्यसाधनम् ।
मन्मन्त्रोपासका लोके मामेव शरणं गताः ॥ २६ ॥
निरपेक्षा नान्यगतास्तेषां दृश्योऽहमन्वहम् ।
स्तोत्रमेतत् पठेद् यस्तु त्वत्कृतं मत्प्रियं सदा ॥ २७ ॥
सद्भक्तिर्मे भवेत्तस्य ज्ञानं च विमलं भवेत् ।
त्वं ममोपासनादेव विमुक्तोऽसीह सर्वतः ॥ २८ ॥
देहान्ते मम सायुज्यं लप्स्यसे नात्र संशयः ।
गुरुं ते द्रष्टुमिच्छामि ह्यगस्त्यं मुनिनायकम् ॥
किञ्चित् कालं तत्र वस्तुं मनो मे त्वरयत्यलम् ॥ २९ ॥

शरीरभिति यावत् अनेन शरीराणाम् अदृष्टमात्रजन्यत्वं सूचि-
तम् ॥ २२ ॥

जानन्तु अन्येऽपि योगिन इति शेषः देशेत्यादि देशकालाद्युपरि-
च्छिन्नमित्यर्थः घनेति चैतन्यमात्ररूपमित्यर्थः प्रत्यक्षत इति मम तु
परिदृश्यमाने अत्रैव प्रीतिर्न तु परे वाङ्मनसागोचरे इत्यर्थः ॥ २४ ॥ २५ ॥

मदृते मद्भक्तिं विनेत्यर्थः तत्रोपन्यासाद्यः तदेवाह मन्मन्त्रेत्या-
दिना ॥ २६ ॥ २७ ॥

तस्य मे मयि सद्भक्तिः सती भक्तिर्भवेत् ॥ २८ ॥ २९ ॥

सुतीक्ष्णोऽपि तथेत्याह श्वो गमिष्यसि राघव!।
अहमप्यागमिष्यामि चिरादृष्टो महामुनिः॥ ४०॥

अथ प्रभाते मुनिना समेतो
रामः ससीतः सह लक्ष्मणेन।
आगस्त्यसंभाषणलोलमानसः
शनैरगस्त्यानुजमन्दिरं ययौ॥ ४१॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अरण्यकाण्डे
द्वितीयः सर्गः।

चिरादृष्टो भवामीति शेषः॥ ४०॥
आगस्त्यसंभाषणे लोलमत्युत्कटेच्छावन्मानसं यस्य स तथाभूतः॥४१॥
इति श्रीमद्ब्रह्मराजाधिपदूरदयसमर्थेंद्रारिदिव• श्रीरामवर्मणः कृतौ
श्रीमदध्यात्मरामायणे सेतौ अरण्यकाण्डे
द्वितीयः सर्गः।

अथ तृतीयः सर्गः ।

अथ रामः सुतीक्ष्णेन जानक्या लक्ष्मणेन च ।
अगस्त्यस्यानुजस्थानं मध्याह्ने समपद्यत ॥ १ ॥
तेन सम्पूजितः सम्यक् भुक्त्वा मूलफलादिकम् ।
परेद्युः प्रातरुत्थाय जग्मुस्तेऽगस्त्यमण्डलम् ॥ २ ॥
सर्वर्त्तुफलपुष्पाढ्यं नानामृगगणैर्युतम् ।
पक्षिसंघैश्च विविधैर्नादितं नन्दनोपमम् ॥ ३ ॥
ब्रह्मर्षिभिर्देवर्षिभिः सेवितं मुनिमन्दिरैः ।
सर्वतोऽलङ्कृतं साक्षाद् ब्रह्मलोकमिवापरम् ॥ ४ ॥
बहिरेवाश्रमस्याथ स्थित्वा रामोऽब्रवीन्मुनिम् ।
सुतीक्ष्ण ! गच्छ त्वं शीघ्रमागतं मां निवेदय ॥ ५ ॥
अगस्त्यमुनिवर्य्याय सीतया लक्ष्मणेन च ।
महाप्रसाद इत्युक्त्वा सुतीक्ष्णः प्रययौ गुरोः ॥ ६ ॥
आश्रमं त्वरया तत्र ऋषिसङ्घसमावृतम् ।
उपविष्टं रामभक्तैर्विशेषेण समायुतम् ॥ ७ ॥
व्याख्यातराममन्त्रार्थं शिष्येभ्यश्चातिभक्तितः ।
दृष्ट्वागस्त्यं मुनिश्रेष्ठं सुतीक्ष्णः प्रययौ मुनेः ॥ ८ ॥

अथेति अगस्त्यानुजोऽग्निजिह्वनामा ऋषिः ॥ १ ॥
अगस्त्यमण्डलं तदाश्रमम् ॥ २ ॥ ३ ॥
देवर्षिभिरिति छन्दोभङ्ग आर्षः मुनिमन्दिरैः सर्वतोऽलंकृतमित्य-न्वयः ॥ ४ ॥ ५ ॥ ६ ॥
व्याख्यातो राममन्त्रार्थो येन तम् प्रययो मुनेः समीपमिति शेषः ॥ ७ ॥ ८ ॥

दण्डवत्प्रणिपत्याह विनयावनतः सुधीः ।
रामो दाशरथिर्ब्रह्मन् ! सीतया लक्ष्मणेन च ।
आगतो दर्शनार्थं ते बहिस्तिष्ठति साञ्जलिः ॥ ९ ॥

अगस्त्य उवाच ।

शीघ्रमानय भद्रन्ते रामं मम हृदि स्थितम् ।
तमेव ध्यायमानोऽहं काङ्क्षमाणोऽत्र संस्थितः ॥ १० ॥
इत्युक्त्वा स्वयमुत्थाय मुनिभिः सहितो द्रुतम् ।
अभ्यवात्त्वरया भक्त्या गत्वा राममथाब्रवीत् ॥ ११ ॥
आगच्छ राम ! भद्रन्ते दिष्ट्या तेऽद्य समागमः ।
प्रियातिथिमम प्राप्तोऽस्यद्य मे सफलं दिनम् ॥ १२ ॥
रामोऽपि मुनिमायान्तं दृष्ट्वा हर्षसमाकुलः ।
सीतया लक्ष्मणेनापि दण्डवत्पतितो भुवि ॥ १३ ॥
द्रुतमुत्थाप्य मुनिराट् राममालिङ्ग्य भक्तितः ।
तद्गात्रस्पर्शजाह्लादस्रवन्नेत्रजलाकुलः ॥ १४ ॥
गृहीत्वा करमेकेन करेण रघुनन्दनम् ।
जगाम स्वाश्रमं हृष्टो मनसा मुनिपुङ्गवः ॥ १५ ॥
सुखोपविष्टं सम्पूज्य पूजया बहुविस्तरम् ।
भोजयित्वा यथान्यायं भोज्यैर्वन्यैरनेकधा ॥ १६ ॥
सुखोपविष्टमेकान्ते रामं शशिनिभाननम् ।

कांक्षमाणः तमेवेत्यनुकर्षः ॥ ९ ॥ १० ॥ ११ ॥
सीतयेत्यादेः सहेति शेषः ॥ १२ ॥
तद्गात्रस्पर्शजाह्लादेन स्रवद् यन्नेत्रजलं तेनाकुलः ॥ १३ ॥
रघुनन्दनं रघुनन्दनस्येत्यर्थः ॥ १४ ॥
वन्यैर्भोज्यैर्भोजयित्वेत्यन्वयः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

कृताञ्जलिरुवाचेदमगस्त्यो भगवानृषिः ॥ १७ ॥
त्वदागमनमेवाहं प्रतीक्षन् समवस्थितः ।
यदा क्षीरसमुद्रान्ते ब्रह्मणा प्रार्थितः पुरा ॥ १८ ॥
भूमेर्भारापनुत्त्यर्थं रावणस्य वधाय च ।
तदादि दर्शनाकाङ्क्षी तव राम ! तपश्चरन् ।
वसामि मुनिभिः सार्धं त्वामेव परिचिन्तयन् ॥ १९ ॥
सृष्टेः प्रागेक एवासीर्निर्विकल्पोऽनुपाधिकः ।
त्वदाश्रया त्वद्विषया माया ते शक्तिरुच्यते ॥ २० ॥
त्वामेव निर्गुणं शक्तिरावृणोति यदा तदा ।
अव्याकृतमिति प्राहुर्वेदान्तपरिनिष्ठिताः ॥ २१ ॥
मूलप्रकृतिरित्येके प्राहुर्मायेति केचन ।
अविद्या संसृतिर्बन्ध इत्यादि बहुधोच्यते ॥ २२ ॥

हे राम तव दर्शनाकाङ्क्षी तपश्चरन् तदादि तत्कालमारभ्य वसामीत्यन्वयः ॥ १९ ॥

अथ भगवत्स्वरूपं विद्वान् बोधयितुमध्यात्मशास्त्रावतारणाय भगवदन्त एवाह सृष्टेः प्रागिति त्वमेक एवासीः निर्विकल्पः विकल्परू- पसकलप्रपञ्चहीनः तत्र हेतुः अनुपाधिक इति उपाध्यसम्बद्ध इत्यर्थः ननु किं सर्वथोपाधेर्नास्त्येवेति नेत्याह त्वदिति अस्त्येव सा परंतु स्वक- ल्पितत्वात् सम्बन्धहीना सा अतस्त्वमनुपाधिक इत्याशयः ॥ २० ॥

अथ सृष्टिमुपक्रमते त्वामिति त्वां निर्गुणमेव सन्तं सा शक्तिः स्वकल्पितसम्बन्धेन त्वामावृणोति त्वत्सम्बन्धादात्मानं मनुते न तु कदा- चिदपि त्वं तत्सम्बन्धमात्मानं मनुषे अतो निर्गुणमेवेत्युक्तं तदा तां मायामव्याकृतमित्याहुः ॥ २१ ॥

तस्य तदवस्थायां नामान्तराण्याह मूलप्रकृतिरित्यादि तदुक्तं कपिलेन "मूलप्रकृतिरविकृतिः" इत्यादिना ॥ २२ ॥

अहङ्कारो महत्तत्त्वसंभूतस्त्रिविधोऽभवत् ।
सात्त्विको राजसश्चैव तामसश्चेति भण्यते ॥ २३ ॥
तामसात् सूक्ष्मतन्मात्राण्यासन् भूतान्यतः परम् ।
स्थूलानि क्रमशो राम ! क्रमोत्तरगुणानि ह ॥ २४ ॥
राजसानीन्द्रियाण्येव सात्त्विका देवता मनः ।
तेभ्योऽभवत् सूत्ररूपं लिङ्गं सर्वगतं महत् ॥ २५ ॥

सा त्वत्सम्बन्धमात्मानं मन्वाना अतएव त्वया संक्षोभ्यमाणा संक्षोभस्तत्र तत्कल्पितसम्बन्ध एवेति बोध्यम् । महत्तत्त्वमिति "सविकारात् प्रधानात् तु महत्तत्त्वमजायत महानिति यतः ख्यातिर्लोकानां जायते सदा" इति स्मृतेः निश्चयोऽस्मामिति साधारणी वृत्तिः एतदभिमानिनि हिरण्यगर्भेऽपि महानितिशब्दः सर्वेषां स्वस्वबुद्धिरूपाः प्रतिनियतोपाधयस्तस्यैव महत्तत्त्वस्यांशाः तस्यानेकबुद्धिमत्त्वरूपत्वादिति बोध्यम् । त्वया संचोदितात्प्रेरितान्महत्तत्त्वादहङ्कारोऽभूत् स चाहं ममेत्यभिमानवृत्तिकमन्तःकरणद्रव्यम् "अहङ्कारोऽभिमानश्च कर्ता मन्ता च सः स्मृतः" इति कौर्मोक्तेः अभिमानोऽभिमानवृत्तिक इत्यर्थः ॥ २२ ॥

महत्तत्त्वसंभूतस्तदुपादानकत्वात् यथा घटो मृदा सत्त्वाद्युपाधिकत्वेन त्रैविध्यं मूलप्रकृतेस्त्रिगुणत्वेन तत्कार्यत्वान्महत्तत्त्वस्य त्रिगुणत्वम् "सात्त्विको राजसश्चैव तामसश्च त्रिधा महान्" इति स्मृतेः तत्कार्यत्वाच्चाहङ्कारस्य त्रैविध्यम् एवमग्रेऽपि बोध्यम् ॥ २४ ॥

सूक्ष्मतन्मात्राणि शब्दस्पर्शरूपरसगन्धतन्मात्राणि अतः सूक्ष्मतन्मात्रेभ्यः स्थूलानि भूतानि तत्र शब्दतन्मात्रादाकाशं स्पर्शतन्मात्रात् पूर्वसहिताद्वायुः ताभ्यां सहिताद्रूपतन्मात्रात्तेजः तैः सहिताद्रसतन्मात्राज्जलम् एतैः सहिताद्गन्धतन्मात्रात् पृथिवीत्याद्यस्मदुक्तसांख्यतत्त्ववृत्तौ विस्तरः तदेवाह क्रमोत्तरगुणानीति क्रमेणाधिकगुणानि आकाशं शब्दमात्रगुणं वायुः शब्दस्पर्शगुणः तेजः शब्दस्पर्शरूपगुणं जलं शब्दस्पर्शरूपरसगुणं भूः शब्दस्पर्शरूपरसगन्धगुणेति ॥ २५ ॥

ततो विराट् समुत्पन्नः स्थूलाद् भूतकदम्बकात् ।
विराजः पुरुषात् सर्वं जगत् स्थावरजङ्गमम् ॥ २६ ॥
देवतिर्यङ्मनुष्याश्च कालकर्मक्रमेण तु ।
त्वं रजोगुणतो ब्रह्मा जगतः सर्वकारणम् ॥ २७ ॥
सत्त्वाद्विष्णुस्त्वमेवास्य पालकः सद्भिरुच्यते ।
लये रुद्रस्त्वमेवास्य त्वन्मायागुणभेदतः ॥ २८ ॥

राजसादहङ्कारादिन्द्रियाणि राजसाहङ्कारोपादानकारणानीत्यर्थः तानि च वाक्पाणिपादपायूपस्थरूपाणि कर्मेन्द्रियाणि पञ्च चक्षुःश्रोत्रत्वग्रसनघ्राणाख्यानि ज्ञानेन्द्रियाणि पञ्चैवं दश वचनादानविहरणानन्दोत्सर्गाश्च कर्मेन्द्रियाणां वृत्तयः ज्ञानेन्द्रियाणां च सविकल्पकनिर्विकल्पकोभयरूपज्ञानरूपा वृत्तिः तत्र निर्विकल्पकं किञ्चिदिदमिति ज्ञानं देवता मनश्च सात्त्विकाः सात्त्विकाहङ्कारोपादाना इत्यर्थः देवताः इन्द्रियदेवताः ताश्च चक्षुषो रविः श्रोत्रस्य दिक् त्वचो वायुः रसनस्य वरुणः घ्राणस्याश्विनौ वाचो अग्निः पाण्योरिन्द्रः पादयोरुपेन्द्रः पायोर्मित्रः उपस्थस्य को ब्रह्मेति मन इन्द्रियमपि अवान्तरत्वात् पृथगुक्तं सूत्ररूपं प्राणादिक्रियाशक्तेः प्राणादेरेव सूत्रव्यवहारात् तदात्मकं हिरण्यगर्भरूपं लिङ्गसर्वकार्यकर्तृत्वात् सर्वसूक्ष्मसमष्टिरूपमभवदित्यर्थः ॥ २६ ॥

ततो विराट् स्थूलसमष्टिरयम् तदाह स्थूलाद्भूतकदम्बकादिति इदमिन्द्रियादेरप्युपलक्षणम् तस्मादेव विराजः पुरुषात् सर्वं स्थावरं जङ्गमम् अभिव्यक्तमित्यर्थः ॥ २७ ॥

तत्र जङ्गममाह देवेत्यादि कालकर्मक्रमेण कालक्रमेण यथा हेमन्ते [व्रीहयो वसन्ते यवादि कर्मक्रमेण कालसहकृतेन तिर्यङ्मनुष्यदेवत्वप्राप्तिः उपाधिभेदेन ब्रह्मादिरूपोऽपि त्वमेवेत्याह रजोगुणतः तद्रूपोपाधेः जगतः सर्वकारणं सर्वस्य जगतः कारणमित्यर्थः आर्षत्वात्समासः ॥ २८ ॥

जाग्रत्स्वप्नसुषुप्त्याख्या वृत्तयो बुद्धिजैर्गुणैः।
तासां विलक्षणो राम! त्वं साक्षी चिन्मयोऽव्ययः ॥२९॥
सृष्टिलीलां यदा कर्त्तुमीहसे रघुनन्दन!।
अङ्गीकरोषि मायां त्वं तदा वै गुणवानिव ॥ ३० ॥
राम! माया द्विधा भाति विद्याविद्येति ते सदा।
प्रवृत्तिमार्गनिरता अविद्यावशवर्त्तिनः।
निवृत्तिमार्गनिरता वेदान्तार्थविचारकाः ॥ ३१ ॥
त्वद्भक्तिनिरता ये च ते वै विद्यामयाः स्मृताः।
अविद्यावशगा ये तु नित्यं संसारिणश्च ते।
विद्याभ्यासरता ये तु नित्यमुक्तास्त एव हि ॥ ३२ ॥
लोके त्वद्भक्तिनिरतास्त्वन्मन्त्रोपासकाश्च ये।
विद्या प्रादुर्भवेत्तेषां नेतरेषां कदाचन ॥ ३३ ॥

अत्र कार्ये नायमिमित्तं त्वमेव तद्रूपमभगाधिक इत्यर्थः एवं त्वन्मा-
यायाः गुणभेदैः सत्त्वरजस्तमोभिरेव तत्तत्प्राधान्येन बुद्धेर्जाग्रदादयो
वृत्तय इत्यर्थः त्वं त्वेतदवस्थात्रयरहित इत्याह तासामिति सम्बद्धयो-
रभावात्तत्प्रतिद्वन्द्विजाग्रदवस्थाया अप्यभाव इति भावः ॥ २९ ॥ ३० ॥

सृष्टिलीलामित्युपलक्षणं स्थित्यादेरपि यदा ईहसे इच्छसि तदा
मायां अङ्गीकरोषि तत्कल्पितं तत्कृतसम्बन्धं मन्यसे तदा वस्तुतोऽगुणो-
ऽपि गुणवानिवाभासीति शेषः ॥ ३१ ॥

तव मायैव संसारस्य मोक्षस्य च दाने समर्थेत्याह रामेति विद्या
तत्त्वज्ञानम् अविद्या संसारमूलकारणम्। तदुक्तं मार्कण्डेयेन
„सा विद्या परमा मुक्तेर्हेतुभूता सनातनी। संसारबन्धहेतुश्च सैव
सर्वेश्वरेश्वरीति" ॥ २२ ॥

विद्यामयाः तत्त्वज्ञानप्रधानाः सन्तोऽपि प्रारब्धकर्मणो विक्षेपेऽपि
पुनः पुनरसंसारबन्धाभावान्न इत्यर्थः ॥ २२ ॥

अतस्त्वद्भक्तिसम्पन्ना मुक्ता एव न संशयः ।
त्वद्भक्त्यमृतहीनानां मोक्षः स्वप्नेऽपि नो भवेत् ॥ २४॥
किं राम ! बहुनोक्तेन सारं किञ्चिद् ब्रवीमि ते ।
साधुसङ्गतिरेवात्र मोक्षहेतुरुदाहृता ॥ २५ ॥
साधवः समचित्ता ये निस्पृहा विगतैषिणः ।
दान्ताः प्रशान्तास्त्वद्भक्ता निवृत्ताखिलकामनाः ॥ २६ ॥
इष्टप्राप्तिविपत्त्योश्च समाः सङ्गविवर्जिताः ।
संन्यस्ताखिलकर्माणः सर्वदा ब्रह्मतत्पराः ॥ २७ ॥
यमादिगुणसम्पन्नाः सन्तुष्टा येन केनचित् ।
सत्सङ्गमो भवेद् यर्हि त्वत्कथाश्रवणे रतिः ॥ २८ ॥

विद्याप्राप्त्यावश्यकारणं हेतुमाह लोक इति ॥ २४ ॥

मुक्ता एव तेषां तत्त्वज्ञानस्यावश्यम्भावित्वादिति भावः व्यतिरेकमप्याह त्वद्भक्तीति ॥ २५ ॥

भक्तिरेव कथमिति चेत्तस्या अपि किञ्चिद् मुख्यं कारणमस्तीत्याह किं रामेति ते तुभ्यमुपदेश इति शेषः स्वशिष्यविश्वासार्थं भवदुक्त एतदुक्तिः ॥ २६ ॥

साधुस्वरूपज्ञाने एव तत्सङ्गतिः शक्येत्यतस्तल्लक्षणमाह साधव इति समचित्ताः शत्रुमित्रयो रागद्वेषहीनचित्ताः अतएव निस्पृहाः रागद्वेषकारणीभूतस्पृहाहीनाः विगतैषिणः लोकपुत्रवित्तादीच्छाः दान्ताः बहिरिन्द्रियनिग्रहवन्तः शान्ताः अन्तरिन्द्रियान्तःकरणनिग्रहवन्तः विगतैषिण इत्यस्यैव व्याख्यानं निवृत्ताखिलकामना इति ॥ २६ ॥

इष्टेति समाः हर्षविषादरहिताः सङ्गवर्जिताः दुःसङ्गरहिताः सन्न्यस्तेत्यादि सन्न्यस्ताखिलकर्माणः तदेवाह सर्वदा ब्रह्मतत्पराः ॥ २७ ॥

यमादयो यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयो

समुदेति ततो भक्तिस्त्वयि राम ! सनातने ।
त्वद्भक्तावुपपन्नायां विज्ञानं विपुलं स्फुटम् ॥ ३९ ॥
उदेति मुक्तिमार्गोऽयमाद्यश्चतुरसेवितः ।
तस्माद्राघव ! सद्भक्तिस्त्वयि मे प्रेमलक्षणा ॥ ४० ॥
सदा भूयाद्धरे ! सङ्गस्त्वद्भक्तेषु विशेषतः ।
अद्य मे सफलं जन्म भवत्सन्दर्शनादभूत् ॥ ४१ ॥
अद्य मे क्रतवः सर्वे बभूवुः सफलाः प्रभो ! ।
दीर्घकालं मया तप्तमनन्यमतिना तपः ।
तस्येह तपसो राम ! फलं तव यद्दर्शनम् ॥ ४२ ॥
सदा मे सीतया सार्द्धं हृदये वस राघव ! ।
गच्छतस्तिष्ठतो वाऽपि स्मृतिः स्यान्मे सदा त्वयि ॥४३॥
इति स्तुत्वा रामनाथमगस्त्यो मुनिसत्तमः ।
ददौ चापं महेन्द्रेण रामार्थे स्थापितं पुरा ॥ ४४ ॥

योगशास्त्रोक्ताः वर्हि यदा तेषां सत्सङ्गमो भवेत्तदा त्वत्कथाश्रवणे रतिः समुदेतीत्यन्वयः ॥ ३८ ॥

ततो भक्तिरवश्यं मम भूयात् तस्या च सा मय्यविच्छाकारचित्त-वृत्तिविशेषः प्रेमाख्यस्तथा प्रेमवतस्तत्त्वज्ञानं स्फुटमेवोदेति इत्य-न्वयः ॥ ३९ ॥

अयमाद्यो मुख्यश्चतुरैः कुशलैः सेवितो मुक्तेर्मार्गः तस्मात् हे राघव ! त्वयि प्रेमलक्षणा सद्भक्तिर्मे सदा भूयात् हे हरे ! तद्भक्तेषु विशेषतः सङ्गो भूयादित्यनुषङ्गः ॥ ४० ॥ ४१ ॥

क्रतवः सफला बभूवुः त्वत्प्रीतिरेव क्रतूनां मुख्यं फलं सा च तदाश्रमे आगमनात् त्वया व्यक्तीकृता ॥ ४२ ॥

उक्तमेवार्थमर्थान्तरेणाह दीर्घेति ॥ ४३ ॥

चाव खेटं प्रार्थयते सदा इति ॥ ४४ ॥

अक्षय्यौ बाणतूणीरौ खड्गो रत्नविभूषितः।
जहि राघव! भूभारभूतं राक्षसमण्डलम् ॥ ४५ ॥
यदर्थमवतीर्णोऽसि मायया मनुजाकृतिः।
इतो योजनयुग्मे तु पुण्यकाननमण्डितः ॥ ४६ ॥
अस्ति पञ्चवटी नाम्ना आश्रमो गौतमीतटे।
नेतव्यस्तत्र ते कालः शेषो रघुकुलोद्वह! ॥ ४७ ॥
तत्रैव बहुकार्य्याणि देवानां कुरु सत्पते! ॥ ४८ ॥

श्रुत्वा तदागस्त्यसुभाषितं वचः
स्तोत्रञ्च तत्त्वार्थसमन्वितं विभुः।
मुनिं समाभाष्य मुदान्वितो ययौ
प्रदर्शितं मार्गमशेषविद्धरिः ॥ ४९ ॥

इति श्रीमदध्यात्मरामायणे अरण्यकाण्डे उमामहेश्वरसंवादे
तृतीयः सर्गः।

बाणतूणीरौ बाणपूर्णौ तूणीरौ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥
अशेषविदपि मानुष्यं नाटयन् प्रदर्शितं मार्गं ययौ ॥ ४९ ॥

इति श्रीमत्सकलराजविपद्धरणसमर्थत्वादिवि० श्रीरामवर्म्मणः
कृतावध्यात्मरामायणे सेतौ अयोध्याकाण्डे
तृतीयः सर्गः।

अथ चतुर्थः सर्गः ।

सूतउवाच ।

मार्गे व्रजन्ददर्शाथ शैलशृङ्गमिव स्थितम् ।
दृष्ट्वा जटायुषं रामः किमेतदिति विस्मितः ॥ १ ॥
धनुरानय सौमित्रे ! राक्षसोऽयं पुरः स्थितः ।
इत्याह लक्ष्मणं रामो हनिष्याम्यृषिभक्षकम् ॥ २ ॥
तच्छ्रुत्वा रामवचनं गृध्रराट् भयपीडितः ।
वधार्होऽहं न ते राम ! पितुस्तेऽहं प्रियः सखा ॥ ३ ॥
जटायुर्नाम भद्रन्ते गृध्रोऽहं प्रियकृत्तव ॥ ४ ॥
पञ्चवट्यामहं वत्स्ये तवैव प्रियकाम्यया ।
मृगयायां कदाचित् तु प्रयाते लक्ष्मणेऽपि च ॥ ५ ॥
सीता जनककन्या मे रक्षितव्या प्रयत्नतः ।
श्रुत्वा तद्गृध्रवचनं रामः सस्नेहमब्रवीत् ॥ ६ ॥
साधु गृध्रमहाराज ! तथैव कुरु मे प्रियम् ।
अत्रैव मे समीपस्थो नातिदूरे वने वसन् ॥ ७ ॥
इत्यामन्त्रितमालिङ्ग्य ययौ पञ्चवटीं प्रभुः ।
लक्ष्मणेन सह भ्रात्रा सीतया रघुनन्दनः ॥ ८ ॥
गत्वा ते गौतमीतीरं पञ्चवट्यां सुविस्तरम् ।

मार्गे इति दृदर्श दृष्ट्वा च किमेतदिति विस्मितः ॥१॥२॥३॥४॥
वत्स्ये वत्स्यामीत्यर्थः आर्षः प्रयोगः ॥ ५ ॥ ६ ॥
गृध्रमहाराजेति पदोत्तपुरुषः अत्रैव वने वसन्मे प्रियं कुर्वित्यन्वयः ॥ ७ ॥
आमन्त्रितं सम्यक् बोधितं गृध्रमालिङ्ग्येत्यर्थः ॥ ८ ॥

मन्दिरं कारयामास लक्ष्मणेन सुबुद्धिना ॥ ९ ॥
तत्र ते न्यवसन् सर्वे गङ्गाया उत्तरे तटे ।
कदम्बपनसाम्रादिफलवृक्षसमाकुले ॥ १० ॥
विविक्ते जनसम्बाधवर्जिते भीरुजस्थले ।
विनोदयन् जनकजां लक्ष्मणेन विपश्चिता ॥ ११ ॥
अध्युवास सुखं रामो देवलोक इवामरः ।
कन्दमूलफलादीनि लक्ष्मणोऽनुदिनं तयोः ॥ १२ ॥
आनीय प्रददौ रामसेवातत्परमानसः ।
धनुर्बाणधरो नित्यं रात्रौ जागर्त्ति सर्वतः ॥ १३ ॥
स्नानं कुर्वन्त्यनुदिनं त्रयस्ते गौतमीजले ।
उभयोर्मध्यगा सीता कुरुते च गमागमौ ॥ १४ ॥
आनीय सलिलं नित्यं लक्ष्मणः प्रीतमानसः ।
सेवतेऽहरहः प्रीत्या एवमासन् सुखं त्रयः ॥ १५ ॥
एकदा लक्ष्मणो राममेकान्ते समुपस्थितम् ।
विनयावनतो भूत्वा पप्रच्छ परमेश्वरम् ॥ १६ ॥
भगवन् ! श्रोतुमिच्छामि मोक्षस्यैकान्तिकीं गतिम् ।
त्वत्तः कमलपत्राक्ष ! सङ्क्षेपाद्वक्तुमर्हसि ॥ १७ ॥

ते गौतमीतीरं गोदावरीतीरं गत्वा पञ्चवट्यां पञ्चवटसमीपे स्थिताः ततस्तत्र रामो लक्ष्मणेन सुविस्तरं मन्दिरं कारयामास ॥ ९ ॥

गङ्गायाः गङ्गात गौतम्येव ॥ १० ॥

जनसम्बाधो जनसमूहः निष्क्रान्ता रुजा पीड़ा यस्मात्तादृशस्थले लक्ष्मणेन सह अध्युवासेति सम्बन्धः ॥ ११ ॥ १२ ॥ १३ ॥१४॥१५॥१६॥

ऐकान्तिकीं गतिम् अव्यभिचारिकारणमित्यर्थः ॥ १७ ॥

ज्ञानं विज्ञानसहितं भक्तिवैराग्यबृंहितम्।
आचक्ष्व मे रघुश्रेष्ठ! वक्ता नान्योऽस्ति भूतले॥ १८॥

श्रीराम उवाच।

शृणु वक्ष्यामि ते वत्स! गुह्याद् गुह्यतरं परम्।
यद्विज्ञाय नरो जह्यात् सद्यो वैकल्पिकं भ्रमम्॥ १९॥
आदौ मायास्वरूपं ते वक्ष्यामि तदनन्तरम्।
ज्ञानस्य साधनं पश्चात् ज्ञानं विज्ञानसंयुतम्॥ २०॥
ज्ञेयं च परमात्मानं यज्ज्ञात्वा मुच्यते भयात्।
अनात्मनि शरीरादावात्मबुद्धिस्तु या भवेत्॥ २१॥
सैव माया तयैवासौ संसारः परिकल्प्यते।
रूपे द्वे निश्चिते पूर्वं मायायाः कुलनन्दन!॥ २२॥
विक्षेपावरणे तत्र प्रथमं कल्पयेज्जगत्।

ननु मोक्षकारणं ज्ञानमिति प्रसिद्धमेवेति चेत्तत्स्वरूपमेव प्रश्न-विषय इत्याह ज्ञानमिति ज्ञानं श्रवणमननजन्यं विज्ञानं निदिध्यासनजं भक्तिर्ज्ञानविषये प्रेम उक्तस्वरूपं वैराग्यं तदतिरिक्ते प्रेमाभाव-रूपम्॥ १८॥

वैकल्पिकं भ्रमं विकल्प एव वैकल्पिकं विनयादित्वाट्ठक् "शब्द-ज्ञानानुपाती वस्तुशून्यो विकल्पः" इति योगसूत्रोक्तविकल्परूपं भ्रमं यथा शशशृङ्गादि यद्यपि तदलीकमेव तथाऽपि शशशृङ्गादिशब्दप्रयोग-स्ततो बोधश्च भवत्येव तद्वदेव सर्वोऽपि व्यवहारः संसाररूपस्तं यज्ज्ञानेन जह्यात्तद्गुह्यं वक्ष्यामीत्यन्वयः॥ १९॥

तदुपयोगितया वक्ष्यमाणान्यर्थानि नाममात्रेण क्रमत उद्दिशति आदाविति॥ २०॥

तत्र मायास्वरूपमाह अनात्मनीति आत्मबुद्धिः अहमिति बुद्धिः॥२१॥
परिकल्प्यते अवस्तुभूत एव दृश्यते अथ तादृशशक्तिमत्त्वं मायायाः दर्शयति रूपे इति पूर्वमित्यनेन तयो रूपयोरनादित्वं दर्शयति॥ २२॥

न स्त्री पुमान्वा षण्ढो वा जीवः सर्वगतोऽव्ययः ।
एक एवाद्वितीयोऽयमाकाशवदलेपकः ।
नित्यो ज्ञानमयः शुद्धः स कथं शोकमर्हति ॥ १६ ॥

तारोवाच ।

देहोऽचित्काष्ठवद्राम ! जीवो नित्यश्चिदात्मकः ।
सुखदुःखादिसम्बन्धः कस्य स्याद्राम ! मे वद ॥ १७ ॥

श्रीराम उवाच ।

अहङ्कारादिसम्बन्धो यावद्देहेन्द्रियैः सह ।
संसारस्तावदेव स्यादात्मनस्त्वविवेकिनः ॥ १८ ॥
मिथ्यारोपितसंसारो न स्वयं विनिवर्त्तते ।
विषयान्ध्यायमानस्य स्वप्ने मिथ्यागमो यथा ॥ १९ ॥

सर्वगतश्चेतनो जीव एक एव अद्वितीय इति द्वितीयसम्बन्धरहितस्तदेवाकाशवदलेपक इति अविभु इत्यर्थः मायागुणैरिति शेषः स कथमिति अविनाशित्वादिति भावः ॥१६॥

देहः काष्ठवदचित् अचेतन इत्यर्थः जीवश्चिदात्मको ज्ञानस्वरूप एव न तु सुखादिपरिणामवान् एवं सति सुखादिसम्बन्धः कस्य स्यात् अचेतनत्वात् स्थूलस्य सूक्ष्मस्य नाप्यपरिणामित्वादात्मन इत्यर्थः ॥१७॥

उत्तरयति अहङ्कारादीति देहेन्द्रियैः सह तेषु इत्यर्थः अहङ्कारादिसम्बन्धः अहं ममेत्येवं बुद्धिविषयता इत्यर्थः प्राकः स्थूलसूक्ष्मदेहयोरुभयोरप्यहं बुद्धिरेव केषाञ्चित् स्थूलदेहे पुत्रादौ च ममता बुद्धिः सूक्ष्मे तु सर्वेषामहं बुद्धिरेवेति विवेकः तावदेवाविवेकिनोऽन्तःकरणादिभ्यः स्वस्मिन् विवेकाग्रहणत आत्मनः संसारः स्यादित्यर्थः ॥ १८ ॥

एवं शुद्धस्यात्मनोऽप्याविवेकादारोपितः संसारः स्वत एव न विनिवर्त्तते यथा स्वप्नस्य मिथ्यागमः स्वाप्नमिथ्यापदार्थदर्शनं न स्वतो निवर्त्तते किन्तु जाग्रदवस्थयैव तद्वदिति भावः ॥ १९ ॥

अनाद्यविद्यासम्बन्धात्तत्कार्याहङ्कृतेस्तथा।
संसारोऽपार्थकोऽपि स्याद्रागद्वेषादिसङ्कुलः॥ २०॥
मन एव हि संसारो बन्धश्चैव मनः शुभे!।
आत्मा मनः समानत्वमेत्य तद्गतबन्धभाक्॥ २१॥
यथा विशुद्धः स्फटिकोऽलक्तकादिसमीपतः।
तत्तद्वर्णयुतो भाति वस्तुतो नास्ति रञ्जनम्॥ २२॥
बुद्धीन्द्रियादिसामीप्यादात्मनः संसृतिर्बलात्।
आत्मा स्वलिङ्गन्तु मनः परिगृह्य तदुद्भवान्॥ २३॥
कामान् जुषन् गुणैर्बद्धः संसारे वर्त्ततेऽवशः।
आदौ मनो गुणान् सृष्ट्वा ततः कर्माण्यनेकधा॥ २४॥
शुक्ललोहितकृष्णानि गतयस्तत्समानतः।

तत्र संसारस्य विषयध्यानवत्संसारस्य मूलकारणमाह अनादीति अविद्या अनात्मन्यात्मबुद्धिर्माया वा अयथार्थकः अत्यन्तमिथ्याभूतः॥२०॥

मन एवेति मनोऽन्तःकरणं संसारस्तन्मूलकारणमित्यर्थः बन्धः सुखादिभोगस्तद्वत् मन एव मनसा समानत्वं आत्ममनसोरैक्यं तद्गतबन्धभाक् तद्गतबन्धयुक्तो भवतीत्यर्थः॥ २१। २२॥

बुद्धीति यथालक्तकादिसामीप्यात् स्फटिकस्य रक्तत्वादिव्यवहारः एवं संसारधर्मकबुद्धीन्द्रियादिसामीप्यादात्मनो बलादवशतः संसारव्यवहारो लोकैः क्रियत इत्यर्थः तदेवाहात्मेति मनसो जडत्वेन कामादिजनकत्वासम्भवात् चेतनस्यात्मनो लिङ्गमनुमापकं मनोऽन्तःकरणं परिगृह्य तेनाविवेकं प्राप्य तदुद्भवान् ततो जातान् कामान् विषयान् जुषन् गुणैस्तदीयै रागद्वेषादिभिर्बद्ध इवावशः संसारे वर्तते॥ २३॥
विषयाणां मन उद्भवत्वं दर्शयति आदाविति गुणान् रागद्वेषादीन् ततो रागद्वेषादितः कर्माणि सृष्टवदिति शेषः॥ २४॥

तत्र कर्मभेदानाह शुक्लेत्यादि शुक्लकर्माणि हिंसादिरहितजपध्या-

एवं कर्मवशाज्जीवो भ्रमत्याभूतसंप्लवम् ॥ २५ ॥
सर्वोपसंहृतौ जीवो वासनाभिः स्वकर्मभिः ।
अनाद्यविद्यावशगस्तिष्ठत्यभिनिवेशतः ॥ २६ ॥
सृष्टिकाले पुनः पूर्ववासनामानसैः सह ।
जायते पुनरप्येवं घटीयन्त्रमिवावशः ॥ २७ ॥
यदा पुण्यविशेषेण लभते सङ्गतिं सताम् ।
मद्भक्तानां सुशान्तानान्तदा मद्विषया मतिः ॥ २८ ॥
मत्कथा श्रवणे श्रद्धा दुर्लभा जायते ततः ।
ततः स्वरूपविज्ञानमनायासेन जायते ॥ २९ ॥
तदाचार्यप्रसादेन वाक्यार्थज्ञानतः क्षणात् ।

मादिरूपाणि लोहितानि हिंसामिश्रयागादीनि कृष्णानि पापकर्माणि तद्नुमानतः कर्मस्य रूपतुल्या गतयो गतीः सृष्टिवदिति शेषः गतय इति द्वितीयार्थे आर्षम् तत्र शुक्लकर्मणा शुक्ला ब्रह्मलोकप्राप्तिरूपोत्तमा गतिः लोहितकर्मणो मध्यमा स्वर्गगतिः कृष्णकर्मणोऽधमा नरकगतिरित्यर्थः भूतसंप्लवः प्रलयस्तावत्पर्यन्तं कर्मवशाद्भ्रमति ॥ २५ ॥

सर्वोपसंहृतौ प्रलये वासनाभिःकर्मभिश्च सहाभिनिवेशतः अन्तःकरणादितादात्म्याध्यासात् अन्तःकरणादिप्रकृतिभूतानाद्यविद्यावशगस्त्लीनः सन् तिष्ठति ॥ २६ ॥

वासनाश्च मानसानि कर्माणि च तैः सह तद्युक्त एव जायते वर्षाकाले मण्डूकवत्प्रादुर्भवति एवं सृष्टिप्रलययोर्घटीयन्त्रमिवावर्तमानस्तिष्ठति ॥ २७ ॥

नन्वेवमस्य मुक्तिः प्रत्याशैव न किं नेत्याह यदेति मद्विषया मतिः ईश्वरो महानित्येवं बुद्धिर्जायते इति शेषः ॥ २८ ॥

ततः ईश्वरविषयबुद्ध्यनन्तरम् ततः स्वरूपविज्ञानं स्वरूपं विज्ञायते अनेन ततः विषयेषु अनित्याशुचिदुःखरूपं वैराग्यं नित्यानित्यविवेकादि च जायते इत्यर्थः ॥ २९ ॥

तदा तादृशवैराग्यादौ जाते आचार्यप्रसादेन तत्त्वमस्यादिवाक्या-

देहेन्द्रियमनःप्राणाहङ्कृतिभ्यः पृथक् स्थितम् ॥ २० ॥
स्वात्मानुभावतः सत्यमानन्दात्मानमद्वयम् ।
ज्ञात्वा सद्यो भवेन्मुक्तः सत्यमेव मयोदितम् ॥ २१ ॥
एवं मयोदितं सम्यगालोचयति योऽनिशम् ।
तस्य संसारदुःखानि न स्पृशन्ति कदाचन ॥ २२ ॥
त्वमप्येतन्मया प्रोक्तमालोच्य विशुद्धधीः ।
न स्पृश्यसे दुःखजालैः कर्मबन्धाद्विमोक्ष्यसे ॥ २३ ॥
पूर्वजन्मनि ते सुभ्रु ! कृता मद्भक्तिरुत्तमा ।
अतस्तव विमोक्षाय रूपं मे दर्शितं शुभे ! ॥ २४ ॥
ध्यात्वा मद्रूपमनिशमालोचय मयोदितम् ।
प्रवाहपतितं कार्यं कुर्वत्यपि न लिप्यसे ॥ २५ ॥

स्वात्मानुभावतः श्रवणमननरूपात् ध्यानात् उत्पन्नात् ध्यानादिविषयीभूतात्मरूपात् पुनःपुनरनुसन्धानादिति यावत् देहादिभ्यः पृथक् स्थितं सत्यमानन्दरूपमद्वितीयमात्मानं स्वात्मानुभवतः स्वात्मविषयादीदृशं ब्रह्माहमेवेत्येवं रूपान्निदिध्यासनात् ज्ञात्वा अपरोक्षीकृत्य सद्यस्तत्कालमेव संसारान्मुक्तो भवेदित्यर्थः ॥ २० । २१ ॥

आलोचयति बुद्ध्या निर्णयति तस्य क्रमेण ज्ञानप्राप्त्या संसारदुःखाभावः ॥ २२ ॥

कर्मबन्धात् कर्मकृताद्बन्धात् संसाररूपादित्यर्थः ॥ २३ ॥

मे मया रूपं दर्शितं स्वरूपं दर्शितमित्यर्थः अत्र तारायै भगवता विश्वरूपदर्शनं कारितमिति ध्वनयति यद्वा दर्शितमित्यंबोधितमित्यर्थः ॥ २४ ॥

मद्रूपं परिच्छिन्नमानं रूपं दर्शितं विश्वरूपं च आलोचय विचारय प्रवाहपतितं संसारप्रवाहपतितं कार्यं सांसारिकं कार्यं कुर्वत्यपि तद्दोषैर्न लिप्यसे इत्यर्थः ॥ २५ ॥

श्रीरामेणोदितं सर्वं श्रुत्वा तारातिविस्मिता ।
देहाभिमानजं शोकं त्यक्त्वा नत्वा रघूत्तमम् ॥ ३६ ॥
आत्मानुभवसन्तुष्टा जीवन्मुक्ता बभूव ह ।
क्षणसङ्गमात्रेण रामेण परमात्मना ॥ ३७ ॥
अनादिबन्धं निर्धूय मुक्ता सापि विकल्मषा ।
सुग्रीवोऽपि च तच्छ्रुत्वा रामवक्त्रात्समीरितम् ॥ ३८ ॥
जहावज्ञानमखिलं स्वस्थचित्तोऽभवत्तदा ।
ततः सुग्रीवमाहेदं रामो वानरपुङ्गवम् ॥ ३९ ॥
भ्रातुर्ज्येष्ठस्य पुत्रेण यद्युक्तं साम्परायिकम् ।
कुरु सर्वं यथान्यायं संस्कारादि ममाज्ञया ॥ ४० ॥
तथेति बहुभिर्मुख्यैर्वानरैः परिगृह्य तम् ।
वालिनं पुष्पके क्षिप्त्वा सर्वराजोपचारकैः ॥ ४१ ॥
भेरीदुन्दुभिनिर्घोषैर्ब्राह्मणैर्मन्त्रिभिः सह ।
यूथपैर्वानरैः पौरैस्तारया चाङ्गदेन च ॥ ४२ ॥
गत्वा चकार तत्सर्वं यथाशास्त्रं प्रयत्नतः ।

देहाभिमानजं देहे अहं मम इत्याकारकाभिमानाज्जातम् ॥३६॥

जीवन्मुक्ता तदवस्था परमात्मना रामेण सङ्गत्वात् क्षणसङ्गमेनैव सापि तिर्यग्योनिरपि तारा अनादिबन्धं संसाररूपं निर्धूय तिरस्कृत्य विकल्मषा निःपापा कृता मुक्ता जीवन्मुक्ता च कृता ॥ ३७—३८ ॥

सुग्रीवं किमाहेत्यत आह भ्रातुरिति ज्येष्ठस्य भ्रातुर्यत्साम्परायिकम् पारलौकिकं युक्तं तत्पुत्रेणाङ्गदेन कुरु कारयेत्यर्थः ननु भवद्भ्यां कथमस्माभिः संस्कारादि कार्यं तत्राह ममाज्ञयेति ॥ ४० ॥

तथेतीत्यस्याङ्गीकृत्येति शेषः परिगृह्य उत्थाप्य पुष्पकविमानतुल्ये वाहने सर्वराजोपचारैर्युक्तं वालिनं क्षिप्त्वा ॥ ४१ । ४२ ॥

स्नात्वा जगाम रामस्य समीपं मन्त्रिभिः सह ॥ ४३ ॥
नत्वा रामस्य चरणौ सुग्रीवः प्राह हृष्टधीः ।
राज्यं प्रशाधि राजेन्द्र ! वानराणां समृद्धिमत् ॥ ४४ ॥
दासोऽहन्ते पादपद्मं सेवे लक्ष्मणवच्चिरम् ।
इत्युक्तो राघवः प्राह सुग्रीवं सस्मितं वचः ॥ ४५ ॥
त्वमेवाहं न सन्देहः शीघ्रं गच्छ ममाज्ञया ।
पुरराज्याधिपत्ये त्वं स्वात्मानमभिषेचय ॥ ४६ ॥
नगरं न प्रवेक्ष्यामि चतुर्दशसमाः सखे ।
आगमिष्यति मे(१) भ्राता लक्ष्मणः पत्तनं तव ॥ ४७ ॥
अङ्गदं यौवराज्ये त्वमभिषेचय सादरम् ।
अहं समीपे शिखरे पर्वतस्य सहानुजः ॥ ४८ ॥
वत्स्यामि वर्षदिवसान् ततस्त्वं यत्नवान् भव ।
किञ्चित्कालं पुरे स्थित्वा सीतायाः परिमार्गणे ॥ ४९ ॥
साष्टाङ्गं प्रणिपत्याह सुग्रीवो रामपादयोः ।

तत् कृतोचितसंस्कारादिः ॥ ४३ ॥

वानराणां राज्यं प्रशाधीत्यन्वयः ॥ ४४ । ४५ ॥

त्वमेवाहं अनेन त्वया क्रियमाण राज्यभोग एव मम भोग इति सूचितम् किञ्चानासक्तो राज्यं भुंक्ष्व ईश्वरप्रेरितोऽहं राज्यं कुर्वे इति मत्वा च तादृश्या बुध्या क्रियमाणया क्रियया भगवान् वध्यत्वेति ध्वनितम् पुरराज्याधिपत्ये किष्किन्ध्यापुरराज्याधिपत्ये ॥ ४६ ॥

तर्हि मदभिषेककाले तत्र सन्निधानं कुर्विति चेत्तत्राह नगरमिति पत्तनं नगरम् ॥ ४७ ॥

अहं च नगरस्य समीपे पर्वतस्य शिखरे वत्स्यामीत्यन्वयः ॥ ४८ ॥

वर्षदिवसान् वर्षाकालम् ततः राज्याभिषेकानन्तरं किञ्चित्कालं वर्षा-

(१) ते इति क्वचित् पाठः ।

यदाज्ञापयसे देव ! तत्तथैव करोम्यहम् ॥ ५० ॥
अनुज्ञातस्तु रामेण सुग्रीवस्तु सलक्ष्मणः ।
गत्वा पुरं तथा चक्रे यथा रामेण चोदितः ॥ ५१ ॥
सुग्रीवेण यथा न्याय्यं पूजितो लक्ष्मणस्तदा ।
आगत्य राघवं शीघ्रं प्रणिपत्योपतस्थिवान् ॥ ५२ ॥
ततो रामो जगामाशु लक्ष्मणेन समन्वितः ।
प्रवर्षणगिरेरूर्द्ध्वं शिखरं भूरिविस्तरम् ॥ ५३ ॥
तत्रैकं गह्वरं दृष्ट्वा स्फाटिकं दीप्तिमच्छुभम् (१) ।
वर्षवातातपसहं फलमूलसमीपगम् ।
वासाय रोचयामास तत्र रामः सलक्ष्मणः ॥ ५४ ॥
दिव्यमूलफलपुष्पसंयुते मौक्तिकोपमजलौघपल्वले ।
चित्रवर्णमृगपक्षिशोभिते पर्वते(२)रघुकुलोत्तमोऽवसत् ॥ ५५ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्ध्याकाण्डे तृतीयः सर्गः ।

समयं स्वपुरे स्थित्वा सीतायाः परिमार्गणे अन्वेषणे यत्नवान् भवेत्यन्वयः ॥ ४६ ॥ ५० ॥

चोदितः प्रेरितः ॥ ५१–५२ ॥

गह्वरं गुहां फलमूलानि समीपगानि यस्य तत् ॥ ५४ ॥

मौक्तिकोपमजलौघो जलसमूहो येषु तादृशानि पल्वलानि यस्मिन् तादृशे पर्वते स्वर्णैः नानावर्णैर्मृगैः पक्षिभिश्च शोभिते ॥ ५५ ॥

इति श्रीमद्रामवर्माराजर्षि० श्रीरामवर्मणः कृताव-ध्यात्मरामायणे सेतौ किष्किन्ध्याकाण्डे तृतीयः सर्गः ।

---

(१) दीप्तमद्भुतमिति वा पाठः ।　　(२) राघवो इत्यपि पाठः ।

अथ चतुर्थः सर्गः।

तत्र वार्षिकदिनानि राघवो
लीलया मणिगुहासु सञ्चरन्।
पक्वमूलफलभोगतोषितो
लक्ष्मणेन सहितोऽवसत् सुखम्॥ १॥

वाततुन्नजलपूरितमेघान्तरस्तनितवैद्युतगर्भान्।
वीक्ष्य विस्मयमगाद्गजयूथान् यद्वदाहितसुकाञ्चनकक्षान्॥२

नवघासं समासाद्य हृष्टपुष्टमृगद्विजाः।
धावन्तः परितो रामं वीक्ष्य विस्फारितेक्षणाः॥ ३॥

न चलन्ति सदा ध्याननिष्ठा इव मुनीश्वराः।
रामं मानुषरूपेण गिरिकाननभूमिषु॥ ४॥

चरन्तं परमात्मानं ज्ञात्वा सिद्धगणा भुवि।
मृगपक्षिगणा भूत्वा राममेवानुसेविरे॥ ५॥

सौमित्रिरेकदा राममेकान्ते ध्यानतत्परम्।

तत्र पर्वते इत्यर्थः वार्षिकदिनानि व्याप्येति शेषः सुखमित्यन्वयः॥१॥

वातप्रेरितजलपूर्णमेघान् अन्तरे मध्ये स्तनितं युक्तं वैद्युतं विद्युत्समूहो गर्भे येषां तान् आहितसुकाञ्चनाः कक्षाः पृष्ठास्तरणानि येषां तादृशान् गजयूथान्यद्वत् तानिव वीक्ष्य विस्मयमगात् अत्र गजा बृंहितयुक्ता बोध्या अतएव स्तनितेनाधिक्यम्॥ २॥

नवघासं लब्ध्वा विस्फारितेक्षणा भगवत्सौन्दर्यं दर्शनायेति भावः॥३॥

तादृशाः सन्तो ध्याननिष्ठा मुनीश्वरा इव न चलन्ति राममित्याद्युक्त्यापि तत्रैते चरन्तो मृगपक्षिगणा न किन्तु सिद्धगणा इत्यपह्नुतिव्यङ्ग्या॥ ४—६॥

समाधिविरमे भक्त्या प्रश्रयाद्विनयान्वितः ॥ ६ ॥
अब्रवीद्देव! ते वाक्यात् पूर्वोक्तादिगतो मम।
अनाद्यविद्यासम्भूतः संशयो हृदि संस्थितः॥ ७ ॥
इदानीं ज्ञातुमिच्छामि(१) क्रियामार्गेण राघव!।
भवदाराधनं लोके यथा कुर्वन्ति योगिनः ॥ ८ ॥
इदमेव सदा प्राहुर्योगिनो मुक्तिसाधनम्।
नारदोऽपि तथा व्यासो ब्रह्मा कमलसम्भवः॥ ९ ॥
ब्रह्मक्षत्रादिवर्णानामाश्रमाणां च मोक्षदम्।
स्त्रीशूद्राणां च राजेन्द्र! सुलभं मुक्तिसाधनम्।
तव भक्ताय मे भ्रात्रे ब्रूहि लोकोपकारकम् ॥ १० ॥

श्रीराम उवाच।

मम पूजाविधानस्य नान्तोऽस्ति रघुनन्दन!।
तथापि वक्ष्ये संक्षेपाद्यथावदनुपूर्वशः ॥ ११ ॥
स्वगृह्योक्तप्रकारेण द्विजत्वं प्राप्य मानवः।
सकाशात्स गुरोर्मन्त्रं लब्ध्वा मद्भक्तिसंयुतः॥ १२ ॥

अनादिभूतयाऽविद्यया संभूतो जातः संशयो विगत इत्यन्वयः ॥७॥
क्रियामार्गेण लौकिकपुष्पादिभिः पूजारूपेण यथा तत्प्रकारविशि-
ष्टेन पूजामार्गेण योगिनो भवदाराधनं कुर्वन्ति तज्ज्ञातुमिच्छामीत्यन्वयः ।८।
इदमेव क्रियामार्गेणाराधनमेव योगिनएवाहु नारद इत्यादि ॥९॥
मे मह्यम् ॥ १० ॥ ११ ॥
द्विजत्वं उपनयनसंस्कारं प्राप्य ज्ञानयोरव्ययकोः प्राप्य लब्ध्वा
एतयोराराधयेदित्यनेनान्वयः ॥ १२ ॥

(१) ज्ञोतुमिच्छामि इति वा पाठः ।

तेन सन्दर्शितविधिर्मामेवाराधयेत् सुधीः ।
हृदये वानले वार्चेत्प्रतिमादौ विभावसौ ॥ १३ ॥
शालग्रामशिलायां वा पूजयेन्मामतन्द्रितः ।
प्रातःस्नानं प्रकुर्वीत प्रथमं देहशुद्धये ॥ १४ ॥
वेदतन्त्रोदितैर्मन्त्रैर्मृल्लेपनविधानतः ।
सन्ध्यादिकर्म यन्नित्यं तत्कुर्याद्विधिना बुधः ॥ १५ ॥
सङ्कल्पमादौ कुर्वीत सिद्ध्यर्थं कर्मणां सुधीः ।
स्वगुरुं पूजयेद्भक्त्या मद्बुद्ध्या पूजको मम ॥ १६ ॥
शिलायां स्नपनं कुर्यात् प्रतिमासु प्रमार्जनम् ।
प्रसिद्धैर्गन्धपुष्पाद्यैर्मत्पूजासिद्धिदायिका ॥ १७ ॥
अमायिकोऽनुवृत्त्या मां पूजयेन्नियतव्रतः ।
प्रतिमादिष्वलङ्कारः प्रियो मे कुलनन्दन ! ॥ १८ ॥

पूजास्थानान्याह हृदय इत्यादि स्वहृदयदेश इत्यर्थः इदं च सुधीरी-
णामपि स्वत्व(?)ज्ञानामुपलक्षणम् अनले वह्नौ प्रतिमादौ प्रतिमा स्वर्णर-
जतादिमयी आदिना आह्वये विभावसौ सूर्यमण्डले अर्चेत् पूजयेत् ॥ १३ ॥

प्रातःस्नानमिति सकलप्रातःकृत्योपलक्षणम् ॥ १४ ॥

वेदेति द्विजो वेदोदितैः शूद्रादिस्तन्त्रोदितैः मृल्लेपनं सकलस्नानं
विधेरुपलक्षणं तेन स्नानं कुर्वन्नित्यन्वयः सन्ध्यादिना होमतर्पणादि ॥१५॥

मम पूजको मद्बुद्ध्या भक्त्या स्वगुरुं पूजयेदित्यन्वयः अत्र गुर्व-
सान्निध्येऽपि ध्यानेन जपादौ गुरुं पूजयेदिति सम्प्रदायः ॥ १६ ॥

शिलायां शिलानिर्मितप्रतिमायाम् प्रतिमासु स्वर्णरजतादिनिर्मिता-
स्वित्यर्थः प्रसिद्धैः स्मृतिप्रसिद्धैः तेन तन्निषिद्धपुष्पादिपूजानर्हमिति
सूचितम् ते च निषेधा निबन्धेषु द्रष्टव्या विस्तरभयान्नेह लिखिताः॥१७॥

अमायिकः माया दम्भादिरूपा तद्रहितः अनुवृत्त्या गुरूपदिष्टमा-
र्गानुवर्तनेन प्रतिमादिषु प्रतिमाश्च ते आदयश्च प्रतिमादयः तेषु प्रति-

Digitized by Google

अग्नौ यजेत हविषा भास्करे स्थण्डिले यजेत्।
भक्त्योपहृतं प्रीत्यै श्रद्धया मम वार्य्यपि ॥ १९ ॥
किं पुनर्भक्ष्यभोज्यादिगन्धपुष्पाक्षतादिकम्।
पूजाद्रव्याणि सर्वाणि सम्पाद्यैवं समारभेत् ॥ २० ॥
चैलाजिन कुशैः सम्यगासनं परिकल्पयेत्।
तत्रोपविश्य देवस्य सम्मुखे शुद्धमानसः ॥ २१ ॥
ततो न्यासं प्रकुर्वीत मातृकाबहिरान्तरम्।
केशवादि ततः कुर्यात्तत्त्वन्यासं ततः परम् ॥ २२ ॥
मन्मूर्त्तिपञ्जरन्यासं मन्त्रन्यासं ततो न्यसेत्।

मादिषु प्रतिमारूपेषु आदिषु आश्रयेषु पूजाधिकरणेष्वित्यर्थः तत्-पुरुषः समासाधिकरणः कर्मधारयः प्रतिमारूपेष्वाश्रयेषु आदिशब्द आश्रयवाची "भीष्मादिषु सुयोधन" इत्यादौ प्रसिद्धः अलङ्कारः पुष्पादिरूपः ॥ १८ ॥

आधारान्तरे पूजाविशेषमाहाग्नाविति अग्नौ तत्तद्देवतामन्त्रेण होम एव तत्तद्देवतापूजेत्यर्थः भास्करे स्थण्डिले यजेदिति भास्करे यजेदित यत् तत्तदाकारे स्थण्डिले इत्यर्थः भक्तेन श्रद्धयोपहृतं वार्य्यपि मम प्रीत्यै भवतीति शेषः अनेन भक्तेरेव मुख्यत्वं दर्शितम् ॥ १९ ॥

भक्ष्यादिकमुपहृतं प्रीत्यै इति किं पुनर्वक्तव्यमित्यर्थः समारभेत् पूजामिति शेषः ॥ २० ॥

तत्र पूजाप्रकारमाह चैलेति अधः कुशासनं तदुपर्य्यजिनम् तदुपरि चैलमिति क्रमः तत्रोपविश्य तत्रासनाद्युपगतमासनेनेत्यर्थः देवस्य सम्मुखे इत्यनेन स्थिरासु प्रतिमासु पश्चिमाद्यभिमुखतयापि पूजा भवतीति सूचितम् ॥ २१ ॥

मातृका अकारादिपञ्चाशद्वर्णात्मिका तन्न्यासप्रकारस्तु तन्त्रे च स्फुटः बहिरिति बहिर्न्यासमान्तरं न्यासं चेत्यर्थः केशवादिचतुर्विंशतिनामभि-रित्यर्थः स च नारदपाञ्चरात्रादौ स्पष्टः तत्त्वन्यासोऽपि तत्रैवोक्तः ॥ २२ ॥

प्रतिमादावपि तथा कुर्यान्नित्यमतन्द्रितः ॥ २३ ॥
कलशं स्वपुरो वामे क्षिपेत् पुष्पादि दक्षिणे ।
अर्घ्यपाद्यप्रदानार्थं मधुपर्कार्थमेव च ॥ २४ ॥
तथैवाचमनार्थं तु न्यसेत्पात्रचतुष्टयम् ।
हृत्पद्मे भानुविमलात् (१) मत्कलां जीवसंज्ञिताम् ॥ २५ ॥
ध्यायेत् स्वदेहमखिलं तया व्याप्तमरिन्दम ! ।
तामेवावाहयेन्नित्यं प्रतिमादिषु मत्कलाम् ॥ २६ ॥
पाद्यार्घ्याचमनीयाद्यैः स्नानवस्त्रविभूषणैः ।
यावच्छक्योपचारैर्वा त्वर्चयेन्मामायया ॥ २७ ॥
विभवे सति कर्पूरकुङ्कुमागुरुचन्दनैः ।

मन्त्रमूर्तिपञ्जरन्यासो विष्णुपञ्जरस्तोत्रोक्तो महान्यास इति सम्प्रदायः तत्त्वन्यासं मन्त्रवर्णैस्तत्तत्स्थानेषु षडङ्गादिन्यासं प्रतिमादावपीति "यथात्मनि तथा देवे" इत्युक्तेः ॥ २३ ॥

स्वस्य वामभागावच्छिन्ने पुरोभागे कलशं जलपूर्णं स्थापयेदिति शेषः पुष्पादि दक्षिणे क्षिपेत् स्थापयेदित्यर्थः अर्घ्यादिपात्रस्थापनदेशः स्मृतौ उक्तः 'अर्घ्यपात्रं तु वायव्ये नैरृत्यां पाद्यपात्रकम् । मध्ये तु मधुपर्कं स्यादैशे त्वाचमनीयकं' इति ॥ २४ ॥

जीवसंज्ञितां मत्कलामित्यनेन चेतनः सर्वत्रैक एवेति बोधितम् युक्तं चैतत् व्यापकेनैकेनैव चेतनेनोपपत्तावनेकतत्कल्पनायां मानाभावात् प्रतिशरीरव्यवस्थात्वन्तःकरणभेदेनैवोपपद्यत इति हृत्पद्मे तां ध्यायेत् ॥ २५ ॥

तया व्याप्तमखिलं स्वदेहं भावयेत् तथा भावयित्वा तामेव मत्कलां प्रतिमादिष्वावाहयेत् तदावाहनेन तामपि चेतनत्वेन ध्यात्वा ॥ २६ ॥

यावच्छक्यैरुपचारैर्वा षोडशभिः पञ्चभिर्वा तु पादपूरणार्थः अमायया अदम्भादिना मां पूजयेत् ॥ २७ ॥

(१) विमलां इति वा पाठः ।

अर्चयेन्मन्त्रवन्नित्यं सुगन्धकुसुमैः शुभैः ॥ २८ ॥
दशावरणपूजां वै आगमोक्तां प्रकारयेत् ।
नीराजनैर्धूपदीपैर्नैवेद्यैर्विविधैस्तथा(१) ॥ २९ ॥
अहर्योपहरेन्नित्यं अहाभुगहमीश्वरः ।
होमं कुर्यात्प्रयत्नेन विधिना मन्त्रकोविदः ॥ ३० ॥
अगस्त्येनोक्तमार्गेण कुण्डेनागमवित्तमः ।
जुहुयान्मूलमन्त्रेण पुंसूक्तेनाथवा बुधः ॥ ३१ ॥
अथवोपासनाग्नौ वा चरुणा हविषा तथा ।
तप्तजाम्बूनदप्रख्यं दिव्याभरणभूषितम् ॥ ३२ ॥
ध्यायेदनलमध्यस्थं होमकाले सदा बुधः ।
पार्षदेभ्यो बलिं दत्त्वा होमशेषं समापयेत् ॥ ३३ ॥

विभवे सति कर्पूरादिभिः सुगन्धपुष्पैश्च मन्त्रवदर्चयेत् ॥ २८ ॥

आगमोक्तां अगस्त्यसंहितोक्तां प्रकारयेत् प्रकुर्वीतेत्यर्थः नीराजनैरिति पाठक्रमादर्थक्रमस्य बलवत्त्वाद्धूपदीपनैवेद्यनीराजनानीति क्रमः नीराजनं पञ्चारार्तिकादिभिः ॥ २९ ॥

मद्रूपादि अहर्योपहरेद्दद्यात् यतोऽहं अहाभुक् अहादस्तभोक्ता ॥३०

अगस्त्येनेति अगस्त्यसंहितोक्तमार्गेण कृतं यत्कुण्डं तेन तत्सन्निमार्षः अधिकरणस्य करणत्वविवक्षया तृतीया मूलमन्त्रेण आगमोक्तेन पुंसूक्तेन पुरुषसूक्तेन एतद्ब्राह्मणविषयम् ॥ ३१ ॥

तद्विषये एवाऽऽहावनोपासनाग्नाविति चरुणा हविषा हवीरूपेण चरुणा ॥ ३२ ॥

ध्यायेदनलमिति शेषः पार्षदेभ्यः तन्मोक्तहनूमदादिभ्यः ॥ ३३ ॥

(१) बहुविस्तरैः इति पाठान्तरम् ।

ततो जपं प्रकुर्वीत ध्यायन्मां यतवाक् स्मरन्।
मुखवासं च ताम्बूलं दत्त्वा प्रीतिसमन्वितः ॥ ३४ ॥
मदर्थं नृत्यगीतादिस्तुतिपाठादि कारयेत्।
प्रणमेद्दण्डवद्भूमौ हृदये मां निधाय च ॥ ३५ ॥
शिरस्याधाय मद्दत्तं प्रसादं भावनामयम्।
पाणिभ्यां मत्पदे मूर्ध्नि गृहीत्वा भक्तिसंयुतः ॥ ३६ ॥
रक्ष मां घोरसंसारादित्युक्त्वा प्रणमेत् सुधीः।
उद्वासयेद्यथा पूर्वं प्रत्यग्ज्योतिषि संस्मरन् ॥ ३७ ॥
एवमुक्तप्रकारेण पूजयेद्विधिवद्यदि।
इहामुत्र च संसिद्धिं प्राप्नोति मदनुग्रहात् ॥ ३८ ॥
मद्भक्तो यदि मामेवं पूजां चैव दिने दिने।

माम्ध्यायन् स्मरन्नित्यस्य मनुमर्णोनिति शेषः तदेवाह यतवागिति अनेन प्रशस्ततरो मानसो जप उक्तः मुखवासं तद्रूपकर्पूरादियुक्तं ताम्बूलं दद्यादित्यर्थः ॥ ३४ ॥

मदर्थं मत्प्रीतये इत्यर्थः कारयेत्कुर्वीतेत्यर्थः निहतप्रपतन् यथा पतेत् दण्डवदित्यनेनाष्टाङ्गप्रणाम उक्तः ॥ ३५ ॥

भावनामयं मद्दत्तं प्रसादं शिरसि आधाय स्थापयित्वा अनेन मह्यं प्रसादं पुष्पादिरूपं भगवान् ददातीति भावनया प्रसादं गृह्णीयादिति सूचितं तं गृहीत्वा शिरसि स्थापयित्वा भावनाभाविते मत्पदे पाणिभ्यां स्वमूर्ध्नि गृहीत्वा धृत्वा ॥ ३६ ॥

इत्युक्त्वा प्रणमेदित्यन्वयः प्रत्यग्ज्योतिषि स्वहृदयस्थे यतएव ध्यातः आवाहनया प्रतिमायामावाहिता पूर्वं तस्मिन्नेवोद्वासयेत् तत्रैव प्रविष्टं ध्यायेत् एतदेव विसर्जनम् ॥ ३७ ॥

इहामुत्र च ऐहिकलौकिकीं पारलौकिकीं चेत्यर्थः ॥ ३८ ॥

मद्भक्तो यदि मामेवं ध्यात्वा आवाह्य च दिने दिने प्रतिदिनं

करोति मम सारूप्यं प्राप्नोत्येव न संशयः ॥ ३९ ॥

इदं रहस्यं परमं च पावनं
मयैव साक्षात्कथितं सनातनम् ।
पठत्यजस्रं यदि वा शृणोति यः
स सर्वपूजाफलभाङ्न संशयः ॥ ४० ॥

एवं परात्मा श्रीरामः क्रियायोगमनुत्तमम् ।
पृष्टः प्राह स्वभक्ताय शेषांशाय महात्मने ॥ ४१ ॥
पुनः प्राकृतवद्रामो मायामालम्ब्य दुःखितः ।
हा सीतेति वदन्नेव(१) निद्रां लेभे कथञ्चन ॥ ४२ ॥
एतस्मिन्नन्तरे तत्र किष्किन्ध्यायां सुबुद्धिमान् ।
हनूमान् प्राह सुग्रीवमेकान्ते कपिनायकम् ॥ ४३ ॥
शृणु राजन् ! प्रवक्ष्यामि तवैव हितमुत्तमम् ।
रामेण ते कृतः पूर्वमुपकारो ह्यनुत्तमः ॥ ४४ ॥
कृतघ्नवत्त्वया नूनं विस्मृतः प्रतिभाति मे ।
त्वत्कृते निहतो वाली वीरस्त्रैलोक्यसम्मतः ॥ ४५ ॥

मम पूजां करोति तदा मम सारूप्यं प्राप्नोति ॥ ३९ ॥

सनातनं पूर्वपूर्वैरप्येवमेवानुष्ठितम् ॥ ४० ॥

शेषांशाय लक्ष्मणाय ॥ ४१ ॥

प्राकृतवत् प्रकृतिकार्यं मनुष्यवत् मायामालम्ब्य दुःखित इत्यनेन तत्त्वतस्तस्य दुःखलेशोऽपि नेति सूचितम् ॥ ४२ ॥

एकान्ते इति मन्त्रस्यैकान्ते कथनम् ॥ ४३ ॥

अनुत्तमः न विद्यते उत्तमं यस्मादित्यर्थः ॥ ४४ ॥

उपकारमेवाह त्वत्कृते इति ॥ ४५ ॥

---

(१) वदन्नैव इति च पाठः ।

राज्ये प्रतिष्ठितोऽसि त्वं तारां प्राप्तोऽसि दुर्लभाम्।
स रामः पर्वतस्याग्रे भ्रात्रा सह वसन् सुधीः॥ ४६॥
त्वदागमनमेकाग्रमीक्षते कार्य्यगौरवात्।
त्वं तु वानरभावेन स्त्रीसक्तो नावबुध्यसे॥ ४७॥
करोमीति प्रतिज्ञाय सीतायाः परिमार्गणम्।
न करोषि कृतघ्नस्त्वं हन्यसे वालिवद्द्रुतम्॥ ४८॥
हनूमद्वचनं श्रुत्वा सुग्रीवो भयविह्वलः।
प्रत्युवाच हनूमन्तं सत्यमेव त्वयोदितम्॥ ४९॥
शीघ्रं कुरु मदाज्ञां त्वं वानराणां तरस्विनाम्।
सहस्राणि दशेदानीं प्रेषयाशु दिशो दश॥ ५०॥
सप्तद्वीपगतान् सर्वान् वानरानानयन्तु ते।
पक्षमध्ये समायान्तु सर्वे वानरपुङ्गवाः॥ ५१॥
ये पक्षमतिवर्त्तन्ते ते वध्या मे न संशयः।
इत्याज्ञाप्य हनूमन्तं सुग्रीवो गृहमाविशत्॥ ५२॥
सुग्रीवाज्ञां पुरस्कृत्य हनूमान्मन्त्रिसत्तमः।

दुर्लभां तारामिति वालिपरिग्रहत्वात् सर्वथा कामिभावेन दुष्-
प्राप्यामित्यर्थः॥ ४६॥

एकाग्रं तन्मात्रविषयं यथा भवति तथा ईक्षते कार्य्यस्य प्रतीक्षते
सीतान्वेषणरूपस्य गौरवात् त्वदेकसाध्यत्वादित्यर्थः॥ ४७॥

कृतघ्नस्त्वं यदि न करोषि तदा वालिवत् हन्यसे रामेणेति शेषः
अतः सर्वथान्वेषणमुचितमिति भावः॥ ४८। ४९॥

वानराणां मदाज्ञां कुरु बोधय॥ ५०॥

आज्ञामाह सप्तेति॥ ५१॥

इत्याज्ञाप्य एवं वानरेषु कर्त्तव्यामाज्ञां बोधयित्वा॥ ५२। ५३॥

तत्क्षणात् (१) प्रेषयामास हरीन् दशदिशः सुधीः॥५३॥

अगणितगुणसत्त्वान् वायुवेगप्रचारान्
वनचरगणमुख्यान् पर्वताकाररूपान्
पवनहितकुमारः प्रेषयामास दूतान्
अतिरभसतरात्मा दानमानादितृप्तान् ॥ ५४ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्ध्याकाण्डे
चतुर्थः सर्गः।

अगणिता गुणाः सत्त्वं पराक्रमश्च येषां तान् पर्वताकारसदृशं रूपमाकारो येषां तान् पवनस्य वायोर्हितोऽतिप्रियः कुमारो हनूमान्दानमानादितृप्तानित्यनेनावश्यं कार्यं सिद्धिकारित्वं दर्शितम् ॥ ५४ ॥

इति श्रीमत्सकलराजविपद्गुहरणसमर्थसाद्विवि० श्रीरामवर्मणः
कृतावध्यात्मरामायणसेतौ किष्किन्ध्याकाण्डे
चतुर्थः सर्गः।

---

(१) तत्क्षणे इति केचित् पठन्ति ।

अथ पञ्चमः सर्गः ।

रामस्तु पर्वतस्याग्रे मणिसानौ निशामुखे ।
सीता विरहजं शोकमसहन्निदमब्रवीत् ॥ १ ॥
पश्य लक्ष्मण ! मे सीता राक्षसेन हृता बलात् ।
मृतामृता वा निश्चेतुं न जानेऽद्यापि भामिनी ॥ २ ॥
जीवतीति मम ब्रूयात्कश्चिद्वा प्रियकृन्मे ।
यदि जानामि तां साध्वीं जीवन्तीं यत्र कुत्र वा ॥ ३ ॥
हठादेवाहरिष्यामि सुधामिव पयोनिधेः ।
प्रतिज्ञां शृणु मे भ्रातर्येन मे जनकात्मजा ॥ ४ ॥
नीता तं भस्मसात् कुर्यां सपुत्रबलवाहनम् ।
हा(१) सीते ! चन्द्रवदने वसन्ती राक्षसालये ॥ ५ ॥
दुःखार्त्ता मामपश्यन्ती कथं प्राणान् धरिष्यसि ? ।
चन्द्रोऽपि भानुवद्भाति मम चन्द्राननां विना ॥ ६ ॥
चन्द्र ! त्वं जानकीं स्पृष्ट्वा करैर्मां स्पृश शीतलैः ।

रामस्त्विति पर्वताग्रे स्थितो मणियुक्तसानौ शिखरे ॥ १ ॥
न जाने न शक्नोमीत्यर्थः धातूनामनेकार्थत्वात् ॥ २ ॥
यः कश्चिदपि जीवतीति ब्रूयात् स मे प्रियकृत् यत्र कुत्र वा यत्र कुत्रापीत्यर्थः ॥ ३ । ४ ॥
वसन्ती त्वं कथं प्राणान् धरिष्यसीत्यन्वयः ॥ ५ ॥
विरहदुःखमभिनयति चन्द्रोऽपीति भानुवत् दाहकत्वात् ॥ ६ ॥
चन्द्रत्वमिति कर्पूरतोऽप्यतिशीतलस्य मम कामदुःखशामकस्य चन्द्रस्य स्पर्शे तव करा अपि तथा गुणशैत्ययुक्ता भूत्वा मां सुख-

(१) हे इति वा पाठः ।

सुग्रीवोऽपि दयाहीनो दुःखितं मां न पश्यति ॥ ७ ॥
राज्यं निष्कण्टकं प्राप्य स्त्रीभिः परिवृतो रहः ।
कृतघ्नो दृश्यते व्यक्तं पानासक्तोऽतिकामुकः ॥ ८ ॥
नायाति शरदं पश्यन्नपि मार्गयितुं प्रियाम् ।
पूर्वोपकारिणं दुष्टः कृतघ्नो विस्मितो हि माम् ॥ ९ ॥
हन्मि सुग्रीवमप्येवं सपुरं सहबान्धवम् ।
वाली यथा हतो मेऽद्य सुग्रीवोऽपि तथा भवेत् ॥ १० ॥
इति रुष्टं समालोक्य राघवं लक्ष्मणोऽब्रवीत् ।
इदानीमेव गत्वाहं सुग्रीवं दुष्टमानसम् ॥ ११ ॥
मामाज्ञापय हत्वा तमायास्ये राम ! तेऽन्तिकम् ।
इत्युक्त्वा धनुरादाय खड्गं तूणीरमेव च ॥ १२ ॥
गन्तुमभ्युद्यतं वीक्ष्य रामो लक्ष्मणमब्रवीत् ।
न हन्तव्यस्त्वया वत्स ! सुग्रीवो ! मे प्रियः सखा ॥ १३ ॥
किन्तु भीषय सुग्रीवं वालिवद्वा हनिष्यसे ।

बिभ्रन्तीति भावः । चिरप्रवृत्तत्वादेव सुग्रीवं निन्दति सुग्रीवोऽपीति ॥ ७ ॥

मां न पश्यति यतः कृतघ्नः स एव दृश्यते ॥ ८ ॥

कृतघ्नत्वमुपपादयति नायातीति ॥ ९ ॥

एवं यथा सीताहर्त्तारं हन्तुमिच्छामि तथा सुग्रीवमपि कस्य यथा मे यथा वाली हतः सुग्रीवो भवेदित्यर्थः ॥ १० ॥

दुष्टं क्रोधवन्तम् ॥ ११ ॥

इदानीमेवेत्याद्युक्त्वा राजाज्ञां विनेदृशकार्यकरणमनुचितमिति प्रतिषेधयाह मामाज्ञापयेति [illegible] अप्रतिषेधं तु राम-क्रोधेन [illegible] रोषाविष्टत्वात् अतो गर्भितं न दोषः ॥ १२।१३ ॥

हत्वा श्रीघ्रमाहाय सुग्रीवप्रतिभाषितम् ॥ १४ ॥
आनयस्व यथा कार्यं तत्करिष्याम्यहं प्रभो ।
तथेति लक्ष्मणोऽगच्छत्त्वरितो भीमविक्रमः ॥१५॥
किष्किन्धां प्रति कोपेन निर्दहन्निव वानरान् ।
सर्वज्ञो नित्यलक्ष्मीको विज्ञानात्मापि राघवः ॥ १६ ॥
सीतामनुशुशोचार्त्तः प्राकृतः प्राकृतामिव ।
बुद्ध्यादिसाक्षिणस्तस्य मायाकार्यातिवर्त्तिनः ॥ १७ ॥
रागादिरहितस्यास्य तत्कार्यं कथमुद्भवेत् ।
ब्रह्मणोक्तमृतं कर्त्तुं राज्ञो दशरथस्य हि ॥ १८ ॥
तपसः फलदानाय(१) जातो मानुषवेषधृक् ।

वालिवत् हनिष्यसि हत्वा श्रीघ्रमेत्यन्वयः नञि काकुः ततः सुग्रीवप्रतिभाषितं तदुत्तरम् आहाय (आत्मनेपदमार्षं) ॥ १४ ॥

अत्रागत्य मां प्रापयेति शेषः तच्छ्रुत्वा यथायत्कार्यं कर्त्तुं योग्यं तत्करिष्यामि अगच्छदिति च्छेदः ॥ १५ ॥

किष्किन्धां प्रत्यगच्छदिति पूर्वेणान्वयः नित्यलक्ष्मीकः अविभक्तस्वाभिन्नमायाशक्तिः तत्सम्बन्धादेव सर्वज्ञः स्वतस्तु विज्ञानात्मा निर्विशेषज्ञानस्वरूपोऽपि ॥ १६ ॥

सीतामनुशुशोचेति विशेष्यः प्राकृतो यो जनः प्राकृतां संयोगवियोगशालिनीम् तत्र अद्भुते बुद्ध्यादिसाक्षित्व कर्त्तृत्वादिरहितेन मायाकार्यातिवर्त्तिनः तस्य एव ॥ १७ ॥

अतएव रागादिरहितस्य तत्कार्यं कथमुद्भवेदित्युपपादितं रावणवधफलकावतरणम् ऋतः सत्यं कर्त्तुं जातः फलान्तरमप्याह राज्ञस्तपः फलदानाय च ॥ १८ ॥

मानुषवेषधृक् जातः एवं च तद्दर्शितशोकादिकं वेषानुकरणमिति॰

---

(१) फलमादातुमिति क्वचित् पाठः ।

मायया मोहिताः सर्वे जना अज्ञानसंयुताः ॥ १९ ॥
कथमेषां भवेन्मोक्ष ? इति विष्णुर्विचिन्तयन् ।
कथां प्रथयितुं लोके सर्वलोकमलापहाम् ॥ २० ॥
रामायणाभिधां रामो भूत्वा मानुषचेष्टकः ।
क्रोधं मोहं च कामं च व्यवहारार्थसिद्धये ॥२१ ॥
तत्तत्कालोचितं गृह्णन् मोहयत्यवशाः प्रजाः ।
अनुरक्त इवाशेषगुणेषु गुणवर्जितः ॥ २२ ॥
विज्ञानमूर्त्तिर्विज्ञानशक्तिः साक्षिगुणान्वितः ।
अतः कामादिभिर्नित्यमविलिप्तो यथा नभः ॥ २३ ॥
विन्दन्ति मुनयः केचिज्जानन्ति सनकादयः ।

भावः फलान्तरमपि तथाव्यवहरणस्याह माययेति मायामोहितत्वा-देवाज्ञानसंयुताः ॥ १९ ॥

प्रथयितुं विस्तारयितुम् ॥ २० ॥

मानुषचेष्टकः मनुष्यसदृशचेष्टा कर्ता लोकानां क्रोधादिकालिकस्य व्यवहारस्य सिद्धये ज्ञानार्थस्य तत्फलस्य च सिद्धये ॥ २१ ॥

तत्तत्कालोचितं व्यवहारं गृह्णन् व्यवहरन् प्रजाः मोहयति रामो-ऽप्येवं व्यवहृतवान् तस्मादेवं व्यवहारो युक्त इति बोधयति मोहकत्वं चास्य निर्वृत्तिमार्गविपरीतत्वेन गुणवर्जितोऽपि अशेषगुणेषु पुत्रवध-कान्तानुरागादिषु अनुरक्त इव तत्तद्व्यवहरन् अतएव मोहयति ॥२२॥

कामाद्यलिप्तत्वमेव हेतुपूर्वं निरूपयति विज्ञानेति अयं विज्ञान-मूर्तिस्तत्त्वतः तथा विज्ञानरूपैव शक्तिर्यस्य तेन शक्तिसंसर्गकृतोऽप्यन्यथा-भावो वारितः अतएव सर्वप्राणिनां सुखदुःखसाक्षी विशिष्टज्ञानशक्ति-मात् सगुणान्वितः गुणान्वितसदृशः निर्गुण इति यावत् अत इति हेतौ यथा नभः आकाशः घटनीलत्वेनालिप्तः तद्वत् ॥ २३ ॥ —

नन्वेवं भूतोऽस्याभिज्ञं ज्ञायते किं तत्राह विन्दन्तीति केचिदेव

तद्भावं विमलात्मानः(१) सम्यक् जानन्ति नित्यदा ॥२४॥
भक्तचित्तानुसारेण जायते भगवानजः ।
लक्ष्मणोऽपि तदा गत्वा किष्किन्धानगरान्तिकम् ॥२५॥
ज्याघोषमकरोत्तीव्रं भीषयन् सर्ववानरान् ।
तं दृष्ट्वा प्राकृतास्तत्र वानरा वप्रमूर्धनि ॥ २६ ॥
चक्रुः किलकिलाशब्दं धृतपाषाणपादपाः ।
तान् दृष्ट्वा क्रोधताम्राक्षो वानरान् लक्ष्मणस्तदा ॥२७॥
निर्मूलान् कर्तुमुद्युक्तो धनुरानम्य वीर्यवान् ।
ततः शीघ्रं समापत्य ज्ञात्वा लक्ष्मणमागतम् ॥ २८ ॥
निवार्य वानरान् सर्वानङ्गदो मन्त्रिसत्तमः ।
गत्वा लक्ष्मणसामीप्यं प्रणनाम स दण्डवत् ॥ २९ ॥
ततोऽङ्गदं परिष्वज्य लक्ष्मणः प्रियवर्धनः ।
उवाच वत्स ! गच्छ त्वं पितृव्याय निवेदय ॥ ३० ॥
मामागतं राघवेण चोदितं रौद्रमूर्तिना ।

सनकादयो मुनयो जानन्ति श्रुतिवाक्यैर्विन्दन्ति लभन्ते अपरोक्षतयापि साक्षात् कुर्वन्ति इति यावत् तद्भिन्नमन्येन ज्ञानत्येव सर्वथा नेत्याह तद्भक्ता इति ईदृशाः सम्यक् जानन्त्येवेति भावः ॥ २४ ॥

तत्र हेतुमाह भक्तेति जायते ज्ञानविषयो जायत इत्यर्थः ॥ २५ ॥

वप्रं प्राकारः ॥ २६ ॥

किलकिलाशब्दो वानराणां क्रोधभयादिप्रकाशकः शब्दः ॥ २७ ॥

समापत्य त्वरयागत्वा ॥ २८ ॥

लक्ष्मणसामीप्यं गत्वा प्राप्य ॥ २९ ॥

प्रियवर्धनः प्रियाणां हर्षवर्धनशीलः ॥ ३० ॥

---

(१) तद्भक्ता निर्मलात्मानः इति वा पाठः ।

तथेति त्वरितं गत्वा सुग्रीवाय न्यवेदयत् ॥ २१ ॥
लक्ष्मणः क्रोधताम्राक्षः पुरद्वारि बहिः स्थितः।
तच्छ्रुत्वातीव सन्त्रस्तः सुग्रीवो वानरेश्वरः ॥ २२ ॥
आहूय मन्त्रिणां श्रेष्ठं हनूमन्तमथाऽब्रवीत्।
गच्छ त्वमङ्गदेनाशु लक्ष्मणं विनयान्वितः ॥ २३ ॥
सान्त्वयन् कोपितं वीरं शनैरानय मन्दिरम्।
प्रेषयित्वा हनूमन्तं तारामाह कपीश्वरः ॥ २४ ॥
त्वं गच्छ सान्त्वयन्ती तं लक्ष्मणं मृदुभाषितैः।
शान्तमन्तःपुरं नीत्वा पश्चाद्दर्शय मेऽनघे ! ॥ २५ ॥
भवत्विति ततस्तारा मध्यकक्षं समाविशत्।
हनूमानङ्गदेनैव सहितो लक्ष्मणान्तिकम् ॥ २६ ॥
गत्वा ननाम शिरसा भक्त्या स्वागतमब्रवीत्।
एहि वीर ! महाभाग भवद्गृहमशङ्कितम् ॥ २७ ॥
प्रविश्य राजदारादीन् दृष्ट्वा सुग्रीवमेव च।
यदाज्ञापयसे पश्चात्तत्सर्वं करवाणि भो ! ॥ २८ ॥

रौद्रमूर्त्तिना वालिवधकालिकमूर्त्तिना ॥ २१ ॥

लक्ष्मणो बहिः स्थित इति न्यवेदयदित्यन्वयः ॥ २२ ॥

लक्ष्मणं तन्निकटम् ॥ २३ ॥

कोपितं सञ्जातकोपं सान्त्वयन् समाश्वस्तं कुर्वन् मन्दिरमानय प्रापय ॥ २४ ॥

मृदुभाषितैः सान्त्वयन्ती लक्ष्मणं प्रति गच्छ ततः शान्तं शान्तकोपं कृत्वा ततोऽन्तःपुरं नीत्वा अनेनात्यन्तमित्त्रताप्रदर्शनं मे मां दर्शय॥२५॥

मध्यकक्षं स्त्रीणां सञ्चारमर्यादास्थलम् ॥ २६ ॥

अशङ्कित मेहि यत इदं भवद्गृहम् ॥ २७ ॥

राजदारादीन् दृष्ट्वानेन सेवकदारदर्शने यथा राज्ञो न सङ्कोचः

इत्युक्त्वा लक्ष्मणं भक्त्या करे धृत्वा स मारुतिः।
आनयामास नगरमध्याद्राजगृहं प्रति ॥ ३९ ॥
पश्यंस्तत्र महासौधान् यूथपानां समन्ततः।
जगाम भवनं राज्ञः सुरेन्द्रभवनोपमम् ॥ ४० ॥
मध्यकक्षे गता तत्र तारा ताराधिपानना।
सर्वाभरणसम्पन्ना मदरक्तान्तलोचना ॥ ४१
उवाच लक्ष्मणं नत्वा स्मितपूर्वाभिभाषिणी।
याहि(१) देवर! भद्रं ते साधुस्त्वं भक्तवत्सलः ॥ ४२ ॥
किमर्थं कोपमाकार्षीर्भक्ते भृत्ये कपीश्वरे।
बहुकालमनाश्वासं दुःखमेवानुभूतवान् ॥ ४३ ॥
इदानीं बहुदुःखौघाद्वह्निरभिरक्षितः।
भवत्प्रसादात् सुग्रीवः प्राप्तसौख्यो महामतिः ॥ ४४ ॥
कामासक्तो रघुपतेः सेवार्थं नागतो हरिः ।

तथाऽन्तःपुरराजदारदर्शने तव सङ्कोचो मोचित इति भावः ॥ ३८ ॥

धृत्वोत्थाप्य ॥ ३९ ॥

यूथपानां महासौधान् महानिलयान् ॥ ४० ॥

ताराधिपानना चन्द्रमुखी ॥ ४१ ॥

आदौ स्वस्य सेवकत्वाल्लक्ष्मणस्य भगवदवतारत्वाच्च नत्वा पश्चान्नि-जभावेन देवरेत्युक्तिः त्वं साधुर्भक्तवत्सलोऽतो भक्ते स्नेहयः कोपोऽनुचितः इति भावः ॥ ४२ ॥

आकार्षीः अतिशयेन कृतवान् अनाश्वासं निरन्तरमित्यर्थः ॥४३॥

बहुदुःखौघात् बाधितः प्राप्तमात्रात् ॥ ४४ ॥

---

(१) एहि इत्यपि पाठः।

आगमिष्यन्ति हरयो नानादेशगताः प्रभो ! ॥ ४५ ॥
प्रेषिता दशसाहस्रा हरयो रघुसत्तम ! ।
आनेतुं वानरान् दिग्भ्यो महापर्वतसन्निभान् ॥ ४६ ॥
सुग्रीवः स्वयमागत्य सर्ववानरयूथपैः ।
वधयिष्यति दैत्यौघान् रावणञ्च हनिष्यति(१) ॥ ४७ ॥
त्वयैव सहितोऽद्यैव गत्वा वानरपुङ्गवः ।
पश्यान्तर्भवनं तत्र पुत्रदारसुहृद्वृतम् ॥ ४८ ॥
दृष्ट्वा सुग्रीवमभयं दत्त्वा नय सहैव ते ।
ताराया वचनं श्रुत्वा शमक्रोधोऽथ लक्ष्मणः ॥ ४९ ॥
जगामान्तःपुरं यत्र सुग्रीवो वानरेश्वरः ।
रुमामालिङ्ग्य सुग्रीवः पर्यङ्के पर्यवस्थितः ॥ ५० ॥
दृष्ट्वा लक्ष्मणमत्यर्थमुत्पपातातिभीतवत् ।
तं दृष्ट्वा लक्ष्मणः क्रुद्धो मदविह्वलितेक्षणम् ॥ ५१ ॥

यतः प्राप्तशीतर्तोऽतः कालावक्तोऽपि सेवार्थं नागत इति न अपि त्वागत एव कालान्तरे वानरानानयनार्थमागमिष्यतीति ॥ ४५ ॥

एवं चैवमुद्यमकरणात् सेवां कृतवानेवेति भावः ॥ ४६ । ४७ ॥

रामस्याह्वानात्त्वयैव सहितो वानरपुङ्गवोऽद्यैव गत्वा रामसमीपमिति शेषः अन्तर्भवनस्य मध्ये ॥ ४८ ॥

ते सहैव नय यथैव तत्र गच्छेः तारायास्तेनातिमधुरेण कथितेन शमक्रोधः ॥ ४९ ॥

तत्र सुग्रीवः स्थितस्तदन्तःपुरं जगाम ॥ ५० ॥

अत्यर्थं अतिशयेनातिभीतवदुत्पपात पर्यङ्कादिति शेषः मदविह्वलितेक्षणं मदविकलनेत्रम् ॥ ५१ ॥

---

(१) महामते ! इति वा पाठः ।

सुग्रीवं प्राह दुर्वृत्त ! विस्मृतोऽसि रघूत्तमम् ।
वाली येन हतो वीरः स बाणोऽद्य प्रतीक्षते ॥ ५२ ॥
त्वमेव वालिनो मार्गं गमिष्यसि मया हतः ।
एवमत्यन्तपरुषं वदन्तं लक्ष्मणं तदा ॥ ५३ ॥
उवाच हनुमान् वीरः कथमेवं प्रभाषसे ? ।
त्वत्तोऽधिकतरो रामे भक्तोऽयं वानराधिपः ॥ ५४ ॥
रामकार्य्यार्थमनिशं जागर्त्ति न तु विस्मृतः ।
आगताः परितः पश्य वानराः कोटिशः प्रभो ! ॥ ५५ ॥
गमिष्यन्त्यचिरेणैव सीतायाः परिमार्गणम् ।
साधयिष्यति सुग्रीवो रामकार्य्यमशेषतः ॥ ५६ ॥
श्रुत्वा हनुमतो वाक्यं सौमित्रिर्लज्जितोऽभवत् ।
सुग्रीवोऽप्यर्घ्यपाद्याद्यैर्लक्ष्मणं समपूजयत् ॥ ५७ ॥
आलिङ्ग्य प्राह रामस्य दासोऽहं तेन रक्षितः ।
रामस्य तेजसा लोकान् क्षणार्द्धेनैव जेष्यति ॥ ५८ ॥
सहायमात्रमेवाहं वानरैः सहितः प्रभो ! ।
सौमित्रिरपि सुग्रीवं प्राह किञ्चिन्मयोदितम् ॥ ५९ ॥
तत् क्षमस्व महाभाग ! प्रणयाद्भाषितं मया ।

प्रतीक्षते त्वां हन्तुमिति शेषः ॥ ५२ । ५३ । ५४ ॥
जागर्त्ति उद्यमवान् भवति अचिरेणैव समये आकर्षणार्थं गताः
वानराः केचित् कर्षन्त आगता इत्याह आगता इति ॥ ५५ ॥
परिमार्गणं कर्त्तुमिति शेषः ॥ ५६ । ५७ । ५८ ॥
यत्किञ्चिन्मयोदितं तत् क्षमस्वेत्यन्वयः ॥ ५९ ॥

(१) संप्रपूजयदिति पाठे अडभावः आर्षः ।

गच्छामोऽद्यैव सुग्रीव ! रामस्तिष्ठति कानने ॥ ६०॥
एक एवातिदुःखार्त्तो जानकीविरहात् प्रभुः ।
तथेति रथमारुह्य लक्ष्मणेन समन्वितः ॥ ६१ ॥
वानरैः सहितो राजा राममेवान्वपद्यत ॥ ६२ ॥

भेरीमृदङ्गैर्बहुऋक्षवानरैः
श्वेतातपत्रैर्व्यजनैश्च शोभितः ।
नीलाङ्गदाद्यैर्हनुमत्प्रधानैः
समावृतो राघवमभ्यगाद्धरिः ॥ ६३ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्धाकाण्डे
पञ्चमः सर्गः ।

प्रणयात् प्रणयकोपात् ॥ ६०—६१ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामवर्मकृत-
अध्यात्मरामायणटीकायां किष्किन्धाकाण्डे
पञ्चमः सर्गः ।

अथ षष्ठः सर्गः ।

दृष्ट्वा रामं समासीनं गुहाद्वारि शिलातले ।
चैलाजिनधरं श्यामं जटामौलिविराजितम् ॥ १ ॥
विशालनयनं शान्तं स्मितचारुमुखाम्बुजम् ।
सीताविरहसन्तप्तं पश्यन्तं मृगपक्षिणः ॥ २ ॥
रथात् दूरात्समुत्पत्य (१) वेगात् सुग्रीवलक्ष्मणौ ।
रामस्य पादयोरग्रे पेततुर्भक्तिसंयुतौ ॥ ३ ॥
रामः सुग्रीवमालिङ्ग्य पृष्ट्वानामयमन्तिके ।
स्थापयित्वा यथान्यायं पूजयामास धर्मवित् ॥ ४ ॥
ततोऽब्रवीद्रघुश्रेष्ठं सुग्रीवो भक्तिनम्रधीः ।
देव ! पश्य समायान्तीं वानराणां महाचमूम् ॥ ५ ॥
कुलाचलाद्रिसम्भूता मेरुमन्दरसन्निभाः ।
नानाद्वीपसरिच्छैलवासिनः पर्वतोपमाः ॥ ६ ॥
असङ्ख्याताः समायान्ति हरयः कामरूपिणः ।
(२) सर्वदेवांशसम्भूताः सर्वे युद्धविशारदाः ॥ ७ ॥
अत्र केचिद्गजबलाः केचिद्दशगजोपमाः ।

दृष्ट्वेति चैलं च जीर्णं वासोऽजिनं च ॥ १ ॥
स्मितेन चारुसुन्दरं मुखाम्बुजं यस्य तम् ॥ २ । ३ ॥
अनामयमारोग्यम् अन्तिके समीपे ॥ ४ । ५ ॥
कुलाचला हिमाचलादयः सप्तपर्वताः ॥ ६ । ७ ॥

(१) उत्प्लुत्य इति वा पाठः ।
(२) सर्वे इति पाठान्तरम् ।

गजायुतबलाः केचित्केऽप्यमितबलाः प्रभो ! ॥ ८ ॥
केचिदञ्जनकूटाभाः केचित्कनकसन्निभाः ।
केचिद्रक्तान्तवदना दीर्घवालास्तथा परे ॥ ९ ॥
शुद्धस्फटिकसङ्काशाः केचिद्राक्षससन्निभाः ।
गर्जन्तः परितो यान्ति वानरा युद्धकाङ्क्षिणः ॥ १० ॥
त्वदाज्ञाकारिणः सर्वे फलमूलाशनाः प्रभो ! ।
ऋक्षाणामधिपो वीरो जाम्बवान्नाम बुद्धिमान् ॥ ११ ॥
एष मे सचिवः श्रेष्ठः कोटिभल्लूकसम्वृतः ।
हनूमानेष विख्यातो महासत्त्वपराक्रमः ॥ १२ ॥
वायुपुत्रोऽतितेजस्वी मन्त्री बुद्धिमतां वरः ।
नलो नीलश्च गवयो गवाक्षो गन्धमादनः ॥ १३ ॥
शरभो मैन्दवश्चैव गजः पनस एव च ।
बलीमुखो दधिमुखः सुषेणस्तार एव च ॥ १४ ॥
केसरी च महासत्त्वः पिता हनुमतो बली ।
एते मे यूथपा राम ! प्राधान्येन मयेरिताः ॥ १५ ॥
महात्मानो महावीर्याः शक्रतुल्यपराक्रमाः ।
एते प्रत्येकशः कोटिकोटिवानरयूथपाः ॥ १६ ॥
तवाज्ञाकारिणः सर्वे सर्वे देवांशसम्भवाः ।
एष वालिसुतः श्रीमानङ्गदो नामविश्रुतः ॥ १७ ॥
वालितुल्यबलो वीरो राक्षसानां कुलान्तकः

अमितबला इति च्छेदः ॥ ८–११ ॥
कोटिभल्लूकसम्वृतः कोटीति लुप्तविभक्तिकम् ॥ १२–१५ ॥
प्रत्येकशः सार्वविभक्तिकस्तसिः एकैक इत्यर्थः ॥ १६–१७ ॥

एते चान्ये च बहवस्त्वदर्थे त्यक्तजीविताः ॥ १८ ॥
योद्धारः पर्वताग्रैश्च निपुणाः शत्रुघातने ।
आज्ञापय रघुश्रेष्ठ ! सर्वे ते वशवर्त्तिनः ॥ १९ ॥
रामः सुग्रीवमालिङ्ग्य हर्षपूर्णाश्रुलोचनः ।
प्राह सुग्रीव ! जानासि सर्वं त्वं कार्यगौरवम् ॥ २० ॥
मार्गणार्थं हि जानक्या नियुङ्क्ष्व यदि रोचते ।
श्रुत्वा रामस्य वचनं सुग्रीवः प्रीतमानसः ॥ २१ ॥
प्रेषयामास बलिनो वानरान् वानरर्षभः ।
दिक्षु सर्वासु विविधान् वानरान् प्रेष्य सत्वरम् ॥ २२ ॥
दक्षिणां दिशमत्यर्थं प्रयत्नेन महाबलान् ।
युवराजं जाम्बवन्तं हनूमन्तं महाबलम् ॥ २३ ॥
नलं सुषेणं शरभं मैन्दं द्विविदमेव च ।
प्रेषयामास सुग्रीवो वचनं चेदमब्रवीत् ॥ २४ ॥
विचिन्वन्तु प्रयत्नेन भवन्तो जानकीं शुभाम् ।
मासादर्वाक् निवर्त्तध्वं मच्छासनपुरःसराः ॥ २५ ॥
सीतामदृष्ट्वा यदि वो मासादूर्ध्वं दिनं भवेत् ।
तदा प्राणान्तिकं दण्डं मत्तः प्राप्स्यथ वानराः ॥ २६ ॥

कार्यगौरवं जानासि अतो यस्यां दिशि ये योग्यास्तांस्तत्र नियुङ्क्ष्वेत्यर्थः ॥ २०—२२ ॥

अत्यर्थमतिप्रयत्नेन महाबलान् वानरान् प्रयत्नेन तानेव प्रेषयामासेत्यन्वयः तानेवाह युवराजमिति ॥ २३ । २४ ॥

मच्छासनपुरःसराः मच्छासनं पुरःसरमग्रे येषां तादृशाः अनेन मच्छासनं न विस्मर्त्तव्यमिति सूचितम् ॥ २५ ॥

प्राणान्तिकं प्राणान्तसम्बन्धिनं तत्समाप्तकमिति यावत् अध्याहारादि-दण्डम् ॥ २६ ॥

इति प्रस्थाप्य सुग्रीवो वानरान् भीमविक्रमान्।
रामस्य पार्श्वे श्रीरामं नत्वा चोपविवेश सः॥ २७॥
गच्छन्तं मारुतिं दृष्ट्वा रामो वचनमब्रवीत्।
अभिज्ञानार्थमेतन्मे ह्यङ्गुलीयकमुत्तमम्॥ २८॥
मन्नामाक्षरसंयुक्तं सीतायै दीयतां रहः।
अस्मिन् कार्ये प्रमाणं हि त्वमेव कपिसत्तम॥
जानामि सत्त्वं ते सर्वं गच्छ पन्थाः शुभस्तव॥ २९॥
एवं कपीनां राज्ञा ते निर्दिष्टाः परिमार्गणे।
सीताया अदृष्टमुखा बभ्रमुस्तत्र तत्र ह॥ ३०॥
भ्रमन्तो विन्ध्यगहने ददृशुः पर्वतोपमम्
राक्षसं भीमवपुषं भक्षयन्तं वृषान् गजान्॥ ३१॥
रावणोऽयमिति ज्ञात्वा केचिद्वानरपुङ्गवाः।
अघ्नुः किलकिलाशब्दं मुञ्चन्तो मुष्टिभिः क्षणात्॥३२॥
नायं रावण इत्युक्त्वा ययुरन्यन्महद्वनम्।
तृषार्ताः सलिलं तत्र नाविन्दन् हरिपुङ्गवाः॥ ३३॥
विभ्रमन्तो महारण्ये शुष्ककण्ठोष्ठतालुकाः।

श्रीरामं नत्वा तत्पार्श्वे उपविवेशेत्यन्वयः॥ २७॥
मे मन्नामाङ्कमीयकं गृहाणेति शेषः हि पादपूरणे॥ २८॥
तत्र अङ्गुलीयकदानेऽभिज्ञाय मद्दूतैर् निर्दिष्टं दीयते तस्मात् कपिरिति
सत्त्वं बलं बुद्धिं च॥ २९॥
परिमार्गणे अन्वेषणनिमित्तमित्यर्थः॥ ३०। ३१॥
किलकिलाशब्दं मुञ्चन्तो मुष्टिभिः क्षणादघ्नुः रावणमिति
शेषः॥ ३२॥
नायमिति तदुक्तवचनादिति भावः॥ ३३॥

हेमा नाम पुरा दिव्यरूपिणी विश्वकर्मणः ।
पुत्री महेशं नृत्येन तोषयामास भामिनी ॥ ५१ ॥
तुष्टो महेशः प्रददाविदं दिव्यपुरं महत् ।
अत्र स्थिता सा सुदती वर्षाणामयुतायुतम् ॥ ५२ ॥
तस्या अहं सखी विष्णुतत्परा मोक्षकाङ्क्षिणी ।
नाम्ना स्वयम्प्रभा दिव्यगन्धर्वतनया पुरा ॥ ५३ ॥
गच्छन्ती ब्रह्मलोकं सा मामाहेदं तपश्चर ।
अत्रैव निवसन्ती त्वं सर्वप्राणिविवर्जिते ॥ ५४ ॥
त्रेतायुगे दाशरथिर्भूत्वा नारायणोऽव्ययः ।
भूभारहरणार्थाय विचरिष्यति कानने ॥ ५५ ॥
मार्गन्तो वानरास्तस्य भार्यामायान्ति ते गुहाम् ।
पूजयित्वाथ तान् गत्वा रामं स्तुत्वा प्रयत्नतः ॥५६ ॥
यातासि भवनं विष्णोर्योगिगम्यं सनातनम् ।
इतोऽहं गन्तुमिच्छामि रामं द्रष्टुं त्वरान्विता ॥५७ ॥
यूयं पिदध्वमक्षीणि गमिष्यथ बहिर्गुहाम् ।
तथैव चक्रुस्ते वेगाद्गताः पूर्वस्थितं वनम् ॥ ५८ ॥
सापि त्यक्त्वा गुहां शीघ्रं ययौ राघवसन्निधिम् ।
तत्र रामं ससुग्रीवं लक्ष्मणञ्च ददर्श ह ॥ ५९ ॥

प्रददौ हेमाया इति शेषः ॥ ५२ ॥
दिव्यगन्धर्वो दिव्याख्यो गन्धर्वस्तस्य कन्या ॥ ५३ ॥
सा हेमा ॥ ५४ । ५५ ॥
तान्वानरान् रामं गत्वा तत्समीपं गत्वा स्तुत्वाथो रामेव ॥५६॥
यातासि लटिदं इतः पूर्वोक्तहेमानियोगात् अत्राहं गोत्र ॥५७॥
वेगात् वेगादिव चक्षुर्मेलनार्थः पूर्वस्थितं वनं गताः ॥ ५८।५९ ॥

कृत्वा प्रदक्षिणं रामं प्रणम्य बहुशः सुधीः ।
आह गद्गदया वाचा रोमाञ्चिततनूरुहा ॥ ६० ॥
दासी तवाहं राजेन्द्र ! दर्शनार्थमिहागता ।
बहुवर्षसहस्राणि तप्तं मे दुश्चरं तपः ॥ ६१ ॥
गुहायां दर्शनार्थं ते फलितं मेऽद्य तत्तपः ।
अद्य हि त्वां नमस्यामि मायायाः परतः स्थितम् ॥ ६२ ॥
सर्वभूतेषु चालक्ष्यं बहिरन्तरवस्थितम् ।
योगमायाजवनिकाच्छन्नो मानुषविग्रहः ॥ ६३ ॥
न लक्ष्यसेऽज्ञानदृशां शैलूष इव रूपधृक् ।
महाभागवतानां त्वं भक्तियोगविधित्सया ॥ ६४ ॥
अवतीर्णोऽसि भगवन् ! कथं जानामि ? तामसी ।
लोके जानातु यः कश्चित्तव तत्त्वं रघूत्तम ! ॥ ६५ ॥

रोमाञ्चिततनूरुहा जातरोमाञ्चतनूरुहा ॥ ६० । ६१ ॥
मायायाः परतः स्थितं तदनधीनम् ॥ ६२ ॥

विकर्तोपादानतयान्तर्यामितया च सर्वभूतानां बहिरन्तरवस्थितमपि तैरलक्ष्यम् जवनिका नटानां वेशपरिग्रहस्थानावरणं पटनिर्मितं नटाश्च तत्र प्रविष्टास्तया छन्ना भवन्ति तद्वद्योगमायया त्वं छन्नो गुप्तः इतः सन् अज्ञानदृशामलक्ष्य इत्यर्थः ॥ ६२ ॥

न लक्ष्यसे रूपधृक् तत्तद्रामादिरूपधृक् शैलूषो नट इव स यदा रामादिवेषं कृत्वा रामाद्यनुकरणं करोति तदा राम इत्येव ज्ञायते न तु पूर्वदृष्टोऽपि तद्रूपेण तद्वत् ॥ ६४ ॥

भागवतानां भगवद्भक्तिमतां एवं भूते रूपे भक्तिरूपो योगस्तद्विधित्सया अवतीर्णोऽसि तादृशं त्वां स्त्रीशरीरत्वात् तामसी अहं कथं जानामि अथ योग्यताभावेऽपि तज्ज्ञानापेक्षा मे नास्तीत्याह लोके इति तव तत्त्वं चिदानन्दादिरूपम् ॥ ६५ ॥

ममैतदेव रूपं ते सदा भातु हृदालये ।
राम ! ते पादयुगलं दर्शितं मोक्षदर्शनम् ॥ ६६ ॥
अदर्शनं भवार्णानां सन्मार्गपरिदर्शनम् ।
धनपुत्रकलत्रादिविभूतिपरिदर्पितः ।
अकिञ्चनधनं त्वाद्य नाभिधातुं जनोऽर्हति ॥ ६७ ॥
निवृत्तगुणमार्गाय निष्किञ्चनधनाय ते ॥ ६८ ॥
नमः स्वात्माभिरामाय निर्गुणाय गुणात्मने ।
कालरूपिणमीशानमादिमध्यान्तवर्जितम् ॥ ६९ ॥
समं चरन्तं सर्वत्र मन्ये त्वां पुरुषं परम् ।
देव ! ते चेष्टितं कश्चिन्न वेद नृविडम्बनम् ॥ ७० ॥
न तेऽस्ति कश्चिद्दयितो द्वेष्यो वा पर एव च ।

स्वापेक्षितमर्थमाह ममैतदिति मोक्षदर्शनं मोक्षोपायदर्शकं पादयुगलं ते त्वया दर्शितम् अतोऽन्याकाङ्क्षा मे नास्तीत्यर्थः ॥ ६६ ॥

तदेव विशिनष्टि अदर्शनमिति भक्तानां भवार्णवानामित्यर्थः वर्णलोप आर्षः सन्मार्गस्तत्प्राप्त्युपायः धनादिगर्वितो जनः अकिञ्चनानां त्यक्तसर्वविषयाणां धनभूतं दरिद्रस्य धनमिवेच्छाविषयं त्वां अभिधातुं वार्तालापं कर्तुं च नार्हति तथापि स्तौमीति शेषः ॥ ६७ ॥

निवृत्तो गुणमार्गः प्रवृत्तिमार्गरूपः संसारः स्ततएव यस्मात्तस्मै ॥ ६८ ॥

स्वात्मन्येव चिदानन्दरूपेऽभिरमते तस्मै अतएव निर्गुणाय गुणानां विषयाणामपि विवर्तोपादानत्वात्सदात्मने कालरूपिणं तेन सर्वसंहर्तृत्वं ईशानत्वेन जगत्स्रष्टृत्वतत्पालकत्वे उक्ते सर्वस्रष्टृत्वादेव तस्यादिमध्यान्तवर्जितत्वं मध्यस्याद्यन्तसापेक्षत्वात्तस्याप्यभावः ॥ ६९ ॥

समं चरन्तं अन्तर्यामितयेत्यर्थः नृविडम्बनं मनुष्यव्यवहारानुकरणरूपं अनुकरणमेतदिति कश्चिन्न वेद ॥ ७० ॥

समत्वादेवाह न त इत्यादि परो भिन्नः सर्वरूपत्वात्तवेति भावः

त्वन्मायापिहितात्मानस्त्वां पश्यन्ति तथाविधम् ॥ ७१ ॥
अजस्याकर्त्तुरीशस्य देव ! तिर्य्यङ्नरादिषु ।
जन्मकर्मादिकं यद्यत्तदत्यन्तविडम्बनम् ॥ ७२ ॥
त्वामाहुरमरं जातं कथाश्रवणसिद्धये ।
केचित् कोशलराजस्य तपसः फलसिद्धये ॥ ७३ ॥
कौशल्यया प्रार्थ्यमानं जातमाहुः परे जनाः ।
दुष्टराक्षसभूभारहरणायार्थितो विभुः ॥ ७४ ॥
ब्रह्मणा नररूपेण जातोऽयमिति केचन ।
शृण्वन्ति गायन्ति च ये कथास्ते रघुनन्दन ! ॥ ७५ ॥
पश्यन्ति तव पादाब्जं भवार्णवसुतारणम् ।
त्वन्मायागुणवर्गाद्यं व्यतिरिक्तं गुणाश्रयम् ॥ ७६ ॥

...द्वा इयितहेष्याभ्यां पर उदासीनः तथाविधं शत्रुमित्रोदासीनवन्तं यथा रावणः शत्रुर्विभीषणो मित्रं अन्ये उदासीना इति ॥ ७१ ॥

अजस्य सर्वकारणत्वात्स्वकारणहीनस्य अकर्तुः कर्तृत्वादिधर्महीनस्य अपरिणामित्वादिति भावः ईशस्य सन्निधानमात्रेण सर्वनियन्तुः तिर्य्यङ्नरादिषु तिर्य्यञ्चो मत्स्यादयः तेषु मनुष्येषु च यज्जन्मकर्मादि तदत्यन्तविडम्बनं अनुकरणं तत्तज्जातेरिति शेषः न तु वास्तवमिति भावः ॥ ७२ ॥

तत्र प्रकृतावतारप्रयोजनमाह त्वामिति अमरमपि लोकानां कथाश्रवणजसिद्धिप्राप्तये जातमाहुः केचित् कोशलराजस्य ॥ ७३ ॥

ब्रह्मणा प्रार्थितो नररूपेण जात इत्यन्वयः ॥ ७४ ॥

साध्यप्रयोजनस्यैव मुख्यत्वं प्रतिपादयितुं तच्छ्रवणादिजां सिद्धिमाह शृण्वन्तीत्यादिना ॥ ७५ ॥

पश्यन्तीति ते त्वत्पादाब्जं पश्यन्तीत्यन्वयः त्वत्पादाब्जदर्शनमेव तच्छ्रवणजा मुख्या सिद्धिरित्यर्थः त्वत्पादाब्जपदेन मुख्यं चिदानन्दात्मकम् त्वत्स्वरूपमेव विवक्षितमित्याह त्वन्मायेति त्वन्मायागुणैः सत्त्वरजस्तमो-

कथं त्वां देव ! जानीयां स्तोतुं वाऽविषयं विभुम् ।
नमस्यामि रघुश्रेष्ठं बाणासनशरान्वितम् ।
लक्ष्मणेन सह भ्रात्रा सुग्रीवादिभिरन्वितम् ॥ ७७ ॥
एवं स्तुतो रघुश्रेष्ठः प्रसन्नः प्रणताघहृत् ।
उवाच योगिनीं भक्तां किन्ते मनसि काङ्क्षितम् ॥ ७८ ॥
सा प्राह राघवं भक्त्या भक्तिं ते भक्तवत्सल ! ।
यत्र क्वापि जाताया निश्चलां देहि मे प्रभो ! ॥ ७९ ॥
त्वद्भक्तेषु सदा सङ्गो भूयान्मे प्राकृतेषु न ।
जिह्वा मे रामरामेति भक्त्या वदतु सर्वदा ॥ ८० ॥
मानसं श्यामलं रूपं सीतालक्ष्मणसंयुतम् ।
धनुर्बाणधरं पीतवाससं मुकुटोज्ज्वलम् ॥ ८१ ॥
अङ्गदैर्नूपुरैर्मुक्ताहारैः कौस्तुभकुण्डलैः ।
भान्तं स्मरतु मे राम ! वरं नान्यं वृणे प्रभो ! ॥ ८२ ॥

श्रीराम उवाच ।

भवत्वेवं महाभागे ! गच्छ त्वं बदरीवनम् ।

भिर्बुद्धा वेऽहमः अहङ्कारविशिष्टास्तेभ्यो व्यतिरिक्तं तद्धीमत्सृष्टं गुणा-
नामाश्रयं प्रवर्त्तकं यद्रूपं तद्दर्शनमेव तज्जन्या सिद्धिरित्यर्थः ॥ ७६ ॥

अविषयं वाङ्मनोऽविषयं त्वां स्तोतुं च कथं जानीयां प्रकृत्या
भवेयं तज्ज्ञानं दुर्लभमेव स्तोतुमपि न सामर्थ्यमिति भावः एवञ्च स्तुते-
रशक्यत्वात्केवलं प्रणाममेव करोमीत्याह नमस्यामीति ॥ ७७ ॥

प्रसन्नः प्रणतानामघस्य पापस्य हर्ता ॥ ७८ ॥

निश्चलां भक्तिं देहीत्यन्वयः ॥ ७९ ॥

प्राकृतेषु त्वद्भक्तिहीनेषु संसारासक्तेष्विति यावत् ॥ ८० ॥

मे मानसं वक्ष्यमाणगुणविशिष्टरूपं स्मरतु पीतवाससं शान्तमिति
दुःस्वन्तार्थम् ॥ ८१ । ८२ ॥

तत्रैव मां स्मरन्तो त्वं त्यक्त्वेदं भूतपञ्चकम्।
मामेव परमात्मानं अचिरात्प्रतिपद्यसे ॥ ८३ ॥

श्रुत्वा रघूत्तमवचोऽमृतसारकल्पं
गत्वा तदैव बदरीतरुखण्डजुष्टम्।
तीर्थं तदा रघुपतिं मनसा स्मरन्तो
त्यक्त्वा कलेवरमवाप परं पदं सा ॥ ८४ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्ध्याकाण्डे
षष्ठः सर्गः।

बदरीवनं बदरिकाश्रमं इदं भूतपञ्चकात्मकमिदं देहमित्यर्थः परमा-
त्मानं मां प्रतिपद्यसे वर्तमानसामीप्ये लट् अनेन स्वायुज्यरूपा मुक्ति-
स्तपःपूर्वकं तत्र देहत्यागेन दर्शिता ॥ ८३ ॥
तरुखण्ड तरुसमूहः ॥ ८४ ॥

इति श्रीमत्सकलराजाधिपद्धुरन्धरसमर्थेत्यादिवि० श्रीरामवर्मकृतः
कृतावध्यात्मरामायणे सेतौ किष्किन्ध्याकाण्डे
षष्ठः सर्गः।

अथ सप्तमः सर्गः ।

अथ तत्र समासीना वृक्षखण्डेषु वानराः ।
चिन्तयन्तो विमुह्यन्तः सीतामार्गणकर्षिताः ॥ १ ॥
ततो वाचाङ्गदः कांश्चिद्वानरान् वानरर्षभः ।
भ्रमतां गह्वरेऽस्माकं मासो नूनं गतोऽभवत् ॥ २ ॥
सीता नाधिगतास्माभिर्न कृतं राजशासनम् ।
यदि गच्छामः किष्किन्ध्यां ? सुग्रीवोऽस्मान् हनिष्यति ॥ ३ ॥
विशेषतः शत्रुसुतं मां मिषाद्विहनिष्यति ।
मयि तस्य कुतः प्रीति ?—रहं रामेण रक्षितः ॥ ४ ॥
इदानीं रामकार्यं मे न कृतं तन्मिषं भवेत् ।
तस्य मद्धनने नूनं सुग्रीवस्य दुरात्मनः ॥ ५ ॥
मातृकल्पां भ्रातृभार्यां पापात्मानुभवत्यसौ ।
न गच्छेयमतः पार्श्वं तस्य वानरपुङ्गवाः ! ॥ ६ ॥
त्यक्ष्यामि जीवितं चात्र येन केनापि मृत्युना ।

अथ तत्रेति विमुह्यन्तः सीतालाभादिति शेषः सीतामार्गणेन तत्र प्राप्तक्लेशेन कर्षिताः कृशत्वं प्राप्ताः ॥ १ ॥

मासो गतः सुग्रीवाज्ञप्तकालादधिकः कालो गत इत्यर्थः ॥ २ ॥

राजशासनं मासान्तः सीतान्वेषणरूपम् ॥ ३ ॥

मिषात् रामकार्याकरणरूपात् ॥ ४ ॥

तदेवाह इदानीमिति ॥ ५ ॥

ननु वधरूपं त्वद्वधरूपं सुग्रीवः कथं कुर्यात्तत्राह मातृकल्पामिति ज्येष्ठभ्रातृपत्नीत्वात् तस्य कार्यविचारो नेति भावः एषोक्तिर्वालिभावेन मृते भर्तरि देवरव्यतिरिक्तस्त्रिया अन्योपगमस्यादूषणात् ॥ ६ ॥

इत्यश्रुनयनं केचित् दृष्ट्वा वानरपुङ्गवाः ॥ ७ ॥
व्यथिताः साश्रुनयना युवराजमथाब्रुवन् ॥ ८ ॥
किमर्थं तव शोकोऽद्य ? वयं ते प्राणरक्षकाः ।
अत्रास्मो निवसामोऽत्र गुहायां भयवर्जिताः ॥ ९ ॥
सर्वसौभाग्यसहितं पुरं देवपुरोपमम् ।
शनैः परस्परं वाक्यं वदतां मारुतात्मजः ॥ १० ॥
श्रुत्वाङ्गदं समालिङ्ग्य प्रोवाच नयकोविदः ।
विचार्यते किमर्थं ? ते दुर्विचारो न युज्यते ॥ ११ ॥
राज्ञोऽत्यन्तप्रियस्त्वं हि तारापुत्रोऽतिवल्लभः ।
रामस्य लक्ष्मणात्प्रीतिस्त्वयि नित्यं प्रवर्धते ॥ १२ ॥
अतो न राघवात्प्रीतिस्तव राज्ञो विशेषतः ।
अहं तव हिते शक्तो वत्स ! नान्यं विचारय ॥ १३ ॥
गुहावासश्च निर्भेद्य इत्युक्तं वानरैस्तु यत् ।

येन केनापि कल्याणमिमाकारेण ॥ ७ । ८ ॥
वयं ते प्राणरक्षका भक्ताः गृहप्रापणादयः अत्र गुहायां वसाम इति ॥ ९ ॥
शनैः परस्परमेव वदतां वाक्यं श्रुत्वा इत्यन्वयः ॥ १० ॥
किमर्थं विचार्यते सुग्रीवतो वधादिकमिति शेषः अयमितरवानरो-क्तो दुर्विचारो गुहावासरूपस्तु सर्वथा न युज्यते ॥ ११ ॥
तत्र सुग्रीवतो भयं मा स्यदिति राज्ञ इति तारापुत्र इत्यनेन तारा-प्रीणनमिति ते स्यादि न तथाप्यकारणमावमात्रमिति भावः रामादपि न भयमित्याह रामस्येति ॥ १२ ॥
सीतालाभोऽपि नाथेनैवाह अयमिति अतो हे वत्स ! अन्यं विचारं न विचारय ॥ १३ ॥
वानरैर्या गुहावासोक्ति दूषयति गुहेति निर्भेद्योऽभेद्यः तदेतद् प-

तदेतद्रामबाणानामभेद्यं किं जगत्त्रये ? ॥ १४ ॥
ये त्वां दुर्बोधयन्त्येते वानरा वानरर्षभ ।
पुत्रदारादिकं त्यक्त्वा कथं स्थास्यन्ति ते त्वया ॥ १५ ॥
अन्यद् गुह्यतमं वक्ष्ये रहस्यं शृणु मे सुत ! ।
रामो न मानुषो देवः साक्षान्नारायणोऽव्ययः ॥ १६ ॥
सीता भगवती माया जनसम्मोहकारिणी ।
लक्ष्मणो भुवनाधारः साक्षाच्छेषः फणीश्वरः ॥ १७ ॥
ब्रह्मणा प्रार्थिताः सर्वे रक्षोगणविनाशने ।
मायामानुषभावेन जाता लोकैकरक्षकाः ॥ १८ ॥
वयं च पार्षदाः सर्वे विष्णोर्वैकुण्ठवासिनः ।
मनुष्यभावमापन्नाः स्वेच्छया परमात्मनि ॥ १९ ॥
वयं वानररूपेण जातास्तस्यैव मायया ।
वयं तु तपसा पूर्वं आराध्य जगतां पतिम् ॥ २० ॥
तेनैवानुज्ञाता अद्य पार्षदत्वमुपागताः ।
इदानीमपि तस्यैव सेवां कृत्वैव मायया ॥ २१ ॥
पुनर्वैकुण्ठमासाद्य सुखं स्थास्यामहे वयम् ।
इत्यङ्गदमथाश्वास्य गता विन्ध्यं महाचलम् ॥ २२ ॥

युक्तमिति शेषः यतो जगत्त्रये रामबाणानामभेद्यं किम् ? न किमपी- त्यर्थः तेनात्र वासे महद्भयमिति भावः ॥ १४ ॥

तदेतैर्वानरैरुक्तं यत्ते प्राणरक्षका इति तदपि मिथ्येत्याह ये स्थास्यन्तीति ॥ १५ । १६ । १७ ॥

रक्षोगणविनाशने तन्निमित्तं प्रार्थिता इत्यन्वयः मायामानुषभा- वेनेति न तेषां वास्तवं मनुष्यत्वं किन्तु मायिकमेवेति भावः ॥ १८ । १९ ॥

नन्वेवं वानररूपमस्माकं किमर्थं तत्राह तस्यैव माययेति ॥ २०–२२ ॥

विचिन्वन्तोऽथ शनकैर्जानकीं दक्षिणाम्बुधेः।
तीरे महेन्द्राख्यगिरेः पवित्रं पादमाययुः॥ २३॥
दृष्ट्वा समुद्रं दुष्पारमगाधं भयवर्द्धनम्।
वानरा भयसन्त्रस्ताः किं कुर्म इति वादिनः॥ २४॥
निषेदुरुदधेस्तीरे सर्वे चिन्तासमन्विताः।
मन्त्रयामासुरन्योन्यमङ्गदाद्या महाबलाः॥ २५॥
भ्रमतामिव नो मासो गतोऽत्रैव गुहान्तरे।
न दृष्टो रावणो वाऽत्र सीता वा जनकात्मजा॥ २६॥
सुग्रीवस्तीक्ष्णदण्डोऽस्मान्निहन्त्येव न संशयः।
सुग्रीववधतोऽस्माकं श्रेयः प्रायोपवेशनम्॥ २७॥
इति निश्चित्य तत्रैव दर्भानास्तीर्य सर्वतः।
उपाविविशुस्ते सर्वे मरणे कृतनिश्चयाः॥ २८॥
एतस्मिन्नन्तरे तत्र महेन्द्राद्रिगुहान्तरात्।
निर्गत्य शनकैरागाद्गृध्रः पर्वतसन्निभः॥ २९॥
दृष्ट्वा प्रायोपवेशेन स्थितान् वानरपुङ्गवान्।
उवाच शनकैर्गृध्रः प्राप्तो भक्षोऽद्य मे बहुः॥ ३०॥

दक्षिणाम्बुधेस्तीरे महेन्द्राख्यगिरेः पादं प्रत्यन्तपर्वतमाययुरित्यन्वयः॥ २३॥

भयवर्धनं दर्शनमात्रेण भयवृद्धिकरं किं कुर्म इतिवादिनः वदनशीलाः सन्तः उदधेस्तीरे निषेदुरथ मन्त्रयामासुरित्यन्वयः॥ २४। २५॥

गुहान्तरे गुहामध्ये वायव्द्रावण्यर्थौ॥ २६॥

सुग्रीववधतः सुग्रीवात्प्राप्स्यमानवधतः प्रायोपवेशनं तत्रास्य प्राणाभावेऽनशनेन मरणसङ्कल्पः॥ २७॥

उपाविविशुरित्यत्र शप आर्षः॥ २८। २९॥

एकैकशः क्रमात्सर्वान् भक्षयामि दिने दिने।
श्रुत्वा तद्गृध्रवचनं वानरा भीतमानसाः॥ २१॥
भक्षयिष्यति नः सर्वानसौ गृध्रो न संशयः।
रामकार्य्यं च नास्माभिः कृतं किञ्चिद्धरीश्वराः!॥२२॥
सुग्रीवस्यापि च हितं न कृतं स्वात्मनामपि।
वृथानेन वधं प्राप्ता गच्छामो यमसादनम्॥ २३॥
अहो जटायुर्धर्मात्मा रामस्यार्थे मृतः सुधीः।
मोक्षं प्राप दुरावापं योगिनामप्यरिन्दमः॥ २४॥
सम्पातिस्तु तदा वाक्यं श्रुत्वा वानरभाषितम्।
के वा यूयं मम भ्रातुः कर्णपीयूषसन्निभम्॥ २५॥
जटायुरिति नामाद्य व्याहरन्तः परस्परम्।
उच्यतां वो भयं मा भूत्सत्तमाः प्लवगसत्तमाः!॥ २६॥
तमुवाचाङ्गदः श्रीमानुत्थितो गृध्रसन्निधौ।
रामो दाशरथिः श्रीमान् लक्ष्मणेन समन्वितः॥ २७॥

वक्षुः विपुलो वक्षुसंस्थश्च॥ २०। २१॥

किञ्चित्किञ्चिदपीत्यर्थः हरीश्वरा इत्यङ्गदहनूमदादीन् प्रत्येतर-वानरवाक्यम्॥ २२॥

सुग्रीवहितं जानकीसमाचारोक्त्या रामसन्तोषरूपं आत्मनो हितं तथा सुग्रीवतोषरूपं अनेन गृध्रेण वृथावधं नाशं प्राप्ताः प्रापिताः यमसादनं यमगृहं गच्छामः वर्त्तमानसामीप्ये लट्॥ २३॥

योगिनामपि दुरावापमित्यन्वयः दुराङ् अवपूर्वादाप्नोतेः खल् प्रत्ययार्थो येषे वा॥ २४॥

कर्णपीयूषसन्निभं कर्णयोरमृततुल्यमित्यर्थः जटायुरिति नामेत्यनेन सम्बन्धः॥ २५॥

यूयं के तद्वक्तुमित्यर्थः॥ २६। २७। २८॥

ततः प्रविश्य हरयः पातुमारेभिरे मधु ।
रक्षिणस्तानताड्य दधिवक्त्रेण नोदितान् ॥ २२ ॥
पिबतस्ताडयामासुर्वानरान् वानरर्षभाः ।
ततस्तान् मुष्टिभिः पादैश्चूर्णयित्वा पपुर्मधु ॥ २३ ॥
ततो दधिमुखः क्रुद्धः सुग्रीवस्य स मातुलः ।
जगाम रक्षिभिः सार्द्धं यत्र राजा कपीश्वरः ॥ २४ ॥
गत्वा तमब्रवीद्देव ! चिरकालाभिरक्षितम् ।
नष्टं मधुवनं तेऽद्य कुमारेण हनूमता ॥ २५ ॥
श्रुत्वा दधिमुखेनोक्तं सुग्रीवो हृष्टमानसः ।
दृष्टा गतो न सन्देहः सीतां पवननन्दनः ॥ २६ ॥
नो चेन्मधुवनं द्रष्टुं समर्थः को भवेन्मम ।
तत्रापि वायुपुत्रेण कृतं कार्यं न संशयः ॥ २७ ॥
श्रुत्वा सुग्रीववचनं हृष्टो रामस्तमब्रवीत् ।
किमुच्यते त्वया राजन् ! वचः सीताकथान्वितम् ? ॥ २८ ॥
सुग्रीवस्त्वब्रवीद्राम ! देव ! दृष्टावनीसुता ।
हनूमत्प्रमुखाः सर्वे प्रविष्टा मधुकाननम् ॥ २९ ॥

दधिवक्त्रो नाम तद्रक्षिणां मुख्यस्तेन प्रेरितः ॥ २२ ॥

वानरर्षभाः दधिवक्त्रप्रेरिताः पिबतो वानरान् ताडयामासुरि-त्यन्वयः ॥ २३ । २४ ॥

कुमारेणाङ्गदेन हनूमता च नष्टं नाशितमित्यर्थः ॥ २५ ॥

दृष्टा आगत इति च्छेदः ॥ २६ ॥

नो चेन्मम मधुवनं द्रष्टुं कः समर्थो भवेत् ॥ २७ ॥

अतिहर्षात् बहुभाषेन सुग्रीवं प्रति रामस्येति वचः ॥ २८ ॥

अवनीसुता जानकी ॥ २९ ॥

भक्षयन्ति स्म सकलं ताडयन्ति स्म रक्षिण: ।
अज्ञात्वा देव ! कार्य्यं ते द्रष्टुं मधुवनं मम ॥ ३० ॥
न समर्थास्ततो देवो दृष्टा सीतेति निश्चितम् ।
रक्षिणो वो भयं मास्तु गत्वा ब्रूत ममाज्ञया ॥ ३१ ॥
वानरानङ्गदमुखानानयध्वं ममान्तिकम् ।
श्रुत्वा सुग्रीववचनं गत्वा ते वायुवेगत: ॥ ३२ ॥
हनुमत्प्रमुखान् प्रोचुर्गच्छतेश्वरशासनात् ।
द्रष्टुमिच्छति सुग्रीव: स रामो लक्ष्मणान्वित: ॥ ३३ ॥
युष्मानतीव हृष्टास्ते त्वरयन्ति महाबला: ।
तथेत्यम्बरमासाद्य ययुस्ते वानरोत्तमा: ॥ ३४ ॥
हनूमन्तं पुरस्कृत्य युवराजं तथाङ्गदम् ।
रामसुग्रीवयोरग्रे निपेतुर्भुवि सत्वरम् ॥ ३५ ॥
हनूमान् राघवं प्राह दृष्टा सीता निरामया ।
साष्टाङ्गं प्रणिपत्याग्रे राम: पश्चाद्धरीश्वरम् ॥ ३६ ॥
कुशलं प्राह राजेन्द्र ! जानकी त्वां शुचान्विता ।
अशोकवनिकामध्ये शिंशपामूलमाश्रिता ॥ ३७ ॥

मम मधुवनं द्रष्टुं न समर्था इत्यन्वय: ॥ ३० ॥

भो रक्षिणो वो युष्माकं भयं वानरेभ्यस्तादनजं मास्तु यतो ममाज्ञया गत्वा अङ्गदमुखान् वानरान् ब्रूत युष्मान् रामसुग्रीवावाकारयत इति शेष: इत्युक्त्वा ममान्तिकं मत्समीपं तानानयध्वम् ॥३१-३२॥

अतीव हृष्टास्ते रामसुग्रीवलक्षणा: युष्मान् स्वसमीपागमनाय त्वरयन्ति ॥ ३४ ॥

भूम्यवक्षोत्तरं राघवाश्वासनाय पूर्वं दृष्टा सीतेत्याह तत: क्रमेण रामसुग्रीवो प्रणिपत्य ॥ ३५ । ३६ ॥

जानकीकुशलं प्राहेत्याह शुचा शोकेन ॥ ३७ ॥

राक्षसीभिः परिवृता निराहारा कृशा प्रभो ! ।
हा राम ! रामरामेति शोचन्ती मलिनाम्बरा ॥३८॥
एकवेणी मया दृष्टा शनैराश्वासिता शुभा ।
वृक्षशाखान्तरे स्थित्वा सूक्ष्मरूपेण ते कथाम् ॥ ३९ ॥
जन्मारभ्य तवात्यर्थं दण्डकागमनं तथा ।
दशाननेन हरणं जानक्या रहिते त्वयि ॥ ४० ॥
सुग्रीवेण यथा मैत्री कृत्वा वालिनिबर्हणम् ।
मार्गणार्थं च वैदेह्याः सुग्रीवेण विसर्जिताः ॥ ४१ ॥
महाबला महासत्त्वा हरयो जितकाशिनः ।
गताः सर्वत्र सर्वे वै तत्रैकोऽहमिहागतः ॥ ४२ ॥
अहं सुग्रीवसचिवो दासोऽहं राघवस्य हि ।
दृष्टा यज्जानकी भाग्यात्प्रयासः फलितोऽद्य मे ॥ ४३ ॥
इत्युदीरितमाकर्ण्य सीता विस्फारितेक्षणा ।
केन वा कर्णपीयूषं श्रावितं मे शुभाक्षरम् ॥ ४४ ॥
यदि सत्यं तदा यातु मद्दर्शनपथं तु सः ।
ततोऽहं वानराकारः सूक्ष्मरूपेण जानकीम् ॥ ४५ ॥

हा इति शोकव्यञ्जकमात्रम् ॥ ३८ ॥

जन्मारभ्य तव कथां ब्रुवता मया सूक्ष्मरूपेण वृक्षशाखान्तरे स्थित्वा शनैराश्वासितेत्यन्वयः ॥ ३९ ॥

अत्यर्थं विस्तरेण दण्डकागमनादिकथोक्तेति शेषः त्वयि रहिते देशान्तरं गते सति जानक्या दशाननेन हरणमित्यन्वयः ॥ ४० ॥

वालिनिबर्हणं तद्वधं कृत्वा यथा सुग्रीवेण मैत्री सफला कृतेति शेषः ॥ ४१—४४ ॥

सः मेनोक्तं स इत्यर्थः ॥ ४५—४७ ॥

प्रणम्य प्राञ्जलिर्भूत्वा दूरादेव स्थितः प्रभो ! ।
पृष्टोऽहं सीतया वाक्यमित्यादिबहुविस्तरम् ॥ ४६ ॥
मया सर्वं क्रमेणैव विज्ञापितमरिन्दम ! ।
मयाऽर्पितं देव्यै भवद्दत्ताङ्गुलीयकम् ॥ ४७ ॥
तेन मामतिविश्वस्ता वचनं चेदमब्रवीत् ।
यथा दृष्टास्मि हनुमन् ! पीड्यमाना दिवानिशम् ॥ ४८ ॥
राक्षसीनां तर्जनैस्तत्सर्वं कथय राघवे ।
मयोक्तं देवि ! रामोऽपि त्वच्चिन्तापरिनिष्ठितः ॥ ४९ ॥
परिद्योचत्यहोरात्रं त्वद्वार्त्तां नाधिगम्य सः ।
इदानीमेव गत्वाहं स्थितिं रामाय ते ब्रुवे ॥ ५० ॥
रामः श्रवणमात्रेण सुग्रीवेण सलक्ष्मणः ।
वानरानीकपैः सार्धमागमिष्यति तेऽन्तिकम् ॥ ५१ ॥
रावणं सकुलं हत्वा नेष्यति त्वां स्वकम्पुरम् ।
अभिज्ञां देहि मे देवि ! यथा मां विश्वसेद्विभुः ॥ ५२ ॥
इत्युक्ता सा शिरोरत्नं चूडापाशे स्थितं प्रियम् ।
दत्त्वा काकेन यद्वृत्तं चित्रकूटगिरौ पुरा ॥ ५३ ॥
तदप्याहाश्रुपूर्णाक्षी कुशलं ब्रूहि राघवम् ।

तेन अङ्गुलीयकदानेन राघवप्राप्तः सेवक इत्यतिविश्वस्ता राक्षसीनां तर्जनैः पीड्यमाना यथा दृष्टास्मि तत्सर्वं पीडनं राघवे कथय ॥ ४८ ॥
त्वच्चिन्तापरिनिष्ठितः त्वच्चिन्तायां स्थितः ॥ ४९ ॥
त्वद्वार्त्तां नाधिगम्य अहोरात्रं परिशोचति त्वामितिति शेषः ॥ ५० ॥ ५१ ॥
विश्वसेत् अयं जानकीं दृष्ट्वा आगत इति विश्वसेदित्यर्थः ॥ ५२ ॥
शिरोरत्नं दत्त्वा चित्रकूटगिरिस्थं काकवृत्तमप्याह ॥ ५३ ॥
ततः कस्मै भवेदिति शेषः तदाह आश्रुपूर्णेति वक्ष्ये किञ्चिदुद्धृतं

लक्ष्मणं ब्रूहि मे किञ्चिद्दुरुक्तं भाषितं पुरा ॥ ५४ ॥
तत् क्षमस्वाज्ञभावेन भाषितं कुलनन्दन ! ।
तारयेन्मां यथा रामस्तथा कुरु कृपान्वितः ॥ ५५ ॥
इत्युक्त्वा रुदती सीता दुःखेन महतावृता ।
मयाप्याश्वासिता राम ! वदता सर्वमेव ते ॥ ५६ ॥
ततः प्रस्थापितो राम ! त्वत्समीपमिहागतः ।
तदागमनवेलायामशोकवनिकां प्रियाम् ॥ ५७ ॥
उत्पाट्य राक्षसांस्तत्र बहून् हत्वा क्षणादहम् ।
रावणस्य सुतं हत्वा रावणेनाभिभाष्य च ॥ ५८ ॥
लङ्कामशेषतो दग्ध्वा पुनरप्यगमं क्षणात् ।
श्रुत्वा हनूमतो वाक्यं रामोऽत्यन्तप्रहृष्टधीः ॥ ५९ ॥
हनूमंस्ते कृतं कार्यं देवैरपि सुदुष्करम् ।
उपकारं न पश्यामि तव प्रत्युपकारिणः ॥ ६० ॥
इदानीं ते प्रयच्छामि सर्वस्वं मम मारुते ! ।
इत्यालिङ्ग्य समाकृष्य गाढं वानरपुङ्गवम् ॥ ६१ ॥

दुर्वचो भाषितं तत् क्षमस्व तदज्ञभावेनाज्ञतया मया भाषितम् अतो यथा मां रामोऽस्माद्दुःखात्तारयेत्तथा कृपान्वितः कुरु इति लक्ष्मणं ब्रूहीत्यन्वयः ॥ ५४–५५ ॥

महता दुःखेनावृता आसीदिति शेषः सर्वमेव वृत्तान्तं वदता मयापि सा आश्वासिता ॥ ५६ ॥

प्रियां रम्यस्थेति शेषः ॥ ५७ ॥

उत्पाट्य उत्पाटितवृक्षां कृत्वा ॥ ५८ ॥

पुनरप्यगमं त्वत्समीपमिति शेषः प्रहृष्टधीः प्रहृष्टचेताः ॥ ५९ ॥

प्रत्युपकारिणः मां प्रति कृतोपकारस्य ॥ ६० ॥

सर्वस्वम् आलिङ्गनम् ॥ ६१ ॥

आश्लिष्टो रघुश्रेष्ठः परां प्रीतिमवाप सः।
हनूमन्तमुवाचेदं राघवो भक्तवत्सलः॥ ६२॥
परिरम्भो हि मे लोके दुर्लभः परमात्मनः।
अतस्त्वं मम भक्तोऽसि प्रियोऽसि हरिपुङ्गव!॥ ६३॥

यत्पादपद्मयुगलं तुलसीदलाद्यैः
सम्पूज्य विष्णुपदवीमतुलां प्रयान्ति।
तेनैव किं पुनरसौ परिरब्धमूर्त्ती
रामेण वायुतनयः कृतपुण्यपुञ्जः?॥ ६४॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे सुन्दरकाण्डे पञ्चमः सर्गः।

पञ्चमं काण्डं समाप्तं।

सः अनन्तानन्त्यादिपरमैश्वर्यवान्॥ ६२॥
आलिङ्गनस्य सर्वसत्त्वसमपादकत्वाद् परिरम्भ इति अतस्त्वं मम भक्तोऽसि अतस्त्वा अयं लब्ध इति शेषः॥ ६३॥
कृतपुण्यपुञ्जो वायुतनयः तेनैव रामेण परिरब्धमूर्त्तिः रत्नानां पदवीं प्राप्नोति किं पुनर्वक्तव्यमिति शेषः॥ ६४॥

इति श्रीमद्रुद्रवराजवि० श्रीरामवर्मणः कृताध्यात्म रामायणे सेतौ सुन्दरकाण्डे पञ्चमः सर्गः।

युद्धकाण्डम् ।

अथ प्रथमः सर्गः ।

श्रीमहादेव उवाच ।

यथावद्भाषितं वाक्यं श्रुत्वा रामो हनूमतः ।
उवाचानन्तरं वाक्यं हर्षेण महतावृतः ॥ १ ॥
कार्य्यं कृतं हनुमता देवैरपि सुदुष्करम् ।
मनसापि यदन्येन स्मर्त्तुं (१) शक्यं न भूतले ॥ २ ॥
शतयोजनविस्तीर्णं लङ्घयेत्कः पयोनिधिम् ।
लङ्काञ्च राक्षसैर्गुप्तां को वा धर्षयितुं क्षमः ॥ ३ ॥
भृत्यकार्य्यं हनुमता कृतं सर्वमशेषतः ।
सुग्रीवस्येदृशो लोके न भूतो न भविष्यति ॥ ४ ॥
अहं च रघुवंशश्च लक्ष्मणश्च कपीश्वरः ।
जानक्या दर्शनेनाद्य रक्षिताः स्मो हनूमता ॥ ५ ॥

यथावदिति ॥ १ ॥
यदन्येन मनसा स्मर्त्तुमपि न शक्यमित्यन्वयः ॥ २ ॥
धर्षयितुम् वशीकर्त्तुं निकारादिनाशेन ॥ ३ ॥
सुग्रीवस्येदृश इति भृत्य इति शेषः ॥ ४ ॥
कपीश्वरः सुग्रीवः ॥ ५ ॥

---

(१) कर्त्तुम् इति वा पाठः ।

सर्वथा सुकृतं कार्यं जानक्याः परिमार्गणम् ।
समुद्रं मनसा स्मृत्वा सीदतीव मनो मम ॥ ६ ॥
कथं नक्रझषाकीर्णं समुद्रं शतयोजनम् ।
लङ्घयित्वा रिपुं हत्वा कथं द्रक्ष्यामि जानकीम् ? ॥ ७ ॥
श्रुत्वा तु रामवचनं सुग्रीवः प्राह राघवम् ।
समुद्रं लङ्घयिष्यामो महानक्रझषाकुलम् ॥ ८ ॥
लङ्कां च विधमिष्यामो हनिष्यामोऽद्य रावणम् ।
चिन्तां त्यज रघुश्रेष्ठ ! चिन्ता कार्यविनाशिनी ॥ ९ ॥
एतान् पश्य महासत्त्वान् शूरान् वानरपुङ्गवान् ।
त्वत्प्रियार्थं समुद्युक्तान् प्रवेष्टुमपि पावकम् ॥ १० ॥
समुद्रतरणे बुद्धिं कुरुष्व प्रथमं ततः ।
दृष्ट्वा लङ्कां दशग्रीवो हत इत्येव मन्महे ॥ ११ ॥
नहि पश्याम्यहं कश्चित्त्रिषु लोकेषु राघव ! ।
गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे ॥ १२ ॥
सर्वथा नो जयो राम ! भविष्यति न संशयः ।
निमित्तानि च पश्यामि तथाभूतानि सर्वशः ॥ १३ ॥

जानक्याः परिमार्गणरूपं कार्यमनेन सुकृतम् सम्यक् कृतम् एवं हनुमन्तं स्तुत्वा प्रकृतमाह समुद्रमित्यादि यतः सीदतीव ॥ ६ ॥

अतः कथमित्यादि ॥ ७ । ८ ॥

यतश्चिन्ता कार्यविनाशिनी अतस्तां त्यज ॥ ९ ॥

त्वत्प्रियनिमित्तं पावकं प्रवेष्टुमपि समुद्युक्तान् ॥ १० ॥

प्रथमं समुद्रतरणविषयं निश्चयमातिष्ठ ततः लङ्कादर्शनोत्तरकाल-मेवाभी रावणो हत इत्येव मन्महे एष एवास्माकं निश्चय इत्यर्थः ॥ ११ ॥

कश्चित् कमपि ॥ १२ ॥

सुग्रीववचनं श्रुत्वा भक्तिवीर्यसमन्वितम् ।
अङ्गीकृत्याब्रवीद्रामो हनूमन्तं पुरः स्थितम् ॥ १४ ॥
येन केन प्रकारेण लङ्घयामो महार्णवम् ।
लङ्कास्वरूपं मे ब्रूहि दुःसाध्यं देवदानवैः ॥ १५ ॥
ज्ञात्वा तस्य प्रतीकारं करिष्यामि कपीश्वर ! ।
श्रुत्वा रामस्य वचनं हनूमान् विनयान्वितः ॥ १६ ॥
उवाच प्राञ्जलिर्देव ! यथादृष्टं ब्रवीमि ते ।
लङ्का दिव्या पुरी देव ! त्रिकूटशिखरे स्थिता ॥ १७ ॥
स्वर्णप्राकारसहिता स्वर्णाट्टालकसंयुता ।
परिखाभिः परिवृता पूर्णाभिर्निर्मलोदकैः(१) ॥ १८ ॥
नानोपवनशोभाढ्या दिव्यवापीभिरावृता ।
गृहैर्विचित्रशोभाढ्यैर्मणिस्तम्भमयैः शुभैः ॥ १९ ॥
पश्चिमद्वारमासाद्य गजवाहाः सहस्रशः ।
उत्तरे द्वारि तिष्ठन्ति साश्ववाहाः सपत्तयः ॥ २० ॥
तिष्ठन्त्यर्बुदसंख्याकाः प्राच्यामपि तथैव च ।

निर्भिन्नानि शकलानि ॥ १२ । १४ ॥
येन केन प्रकारेण समुद्रशोषणेन सेतुना वा देवदानवैर्दुःसाध्यं बोद्धुं चेति शेषः ॥ १५ ॥
प्रतीकारम् तन्नाशोपायम् ॥ १६ ॥
दिव्यत्वं त्रिकूटशिखरस्थत्वेन चेतराशोभत्वम् ॥ १७ ॥
प्राकारो नगरवेष्टनभित्तिः परिखाः प्राकारस्य बाह्याः प्राकाराद्बहिर्देशस्थाः खाताः ॥ १८ ॥
वाप्यः सजलजलाशयाः अवतरणसोपानसहिताः कूपविशेषाः ॥ १९ ॥
वरूथपास्तिष्ठन्तीति शेषः ॥ २० । २१ । २२ ॥

---

(१) नानावन्योपशोभिता इति पाठान्तरम् ।

रक्षिणो(१) राक्षसा वीरा द्वारं कृत्स्नमधिश्रिता: ॥२१॥
मध्यकक्षेऽप्यसंख्याता गजाश्वरथपत्तय: ।
रक्षयन्ति सदा लङ्कां नानास्त्रकुशला: प्रभो ! ॥ २२ ॥
संक्रमैर्विविधैर्लङ्का शतघ्नीभिश्च संयुता ।
एवं स्थितेऽपि देवेश ! शृणु मे तत्र चेष्टितम् ॥ २३ ॥
दशाननबलौघस्य चतुर्थांशो मया हत: ।
दग्ध्वा लङ्कां पुरीं स्वर्णप्रासादो धर्षितो मया ॥ २४ ॥
शतघ्न्य: संक्रमाश्चैव नाशिता मे रघूत्तम ! ।
देव ! त्वद्दर्शनादेव लङ्का भस्मीकृता भवेत् ॥ २५ ॥
प्रयाणं कुरु देवेश ! गच्छामो लवणाम्बुधे: ।
तीरं सह महावीरैर्वानरौघै: समन्तत: ॥ २६ ॥
श्रुत्वा हनूमतो वाक्यमुवाच रघुनन्दन: ।
सुग्रीव सैनिकान् सर्वान् प्रस्थानायाभिनोदय ॥ २७ ॥
इदानीमेव विजयो मुहूर्त: परिवर्त्तते ।
अस्मिन्मुहूर्त्ते गत्वाहं लङ्कां राक्षससङ्कुलाम् ॥ २८ ॥
सप्राकारां सुदुर्धर्षां नाशयामि सरावणाम् ।
आनेष्यामि च सीतां मे दक्षिणाक्षि स्फुरत्यध: ॥२९॥
प्रयातु वाहिनी सर्वा वानराणां तरस्विनाम् ।

संक्रमा:परिखा:सर्वप्रवेशायोग्यामार्गा:।मे चेष्टितं मत्कृतो व्यवहार:।२३।२४
संक्रमा नाशिता: प्राकारपातनेन पूरयित्वा सर्वप्रवेशयोग्या: कृता: ।२५॥
लवणाम्बुधेस्तीरं गच्छाम इत्यन्वय: ॥२६ । २७ ॥
विजयो अन्वर्थनामा ॥ २८ ॥
सुतरां दुर्धर्षामपि नाशयामि ॥ २९ ॥

(१) रक्षिनो इत्यपि पाठ: ।

रक्षन्तु यूथपाः सेनामग्रे पृष्ठे च पार्श्वयोः ॥ ३० ॥
हनूमन्तमथारुह्य गच्छाम्यग्रेऽङ्गदं ततः।
आरुह्य लक्ष्मणो यातु सुग्रीव! त्वं मया सह ॥ ३१ ॥
गयो(१)गवाक्षो गवयो मैन्दो द्विविद एव च।
नलो नीलः सुषेणश्च जाम्बवांश्च तथापरे ॥ ३२ ॥
सर्वे गच्छन्तु सर्वत्र सेनापाः शत्रुघातिनः।
इत्याज्ञाप्य हरीन् रामः प्रतस्थे सहलक्ष्मणः ॥ ३३ ॥
सुग्रीवसहितो हर्षात् सेनामध्यगतो विभुः।
वारणेन्द्रनिभाः सर्वे वानराः कामरूपिणः ॥ ३४ ॥
क्ष्वेलन्तः परिगर्जन्तो जग्मुस्ते दक्षिणां दिशम्।
भक्षयन्तो ययुः सर्वे फलानि च मधूनि च ॥ ३५ ॥
ब्रुवन्तो राघवस्याग्रे हनिष्यामोऽद्य रावणम्।
एवं ते वानरश्रेष्ठा गच्छन्त्यतुलविक्रमाः ॥ ३६ ॥
हरिभ्यामुह्यमानौ तौ शुशुभाते रघूत्तमौ।
नक्षत्रैः सेवितौ यद्वच्चन्द्रसूर्याविवाम्बरे ॥ ३७ ॥
आवृत्य पृथिवीं कृत्स्नां जगाम महती चमूः।

यूथपाः जाम्बवदाद्याः ॥ ३० ॥
त्वं मया सह याहीति शेषः ॥ ३१ । ३२ ॥
सेनापाः सेनापालाः ॥ ३३ ॥
वारणेन्द्राः गजेन्द्राः ॥ ३४ ॥
क्ष्वेलन्तः क्ष्वेलाः युद्धार्थं गच्छतां शूराणां गतिविशेषाः ॥३५।३६॥
हरिभ्यां हनूमदङ्गदाभ्याम् नक्षत्रसदृशा अन्ये हरयः हनूमदङ्गद-
योरत्युच्चत्वादम्बरस्थचन्द्रसूर्योपमा ॥ ३७ ॥

(१) गजो इति वा पाठः।

प्रस्फोटयन्तः(१) पुच्छाग्रान् उद्वहन्तश्च पादपान् ॥३८॥
शैलानारोहयन्तश्च जग्मुर्मारुतवेगतः ।
असङ्ख्याताश्च सर्वत्र वानराः परिपूरिताः ॥ ३९ ॥
हृष्टास्ते जग्मुरत्यर्थं रामेण परिपालिताः ।
गता चमूर्दिवारात्रं क्वचिन्नासज्जत क्षणम् ॥ ४० ॥
काननानि विचित्राणि पश्यन्मलयसह्ययोः ।
ते सह्यं समतिक्रम्य मलयं च तथा गिरिम् ॥ ४१ ॥
आययुश्चानुपूर्व्येण समुद्रं भीमनिःस्वनम् ।
अवतीर्य हनूमन्तं रामः सुग्रीवसंयुतः ॥ ४२ ॥
सलिलाभ्यासमासाद्य रामो वचनमब्रवीत् ।
आगताः स्मो वयं सर्वे समुद्रं मकरालयम् ॥ ४३ ॥
इतो गन्तुमशक्यं नो निरुपायेन वानराः ।
अत्र सेनानिवेशोऽस्तु मन्त्रयामोऽस्य तारणे ॥ ४४ ॥

आहत्य आच्छाद्य प्रस्फोटयन्तः शौर्य्या वेगकृतमभ्याघातेन पादपानुद्वहन्तः हस्तैरुद्धार्यमिति शेषः ॥ ३८ ॥

सर्वत्र यावद्दर्शनपथदेशे ॥ ३९ ॥

न असज्जत आसक्ता नाभूत् अविश्रमं जगामेति यावत् ॥ ४० ॥

ते वानराः ॥ ४१ ॥

आनुपूर्व्येण क्रमेण आययुः प्राप्ताः हनूमतः पश्चादर्थे आर्षी द्वितीया सुग्रीवयुतो रामः ॥ ४२ ॥

सलिलसमीपं प्राप्य सुग्रीवं प्रति रामो वचनमब्रवीदित्यन्वयः आगताः प्राप्ताः स्मः ॥ ४३ ॥

निरुपायेन उपायं विना अस्य तारणे अस्य समुद्रस्य तरणे स्वार्थे णिच् मन्त्रयामः उपायानिति शेषः ॥ ४४ । ४५ ॥

---

(१) आस्फोटयन्तः इति वा पाठः ।

श्रुत्वा रामस्य वचनं सुग्रीवः सागरान्तिके ।
सेनां न्यवेशयत् क्षिप्रं रक्षितां कपिकुञ्जरैः ॥ ४५ ॥
ते पश्यन्तो विषेदुस्तं सागरं भीमदर्शनम् ।
महोन्नततरङ्गाढ्यं भीमनक्रभयङ्करम् ॥ ४६ ॥
अगाधं गगनाकारं सागरं वीक्ष्य दुःखिताः ।
तरिष्यामः कथं घोरं सागरं वरुणालयम् ? ॥ ४७ ॥
हन्तव्योऽस्माभिरद्यैव रावणो राक्षसाधमः ।
इति चिन्ताकुलाः सर्वे रामपार्श्वे व्यवस्थिताः ॥ ४८ ॥
रामः सीतामनुस्मृत्य दुःखेन महताऽऽवृतः ।
विलप्य जानकीं सीतां बहुधा कार्य्यमानुषः ॥ ४९ ॥
अद्वितीयश्चिदात्मैकः परमात्मा सनातनः ।
यस्तु जानाति रामस्य स्वरूपं तत्त्वतो जनः ॥ ५० ॥
तन्नः स्पृशति दुःखादि किमुतानन्दमव्ययम् ? ।
(१)दुःखहर्षभयक्रोधलोभमोहमदादयः ॥ ५१ ॥

विषेदुः दुःखिता बभूवुः महोन्नतैस्तरङ्गैराढ्यं सम्पन्नम् ॥ ४६ ॥
गगनाकारं विपुलत्वेन तत्सादृश्यम् दुःखिता वानराः कथं तरिष्याम इत्यादेः इति चिन्ताकुला इत्यनेनान्वयः ॥ ४७ ॥
अद्यैव हन्तव्यो हन्तुमर्हः ॥ ४८ ॥
दुःखेन महताऽऽवृतः व्याप्तोऽभूदिति शेषः तत्र हेतुः कार्य्यमानुषः कार्य्यार्थमानुषः नाटितमानुषः नाटितमानुषत्वः एवं चेदं दुःखादि तस्य नटनमेवेति भावः ॥ ४९ ॥
वस्तुतो न तस्य दुःखादि इत्याशयाऽद्वितीय इति 'द्वितीयाद्वै भयं भवति' इति श्रुतेस्तस्य न दुःखादीति भावः तदुपपादकं चिदात्मैक इति अनेकचेतनकल्पने गौरवात्सोऽद्वितीय एक इति भावः किञ्च यो रामस्य स्वरूपं तत्त्वतः

(१) दुःखशोक इति वा पाठः ।

अज्ञानलिङ्गान्येतानि कुतः सन्ति चिदात्मनि ? ।
देहाभिमानिनो दुःखं नादेहस्य चिदात्मनः(१) ॥५२॥
सम्प्रसादे द्वयाभावात् सुखमात्रं हि दृश्यते ।
बुद्ध्याद्यभावत् संशुद्धे दुःखं तत्र न दृश्यते (२) ।
अतो दुःखादिकं सर्वं बुद्धेरेव न संशयः ॥ ५३ ॥

रामः परात्मा पुरुषः पुराणो
नित्योदितो नित्यसुखो निरीहः ।
तथापि मायागुणसङ्गतोऽसौ
सुखीव दुःखीव विभाव्यते बुधैः ॥ ५४ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
प्रथमः सर्गः ।

तत्त्वमस्यादिवाक्यतो जानाति सोऽपि दुःखादिभ्यतो मुच्यते स्वयमानन्द-स्वरूपस्य भगवतो न दुःखादि इति किं वक्तव्यमिति भावः-दुःखादीत्य-त्रादिशब्द्पाद्यमाह दुःखेति ॥ ५० । ५१ ॥

तत्त्वज्ञमपि तानि कुतो न स्पृशन्तीत्यत हेतुमाह अज्ञानलिङ्गा-नीति तस्य तत्त्वज्ञानेन नाशादिति भावः चिदात्मनि सर्वथाज्ञानरहिते तानि कुतः सन्ति कथं भवन्तीत्यर्थः तदेव द्रढयितु पुनराह देहेति ॥५८॥

तस्य सुखरूपत्वे हेतुमाह सम्प्रसादे इति सुषुप्ताविल्यर्थः द्वयाभा-वात् द्वितीयाभावात् ननु शुद्धेऽपि दुःखं कुतो न तत्राह बुद्ध्याद्यभावादिति अतो बुद्धिरहिते तत्र न दृश्यते अतो बुद्धेरेव तत्सर्वमित्यर्थः ॥ ५३ ॥

नित्योदितत्वेव मायराहित्यम् अबुधैर्मायागुणैः सङ्गतः तत्सङ्गत-त्वेन कल्पितः सुखीव दुःखीव च विभाव्यते ॥ ५४ ॥

इति श्रीमद्युक्तराजविपदुद्धरणसमर्थत्वादिवि० श्रीरामवर्मणः
कृताध्यात्मरामायणसेतौ युद्धकाण्डे
प्रथमः सर्गः ।

---

(१) परमात्मनः इत्यपि पाठः ।　(२ न विद्यते इति पाठान्तरम् ।

अथ द्वितीयः सर्गः ।

लङ्कायां रावणो दृष्ट्वा कृतं कर्म हनूमता ।
दुष्करं दैवतैर्वापि क्रिया किञ्चिदवाङ्मुखः ॥ १ ॥
आहूय मन्त्रिणः सर्वानिदं वचनमब्रवीत् ।
हनूमता कृतं कर्म भवद्भिर्दृष्टमेव तम् ॥ २ ॥
प्रविश्य लङ्कां दुर्धर्षां दृष्ट्वा सीतां दुरासदाम् ।
हत्वा च राक्षसान् वीरानक्षं मन्दोदरीसुतम् ॥ ३ ॥
दग्ध्वा लङ्कामशेषेण लङ्घयित्वा च सागरम् ।
युष्मान् सर्वानतिक्रम्य स्वस्थोऽगात्पुनरेव सः ॥ ४ ॥
किं कर्त्तव्यमितोऽस्माभिर्यूयं मन्त्रविशारदाः ।
मन्त्रयध्वं प्रयत्नेन यत् कृतं मे हितं भवेत् ॥ ५ ॥
रावणस्य वचः श्रुत्वा राक्षसास्तमथाब्रुवन् ।
देव ! शङ्का कुतो रामात्तव लोकजितो रणे ? ॥ ६ ॥
इन्द्रस्तु बद्धा निक्षिप्तः पुत्त्रेण तव पत्तने ।
जित्वा कुबेरमानीय पुष्पकं भुज्यते त्वया ॥ ७ ॥
यमो जितः कालदण्डाद्भयं नाभूत्तव प्रभो ! ।

लङ्कायामिति दैवतैर्वापि दैवतैरपीत्यर्थः वा पादपूरणे ॥ १ ॥
अक्षं हत्वेति अनुकर्षः ॥ ३ ॥
स्वस्थ इत्यनेन भवत्कृताक्षवैकृतराहित्यं सूचितम् ।
यत्कृतं सन्मे हितं भवेत्तन्मन्त्रयध्वमित्यन्वयः ॥ ५ ॥
लोकजितः इन्द्रादिलोकजयिनः ॥ ६ ॥
तदेवाहेन्द्रस्त्विति पत्तने पुरे कुबेरं जित्वा पुष्पकमानीय भुज्यत
इत्यन्वयः ॥ ७ ॥

वरुणो युद्धतेनैव जितः सर्वेऽपि राक्षसाः ॥ ८ ॥
मयो महासुरो भीत्या कन्यां दत्त्वा स्वयं तव ।
त्वद्वशे वर्ततेऽद्यापि किमुतान्ये महासुराः? ॥ ९ ॥
हनूमद्धर्षणं यत्तु तद्वज्ञाकृतं च नः ।
वानरोऽयं किमस्माकमस्मिन् पौरुषदर्शने ॥ १० ॥
इत्युपेक्षितमस्माभिर्धर्षणं तेन किं भवेत् ? ।
वयं प्रमत्ताः किं तेन वञ्चिताः स्मो हनूमता ? ॥ ११ ॥
जानीमो यदि तं सर्वे कथं जीवन् गमिष्यति ? ।
आज्ञापय जगत्कृत्स्नमवानरममानुषम् ॥ १२ ॥
कृत्वा यास्यामहे सर्वे प्रत्येकं वा नियोजय ।
कुम्भकर्णस्तदा प्राह रावणं राक्षसेश्वरम् ॥ १३ ॥
आरब्धं यत्त्वया कर्म स्वात्मनाशाय केवलम् ।
न दृष्टोऽसि तदा भाग्यात्त्वं रामेण महात्मना ॥ १४ ॥

यदा यमो जितस्तदा कालदण्डादपि भयं नाभूत्तत्कुतो मानुषा-
द्भयमिति भावः सर्वेऽपि राक्षसा इत्यस्य त्वदधीना इति शेषः ॥ ८।९ ॥

नोऽस्माकं या तदवज्ञा तस्मिन्नवज्ञा तत्कृतमित्यर्थः अवज्ञाकार-
णमाहुः अयं वानरः किमस्माकं करिष्यतीति शेषः अस्मिन् वानरे
पौरुषस्य दर्शने किं फलं निष्फलं तत् ॥ १० ॥

इतीत्यादि धर्षणं तेन किं भवेदिति तस्योपेक्षाभावे इत्यादि अयं
किं कः पदार्थः इति वयं प्रमत्तास्तेन प्रमादेन हनूमता वञ्चिताः ॥११॥

यदि तं जानीमः अयमेवं रूप इति यदि जानीम इत्यर्थः गमि-
ष्यति गतः स्यादित्यर्थे आर्षम् ॥ १२ ॥

सर्वानाज्ञापय एकैकं वेत्यर्थः ॥ १३ ॥

यत्कर्म त्वया आरब्धं तत् केवलं स्वात्मनाशाय आरम्भकाल एव
नाशप्रसक्तः परन्तु भाग्याज्जीवितोऽसि यत्तदा रामेण न दृष्टोऽसि ॥१४॥

यदि पश्यति रामस्त्वां जीवन्नायासि रावण ! ।
रामो न मानुषो देव: साक्षान्नारायणोऽव्यय: ॥ १५ ॥
सीता भगवती लक्ष्मी रामपत्नी यशस्विनी ।
राक्षसानां विनाशाय त्वयानीता सुमध्यमा ॥ १६ ॥
विषपिण्डमिवागीर्य्य महामीनो यथा तथा ।
आनीता जानकी पश्चात्त्वया किं वा भविष्यति ॥ १७ ॥
यद्यप्यनुचितं कर्म त्वया कृतमजानता ।
सर्वं समं करिष्यामि स्वस्थचित्तो भव प्रभो ! ॥ १८ ॥
कुम्भकर्णवच: श्रुत्वा वाक्यमिन्द्रजिदब्रवीत् ।
देहि देव ! ममानुज्ञां हत्वा रामं सलक्ष्मणम् ।
सुग्रीवं वानरांश्चैव पुनर्यास्यामि(१)तेऽन्तिकम् ॥ १९॥

तत्रागतो भागवतप्रधानो
विभीषणो बुद्धिमतां वरिष्ठ: ।
श्रीरामपादद्वयएकतान:
प्रणम्य देवारिमुपोपविष्ट: ॥ २० ॥

जीवन्नायासीत्यत्र हेतुभूतं रामस्वरूपमाह रामो नेति ॥ १५ ॥
त्वया आनीतेति च्छेद: ॥ १६ ॥
विषपिण्डमिव तत्सदृशम् आगीर्य्य निगीर्य्य महामीनो यथा उपतापस्यति तथा त्वया जानकी आनीता अथ किं वा भविष्यतीति पश्चात्तप्यसे इति शेष: ॥ १७ ॥
सर्वं समं करिष्यामि पराक्रमेणेति भाव: ॥ १८ । १९ ॥
एकतान: तन्मात्रविषयध्यानवान् देवारिं रावणं प्रणम्य उप तत्-समीपे आहूतत्वादुपविष्ट: ॥ २० ॥

---

(१) पुनरायास्यते इति पाठ: ।

विलोक्य कुम्भश्रवणादिदैत्यान्
मत्तप्रमत्तानतिविस्मयेन।
विलोक्य कामातुरमप्रमत्तो
दशाननं प्राह विशुद्धबुद्धिः ॥ २१ ॥

न कुम्भकर्णेन्द्रजितौ च राजन्!
तथा महापार्श्वमहोदरौ तौ।
निकुम्भकुम्भौ च तथातिकायः
स्थातुं न शक्ता युधि राघवस्य ॥ २२ ॥

सीताभिधानेन महाग्रहेण
ग्रस्तोऽसि राजन्! न च ते विमोक्षः।
तामेव सत्कृत्य महाधनेन
दत्त्वाभिरामाय सुखी भव त्वम् ॥ २३ ॥

यावन्न रामस्य शिताः शिलीमुखा
लङ्कामभिव्याप्य शिरांसि रक्षसाम्।
छिन्दन्ति तावद्रघुनायकस्य भो!
तां जानकीं त्वं प्रतिदातुमर्हसि ॥ २४ ॥

कुम्भश्रवणः कुम्भकर्णः आदिनेन्द्रजित् मत्तप्रमत्तान् अतिशयेन महानिस्मयः कामातुरं दशाननं विलोक्य प्राह ॥ २१ ॥

कुम्भकर्णेन्द्रजितौ यस्य युधिस्थातुं न शक्तौ तौ प्रसिद्धौ तौ महापार्श्वमहोदरावपि न शक्तौ तथा निकुम्भकुम्भावतिकायोऽपि न शक्तो अन्येषां का गणनेति भावः ॥ २२ ॥

न च ते विमोक्षः तेन महाग्रहादिति शेषः महाधनेन रत्नादिना॥२३॥

अभिव्याप्येत्यनेन युगपत्सर्वदेशावच्छेदेन शिरश्छेदकथनं तेन पराक्रमातिशयवर्णनं तां दत्त्वा कुशलं कातरानिरूपाक् ॥ २४ ॥

यावन्नगाभाः कपयो महाबला
हरीन्द्रतुल्या नखदंष्ट्रयोधिनः।
लङ्कां समाक्रम्य विनाशयन्ति ते(१)
तावद्द्रुतं देहि रघूत्तमाय ताम्॥ २५॥
जीवन्न(२)रामेण विमोक्ष्यसे त्वं
गुप्तः सुरेन्द्रैरपि शङ्करेण।
न देवराजाङ्कगतो न मृत्योः
पातालमूलानपि संप्रविष्टः॥ २६॥

शुभं हितं पवित्रं च विभीषणवचः खलः।
प्रतिजग्राह नैवासौ म्रियमाण इवौषधम्॥ २७॥
कालेन नोदितो दैत्यो विभीषणमथाऽब्रवीत्।
मद्दत्तभोगैः पुष्टाङ्गो मत्समीपे वसन्नपि॥ २८॥
प्रतीपमाचरत्येष ममैव हितकारिणः।
मित्रभावेन शत्रुर्मे जातो नात्रास्ति संशयः॥ २९॥
अनार्येणेह कृतघ्नेन सङ्गतिर्मे न युज्यते।
विनाशमभिकाङ्क्षन्ति ज्ञातीनां ज्ञातयः सदा॥ ३०॥

हरीन्द्रतुल्याः महासिंहसदृशा यावन्न विनाशयन्ति तावत्ततः प्राक् देहीत्यन्वयः॥ २५॥

सुरेन्द्रैः कुबेरादिभिः देवराजः इन्द्रः न मृत्योः लोकं गतोऽपीति शेषः॥ २६। २७॥

दैत्यो रावणः मद्दत्तैर्भोगैः भोगसाधनैः॥ २८॥

प्रतीपः प्रतिकूलम्॥ २९॥

कृतघ्नत्वादेवानार्येण असाधोस्तस्मात्तु विनाशमिति॥ ३०॥

---

(१) नो इति पाठः। (२) यावन्न इति पाठान्तरम्।

योऽन्यस्त्वेवंविधं ब्रूयाद्वाक्यमेतं निशाचरः।
अस्मिन् तस्मिन् वधे एव(१) धिक् त्वां रक्षःकुलाधमम्॥११॥
रावणेनैवमुक्तः सन् परुषं स विभीषणः।
उत्पपात गदापाणिश्चतुर्भिः सह राक्षसैः॥१२॥
चतुर्भिर्मन्त्रिभिः सार्धं गगनस्थोऽब्रवीदिदम्।
क्रोधेन महताविष्टो रावणं दशकन्धरम्।
मा विनाशमुपेहि त्वं प्रियवादिनमेव माम्॥१३॥
धिक्करोषि तथापि त्वं ज्येष्ठो भ्राता पितुः समः।
कालो राक्षसरूपेण जातो दशरथालये॥१४॥
काली सीताभिधानेन जाता जनकनन्दिनी।
तावुभावागतावत्र भूमेर्भारापनुत्तये॥१५॥
तेनैव प्रेरितस्त्वं तु न शृणोषि हितं मम।

योऽन्यो निशाचर एवंविधं वाक्यं ब्रूयात् तस्मिन् वधे एव ... एव हन्मि त्वं तु भ्राता ... इति तव धिक्कार एव वध इत्याह धिगिति ... ॥११॥

परुषं धिगिति वचनम्॥१२॥

रावणं प्रति विभीषणोऽब्रवीदित्यन्वयः यदब्रवीत्तदाह मेति यद्यपि प्रियवादिनमेव माम्॥१३॥

त्वं धिक्करोषि तथापि पितुः समो ज्येष्ठो भ्राता त्वमिति तव हितं ब्रवीमि इति शेषः तदाह काल इति सर्वसंहर्तेत्यर्थः॥१४॥

काली सर्वसंहारे सहायभूता शक्तिः॥१५॥

तेनैव रामेण अन्तर्यामिनेति भावः अकर्तव्यमिदं कार्यं त्वं तेन प्रेरकेणेति तात्पर्यं अन्तर्यामित्वमेव तस्य व्युत्पादयति श्रीराम इति

---

(१) तेन इति वा पाठः।

श्रीरामः प्रकृतेः साक्षात्परस्तात् सर्वदा स्थितः ॥ ३६ ॥
बहिरन्तश्च भूतानां समः सर्वत्र संस्थितः ।
नामरूपादिभेदेन तत्तन्मय इवामलः ॥ ३७ ॥
यथा नानाप्रकारेषु द्रुमेष्वेको महानलः ।
तत्तदाकृतिभेदेन भिद्यते ज्ञानचक्षुषाम् ॥ ३८ ॥
पञ्चकोशादिभेदेन तत्तन्मय इवाबभौ ।
नीलपीतादियोगेन निर्मलः स्फटिको यथा ॥ ३९ ॥
स एव(१)नित्यमुक्तोऽपि स्वमायागुणबिम्बितः ।
कालः प्रधानं पुरुषोऽव्यक्तं चेति चतुर्विधः ॥ ४० ॥
प्रधानपुरुषाभ्यां स जगत् कृत्स्नं सृजत्यजः ।

प्रकृतेः साक्षाद्द्रष्टेत्यर्थः एवं च प्रकृतिकार्यद्रष्टृत्वमर्थात्सिद्धं तत् किं प्रकृतिसम्बन्धस्तथा सति तद्धर्मलोपापत्तिः हरिद्रादिसम्बन्धाद्वस्त्रस्येवे-त्यत आह परस्तात् सर्वदेति पद्मपत्रन्यायेन तद्धर्मासम्बद्धः ॥ ३६ ॥

प्रकृतिद्रष्टृत्वमेवाह बहिरिति समो न तु न्यूनाधिकभावेनापि वैषम्येण यथा कर्मफलप्रदत्वादिति भावः वस्तुतस्तद्व्यतिरिक्तं नैव किञ्चिद् अस्तीत्याह नामेति यत्किञ्चित् सत्वेन नामादि प्रतीयते तन्मयं तत्त-न्मयत्वादेव तथा प्रतीतिविषय इति भावः ॥ ३७ ॥

एकस्यानेकरूपत्वं दृष्टान्तेन साधयति यथेति ॥ ३८ ॥

दार्ष्टान्तिके योजयति पञ्चेति अन्नमयप्राणमयमनोमयविज्ञान-मयानन्दमयाः पञ्च कोशाः आदिना भूतादीनि तन्मयस्तन्मयः स्थूलश-रीरम् तद्वः क्रमेण सूक्ष्मा अन्ये दृष्टान्तान्तरमाह नीलेति ॥ ३९ ॥

स एषः रामः स्वमायागुणाः सत्त्वादयस्तैर्बिम्बितः प्रतिबिम्बितः प्रपञ्चः तेषु प्रतिबिम्बित इति वा ॥ ४० ॥

तत्र रजोगुणप्रतिबिम्बे प्रधानपुरुषावित्याह प्रधानेति प्रधानं

(१) स एष इति वा ।

कालरूपेण कलनां जगतः कुरुतेऽव्ययः ॥ ४१ ॥
कालरूपी स भगवान् रामरूपेण मायया ॥ ४२ ॥
ब्रह्मणा प्रार्थितो देवस्त्वद्वधार्थमिहागतः।
तदन्यथा कथं कुर्य्यात्? सत्यसङ्कल्प ईश्वरः ॥ ४३ ॥
हनिष्यति त्वां रामस्तु सपुत्रबलवाहनम्।
हन्यमानं न शक्नोमि द्रष्टुं रामेण रावण! ॥ ४४ ॥
त्वां राक्षसकुलं(१) कृत्स्नं ततो गच्छामि राघवम्।
मयि याते सुखी भूत्वा रमस्व भवने चिरम् ॥ ४५॥

परिच्छिन्नपुरुषः स्वभोगापवर्गार्थं तत्प्रवर्त्तक त्वनुभाभ्यां सृष्टिः सत्त्वो-
गुणप्रतिबिम्बं काल इत्याह कालरूपेणेति कलनाम् संहारम् अर्थात्
सत्त्वगुणप्रतिबिम्बतोऽव्यक्तमित्युच्यते स: चान्तर्यामितया सर्वमोचको
दुर्ज्ञेयतया चाव्यक्तमिति भावः ॥ ४१ ॥

तत्र कालरूपी संहारप्रधान इदानीं राम इत्याह कालेति ॥४२॥

ननु सर्वसमस्य भगवतो मद्वधे कथं प्रवृत्तिरत आह ब्रह्मणेति
परिपालनानुग्रहार्थेन दुष्टनिग्रहेऽपि न समत्वहानिः कर्मानुरूपफल-
दातृत्वमेव तस्य समत्वं तदननुरूपफलदाने हि तस्य वैषम्यमापद्येत न
च तदस्ति यथानेकेषु कर्मानुरूपफलदो राजा सर्वेषु सम इत्येव व्यव-
ह्रियते न तु विषम इति भावः अन्यथा करणाभावे हेतुः सत्यसङ्कल्प-
त्वम् ॥ ४३ ॥

हनिष्यतीति सत्यसङ्कल्पत्वादेवेति भावः नन्वेवमवश्यम्भाविनि
मद्वधे तव गमनेन किं तत्राह हन्यमानमिति हे रावण! त्वां स्वामि-
बुद्धिविषयं स्वीयत्वबुद्धिविषयं च राक्षसकुलं हन्यमानं द्रष्टुं न शक्नोमि
अतस्त्वयि राक्षसकुले च तां बुद्धिं विहाय रामे वानरेषु चोक्तबुद्धिं
कृत्वा राघवं गच्छामि तथा बुद्धिकृतमेव च दुःखमिति भावः ॥४४।४५॥

---

(१) त्वां वक्ष्ये कुशलमिति पाठान्तरम्।

विभीषणो रावणवाक्यतः क्षणात्
विसृज्य सर्वं सपरिच्छदं गृहम् ।
जगाम रामस्य पदारविन्दयोः
सेवाभिकाङ्क्षी परिपूर्णमानसः ॥ ४६ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
द्वितीयः सर्गः ।

विसृज्य सर्वमित्यनेन वैराग्यमुक्तं भगवद्भजने तस्य तृष्णाकुलत्वात् परिपूर्णो मनसि भवो मानसो मनोरथो यस्य सः भगवद्भजनं कार्य-मिति तस्य मानसिको मनोरथः ॥ ४६ ॥

इति श्रीमत्[illegible] श्रीरामवर्म्म-कृतायामध्यात्मरामायणटीकायां युद्धकाण्डे
द्वितीयः सर्गः ।

तृतीयः सर्गः ।

विभीषणो महाभागश्चतुर्भिर्मन्त्रिभिः सह ।
आगत्य गगने रामसम्मुखे समवस्थितः ॥ १ ॥
उच्चैरुवाच भो स्वामिन् ! राम ! राजीवलोचन ! ।
रावणस्यानुजोऽहं ते दारहर्तुर्विभीषणः ॥ २ ॥
नाम्ना भ्रात्रा निरस्तोऽहं त्वामेव शरणं गतः ।
हितमुक्तं मया देव ! तस्य चाविदितात्मनः (१) ॥ ३ ॥
सीतां रामाय वैदेहीं प्रेषयेति पुनः पुनः ।
उक्तोऽपि न शृणोत्येष; कालपाशवशं गतः ॥ ४ ॥
हन्तुं मां खड्गमादाय प्राद्रवद्राक्षसाधमः ।
ततो चिरेण सचिवैश्चतुर्भिः सहितो भयात् ॥ ५ ॥
त्वामेव भवमोक्षाय मुमुक्षुः शरणं गतः ।
विभीषणवचः श्रुत्वा सुग्रीवो वाक्यमब्रवीत् ॥ ६ ॥

विभीषण इति ॥ १ ॥

ते दारहर्तुः रावणस्याहमनुजो नाम्ना विभीषण इत्यन्वयः ॥ २ ॥

भ्रात्रा रावणेनाहं निरस्तः धिक्कृतः; अविदितात्मनः अविदित स्वस्वरूपस्य ॥ ३ ॥

प्रेषय मद्भक्तस्य प्रेषयेत्युक्तः कालरूपस्य तव पाशः अन्तर्यामितया प्रेरणा तदधीनतां प्राप्तः ॥ ४ ॥

अस्त्रवशमात्मानमेव किं न त्वधिकमपीत्याह हन्तुमिति भयात् ॥५॥

तद्भयात् संसारे एव वैराग्येण तस्मादेव मोक्षाय तदिच्छावान् त्वां शरणं गत इत्यन्वयः ॥ ६ ॥

(१) तस्यैवाविदितात्मनः इति वा पाठः ।

विश्वासार्हो न ते राम ! मायावी राक्षसाधमः ।
सीताहर्त्तुर्विशेषेण रावणस्यानुजो बली ॥ ७ ॥
मन्त्रिभिः सायुधैरस्मान् विवरे निहनिष्यति ॥ ८ ॥
तदाज्ञापय मे देव ! वानरैर्हन्यतामयम् ।
ममैवं भाति ते राम ! बुद्ध्या किं निश्चितं वद ॥
श्रुत्वा सुग्रीववचनं रामः सस्मितमब्रवीत् ॥ ९ ॥
यदीच्छामि कपिश्रेष्ठ ! लोकान् सर्वान् सहेश्वरान् ।
निमिषार्द्धेन संहन्यां सृजामि निमिषार्द्धतः ॥ १० ॥
अतो मयाभयं दत्तं शीघ्रमानय राक्षसम् ॥ ११ ॥
सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ १२ ॥
रामस्य वचनं श्रुत्वा सुग्रीवो हृष्टमानसः ।
विभीषणमथानाय्य दर्शयामास राघवम् ॥ १३ ॥
विभीषणस्तु साष्टाङ्गं प्रणिपत्य रघूत्तमम् ।
हर्षगद्गदया वाचा भक्त्या च परयान्वितः ॥ १४ ॥

सीताहर्त्तुरनुज इति विशेषणेन विश्वासार्हो नेत्यनेन अन्वयः ॥ ७ ॥
विवरे अन्येन युद्धावसरादिरूपे छिद्रे ॥ ८ ॥
ममैवं बुद्धिः तव बुद्ध्यान्तःकरणेन किं निश्चितं तद्वदेत्यर्थः ॥ ९ ॥
यदीच्छामीति अनेन सत्यसङ्कल्प ईश्वरोऽहमिति सूचितं सहेश्वरान् सर्वेश्वरा इन्द्राद्याः ॥ १० ॥
अभयमिति च्छेदः ॥ ११ ॥
नन्वेवं विधेभ्योऽभयदानं नोचितम् इति चेत्तत्राह सकृदेवेति तवास्मीति प्रपन्नाय अङ्गीकृतवते याचते यत्नतम् अभयमिति शेषः सर्वभूतेभ्यः सर्वप्राणिभ्यः निकृष्टायापीति शेषः तादृशायाप्यभयं ददामीति मे व्रतं तस्मात् अभयाप्रदाने मे व्रतभङ्गः स्यादिति न किञ्चिद्वाच्यमिति भावः ॥ १२ ॥ १३ ॥

रामं श्यामं विशालाक्षं प्रसन्नमुखपङ्कजम् ।
धनुर्बाणधरं शान्तं लक्ष्मणेन समन्वितम् ॥ १५ ॥
कृताञ्जलिपुटो भूत्वा स्तोतुं समुपचक्रमे ॥ १६ ॥

विभीषण उवाच ।

नमस्ते राम ! (१) राजेन्द्र ! नमः सीतामनोरम ! ।
नमस्ते चण्डकोदण्ड ! नमस्ते भक्तवत्सल ! ॥ १७ ॥
नमोऽनन्ताय शान्ताय रामायामिततेजसे ।
सुग्रीवमित्राय च ते रघूणां पतये नमः ॥ १८ ॥
जगदुत्पत्तिनाशानां कारणाय महात्मने ।
त्रैलोक्यगुरवेऽनादिगृहस्थाय नमो नमः ॥ १९ ॥
त्वमादिर्जगतां राम ! त्वमेव स्थितिकारणम् ।
त्वमन्ते निधनस्थानं स्वेच्छाचारस्त्वमेव हि ॥ २० ॥
चराचराणां भूतानां बहिरन्तश्च राघव ! ।

रामं श्याममित्यादिध्यानप्रकारः ॥ १५ । १६ ॥

अथ स्तौति नमस्त इति ॥ १७ । १८ ॥

जगदिति 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' इति श्रुतिबोधितजगदुत्पत्त्युत्पत्तिनाशकारणायेत्यर्थः त्रैलोक्यगुरवे अन्तर्यामितयेति भावः अनादिगृहस्थाय सदा मायाख्यगृहिण्या स्वशक्तिरूपया युतायेत्यर्थः ॥ १९ ॥

तदेव पुनः स्पष्टमाह त्वमादिरिति उत्पत्तिकारणस्थानमित्यर्थः निधनस्थानं लयस्थानम् एवं चोत्पत्त्यादयोऽपि त्वद्विवर्त्तभूता एव नातिरिक्ता इति सूचितं स्वेच्छाचारत्वेन न पराधीनत्वं सूचितम् ॥२०॥

---

(१) नाथ ! इति पाठान्तरम् ।

व्याप्यव्यापकरूपेण भवान् भाति जगन्मयः ॥ २१ ॥
त्वन्मायया हृतज्ञाना नष्टात्मानो विचेतसः।
गतागतं प्रपद्यन्ते पापपुण्यवशात्सदा ॥ २२ ॥
तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा।
यावन्न ज्ञायते ज्ञानचेतसा नान्यगामिना ॥२३ ॥
त्वदज्ञानात्सदा युक्ताः (१) पुत्रदारगृहादिषु।
रमन्ते विषयान् सर्वानन्ते दुःखप्रदान् विभो ! ॥ २४ ॥
त्वमिन्द्रोऽग्निर्यमो रक्षो वरुणश्च तथानिलः।
कुबेरश्च तथा रुद्रस्त्वमेव पुरुषोत्तमः ॥ २५ ॥
त्वमणोरप्यणीयांश्च स्थूलात् स्थूलतरः प्रभो ! ।
त्वं पिता सर्वलोकानां माता धाता त्वमेव हि ॥ २६ ॥

व्याप्यव्यापकरूपेणेति यथा महामत्स्यस्याल्पमत्स्यो व्याप्यः ॥२१॥

हृतज्ञानास्त्वद्रूपं जगदिति ज्ञानहीनाः अतएव नष्टात्मानः अतएव नष्टकण्ठचामीकरवत् अज्ञातं स्वस्वरूपं येषां ते अतएव विचेतसः विरुद्धे प्रवृत्तिमार्गे चेतो येषां ते गतागतम् जन्ममरणरूपं संसारम् ॥२२ ॥

यावदन्यविषयरहितेन ज्ञानस्वरूपभवद्विषयचित्तेन भवान् न ज्ञायते तावज्जगत्सत्यं भाति त्वत्स्वरूपज्ञाने तु त्वमेव सर्वरूपेणैव भातीति ज्ञाने तु भासमानस्य जगतो मिथ्यात्वं भाति तथा यावत् शुक्तिकास्वरूपेण न ज्ञायते तावत्तत्र भातरजतं सत्यमिति भाति शुक्तिकाज्ञाने तु तन्मिथ्येति ज्ञायते तद्वत् ॥ २३ ॥

तदेव द्रढयितुं पुनराह त्वदज्ञानादिति युक्ताः तत्रैव सत्यत्वाभिमानेन लीनचित्ताः रमन्ते भीत्वा भुञ्जन्ते अन्ते वियोगे दुःखप्रदानम्॥२४॥

त्वमेव सर्वरूप इत्याह त्वमिति ॥ ॥ २५ ॥

अणीयान् सर्वथा दुर्ज्ञेयत्वात् स्थूलतरः विभुत्वात् मातापितृवत्सर्वत्र

(१) सक्ता इति पाठः।

आदिमध्यान्तरहितः परिपूर्णोऽच्युतोऽव्ययः ।
त्वं पाणिपादरहितश्चक्षुःश्रोत्रविवर्जितः ॥ २७ ॥
श्रोता द्रष्टा ग्रहीता च जवनस्त्वं खरान्तक ।
कोशेभ्यो व्यतिरिक्तस्त्वं निर्गुणो निरुपाश्रयः ॥ २८ ॥
निर्विकल्पो निर्विकारो निराकारो निरीश्वरः (१) ।
षड्भावरहितोऽनादिः पुरुषः प्रकृतेः परः ॥ २९ ॥
मायया गृह्यमाणस्त्वं मनुष्य इव भाव्यसे ।
ज्ञात्वा त्वां निर्गुणमजं वैष्णवा मोक्षगामिनः ॥ ३० ॥

यमः पालने इत्याह त्वं पितेत्यादि ॥ २६ ॥

अच्युतः कयापि शक्त्या च्युतो हीनो न भवेन सर्वशक्तिमत्त्वात् अव्ययः व्ययोऽत्र ह्रासापचयस्तद्रहितः त्वं पाणीति 'अपाणिपादो ज-वनो ग्रहीता' इति श्रुतेः ॥ २७ ॥

विपरीतक्रमेण श्रोतेत्याद्युक्तिः कोशेभ्यः अन्नमयप्राणमयमनोमय-विज्ञानमयानन्दमयेभ्यः पञ्चकोशेभ्यो व्यतिरिक्तस्तद्दोषास्पृष्टः निर्गुणः सतो निर्गुण इत्यर्थः मायाश्रयत्वात् गुणवानिव निरुपाश्रयः आधा-रान्तररहितः ॥ २८ ॥

निर्विकल्पः वस्तुतो निर्धर्मकत्वान्निर्विकल्पकज्ञानस्यैव विषयो न सविकल्पकस्येति भावः अतएव निराकारः त्वदन्येश्वरस्य अभावा-न्निरीश्वरः उक्तं निर्विकारत्वं विवृणोति षड्भावरहित इति जा-यतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते नश्यतीति निरुक्तोक्तषड्भावविका-रहीनः अतएवानादिः जगत् त्वद्विवर्त एवेति भावः प्रकृतिसम्बन्धा-दपि तेन विकार इत्याह प्रकृतेः परः तद्दोषगुणासंस्पृष्ट इत्यर्थः ॥२९॥

नन्वीदृशस्य मम मनुष्यत्वं कुतस्तत्राह माययेति इदं त्वद्दर्शनं माय-यैव तदेवाह मनुष्य इवेति एवं मायिकस्यास्य तव ज्ञानात् मुक्तिः

---

(१) निराकारो निरीहो निरुपाधिक इति पाठान्तरम् ।

अहं त्वत्पादसद्भक्तिनिश्रेणीं प्राप्य राघव ! ।
इच्छामि ज्ञानयोगाख्यं सौधमारोढुमीश्वर ! ॥ ३१ ॥
नमः सीतापते ! राम ! नमः कारुणिकोत्तम ! ।
रावणारे ! नमस्तुभ्यं त्राहि मां भवसागरात् ॥ ३२ ॥
ततः प्रसन्नः प्रोवाच श्रीरामो भक्तवत्सलः ।
वरं वृणीष्व भद्रन्ते वाञ्छितं वरदोऽस्म्यहम् ॥ ३३ ॥

विभीषण उवाच ।

धन्योऽस्मि कृतकृत्योऽस्मि कृतकार्य्योऽस्मि राघव ! ।
त्वत्पाददर्शनादेव विमुक्तोऽस्मि न संशयः ॥ ३४ ॥
नास्ति मत्सदृशो धन्यो नास्ति मत्सदृशः शुचिः ।
नास्ति मत्सदृशो लोके राम ! त्वन्मूर्त्तिदर्शनात् ॥ ३५ ॥
कर्मबन्धविनाशाय त्वज्ज्ञानं भक्तिलक्षणम् ।

किन्तु पूर्वोक्तरूपज्ञानादेवेत्याह ज्ञात्वेति तज्ज्ञानकारणं चाह वाणिके ब्रह्मरूपे भक्तिरित्थं तज्ज्ञानमपि परम्परया तदुपयोगीति भावः ॥३०॥

तदेवाहाहमिति भक्तिरूपां निश्रेणीं प्राप्य ज्ञानयोगाख्यं सौधं पूर्वोक्तज्ञानयोगाख्यं सौधम् ॥ ३१ ॥

सर्वविघ्नभङ्गापेक्षया नतिरूपा भक्तिरेव सम्येति ध्यानवच्चाह नम इति ॥ ३२ ॥

वाञ्छितं वरं वृणीष्व यतोऽहं वरदोऽस्मीत्यन्वयः ॥ ३३ ॥

कृतकृत्यत्वम् सर्वधर्मजनककर्मकृतत्वम् अतएव धन्यत्वम् भवद्दर्शनस्य सर्वधर्मरूपत्वमिति भावः कृतकार्य्यत्वं च धातूनामनेकार्थत्वात्प्राप्तकलप्राप्यत्वम् प्राप्यं च सकलधर्मफलम् तदेवाह त्वत्पादेति छक्तिर्हि सर्वपुण्यफलम् ॥ ३४ ॥

तदेवाह नास्तीति ॥ ३५ ॥

कर्मकृतो बन्धः संसारस्तन्नाशफलं भक्तिलक्षणं करणं यस्य तादृशं

त्वद्ध्यानं परमार्थं च देहि मे रघुनन्दन ! ॥ ३६ ॥
न याचे राम ! राजेन्द्र ! सुखं विषयसम्भवम् ।
त्वत्पादकमले सक्ता भक्तिरेव सदास्तु मे ॥ ३७ ॥
ओमित्युक्ता पुनः प्रीतो रामः प्रोवाच राक्षसम् ।
शृणु वक्ष्यामि ते भद्र ! रहस्यं मम निश्चितम् ॥ ३८ ॥
मद्भक्तानां प्रशान्तानां योगिनां वीतरागिणाम् ।
हृदये सीतया नित्यं वसाम्यत्र न संशयः ॥ ३९ ॥
तस्मात्त्वं सर्वदा शान्तः सर्वकल्मषवर्जितः ।
मां ध्यात्वा मोक्ष्यसे नित्यं घोरसंसारसागरात् ॥ ४० ।
स्तोत्रमेतत्पठेद्यस्तु लिखेद्यः शृणुयादपि ।
मत्प्रीतये ममाभीष्टं सारूप्यं समवाप्नुयात् ॥ ४१ ॥
इत्युक्ता लक्ष्मणं प्राह श्रीरामो भक्तवत्सलः ।
पश्यत्विदानीमेवैष मम सन्दर्शने फलम् ॥ ४२ ॥
लङ्काराज्येऽभिषेक्ष्यामि जलमानय सागरात् ।
यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥ ४३ ॥
यावन्मम कथा लोके तावद्राज्यं करोत्वसौ ।

त्वद्विषयध्यानं देहि एव फलं यथार्थं तस्य कार्यं विना अनन्यशरण-त्वकारणीभूतां भक्तिं प्रार्थयते त्वत्पादेति एतदेव इच्छा भक्तिरित्यर्थः परमार्थं परम उत्कृष्टो मोक्षोऽर्थः प्रयोजनं परम्परया यस्य ॥ ३६ ॥

तदेव पुनराह न याचे इति ॥ ३७ ॥ ३८ ॥

मद्भक्तानामिति सर्वथा तव ध्यानविषयो भवामीति भावः ॥ ३९ ॥

शान्तः जितेन्द्रियः अतएव सर्वपापहीनः ॥ ४० ॥ ४१ ॥

मम सन्दर्शने फलं तत्क्षण्यं एवं मोक्षरूपं कालान्तरमवश्यम्भावि इदानीं वाञ्छितमैहिकं पश्यतु ॥ ४२—४४ ॥

इत्युक्त्वा लक्ष्मणेनाशु आनाय्य कलशेन तम् ॥ ४४ ॥
लङ्काराज्याधिपत्यार्थमभिषेकं रमापतिः ।
कारयामास सचिवैर्लक्ष्मणेन विशेषतः (१) ॥ ४५ ॥
साधु साध्विति ते सर्वे वानराश्चुक्रुशुर्भृशम् ।
सुग्रीवोऽपि परिष्वज्य विभीषणमथाब्रवीत् ॥ ४६ ॥
विभीषण ! वयं सर्वे रामस्य परमात्मनः ।
किङ्करास्तत्र मुख्यस्त्वं भक्त्या रामपरिग्रहात् ॥ ४७ ॥
रावणस्य विनाशे त्वं साहाय्यं कर्तुमर्हसि ।

विभीषण उवाच ।

अहं कियान् सहायत्वे रामस्य परमात्मनः ? ।
किन्तु दास्यं करिष्येऽहं भक्त्या नत्या त्वमायया (२) ॥ ४८ ॥
दशग्रीवेण संदिष्टः शुको नाम महासुरः ।
संस्थितो ह्यम्बरे वाक्यं सुग्रीवमिदमब्रवीत् ॥ ४९ ॥
त्वामाह रावणो राजा भ्रातरं राक्षसाधिपः ।
महाकुलप्रसूतस्त्वं राजासि वनचारिणाम् ॥ ५० ॥

सचिवैस्तद्भिर्विभीषणसचिवैः ॥ ४५ ॥ ४६ ॥
मुख्यत्वहेतुर्भक्त्या रामपरिग्रहात् ॥ ४७ ॥
परमात्मत्वेन सहायानपेक्षता सूचिता अमायया अकपटेन ॥ ४८ ॥
दशग्रीवेणेति अम्बरे इत्यादि ॥ ४९ ॥
भ्रातरं वालिना भ्रातृत्वव्यवहारस्य मैत्रीकरणोत्तरं कृतत्वेन तद्-
भ्रातृत्वात् भ्रातृसदृशं त्वाम् [illegible] वनचारिणां वानराणाम् ॥ ५० ॥

---

(१) महात्मना इति वा पाठः ।
(२) त्वया सह इति पाठान्तरम् ।

मम भ्रातृसमानस्य तव नास्त्यर्थविप्लवः ।
अहं यद्यहरं भार्य्यां राजपुत्रस्य किन्तव ? ॥ ५१ ॥
किष्किन्ध्यां याहि हरिभिर्लङ्का शक्या न दैवतैः ।
प्राप्तुं किं मानवैरल्पसत्त्वैर्वानरयूथपैः ? ॥ ५२ ॥
तं प्रापयन्तं वचनं तूर्णमुत्प्लुत्य वानराः ।
प्रापद्यन्त तदा क्षिप्रं निहन्तुं दृढमुष्टिभिः ॥ ५३ ॥
वानरैर्हन्यमानस्तु शुको राममथाब्रवीत् ।
न दूतान् घ्नन्ति राजेन्द्र ! वानरान् वारय प्रभो ! ॥ ५४ ॥
रामः श्रुत्वा तदा वाक्यं शुकस्य परिदेवितम् ।
मावधिष्टेति रामस्तान् वारयामास वानरान् ॥ ५५ ॥
पुनरम्बरमासाद्य शुकः सुग्रीवमब्रवीत् ।
ब्रूहि राजन् ! दशग्रीवं किं वक्ष्यामि ? व्रजाम्यहम् ॥ ५६ ॥

सुग्रीव उवाच ।

यथा वाली मम भ्राता तथा त्वं राक्षसाधम ! ।
हन्तव्यस्त्वं मया यत्नात् सपुत्रबलवाहनः ॥ ५७ ॥
ब्रूहि मे रामचन्द्रस्य भार्य्यां हृत्वा क्व यास्यसि ? ।

अर्थविप्लवो मत्कृतोऽर्थनाशः. अहं यद्राजपुत्रस्य भार्य्यामहरं तत्र तव किं दुःखमिति शेषः ॥ ५१ ॥

दैवतैः दैवतैरपि ॥ ५२ ॥

निहन्तुं प्रापद्यन्त प्रयत्ताः कृतारम्भा इत्यर्थः ॥ ५३ ॥

घ्नन्ति राजान इति शेषः ॥ ५४—५६ ॥

यथा वालीति वक्रोक्तिः यथा जायापहारित्वाद्वाली मे वध्यस्तथा स्वामिभार्य्यापहारित्वात्त्वमपि वध्य इति भावः ॥ ५७ ॥

मे स्वामिनः श्रीरामचन्द्रस्य भार्य्यां हृत्वा क्व यास्यसीति ब्रूहीत्य-

ततो रामाज्ञया मुक्त्वा शुकं बन्धान्वरस्थयत् ॥ ५८ ॥
शार्दूलोऽपि(१) ततः पूर्वं दृष्ट्वा कपिबलं महत् ।
यथावत्कथयामास रावणाय स राक्षसः ॥ ५९ ॥
दीर्घचिन्तापरो भूत्वा निःश्वसन्नास मन्दिरे ।
ततः समुद्रमावेक्ष्य रामो रक्तान्तलोचनः ॥ ६० ॥
पश्य लक्ष्मण ! दुष्टोऽसौ वारिधिर्मामुपागतम् ।
नाभिनन्दति दुष्टात्मा दर्शनार्थं ममानघ ! ॥ ६१ ॥
जानाति मानुषोऽयं मे किं करिष्यति वानरैः ? ।
अद्य पश्य महाबाहो ! शोषयिष्यामि वारिधिम् ॥ ६२ ॥
पादेनैव गमिष्यन्ति वानरा विगतज्वराः ।
इत्युक्त्वा क्रोधताम्राक्ष आरोपितधनुर्धरः ॥ ६३ ॥
तूणीराद् बाणमादाय कालाग्निसदृशप्रभम् ।
सन्धाय चापमाकृष्य रामो वाक्यमथाब्रवीत् ॥ ६४ ॥

त्वयः शुकमन्वरक्षयत् वानरैः सुग्रीव इति शेषः अयमत्राशयः शुकवच-नात् सुग्रीवस्य भेदायोग्यत्वं निर्णीय विश्वस्तं स्वकेषु वानरेषु स्वनग-रयातस्यैतैरयक्ष्यत्वं समुद्रव्यवधानान्निर्णीय घातादि मा करोत्विति ॥ ५८ ॥

शार्दूलो दर्शनमात्रे नियुक्तो न तु सुग्रीवभेदने इति तस्यापक्ष-पम् ॥ ५९ ॥

कपिबलस्यातिमहत्त्वश्रवणमात्रेण दीर्घचिन्तापरत्वं रावणस्य त्व-रेन शौर्य्यहानिः सूचिता ॥ ६० ॥

उपागतं स्वतटं प्राप्तम् अनभिनन्दने चिह्नमाह दर्शनार्थमिति नायातीति शेषः ॥ ६१ । ६२ ॥

आरोपितेति आरोपितस्य धनुर्धरस्येत्यर्थः ॥ ६३ ॥

कालाग्नीति कालाग्नितुल्यकान्ति सन्धाय धनुषि योजयित्वेत्यर्थः ॥ ६४ ॥

---

(१) शार्दूलोऽपि इति वा पाठः

पश्यन्तु सर्वभूतानि रामस्य शरविक्रमम् ।
इदानीं भस्मसात्कुर्य्यां समुद्रं सरिताम्पतिम् ॥ ६५ ॥
एवं ब्रुवति रामे तु सशैलवनकानना ।
चचाल वसुधा द्यौश्च दिशश्च तमसावृताः ॥ ६६ ॥
चुक्षुभे सागरो वेलां भयाद्योजनमत्यगात् ।
तिमिनक्रझषा मीनाः प्रतप्ताः परितत्रसुः ॥ ६७ ॥
एतस्मिन्नन्तरे साक्षात्सागरो दिव्यरूपधृक् ।
दिव्याभरणसम्पन्नः स्वभासा भासयन् दिशः ॥ ६८ ॥
स्वान्तस्थदिव्यरत्नानि कराभ्यां परिगृह्य सः ।
पादयोः पुरतः क्षिप्त्वा रामस्योपायनं बहु ॥ ६९ ॥
दण्डवत्प्रणिपत्याह रामं रक्तान्तलोचनम् ।
त्राहि त्राहि जगन्नाथ ! राम ! त्रैलोक्यरक्षक ! ॥ ७० ॥
जडोऽहं राम ! ते सृष्टः सृजता निखिलं जगत् ।
स्वभावमन्यथा कर्त्तुं कः शक्तो ? दैवनिर्मितम् ॥ ७१ ॥

भस्मसात् कुर्य्यां भस्मसात्करोमीत्यर्थः ॥ ६५ ॥

तमसावृता आसन्निति शेषः ॥ ६६ ॥

सागरक्षोभमेवाह योजनं वेलामत्यगात् अतिक्रान्तः वेलामारभ्य योजनपर्य्यन्तं सजलो देशः शुष्को जात इत्यर्थः प्रतप्ताः जलौष्ण्यव-शात् ॥ ६७ । ६८ ॥

उपायनं रत्नानि पादयोः क्षिप्त्वा ॥ ६९ ॥,

प्रणिपत्य च राममाह इत्यन्वयः ॥ ७० ॥

स्वस्य शीघ्रमनागमने हेतुमाह जडं इति जडः तमसाच्छादित-ज्ञानः एवञ्च त्वत्सृष्टस्वभावेन जडत्वेन मदनागमनमिति न मे दोष इति भावः ॥ ७१ ॥

स्थूलानि पञ्चभूतानि जडान्येव स्वभावतः ।
सृष्टानि भवतैतानि त्वदाज्ञां लङ्घयन्ति न ॥ ७२ ॥
तामसादहमो राम ! भूतानि प्रभवन्ति हि ।
कारणानुगमात्तेषां जडत्वं तामसं स्वतः ॥ ७३ ॥
निर्गुणस्त्वं निराकारो यदा मायागुणान् प्रभो ! ।
लीलयाङ्गीकरोषि त्वं तदा वैराजनामवान् ॥ ७४ ॥
गुणात्मनो विराजश्च सत्त्वाद्देवा बभूविरे ।
रजोगुणात् प्रजेशाद्या मन्वोर्भूतपतिस्तव ॥ ७५ ॥
त्वामहं मायया च्छन्नं लीलया मानुषाकृतिम् ॥ ७६ ॥
जडबुद्धिर्जडो मूर्खः कथं जानामि निर्गुणम् ? ।
दण्ड एव हि मूर्खाणां सन्मार्गप्रापकः प्रभो ! ॥ ७७ ॥

ननु तव जडत्वं कुत इति चेत्तत्राह स्थूलानीति स्वभावतो जडान्येव भवता सृष्टानि तामसाहङ्कारतस्त्वया तस्मृष्टेरिति भावः अतस्त्वदाज्ञारूपं जडत्वं न लङ्घयन्ति न त्यजन्तीति तेष्वप्रूपं भूतसङ्गमिति भावः ॥ ७२ ॥

तदेवाह तामसादीनि अहमः अहङ्कारात् कारणगुणा हि कार्यगुणानारभन्त इति भावः ॥ ७३ ॥

ननु निर्गुणस्य मम कथं भूतसृष्टृत्वमत आह निर्गुण इति निर्गुणो निराकारोऽपि लीलया यदा मायागुणानङ्गीकरोषि तदा सृष्टृत्वाद्वैराजनामा स्यात्र्येऽथ ॥ ७४ ॥

तत्र कस्माद्गुणात्कस्य सृष्टिस्तत्राह गुणात्मनो विराज इति देवा अत्र सनकादयः प्रजेशा मन्वाद्या इन्द्राद्याश्च मन्वोस्तमसः भूतपतिः संहर्त्ता रुद्रः ॥ ७५ ॥

मायया च्छन्नं छन्नात्मस्वरूपं तदेवाह लीलयेति ॥ ७६ ॥

जडबुद्धिस्तमोहतत्वात् जडः स्वरूपेणापि जडरूपत्वात् अतएव मूर्खः त्वां निर्गुणं सर्वनियन्तृपरमेश्वरत्वेन कथं जानामीत्यर्थः इदानीं

भूतानाममरश्रेष्ठ ! पशूनां लगुडो यथा ।
शरणं ते व्रजामीश ! शरण्य भक्तवत्सल ! ।
अभयं देहि मे राम ! लङ्कामार्गं ददामि ते ॥ ७८ ॥

श्रीराम उवाच ।

अमोघोऽयं महाबाणः कस्मिन्देशे निपात्यताम्(१) ।
लक्ष्यं दर्शय मे शीघ्रं बाणस्यामोघपातिनः ॥ ७९ ॥
रामस्य वचनं श्रुत्वा करे दृष्ट्वा महाशरम् ।
महोदधिर्महातेजा राघवं वाक्यमब्रवीत् ॥ ८० ॥
रामोत्तरप्रदेशे तु द्रुमकुल्य इति श्रुतः ।
प्रदेशस्तत्र बहवः पापात्मानो दिवानिशम् ॥ ८१ ॥
बाधन्ते मां रघुश्रेष्ठ ! तत्र ते पात्यतां शरः ।
रामेण सृष्टो बाणस्तु क्षणादाभीरमण्डलम् ॥ ८२ ॥
हत्वा पुनः समागत्य तूणीरे पूर्ववत् स्थितः ।
ततोऽब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः ॥ ८३ ॥
नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्मणः ।
सुतो धीमान् समर्थोऽस्मिन् कार्य्ये लब्धवरो हरिः ॥ ८४

ड त्वत्कृतदण्डात्त्वत्स्वरूपं ज्ञातमिति वदन् अर्थान्तरन्यासमाह दण्ड एवेति ॥ ७७ ॥
भूतानां प्राणिनाम् ॥ ७८ ॥
अमोघममिष्फलं यथा भवति तथा पातिनः ॥ ७९ । ८० ॥
हे राम ! उत्तरप्रदेशे द्रुमकुल्यसंज्ञास्य ।। ८१ ।।
तत्र तेषु पापात्मसु ।। ८२ । ८३ ।।
ब्रह्मणो लब्धवरत्वात् अस्मिन् कार्य्ये सेतुबन्धनकार्य्ये ।। ८४ ।।

---

(१) निपात्यते इति क्वचित् पाठः ।

कीर्त्तिं जानन्तु(१)ते लोकाः सर्वलोकमलापहाम्।
इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम्॥ ८५॥
ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः।
नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धने॥ ८६॥

ततोऽतिहृष्टः प्लवगेन्द्रयूथपै-
र्महानगेन्द्रप्रतिमैर्युतोऽनलः।
बबन्ध सेतुं शतयोजनायतं
सुविस्तृतं पर्वतपादपैर्दृढम्॥ ८७॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
तृतीयः सर्गः।

कीर्त्तिं सेतुबन्धनकृतां या कीर्त्तिः सेत्वात्मिका दृष्टा सती सर्व-लोकपापहर्त्री॥ ८५॥
वानरैः सहेति शेषः॥ ८६॥
पर्वतपादपैः पर्वतैः पादपैश्च॥ ८७॥

इति श्रीमत्सकलराजधिपदुरन्धरणसमर्थेत्यादिवि० श्रीरामवर्मणः कृतौ
श्रीमदध्यात्मरामायणे सेतौ युद्धकाण्डे
तृतीयः सर्गः।

---

(१) गायन्तु इति केचित् पठन्ति।

अथ चतुर्थः सर्गः ।

सेतुमारभमाणस्तु तत्र रामेश्वरं शिवम् ।
संस्थाप्य पूजयित्वाह रामो लोकहिताय च ॥ १ ॥
प्रणमेत् सेतुबन्धं यो दृष्ट्वा रामेश्वरं शिवम् ।
ब्रह्महत्यादिपापेभ्यो मुच्यते मदनुग्रहात् ॥ २ ॥
सेतुबन्धे नरः स्नात्वा दृष्ट्वा रामेश्वरं हरम् ।
सङ्कल्पनियतो भूत्वा गत्वा वाराणसीं नरः ॥ ३ ॥
आनीय गङ्गासलिलं रामेशमभिषिच्य च ।
समुद्रे क्षिप्ततद्भारो ब्रह्म प्राप्नोत्यसंशयम् ॥ ४ ॥
कृतानि प्रथमेनाह्ना योजनानि चतुर्दश ।
द्वितीयेन तथा चाह्ना योजनानि तु विंशतिः ॥ ५ ॥
तृतीयेन तथा चाह्ना योजनान्येकविंशतिः ।
चतुर्थेन तथा चाह्ना द्वाविंशतिरिति श्रुतम् ॥ ६ ॥
पञ्चमेन त्रयोविंशद्योजनानि समन्ततः ।
बबन्ध सागरे सेतुं नलो वानरसत्तमः ॥ ७ ॥

सेतुमिति निर्विघ्नत्वार्थं दृष्टार्थं पुण्यार्थं च तदेवाह लोकहिताय चेति ॥ १ ॥

तदेव स्पष्टयति प्रणमेदिति ॥ २ ॥

सङ्कल्पनियतः सङ्कल्पपूर्वकमित्यर्थः मध्ये कार्यान्तरमकुर्वन्निति यावत् ॥ ३ ॥

क्षिप्ततद्भारः जलानयनपात्रादिभारः ॥ ४ ॥

चतुर्दशयोजनानि सेतुयुक्तानि कृतानि ॥ ५ । ६ ॥

त्रयोविंशदिति त्रयोविंशतिरित्यर्थं आर्षं बबन्ध एवं क्रमेण बबन्धेत्यर्थः ॥ ७ । ८ ॥

तेनैव जग्मुः कपयो योजनानां शतं द्रुतम्।
असङ्ख्याताः सुवेलाद्रिं रुरुधुः प्लवगोत्तमाः॥ ८ ॥
आरुह्य मारुतिं रामो लक्ष्मणोऽप्यङ्गदं तथा।
दिदृक्षू राघवो लङ्कामारुरोहाचलं महत्॥ ९ ॥
दृष्ट्वा लङ्कां सुविस्तीर्णां नानाचित्रध्वजाकुलाम्।
चित्रप्रासादसम्बाधां स्वर्णप्राकारतोरणाम्॥ १० ॥
परिखाभिः शतघ्नीभिः संक्रमैश्च विराजिताम।
प्रासादोपरि विस्तीर्णप्रदेशे दशकन्धरः॥ ११ ॥
मन्त्रिभिः सहितो वीरैः किरीटदशकोज्ज्वलः।
नीलाद्रिशिखराकारः कालमेघसमप्रभः॥ १२ ॥
रत्नदण्डैः सितच्छत्रैरनेकैः परिशोभितः।
एतस्मिन्नन्तरे बद्धो मुक्तो रामेण वै शुकः॥ १३ ॥
वानरैस्ताडितः सम्यक् दशाननमुपागतः।
प्रहसन् रावणः प्राह पीडितः किम्परैः शुक!॥१४॥
रावणस्य वचः श्रुत्वा शुको वचनमब्रवीत्।
सागरस्योत्तरे तीरेऽब्रुवन्ते वचनं यथा।
तत उत्प्लुत्य कपयो गृहीत्वा मां क्षणात्ततः॥ १५ ॥
मुष्टिभिर्नखदन्तैश्च हन्तुं लोप्तुं प्रचक्रमुः।
ततो मां राम! रक्षेति क्रोशन्तं रघुपुङ्गवः॥ १६ ॥

महदिति क्लीबत्वमार्षम् तोरणं पुरद्वारम्॥ १०—१२॥
हे शुक त्वं परैः पीड़ितः किम्॥ १४॥
ते तव वचनम् अब्रूवं सुग्रीवं प्रतीति शेषः॥ १५॥
मुष्टिभिर्हन्तुं नखदन्तैर्लोप्तुं कर्त्तुं हे राम! मां रक्षेति क्रोशन्तं मां दृष्ट्वा अयं विसृज्यतामिति वानरान् प्राह॥ १६। १७॥

विसृज्यतामिति प्राह विसृष्टोऽहं कपीश्वरैः ।
ततोऽहमागतो भीत्या दृष्ट्वा तद्वानरं बलम् ॥ १७ ॥
राक्षसानां बलौघस्य वानरेन्द्रबलस्य च ।
नैतयोर्विद्यते सन्धिर्देवदानवयोरिव ॥ १८ ॥
पुरप्राकारमायान्ति क्षिप्रमेकतरं कुरु ।
सीतां वास्मै प्रयच्छाशु युद्धं वा दीयतां प्रभो ! ॥ १९ ॥
मामाह रामस्त्वं ब्रूहि रावणं मद्वचः शुक ! ।
यद्बलं च समाश्रित्य सीतां मे हृतवानसि ॥ २० ॥
तद्दर्शय यथाकामं ससैन्यः सहबान्धवः ।
श्वःकाले नगरीं लङ्कां सप्राकारां सतोरणाम् ॥ २१ ॥
राक्षसं च बलं पश्य शरैर्विध्वंसितं मया ।
घोररोषमहं मोक्ष्ये बलं धारय रावण ! ॥ २२ ॥
इत्युक्त्वोपरराामाथ रामः कमललोचनः (१) ।
एकस्थानगता यत्र चत्वारः पुरुषर्षभाः ॥ २३ ॥
श्रीरामो लक्ष्मणश्चैव सुग्रीवश्च विभीषणः ।
एत एव समर्थास्ते लङ्कां नाशयितुं प्रभो ! ॥ २४ ॥
उत्पाट्य भस्मीकरणे सर्वे तिष्ठन्तु वानराः ।

त्वदुक्तसन्धिभेदादि अवस्थान्तरमित्याह राक्षसानामिति ॥१८॥
आयान्ति वानरा इति शेषः ॥ १९ । २० ॥
श्वः काले श्वः प्रातःकाल इत्यर्थः नगरीं लङ्कामित्यत्र शरैर्विध्वं-
सितामिति लिङ्गविभक्तिविपरिणामेनान्वयः ॥ २१—२४ ॥

---

(१) कञ्जनिभेक्षण इति वा पाठः ।

तस्य यादृग्बलं दृष्टं रूपं प्रहरणानि(१) च ॥ २५ ॥
वधिष्यति पुरं सर्वमेकस्तिष्ठन्तु ते त्रयः।
पश्य वानरसेनां तामसंख्यातां प्रपूरिताम् ॥ २६ ॥
गर्जन्ति वानरास्तत्र पश्य पर्वतसन्निभाः।
न शक्यास्ते गणयितुं प्राधान्येन ब्रवीमि ते ॥ २७ ॥
एष योऽभिमुखो लङ्कां नदन् तिष्ठति वानरः।
यूथपानां सहस्राणां शतेन परिवारितः ॥ २८ ॥
सुग्रीवसेनाधिपतिर्नीलो नामाग्निनन्दनः।
एष पर्वतशृङ्गाभः पद्मकिञ्जल्कसन्निभः ॥ २९ ॥
स्फोटयत्यभिसंरब्धो लाङ्गूलं च पुनः पुनः।
युवराजोऽङ्गदो नाम वालिपुत्रोऽतिवीर्य्यवान् ॥ ३० ॥
येन दृष्टा जनकजा रामस्यातीव वल्लभा।
हनूमानेष विख्यातो हतो येन तवात्मजः ॥ ३१ ॥
श्वेतो रजतसङ्काशो महाबुद्धिपराक्रमः।
तूर्णं सुग्रीवमागम्य पुनर्गच्छति वानरः ॥ ३२ ॥

लङ्कानाशस्य प्रकारविशेषमाह उत्पाद्य भस्मीकरणे इति पुनर्वि-
चार्य्य एको राम एव तन्नाशेऽलमित्याह तस्येति ॥ २५ ॥

प्रपूरिताम् प्रकर्षेण पूरिता लङ्का यया ताम् यद्वा रामतेजसा
पूरिताम् ॥ २६-२८ ॥

अग्निनन्दनः अग्निपुत्रः अथाङ्गदं दर्शयति एष इति ॥ २९ ॥

लाङ्गूलं स्फोटयति भुव्याहन्ति ॥ ३० ॥

हनूमन्तं दर्शयति येनेति ॥ ३१ ॥

श्वेतः नाम्ना यः सुग्रीवसमीपमागम्य पुनर्गच्छति स श्वेतनामा ३२

---

(१) तेजःप्रहराणीति पाठान्तरम्।

यस्त्वेष सिंहसङ्काशः पश्यत्यतुलविक्रमः ।
रम्भो नाम महासत्त्वो लङ्कां नाशयितुं क्षमः ॥ ३३ ॥
एष पश्यति वै लङ्कां दिधक्षन्निव वानरः ।
शरभो नाम राजेन्द्र ! कोटियूथपनायकः ॥ ३४ ॥
पनसश्च महावीर्य्यो मैन्दश्च द्विविदस्तथा ।
नलश्च सेतुकर्त्तासौ विश्वकर्मसुतो बली ॥ ३५ ॥
वानराणां वर्णने वा संख्याने वा क ईश्वरः ।
शूराः सर्वे महाकायाः सर्वे युद्धाभिकाङ्क्षिणः ॥ ३६ ॥
शक्ताः सर्वे चूर्णयितुं लङ्कां रक्षोगणैः सह ।
एतेषां बलसंख्यानं प्रत्येकं वच्मि ते शृणु ॥ ३७ ॥
एषां कोटिसहस्राणि नव पञ्च च सप्त च ।
तथा शङ्खसहस्राणि तथार्बुदशतानि च ॥ ३८ ॥
सुग्रीवसचिवानां ते बलमेतत्प्रकीर्त्तितम् ।
अन्येषां तु बलं नाहं वक्तुं शक्तोऽस्मि(१)रावण ! ॥३९॥
रामो न मानुषः साक्षादादिनारायणः परः ।

रम्भाख्यं दर्शयति यस्त्विति ॥ ३३ ॥
शरभं दर्शयति एष इति ॥ ३४ ॥
अथ पनसादीन् दर्शयति ॥ ३५ ॥
वर्णने स्तुतिकथने संख्याने गणने ॥ ३६ ॥
रक्षोगणसहितां लङ्कामित्यर्थः बलसंख्यानं योद्धृगणनम् ॥ ३७ ॥
एषां नीलाङ्गदहनूमच्छ्वेतरम्भशरभपनसमैन्दद्विविदानां दशानाम् नव पञ्चसप्त एकविंशतिरित्यर्थः ॥ ३८ । ३९ ॥

---

(१) शक्नोमीति तु कुत्रचित् पाठः ।

सीता साक्षाज्जगद्धेतु(१)श्चिच्छक्तिर्जगदात्मिका ॥४०॥
ताभ्यामेव समुत्पन्नं जगत् स्थावरजङ्गमम्।
तस्माद्रामश्च सीता च जगतस्तस्थुषश्च तौ ॥ ४१ ॥
पितरौ पृथिवीपाल! तयोर्वैरी कथं भवेत्?।
अजानता त्वया नीता जगन्मातैव जानकी ॥ ४२ ॥
क्षणनाशिनि संसारे शरीरे क्षणभङ्गुरे।
पञ्चभूतात्मके राजन्! चतुर्विंशतितत्त्वके ॥ ४३ ॥
मलमांसास्थिदुर्गन्धभूयिष्ठेऽहङ्कृतालये।
केवात्मा व्यतिरिक्तस्य काये तव जडात्मके? ॥ ४४ ॥
यत्कृते ब्रह्महत्यादिपातकानि कृतानि ते।
भोगभोक्ता तु यो देहः स देहोऽत्र पतिष्यति ॥ ४५ ॥

जगदात्मिका जगत्स्वरूपा मायास्वरूपं दृश्यं जगदेव सूक्ष्मरूपेणेत्याशयः ॥ ४० ॥

समुत्पन्नं स्थूलरूपेणेत्यर्थः जगतस्तस्थुषश्च स्थावरजङ्गमात्मकस्य संसारस्य तौ सीतारामौ ॥ ४१ ॥

पितरौ मातापितरौ तयोर्वैरी तद्वैरवान् कथं भवेत् कथं जीवेदित्यर्थः जगन्मातैवेत्यनेनार्यास्तवापि मातेति व्यङ्ग्यम् ॥ ४२ ॥

क्षणनाशित्वेनात्यन्तास्थिरत्वबोधनम् तत्र हेतुः पञ्चभूतात्मके इति चतुर्विंशतितत्त्वके तदात्मके बुद्ध्यहङ्कारैकादशेन्द्रियपञ्चभूततद्गुणरूपादिपञ्चकात्मकत्वात् विकारद्वारा च प्रकृतेरप्यत्रानुगम इति चतुर्विंशतितत्त्वात्मकत्वम् ॥ ४३ ॥

अहङ्कारस्यालये स्थानभूते तेभ्यश्चतुर्विंशतिभ्यो भिन्नस्य जडात्मके देहे केवात्मा ॥ ४४ ॥

तस्य देहस्य कृते तत्पोषणादिनिमित्तम् यो देहः स्थूलः ॥ ४५ ॥

(१) जगद्धात्री इति केचित् पठन्ति।

पुण्यपापे समायातो जीवेन सुखदुःखयोः ।
कारणे देहयोगादिनात्मनः कुरुतोऽनिशम् ॥ ४६ ॥
यावद्देहोऽस्मि कर्त्ताऽस्मीत्यात्माहं कुरुतेऽवशः ।
अध्यासात्तावदेव स्याज्जन्मनाशादिसम्भवः ॥ ४७ ॥
तस्मात्त्वं त्यज देहादावभिमानं महामते ! ।
आत्मातिनिर्मलः शुद्धो विज्ञानात्माचलोऽव्ययः ॥ ४८ ॥
स्वाज्ञानवशतो बन्धं प्रतिपद्य विमुह्यति ।
तस्मात्त्वं शुद्धभावेन ज्ञात्वात्मानं सदा स्मर ॥ ४९ ॥
विरतिं भज सर्वत्र पुत्रदारगृहादिषु ।
निरयेष्वपि भोगः स्याच्छ्वसूकरतनावपि ॥ ५० ॥
देहं लब्ध्वा विवेकाढ्यं द्विजत्वं च विशेषतः ।

सुखदुःखयोः कारणे पुण्यपापे जीवेन सह समायातः समागते इत्यर्थं आगतं तत् ते च पुण्यपापे देहयोगादिना आत्मनः सुखदुःखे कुरुतो न तु स्वतस्तौ आत्मनः इत्यर्थः ॥ ४६ ॥

देहयोगः कीदृशः तत्राह यावदिति अध्यासादहङ्कारतादात्म्याध्यासात् अकर्त्तात्मा यावदवशोऽहं कुरुत इत्यर्थः एतेन ज्ञानिनो देहसम्बन्धेऽपि दुःखाद्यभावाद्देहयोगेनैव दुःखमित्ययुक्तमित्यपास्तम् अहङ्काराध्यासरूपस्यैव योगस्य विवक्षितत्वात् ॥ ४७ ॥

उपसंहरति तस्मादिति ॥ ४८ ॥

स्वाज्ञानं स्वस्वरूपस्य शुद्धत्वादेरज्ञानं तद्वशतो बन्धं शरीरादिसम्बन्धं प्राप्य मुह्यति पुनः पुनः कर्मसु प्रवर्त्तते आत्मानं शुद्धबुद्धमुक्तस्वभावं ज्ञात्वा सदा स्मरेत्यनेनाविच्छेदेन तत्स्मरणाभ्यासो मोक्षहेतुरित्युक्तम् ॥ ४९ ॥

अथ तादृशज्ञानसाधनं वैराग्यमाह विरतिमिति ननु सर्वत्र विरतौ भोगसुखं हीयेतेति तत्राह निरयेष्वपीति एवञ्चेहभोगोऽपि हेय एवेति भावः ॥ ५० ॥

तत्रापि भारते वर्षे कर्मभूमौ सुदुर्लभम् ॥ ५१ ॥
को विद्वानात्मसात्कृत्वा देहं भोगानुगो भवेत्।
अतस्त्वं ब्राह्मणो भूत्वा पौलस्त्यतनयश्च सन् ॥ ५२ ॥
अज्ञानीव सदा भोगाननुधावसि किं मुधा ?!
इतः परं वा त्यक्त्वा त्वं सर्वसङ्गं समाश्रय ॥ ५३ ॥
राममेव परात्मानं भक्तिभावेन सर्वदा।
सीतां समर्प्य रामाय तत्पादानुचरो भव ॥ ५४ ॥
विमुक्तः सर्वपापेभ्यो विष्णुलोकं प्रयास्यसि।
नो चेद्गमिष्यसेऽधोऽधः पुनरावृत्तिवर्जितः।
अङ्गीकुरुष्व मद्वाक्यं हितमेव वदामि ते ॥ ५५ ॥

सत्सङ्गतिं कुरु भजस्व हरिं शरण्यं
श्रीराघवं मरकतोपलकान्तिकान्तम्।
सीतासमेतमनिशं धृतचापबाणं
सुग्रीवलक्ष्मणविभीषणसेविताङ्घ्रिम् ॥ ५६ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
चतुर्थः सर्गः।

सर्वथा दुर्लभं तत्रापि भारते वर्षे कर्मभूमौ सुतरां दुर्लभं विवेकाद्
ब्रह्मावतायोग्यं देहं लब्ध्वा विशेषतश्च द्विजत्वं लब्ध्वा ॥ ५१ ॥

को विद्वान् देहमात्मसात् आत्माधीनं कृत्वा अर्थात्स्वयं देहभोगा-
नुगो भवेदित्यन्वयः पौलस्त्यतनयस्येत्यनेन विशुद्धवंशतोक्ता ॥ ५२ ॥

सर्वसङ्गं त्यक्त्वा राममेवाश्रयेत्यन्वयः ॥ ५३ । ५४ ॥

पुनरावृत्तिवर्जित इति पुनरावृत्त्या उत्तमलोकाद्वर्जितः कीर्ति-
तत इत्यर्थः ॥ ५५ ॥

मरकतोपलो मरकतमणिस्तद्वत्कान्तं श्यामदेहम् ॥ ५६ ॥

इति चतुर्थः सर्गः।

अथ पञ्चमः सर्गः ।

श्रुत्वा शुकमुखोद्गीतं वाक्यमप्राननाशनम् ।
रावणः क्रोधताम्राक्षो दहन्निव तमब्रवीत् ॥ १ ॥
अनुजीव्य सुदुर्बुद्धे ! गुरुवद्भाषसे कथम् ? ।
शासिताहं त्रिजगतां त्वं मां शिक्षन्न लज्जसे ? ॥ २ ॥
इदानीमेव हन्मि त्वां किन्तु पूर्वकृतं तव ।
स्मरामि तेन रक्षामि त्वां यद्यपि वधोचितम् ॥ ३ ॥
इतो गच्छ विमूढ ! त्वमेवं श्रोतुं न मे क्षमम् ।
महाप्रसाद इत्युक्त्वा वेपमानो गृहं ययौ ॥ ४ ॥
शुकोऽपि ब्राह्मणः पूर्वं ब्रह्मिष्ठो ब्रह्मवित्तमः ।
वानप्रस्थविधानेन वने तिष्ठन् स्वकर्मकृत् ॥ ५ ॥
देवानामभिवृद्ध्यर्थं विनाशाय सुरद्विषाम् ।
चकार यज्ञविततिमविच्छिन्नां महामतिः ॥ ६ ॥
राक्षसानां विरोधीऽभूच्छुको देवहितोद्यतः ।
वज्रदंष्ट्र इति ख्यातस्तत्रैको राक्षसो महान् ॥ ७ ॥

श्रुत्वेति ॥ १ ॥

सुतरां दुर्मते मामनुजीव्य मम सेवको भूत्वेति यावत् गुरुवत्कथं भाषसे सर्वशिक्षकं मां शिक्षन् शिक्षयन् इत्यर्थः ॥ २ ॥

पूर्वकृतं पूर्वोपकृतं यद्यपि त्वं वधोचितस्तथापि तेन पूर्वोपकारस्मरणेन त्वां रक्षामीत्यन्वयः ॥ ३ ॥

एवंविधं वाक्यम् गृहं वैखानसाश्रमम् ॥ ४ ॥

अमुमेवार्थमितिहासपूर्वमाह शुकोऽपीति ॥ ५ ॥

अविच्छिन्नां यज्ञविततिं मध्ये विच्छेदरहितं यज्ञविस्तरम् ॥ ६ ॥

शुको देवहितोद्यत इति ज्ञात्वा राक्षसानां शुके विरोधो द्वेष्यत्वबुद्धिरभूत् ॥ ७ ॥

अन्तरं प्रेप्सुरातिष्ठच्छुकापकरणोद्यतः।
कदाचिदागतोऽगस्त्यस्तस्याश्रमपदं मुनिः॥ ८॥
तेन सम्पूजितोऽगस्त्यो भोजनार्थं निमन्त्रितः।
गते स्नातुं मुनौ कुम्भसम्भवे प्राप्य चान्तरम्॥ ९॥
अगस्त्यरूपधृक् सोऽपि राक्षसः शुकमब्रवीत्।
यदि दास्यसि मे ब्रह्मन्! भोजनं देहि सामिषम्॥१०
बहुकालं न भुक्तं मे मांसं छागादिसम्भवम्॥ ११॥
तथेति कारयामास मांसभोज्यं सविस्तरम्।
उपविष्टे मुनौ भोक्तुं राक्षसोऽतीव सुन्दरम्।
शुकभार्य्यावपुर्धृत्वा तां चान्तर्मोहयन् खलः॥ १२॥
नरमांसं ददौ तस्मै सुपक्वं बहुविस्तरम्।
दत्त्वैवान्तर्दधे रक्षस्ततो दृष्ट्वा चुकोप सः॥ १३॥
अमेध्यं मानुषं मांसमगस्त्यः शुकमब्रवीत्।
अभक्ष्यं मानुषं मांसं दत्तवानसि दुर्मते!॥ १४॥
मह्यं त्वं राक्षसो भूत्वा तिष्ठ त्वं मानुषाशनः।

शुकापकरणे शुकस्यापकारे उद्यतः शुकापकारम् आतिष्ठत्प्रतिज्ञा-तवान् परन्तु पदमार्गं तस्य शुकस्य॥ ८॥

अन्तरमवसरम्॥ ९॥

सामिषं समांसम्॥ १०॥

मांसभोज्यम् मांसयुक्तभोज्यम्॥ ११॥

तां च शुकभार्यां चान्तः तच्छरीरान्तर्मायया प्रविश्य मोहयन् मायाजालतो बहिर्निःसरणाक्षमां कुर्वन्॥ १२॥

सः अगस्त्यः अमेध्यं मानुषं मांसं दृष्ट्वा चुकोप कुपितश्च सन् अ-गस्त्यः शुकमब्रवीत्॥ १३। १४॥

इति शप्तः पुरी भीत्या प्राहागस्त्यं मुने ! त्वया ॥ १५ ॥
इदानीं भाषितं मेऽद्य मांसं देहीति विस्तरम् ।
तथैव दत्तं मे देव ! किं मे शापं प्रदास्यसि ? ॥ १६ ॥
श्रुत्वा शुकस्य वचनं मुहूर्त्तं ध्यानमास्थितः ।
ज्ञात्वा रक्षःकृतं सर्वं ततः प्राह शुकं सुधीः ॥ १७ ॥
तवापकारिणा सर्वं राक्षसेन कृतं त्विदम् ।
अविचार्य्यैव मे दत्तः शापस्ते मुनिसत्तम ! ॥ १८ ॥
तथापि मे वचोऽमोघमेवमेव भविष्यति ।
राक्षसं वपुरास्थाय रावणस्य सहायकृत् ॥ १९ ॥
तिष्ठ तावद्यदा रामो दशाननबधाय हि ।
आगमिष्यति लङ्कायाः समीपं वानरैः सह ॥ २० ॥
प्रेषितो रावणेन त्वं चारो भूत्वा रघूत्तमम् ।
दृष्ट्वा शापाद्विनिर्मुक्तो बोधयित्वा च रावणम् ॥ २१ ॥
तत्त्वज्ञानं ततो मुक्तः परं पदमवाप्स्यसि ।
इत्युक्तोऽगस्त्यमुनिना शुको ब्राह्मणसत्तमः ।
बभूव राक्षसः सद्यो रावणं प्राप्य संस्थितः ।

यतस्त्वं मह्यं मानुषं मांसं दत्तवानसि अतस्त्वं मानुषाशनो राक्षसो भूत्वा तिष्ठ ॥ १५ ॥

अद्य मे विस्तरम् विस्तरयुतं मांसं देहीति इदानीमुक्तं तथैव मे मया दत्तमतो मे मम शापं किं प्रदास्यसि आर्षमेतत् ॥ १६ । १७ । १८ ॥

यतो मे वचोऽमोघमनिष्फलमत एवमेव मदुक्तं भविष्यति तदेव सदा शापान्तमाह राक्षसं वपुरिति ॥ १९ । २० ॥

तदागमनोत्तरं रावणेन प्रेषितश्चारो भूत्वा रघूत्तमं दृष्ट्वा शापाद्विनिर्मुक्तः रक्षःस्वभावाद्विनिर्मुक्तः ॥ २१ ॥

इदानीं चाररूपेण दृष्ट्वा रामं सहानुजम् ॥ २३ ॥
रावणं तत्त्वविज्ञानं बोधयित्वा पुनर्द्रुतम् ।
पूर्ववद्ब्राह्मणो भूत्वा स्थितो वैखानसैः सह ॥ २४ ॥
ततः समागमद्वृद्धो माल्यवान् राक्षसो महान् ।
बुद्धिमान्नीतिनिपुणो राज्ञो मातुः प्रियः पिता ॥ २५ ॥
प्राह तं राक्षसं वीरं प्रशान्तेनान्तरात्मना ।
शृणु राजन् ! वचो मेऽद्य श्रुत्वा कुरु यथेप्सितम् ॥ २६ ॥
यदा प्रविष्टा नगरीं जानकी रामवल्लभा ।
तदादि पुर्यां दृश्यन्ते निमित्तानि दशानन ! ॥ २७ ॥
घोराणि नाशहेतूनि तानि मे वदतः शृणु ।
खरस्तनितनिर्घोषा मेघा अतिभयङ्कराः ॥ २८ ॥
शोणितेनाभिवर्षन्ति लङ्कामुष्णेन सर्वदा ।
रुदन्ति देवलिङ्गानि स्विद्यन्ति प्रचलन्ति च ॥ २९ ॥
कालिका पाण्डुरैर्दन्तैः प्रहसन्त्यग्रतः स्थिता ।
खरा गोषु प्रजायन्ते मूषका नकुलैः सह ॥ ३० ॥

रावणं तत्त्वज्ञानं बोधयित्वा च ततो शुकः मत्समीपाद्गच्छेति तेन मुक्तः परं पदं वैखानसं पदम् ॥ २२ । २३ । २४ ॥

राज्ञो मातुः पिता राज्ञः प्रियश्चार्थः ॥ २५ । २६ ॥

तदादि जानकीप्रवेशदिनादारभ्य पुर्यां लङ्कायां घोराणि निमित्तानि उत्पाता दृश्यन्ते इत्यन्वयः ॥ २७ ॥

घोरत्वविवरणं नाशहेतूनीति खरं कठोरं स्तनितं गर्जितं निर्घोषः वज्रपातः यत्र च येषां ते ॥ २८ ॥

देवलिङ्गानि देवस्थानभूताः प्रतिमाः स्विद्यन्ति स्वेदवन्ति भवन्ति ॥ २९ ॥

अग्रतः प्रतिराक्षसं पुरःस्थिता कालिका पाण्डुरैः दन्तैः प्रकाशितैः

मार्जारेण तु युध्यन्ति पन्नगा गरुडेन तु ।
करालो विकटो मुण्डः पुरुषः कृष्णपिङ्गलः ॥ २१ ॥
कालो गृहाणि सर्वेषां काले काले त्ववेक्षते ।
एतान्यन्यानि दृश्यन्ते निमित्तान्युद्भवन्ति च ॥२२॥
अतः कुलस्य रक्षार्थं शान्तिं कुरु दशानन ! ।
सीतां सत्कृत्य सधनां रामायाशु प्रयच्छ भो ! ॥२३॥
रामं नारायणं विद्धि विद्वेषं त्यज राघवे ।
यत्पादपोतमाश्रित्य ज्ञानिनो भवसागरम् ॥ २४ ॥
तरन्ति भक्तिपूतात्मा ततो रामो न मानुषः ।
भजस्व भक्तिभावेन रामं सर्वहृदालयम् ॥ २५ ॥
यद्यपि त्वं दुराचारो भक्त्या पूतो भविष्यसि ।
मद्वाक्यं कुरु राजेन्द्र ! कुलकौशलहेतवे ॥ २६ ॥
तत्तु माल्यवतो वाक्यं हितमुक्तं दशाननः ।

इति सर्वान् भक्षयामीत्याशयेन हासः मञ्जुलसहिता मूषका मार्जारभक्ष्या मार्जारैर्युध्यन्ति तेन रक्षोभक्ष्येभ्यो वानरमनुष्येभ्य एव रक्षसां भयमिति सूचितम् ॥ २० ॥

कालो मृत्युस्वरूपः काले काले वारं प्रातरवेक्षते एतान्युक्तानि एवं जातीयकान्यन्यानि च जातानि दृश्यन्ते अन्यान्युद्भवन्ति जायन्ते ॥२१।२२॥

शान्ति उत्पातसूचितारिष्टनाशकर्म तदेव कमाह सीतामिति॥२३॥

रामस्य नारायणत्वे गमकमाह यत्पादेति पोतो नौका ज्ञानिभवतरन्तीत्यन्वयः ॥ २४ ॥

भक्त्या पूतं पवित्रम् अन्तःकरणं येषां ते भक्तिपूतात्मा: आर्षो रेफलोपः सर्वेषां हृद् हृदयम् आलयः स्थानं यस्य तेन सर्वान्तर्यामिणमित्यर्थः ॥२५॥

भक्तोऽस्य तथापोत्याह भक्त्या रामभक्त्या कुलस्य कुशलमेव कौशलं हेतवे तन्निमित्तमित्यर्थः ॥ २६ ॥

न मर्षयति दुष्टात्मा कालस्य वशमागतः ॥ ३७ ॥
मानवं कृपणं राममेकं शाखामृगाश्रयम् ।
समर्थं मन्यसे केन ? हीनं पित्रा मुनिप्रियम् ॥३८ ॥
रामेण प्रेषितो नूनं भाषसे त्वमनर्गलम् ।
गच्छ वृद्धोऽसि बन्धुस्त्वं सोढं सर्वं त्वयोदितम् ॥३९॥
इतो मत्कर्णपदवीं दहत्येतद्वचस्तव ।
इत्युक्त्वा सर्वसचिवैः सहितः प्रस्थितस्तदा ॥ ४० ॥
प्रासादाग्रे समासीनः पश्यन् वानरसैनिकान् ।
युद्धायायोजयत्सर्वराक्षसान् समुपस्थितान् ॥ ४१ ॥
रामोऽपि धनुरादाय लक्ष्मणेन समाहृतम् ।
दृष्ट्वा रावणमासीनं कोपेन कलुषीकृतः ॥ ४२ ॥
किरीटिनं समासीनं मन्त्रिभिः परिवेष्टितम् ।
अर्धचन्द्रनिभेनैव बाणेनैकेन राघवः ॥ ४३ ॥
श्वेतच्छत्रसहस्राणि किरीटदशकं तथा ।
चिच्छेद निमिषार्द्धेन तदद्भुतमिवाभवत् ॥ ४४ ॥

न मर्षयति न हि तत्त्वेन स्पृहातीत्यर्थः ॥ ३७ ॥
अमर्षमेव प्रकटयति मानवमिति कृपणम् अप्रसादादिदयापात्रं शाखा-
मृगा वानराः मुनिप्रियत्वेनातिनिःसारत्वं सूचितम् ॥ ३८ ॥
यतस्त्वं वृद्धो बन्धुरतस्त्वयोदितं सर्वं सोढम् ॥ ३९ ॥
इतस्तव वक्त्रान्निःसृतमेतद्वचः कर्णपदवीं दहति प्रस्थितः सभा-
मध्याद्रावण इति शेषः ॥ ४० ॥
समुपस्थितान् सन्निहितान् ॥ ४१ ॥
समाहृतं समानीय दत्तम् ॥४२ । ४३ ॥
श्वेतच्छत्रसहस्राणि अतिमहत्त्वादिदृश्यानेकच्छत्रधारणात् ॥४४।४५॥

लज्जितो रावणस्तूर्णं विवेश भवनं स्वकम्।
आहूय राक्षसान् सर्वान् प्रहस्तप्रमुखान् खलः ॥४५॥
वानरैः सह युद्धाय नोदयामास सत्वरः।
ततो भेरीमृदङ्गाद्यैः पणवानकगोमुखैः ॥ ४६ ॥
महिषोष्ट्रैः खरैः सिंहैर्द्वीपिभिः कृतवाहनाः।
खड्गशूलधनुःपाशयष्टितोमरशक्तिभिः ॥ ४७ ॥
लक्षिताः सर्वतो लङ्कां प्रतिद्वारमुपाययुः।
तत्पूर्वमेव रामेण नोदिता वानरर्षभाः ॥ ४८ ॥
उद्यम्य गिरिशृङ्गाणि शिखराणि महान्ति च।
तरूंश्चोत्पाद्य विविधान् युद्धाय हरियूथपाः ॥ ४९ ॥
प्रेक्षमाणा रावणस्य तान्यनीकानि भागशः।
राघवप्रियकामार्थं लङ्कामारुरुहुस्तदा॥ ५० ॥
ते द्रुमैः पर्वताग्रैश्च मुष्टिभिश्च प्लवङ्गमाः।
ततः सहस्रयूथाश्च कोटियूथाश्च यूथपाः ॥ ५१ ॥

पणवानकगोमुखैः वाद्यविशेषैः ॥ ४६ ॥

कृतवाहना आरूढमहिषादिवाहनाः खड्गादिभिरायुधैर्लक्षिताः तादृशायुधधरा इत्यर्थः ॥ ४७ ॥

लङ्कां सर्वतः प्रतिद्वारं चोपाययुः ॥ ४८ ॥

शृङ्गाणि सूक्ष्मोन्नतभागाः शिखराणि ततो विपुलानि युद्धाय स्थिता इति शेषः ॥ ४९ ॥

रावणस्य भागशः तत्तद्देशं सत्वरवीरांशत्वेन गृहीत्वा स्थितानीति शेषः ॥ ५० ॥

ते द्रुमैरित्याद्यैरुपलक्षिता इति शेषः सहस्रयूथा सहस्रसंख्येया यूथा येषाम् ॥ ५१ ॥

कोटीशतयुताश्चान्ये रुरुधुर्नगरं भृशम्।
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः॥ ५२॥
रामो जयत्यतिबलो लक्ष्मणश्च महाबलः।
राजा जयति सुग्रीवो राघवेणानुपालितः॥ ५३॥
इत्येवं घोषयन्तश्च समं युयुधिरेऽरिभिः।
हनूमानङ्गदश्चैव कुमुदो नील एव च॥ ५४॥
नलश्च शरभश्चैव मैन्दो द्विविद एव च।
जाम्बवान् दधिवक्त्रश्च केशरी तार एव च॥ ५५॥
अन्ये च बलिनः सर्वे यूथपाश्च प्लवङ्गमाः।
द्वाराण्युत्प्लुत्य लङ्कायाः सर्वतो रुरुधुर्भृशम्।
तदा वृक्षैर्महाकायाः पर्वताग्रैश्च वानराः॥ ५६॥
निजघ्नुस्तानि रक्षांसि नखैर्दन्तैश्च वेगिताः।
राक्षसाश्च तदा भीमा द्वारेभ्यः सर्वतो रुषा॥ ५७॥
निर्गत्य भिन्दिपालैश्च खड्गैः शूलैः परश्वधैः।
निजघ्नुर्वानरानीकं महाकाया महाबलाः॥ ५८॥
राक्षसांश्च तथा जघ्नुर्वानरा जितकाशिनः।
तथा बभूव समरो मांसशोणितकर्द्दमः॥ ५९॥
रक्षसां वानराणां च सम्बभूवाद्भुतोपमः।

आप्लवन्तः ऊर्द्ध्वं प्लवन्तः पुनरधःपतन्तः॥ ५२। ५३॥

अरिभिः राक्षसैः॥ ५४। ५५॥

सर्वतो रुरुधुः यथा रक्षसां बहिर्निर्गमो न भवति तथा स्वयमन्तः प्रविविशुरित्यर्थः॥ ५६॥ ५७॥

निर्गत्य बलेन वानरान् ततो निःसार्य्य स्वयं च बहिरागत्येत्यर्थः॥५८

समरः मांसशोणिताभ्यां कर्दमयुतभूप्रदेशकः॥ ५९॥

तै र्हयैश्च गजैश्चैव रथैः काञ्चनसन्निभैः। ६० ॥
रेजुर्घोराश्च युयुधिरे नादयन्तो दिशो दश।
राक्षसाश्च कपीन्द्राश्च परस्परजयैषिणः ॥ ६१ ॥
राक्षसान् वानरा जघ्नुर्वानरांश्चैव राक्षसाः।
रामेण विष्णुना दृष्टा हरयो दिविजांशजाः ॥ ६२ ॥
बभूवुर्बलिनो हृष्टास्तदा पीतामृता इव।
सीताभिमर्शपापेन रावणेनाभिपालितान् ॥ ६३ ॥
हतश्रीकान् हतबलान् राक्षसान् जघ्नुरोजसा।
चतुर्थांशावशेषेण निहतं राक्षसं बलम् ॥ ६४ ॥
स्वसैन्यं निहतं दृष्ट्वा मेघनादोऽथ दुष्टधीः।
ब्रह्मदत्तवरः श्रीमानन्तर्धानं गतोऽसुरः ॥ ६५ ॥
सर्वास्त्रकुशलो व्योम्नि ब्रह्मास्त्रेण समन्ततः।
नानाविधानि शस्त्राणि वानरानीकमर्दयन् ॥ ६६ ॥
ववर्ष शरजालानि तदद्भुतमिवाभवत्।
रामोऽपि मानयन् ब्राह्ममस्त्रमस्त्रविदांवरः ॥ ६७ ॥
क्षणं तूष्णीमुवासाथ ददर्श पतितं बलम्।

अद्भुतोपमः अद्भुतान्युपमीयन्तेऽनेन सकलाद्भुतयुद्धोपमानभूतः समरो बभूवेत्यन्वयः ॥ ६० ॥ ६१ ॥

विष्णुदृष्टत्वात् वानराणां हृष्टत्वं बलित्वं च सीताया दुष्टभावस्पर्शजनितपापवता रावणेन पालितत्वाद्रक्षसां हतश्रीकत्वाद्व्यतिरेकालङ्कारः ॥ ६२ ॥ ६३ ॥ ६४ ॥

अन्तर्धानमदृश्यत्वम् ॥ ६५ ॥

ब्रह्मास्त्रेण युतानि नानाविधानि शस्त्राणि ववर्षेति शेषः। वानरसेनां पीडयन् [illegible] शरजालानि ववर्ष ॥ ६६ ॥ ६७ ॥

वानराणां रघुश्रेष्ठश्चुकोपानलसन्निभः ॥ ६८ ॥
चापमानय सौमित्रे ! ब्रह्मास्त्रेणासुरं क्षणात् ।
भस्मीकरोमि मे पश्य बलमद्य रघूत्तम ! ॥ ६९ ॥
मेघनादोऽपि तच्छ्रुत्वा रामवाक्यमतन्द्रितः ।
तूर्णं जगाम नगरं मायया मायिकोऽसुरः ॥ ७० ॥
पतितं वानरानीकं दृष्ट्वा रामोऽतिदुःखितः ।
उवाच मारुतिं शीघ्रं गत्वा क्षीरमहोदधिम् ॥ ७१ ॥
तत्र द्रोणगिरिर्नाम दिव्यौषधिसमुद्भवः ।
तमानय द्रुतं गत्वा सञ्जीवय महामते ! ॥ ७२ ॥
वानरौघान् महासत्त्वान् कीर्त्तिस्ते सुस्थिरा भवेत् ।
आप्याय्यमानमित्युक्त्वा जगामानिलनन्दनः ॥ ७३ ॥
आनीय च गिरिं सर्वान् वानरान् वानरर्षभः ।
जीवयित्वा पुनस्तत्र स्थापयित्वा ययौ द्रुतम् ॥ ७४ ॥
पूर्ववद्भैरवं नादं वानराणां बलौघतः ।
श्रुत्वा विस्मयमापन्नो रावणो वाक्यमब्रवीत् ॥ ७५ ॥

वानराणां बलं पतितं ददर्श ततश्चुकोप ॥ ६८ ॥

कुपितश्चाह चापमिति चापहस्तस्यापि कोपातिशयेन तद्विस्मरणादिव चापमानयेत्युक्तिः रघूत्तम ! वत्स ! ॥ ६९ ॥

रामवाक्यं श्रुत्वा भीतः स जगाम माययादृश्यः सन्नेव जगाम ॥ ७० ॥ ७१ ॥

दिव्यौषधिसमुद्भवः दिव्यौषधीनां समुद्भवो यस्मिन्निति सः सञ्जीवय वानरौघानित्यन्वयः ॥ ७२ ॥

आप्याययानीति शेषः विश्वसहायस्य हनूमत एतत्कर्म न सन्दिग्धव्यम् ॥ ७३–७६ ॥

राघवो मे महान् शत्रुः प्राप्तो दैवविनिर्मितः ।
हन्तुं तं समरे शीघ्रं गच्छन्तु मम यूथपाः ॥ ७६ ॥
मन्त्रिणो बान्धवाः शूरा ये च मत्प्रियकाङ्क्षिणः ।
सर्वे गच्छन्तु युद्धाय त्वरितं मम शासनात् ॥ ७७ ॥
ये न गच्छन्ति युद्धाय भीरवः प्राणविप्लवात् ।
तान् हनिष्याम्यहं सर्वान् मच्छासनपराङ्मुखान् ॥७८ ॥
तच्छ्रुत्वा भयसन्त्रस्ता निर्जग्मू रणकोविदाः ।
अतिकायः प्रहस्तश्च महानादमहोदरौ ॥ ७९ ॥
देवशत्रुर्निकुम्भश्च देवान्तकनरान्तकौ ।
अपरे बलिनः सर्वे ययुर्युद्धाय वानरैः ॥ ८० ॥
एते चान्ये च बहवः शूराः शतसहस्रशः ।
प्रविश्य वानरं सैन्यं ममन्थु र्बलदर्पिताः ॥ ८१ ॥
भुशुण्डैर्भिन्दिपालैश्च बाणैः खड्गैः परश्वधैः ।
अन्यैश्च विविधैरस्त्रैर्निजघ्नुर्हरियूथपान् ॥ ८२ ॥
ते पादपैः पर्वताग्रैर्नखदंष्ट्रैश्च मुष्टिभिः ।
प्राणैर्विमोचयामासुः सर्वराक्षसयूथपान् ॥ ८३ ॥
रामेण निहताः केचित् सुग्रीवेण तथापरे ।
हनूमता चाङ्गदेन लक्ष्मणेन महात्मना ॥ ८४ ॥
यूथपैर्वानराणां ते निहताः सर्वराक्षसाः ।

मन्त्रिणो ये च बान्धवास्ते सर्वे गच्छन्तु यतस्ते मत्प्रियकाङ्क्षिणः ॥७७
प्राणविप्लवात् प्राणनाशभयात् एवं च प्राणनाशे सर्वथा प्राप्ते यशो
रक्षणाय युद्धार्थं गमनमेव न्याय्यमिति भावः ॥ ७८ ॥ ७९ ॥
वानराणामिदं वानरमार्गं तत्सैन्यं प्रविश्य ममन्थुरणात् तत्सैन्यमेव॥८०॥
भुशुण्डिभिन्दिपाला आयुधविशेषाः ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८ ।

रामतेजः समाविश्य वानरा बलिनोऽभवन् ॥ ८५ ॥

रामभक्तिविहीनानामेवं भक्तिः कुतो भवेत् ॥ ८६ ॥

सर्वेश्वरः सर्वमयो विधाता

मायामनुष्यत्वविडम्बनेन ।

सदा चिदानन्दमयोऽपि रामो

युद्धादिलीलां वितनोति मायाम् ॥ ८७ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे

पञ्चमः सर्गः ।

रामतेजः समाविश्य प्राप्य तत्तेजः समावेशेन बलवन्तो हेतुमाह रामभक्तीति ॥ ८६ ॥

सर्वेश्वरः सङ्कल्पमात्रेण सर्वसंहारसमर्थोऽपि मायया मनुष्यत्वविडम्बनं तदनुकरणं तेन हेतुना तन्निर्वाहाय युद्धादिलीलारूपां मायां वितनोति ॥ ८७ ॥

इति श्रीमत्पृथ्वीश्वरराजर्षि॰ श्रीरामवर्मभिः कृताध्यात्मरामायणसेतौ युद्धकाण्डे

पञ्चमः सर्गः ।

अथ षष्ठः वर्गः ।

श्रुत्वा युद्धे बलं नष्टमतिकायमुखं महत् ।
रावणो दुःखसन्तप्तः क्रोधेन महताहतः ॥ १ ॥
निधायेन्द्रजितं लङ्कारक्षणार्थं(१) महाद्युतिः ।
स्वयं जगाम युद्धाय रामेण सह राक्षसः ॥ २ ॥
दिव्यं स्यन्दनमारुह्य सर्वशस्त्रास्त्रसंयुतम् ।
राममेवाभिदुद्राव राक्षसेन्द्रो महाबलः ॥ ३ ॥
वानरान् बहुशो हत्वा बाणैराशीविषोपमैः ।
पातयामास सुग्रीवप्रमुखान् यूथनायकान् ॥ ४ ॥
गदापाणिं महासत्त्वं तत्र दृष्ट्वा विभीषणम् ।
उत्ससर्ज महाशक्तिं मयदत्तां विभीषणे ॥ ५ ॥
तामापतन्तीमालोक्य विभीषणविघातिनीम् ।
दत्ताभयोऽयं रामेण वधार्हो नायमासुरः ॥ ६ ॥
इत्युक्त्वा लक्ष्मणो भीमं चापमादाय वीर्यवान् ।
विभीषणस्य पुरतः स्थितोऽकम्प इवाचलः ॥ ७ ॥

श्रुत्वेति अतिकायमुखं तत्प्रधानम् ॥ १ ॥
लङ्कारक्षणार्थं इन्द्रजितं लङ्कायां निधाय स्थापयित्वा ॥ २ ॥ ३ ॥
आशीः सर्पाणान्तागता जिह्वा दन्त इत्यन्ये ॥ ४ ॥
महासत्त्वं महाबलम् मयदत्तां मन्दोदरीपित्रा दत्ताम् ॥ ५ ॥
विभीषणविघातिनीं तत्प्राणहरां रामदत्ताभयत्वादयम् असुर एव आसुरः वधार्हो न शक्तिश्च माहशातिरिक्तेष्वमोघैवेति ॥ ६ ॥
उक्त्वा विचार्य्य विभीषणं पुरतस्तं पृष्ठतः कृत्वा शक्तिसंमुखे स्थितः ॥ ७

(१) राक्षसार्थम् इति पाठान्तरम् ।

सा शक्तिर्लक्ष्मणतनुं विवेशामोघशक्तितः ।
यावन्त्यः शक्तयो लोके मायायाः सम्भवन्ति हि ॥ ८ ॥
तासामाधारभूतस्य लक्ष्मणस्य महात्मनः ।
मायाशक्त्या भवेत् किं वा ? शेषांशस्य हरेस्तनोः ॥ ९ ॥
तथापि मानुषं भावमापन्नस्तदनुव्रतः ।
मूर्च्छितः पतितो भूमौ तमादातुं दशाननः ॥ १० ॥
हस्तैस्तोलयितुं शक्तो न बभूवातिविस्मितः ।
सर्वस्य जगतःसारं विराजं परमेश्वरम् ॥ ११ ॥
कथं लोकाश्रयं विष्णुं तोलयेल्लघु राक्षसः ? ।
अग्रहीतकामं सौमित्रिं रावणं वीक्ष्य मारुतिः ॥ १२ ॥
आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना ।
तेन मुष्टिप्रहारेण जानुभ्यामपतद्भुवि ॥ १३ ॥
आस्यैश्च नेत्रश्रवणैरुद्वमन् रुधिरं बहु ।

अमोघशक्तितः अमोघसामर्थ्यवत्त्वात् नन्वेवं कथं लक्ष्मणजीवनं तत्राह यावन्त्य इति सम्भवन्ति प्रकटिता भवन्ति ॥ ८ ॥

ईश्वरचैतन्यसम्बन्धादेव जडायां मायायां सर्वशक्तिप्रादुर्भाव इति तासामाधारभूतो लक्ष्मणोऽतः सर्वशक्तिधारकस्य मायाशक्त्या माया-निर्मितया शक्त्या न क्षतिरिति भावः ॥ ९ ॥

नन्वेवं मूर्च्छापि कुतस्तत्राह तथापि इति तदनुव्रतः नटवत् अन्यथा रावणस्य मनुष्यत्वज्ञाने तन्मृतिर्दुर्लभेत्याशयेन मूर्च्छादिनाटन-मिति भावः ॥ १० ॥

तोलयितुं चालयितुमपि न शक्तो बभूव उत्थापयितुं तेन तेन चातिविस्मित आसीत् तत्र हेतुमाह सर्वस्येति विराजं सर्वजग-द्रूपेण भासमानम् अतएव जगतः सारम् ॥ ११ ॥ १२ ॥

अपतत् रावणः ॥ १३ ॥ १४ ॥ १५ ॥

विघूर्णमाननयनो रथोपस्थ उपाविशत्॥ १४ ॥
अथ लक्ष्मणमादाय हनूमान् रावणार्दितम्।
आनयद्रामसामीप्यं बाहुभ्यां परिगृह्य तम्॥ १५ ॥
हनूमतः सुहृत्त्वेन भक्त्या च परमेश्वरः।
लघुत्वमगमद्देवो गुरूणां गुरुरप्यजः॥ १६ ॥
सा शक्तिरपि तं त्यक्त्वा ज्ञात्वा नारायणांशजम्।
रावणस्य रथं प्रागाद्रावणोऽपि शनैस्ततः॥ १७ ॥
संज्ञामवाप्य जग्राह बाणासनमथो रुषा।
राममेवाभिदुद्राव दृष्ट्वा रामोऽपि तं क्रुधा॥ १८ ॥
आरुह्य जगतां नाथो हनूमन्तं महाबलम्।
रथस्थं रावणं दृष्ट्वा अभिदुद्राव राघवः॥ १९ ॥
ज्याशब्दमकरोत्तीव्रं वज्रनिष्पेषनिष्ठुरम्(१)।
रामो गम्भीरया वाचा राक्षसेन्द्रमुवाच ह॥ २० ॥
राक्षसाधम! तिष्ठाद्य क्व गमिष्यसि मे पुरः?।
कृत्वापराधमेवं मे सर्वत्र समदर्शिनः॥ २१ ॥

भक्त्या तस्य स्वभक्तत्वादिति भावः गुरूणां गरिष्ठानाम्॥ १६ ॥

नारायणांशजं तत्त्वेन स्वाविषयं ज्ञात्वा॥ १७ ॥

बाणासनं धनुः॥ १८ ॥

रावणं रथस्थं दृष्ट्वा लोकदृष्ट्या तन्नाम्याय हनूमन्तमारुह्याभि-
दुद्राव॥ १९ ॥

वज्रस्य निष्पेषो निर्घातः॥ २० ॥

मे पुरः तिष्ठ क्व गमिष्यसि सर्वत्र समदर्शिनः तेनेतो गमनेऽपि अदृष्टस्वविषये गमनं न सम्भावितमिति भावः किञ्च यद्यप्यहं सर्वत्र समदर्शी तथापि अपराधं कृत्वा जीवनं दुर्लभम् एतावदेव मे समद-

(१) निस्वनम् इति वा पाठः।

येन बाणेन निहता राक्षसास्ते जनालये ।
तेनैव त्वां हनिष्यामि तिष्ठाद्य मम गोचरे ॥ २२ ॥
श्रीरामस्य वचः श्रुत्वा रावणो मारुतात्मजम् ।
वहन्तं राघवं संख्ये शरैस्तीक्ष्णैरताडयत् ॥ २३ ॥
हतस्यापि शरैस्तीक्ष्णैर्वायुसूनोः स्वतेजसा ।
व्यवर्धत पुनस्तेजो ननर्द च महाकपिः ॥ २४ ॥
ततो दृष्ट्वा हनूमन्तं सव्रणं रघुसत्तमः ।
क्रोधमाहारयामास कालरुद्र इवापरः ॥ २५ ॥
साश्वं रथं ध्वजं सूतं शस्त्रौघं धनुरञ्जसा ।
छत्रं पताकान्तरसा चिच्छेद शितसायकैः(१) ॥ २६ ॥
ततो महाशरेणाशु रावणं रघुसत्तमः ।
विव्याध वज्रकल्पेन पाकारिरिव पर्वतम् ॥ २७ ॥
रामबाणहतो वीरश्चचाल च मुमोह च ।
हस्तान्निपतितश्चापस्तं समीक्ष्य रघूत्तमः ॥ २८ ॥
अर्धचन्द्रेण चिच्छेद तत्किरीटं रविप्रभम् ।

शित्वं यत्कर्मानुरूपफलदत्वम् अन्यथा वैषम्यनैर्घृण्ये आपद्येते इति भावः ॥ २१ ॥

अस्यदपि समर्थत्वमाह येनेति न तु विषादिशिलादिभिरित्याशयः ॥ २२ ॥

रावणं वहन्तं हनूमन्तमताडयत् ॥ २३ ॥

स्वतेजसा स्त्रीयेन स्वतरौद्रतेजसा तेजो व्यवर्द्धत यद्वा रामः स्वतेजसा हनूमतस्तेजो व्यवर्धत व्यवर्धयदित्यर्थः ॥ २४ ॥ २५ ॥

अञ्जसा शीघ्रं युगपदेवेति यावत् ॥ २६ ॥

पाकारिरिन्द्रः ॥ २७ ॥

तं चलितं तादृशावस्थं रावणं समीक्ष्य ॥ २८ ॥

(१) वज्रकोपमैः इति पाठान्तरम् ।

अनुजानामि गच्छ त्वमिदानीं बाणपीडितः ॥ २९ ॥
प्रविश्य लङ्कामाश्वास्य श्वः पश्यसि बलं मम ।
रामबाणेन संविद्धो हतदर्पोऽथ रावणः ॥ ३० ॥
महत्या लज्जया युक्तो लङ्कां प्राविशदातुरः ।
रामोऽपि लक्ष्मणं दृष्ट्वा मूर्च्छितं पतितं भुवि ॥ ३१ ॥
मानुषत्वमुपाश्रित्य लीलयानुशुशोच ह ।
ततः प्राह हनूमन्तं वत्स ! जीवय लक्ष्मणम् ॥ ३२ ॥
महौषधीः समानीय पूर्ववत् वानरानपि ।
तथेति राघवेणोक्तो जगामाशु महाकपिः ॥ ३३ ॥
हनूमान् वायुवेगेन क्षणात्तीर्त्वा महोदधिम् ।
एतस्मिन्नन्तरे चारा रावणाय न्यवेदयन् ॥ ३४ ॥
रामेण प्रेषितो देव ! हनूमान् क्षीरसागरम् ।
गतो नेतुं लक्ष्मणस्य जीवनार्थं महौषधीः ॥ ३५ ॥
श्रुत्वा तच्चारवचनं राजा चिन्तापरोऽभवत् ।
जगाम रात्रावेकाकी कालनेमिगृहं क्षणात् ॥ ३६ ॥
गृहागतं समालोक्य रावणं विस्मयान्वितः ।

तादृशावस्थस्य वीरस्य हननानौचित्यं मत्वा कार्य्यशेषं च विचार्य्य किरीटमेव चिच्छेद ततो रावणं प्रति उवाचेति शेषः तदेवाहानुजानामीति ॥ २९ ॥

लङ्कां प्रविश्याश्वास्य श्वो बलं पश्यसीत्यन्वय इति शेषः ॥ ३० ॥ ३१ ॥

जीवयेत्यनेन वस्तुतः शोकाभाव उक्तः ॥ ३२ ॥

वानरानपि अपिना लक्ष्मणम् ॥ ३३ ॥

क्षणान्महोदधिं तीर्त्वा गत्वौषधीरानयामीति प्रतिज्ञायेति शेषः जगामेत्यनेनान्वयः प्रस्थातुमुद्यत इत्यर्थः ॥ ३४ ॥

नेतुम् आनेतुम् ॥ ३५ ॥ ३६ ॥

कालनेमिरुवाचेदं प्राञ्जलिर्भयविह्वलः
अर्घ्यादिकं ततः कृत्वा रावणस्याग्रतः स्थितः ॥ ३७ ॥
किन्ते करोमि ? राजेन्द्र ! किमागमनकारणम् ? ।
कालनेमिमुवाचेदं रावणो दुःखपीड़ितः ॥ ३८ ॥
ममापि कालवशतः कष्टमेतदुपस्थितम् ।
मया शक्त्या(१) हतो वीरो लक्ष्मणः पतितो भुवि॥३९॥
तं जीवयितुमानेतुमोषधीर्हनुमान् गतः ।
यथा तस्य भवेद्विघ्नं तथा कुरु महामते ! ॥ ४० ॥
मायया मुनिवेशेन मोहयस्व महाकपिम् ।
कालात्ययो यथा भूयात् तथा कृत्वैहि मन्दिरे ॥ ४१ ॥
रावणस्य वचः श्रुत्वा कालनेमिरुवाच तम् ।
रावणेश ! वचो मेऽद्य शृणु धारय तत्त्वतः ॥ ४२ ॥
प्रियं ते करवाण्येव न प्राणान् धारयाम्यहम् ।
मारीचस्य यथारण्ये पुराभून्मृगरूपिणः ॥ ४३ ॥
तथैव मे न सन्देहो भविष्यति दशानन ! ।
हताः पुत्राश्च पौत्राश्च बान्धवा राक्षसाश्च ते ॥ ४४ ॥

स्थितः कालनेमिः ॥ ३७ ॥
किमागमनकारणमिति रावणं पप्रच्छेति शेषः ॥ ३८ ॥
कष्टमेवाह मयेति ॥ ३९ ॥
गतः युद्धभूमेः प्रस्थित इत्यर्थः ॥ ४० ॥
कालात्ययः अस्तमसूर्योदयरूपः ॥ ४१ ॥
हे ईश रावणेति च्छेदः धारय हृदये इति शेषः ॥ ४२ ॥ ४३ ॥
तथैव मे भविष्यति मृत्युरेव भविष्यतीत्यर्थः ॥ ४४ ॥

(१) मम शक्त्या इति वा पाठः ।

घातयित्वाऽसुरकुलं(१)जीवितेनापि किन्तव ?।
राज्येन वा सीतया वा किन्देहेन जडात्मना ? ॥ ४५॥
सीतां प्रयच्छ रामाय राज्यं देहि विभीषणे।
वनं याहि महाबाहो! रम्यं मुनिगणाश्रयम् ॥ ४६ ॥
स्नात्वा प्रातः शुभजले कृत्वा सन्ध्यादिकाः क्रियाः।
तत(२)एकान्तमाश्रित्य सुखासनपरिग्रहः॥ ४७ ॥
विसृज्य सर्वतः सङ्गमितरान्विषयान् बहिः।
बहिः प्रवृत्ताक्षगणं शनैः प्रत्यक् प्रवाहय ॥ ४८ ॥
प्रकृतेर्भिन्नमात्मानं विचारय सदानघ।
चराचरं जगत् कृत्स्नं देहबुद्धीन्द्रियादिकम् ॥ ४९ ॥
आब्रह्मस्तम्बपर्यन्तं दृश्यते श्रूयते च यत्।
सैषा प्रकृतिरित्युक्ता सैव मायेति कीर्त्तिता ॥५० ॥

असुरकुलमितिच्छेदः किं किं फलं जडात्मना जडस्वरूपेण ॥ ४५ ॥

एवं जीवितादौ वैराग्यमुपदिश्य कर्तव्यमुपदिशति सीतामिति रम्यत्वोपपादकं मुनिगणाश्रयमिति ॥ ४६ ॥

यत्रैव पद्मासनादौ स्थित्वा स्थाता सुखं लभते तत्सुखासनम्॥४७॥

बहिः कृत्वेति शेषः दूरे कृत्वा इत्यर्थः बहिः प्रवृत्तं बाह्यविषयेषु प्रवृत्तमक्षगणमिन्द्रियगणं प्रत्यक् प्रवाहय आत्मविषयं कुरु सर्वसङ्गत्यागस्य मनस आत्मविषयत्वकरणमेव सर्वेन्द्रियाणामात्मविषयत्वकरणम् ॥४८॥

तदेवोपपादयति प्रकृतेरिति प्रकृतिस्वरूपमाह चराचरमिति एतदेव प्रकृतिरित्यर्थः ॥ ४९ ॥

किं विशेषेण दृश्यं सर्वमेव मायेत्याहाब्रह्मेति ॥ ५० ॥

---

(१) घातयित्वा सुतकुलम् इति पाठान्तरम्।

(२) तत्र इति वा पाठः।

सर्गस्थितिविनाशानां जगद्वृक्षस्य कारणम् ।
लोहितश्वेतकृष्णादिप्रजाः सृजति सर्वदा ॥ ५१ ॥
कामक्रोधादिपुत्राद्यान् हिंसातृष्णादिकन्यकाः ।
मोहयत्यनिशं देवमात्मानं स्वैर्गुणैर्विभुम् ॥ ५२ ॥
कर्तृत्वभोक्तृत्वमुखान् स्वगुणानात्मनीश्वरे ।
आरोप्य स्ववशं कृत्वा तेन क्रीडति सर्वदा ॥ ५३ ॥
शुद्धोऽप्यात्मा यया युक्तो पश्यतीव सदा बहिः(१) ।
विस्मृत्य च स्वमात्मानं मायागुणविमोहितः ॥ ५४ ॥
यदा सद्गुरुणा युक्तो बोध्यते बोधरूपिणा ।
निवृत्तदृष्टिरात्मानं पश्यत्येव सदा स्फुटम् ॥ ५५ ॥
जीवन्मुक्तः सदा देही मुच्यते प्राकृतैर्गुणैः ।

सैव जगद्वृक्षस्य सर्गादिकारणं लोहितेत्यादि स्वस्य त्रिगुणात्मकत्वात् राजससात्त्विकतामसाः प्रजाः सृजति ॥ ५१ ॥

तथा कामक्रोधादीन् पुत्रान् हिंसाद्याश्च कन्यकाः सृजति स्वसृष्टस्य जगतो दृढ्यर्थमित्यर्थः एवं सृष्ट्वा आत्मानमात्मपदवाच्यं विभुं देवं स्वैर्गुणैः पदार्थैर्मोहयति तेष्वहं ममेति बुद्धिमन्तं करोति ॥ ५२ ॥

स्वनिष्ठान् जगत्कर्तृत्वादीन् गुणान् सन्निधानेन तत्रारोप्य स्ववशं कृत्वा अहं कर्तृत्वादिबुद्धिमत्त्वकरणमेव तस्य वशीकरणम् ॥ ५३ ॥

शुद्धोऽप्ययं दर्शनादिविकारहीनोऽपि पश्यतीव बहिर्विषयान् स्वमात्मानं स्वस्वरूपं विस्मरणे हेतुर्मायागुणविमोहितत्वम् ॥ ५४ ॥

तर्हि किं सर्वथा विस्मृतस्वस्वरूपस्य बन्ध एव नेत्याह यदेति बोधरूपिणा ज्ञानस्वरूप एवाहमिति जानता जीवन्मुक्तेनेत्यर्थः निवृत्तदृष्टिः बहिर्विषयेभ्य इति शेषः आत्मानं शुद्धमुक्तबुद्धस्वभावमात्मस्वरूपम् ॥ ५५ ॥

तादृश सद्गुरूपदेशान्निदिध्यासनसम्पत्त्या जीवन्मुक्तिदशां प्राप्तः

---

(१) पश्यत्येव हि सर्वदा इत्यपि पाठः ।

त्वमप्येवं सदात्मानं विचार्य नियतेन्द्रियः ॥ ५६ ॥
प्रकृतेरन्यमात्मानं ज्ञात्वा मुक्तो भविष्यसि ।
ध्यातुं यद्यसमर्थोऽसि सगुणं देवमाश्रय ॥ ५७ ॥
हृत्पद्मकर्णिके स्वर्णपीठे मणिगणान्विते ।
मृदुश्लक्ष्णतरे तत्र जानक्या सह संस्थितम् ॥ ५८ ॥
वीरासनं विशालाक्षं विद्युत्पुञ्जनिभाम्बरम्(१) ।
किरीटहारकेयूरकौस्तुभादिभिरन्वितम् ॥ ५९ ॥
नूपुरैः कटकैर्भान्तं तथैव वनमालया ।
लक्ष्मणेन धनुर्हस्तकरेण परिसेवितम् ॥ ६० ॥
एवं ध्यात्वा सदात्मानं रामं सर्वहृदि स्थितम् ।
भक्त्या परमया युक्तो मुच्यते नात्र संशयः ॥ ६१ ॥
शृणु वै चरितं तस्य भक्तैर्नित्यमनन्यधीः ।
एवं चेत्कृतपूर्वाणि पापानि च महान्त्यपि ।

प्राकृतैर्गुणैः सुखदुःखादिभिर्मुच्यते अतो मदुपदेशात् त्वमात्मानमेवं विचार्य मदुक्तात्मस्वरूपं विचारेण दृढीकृत्य ॥ ५६ ॥

ध्यातुमिति मदुक्तप्रकारेण ध्यातुमित्यर्थः ॥ ५७ ॥

सगुणं ध्येयं रूपमाह हृत्पद्मेति तत्कर्णिकायां स्वर्णपीठे स्थितमित्यन्वयः श्लक्ष्णं स्निग्धम् ॥ ५८ ॥

वीरासनं वीरासनस्थं विद्युत्पुञ्जनिभाम्बरं पीताम्बरमित्यर्थः ॥ ५९ ॥

भान्तं शोभायमानम् धनुर्हस्तकरेण एकं सखैकं रामस्येति शेषम् ॥ ६० ॥

सर्वहृदि स्थितमित्यनेन एवम्भूतः सर्वप्रेरकत्वेन ध्येयः एवं चिद्रूपस्य स्वतन्त्रताभावनिश्चये देहादिहानिर्भवतीत्यर्थः ॥ ६१ ॥

---

(१) निभाम्बरम् इति वा पाठः ।

क्षणादेव विनश्यन्ति यथाऽग्नेस्तूलराशय:(१)॥ ६२ ॥
भजस्व रामं परिपूर्णमेकं विहाय वैरं निजभक्तियुक्त: ।
हृदा सदा भावितभावरूपमनामरूपं पुरुषं पुराणम्॥ ६३

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
षष्ठ: सर्ग: ।

भक्तै: कथ्यमानमिति शेष: कृतपूर्वाणि पूर्वं कृतानि यथाग्ने: क्षणात् तूलराशयो नश्यन्ति तद्वत् ॥ ६२ ॥

वैरं वैरभावम् निजभक्तियुक्त: अनन्यभक्तियुक्त: हृदा हृदयेन सदा भावितं भावस्य सत्तारूपस्य ब्रह्मणो रूपं शुद्धबुद्धमुक्तस्वभावं येन तम् वस्तुत: स एव ब्रह्मेत्यादिना ॥ ६३ ॥

इति श्रीमत्कल्पकराजविपदुद्धरणसमर्थेत्यादिवि० श्रीरामवर्म्मण: कृतावध्यात्मरामायणे सेतौ युद्धकाण्डे
षष्ठ: सर्ग: ।

---

(१) तूलराशय: इति वा पाठ: ।

अथ सप्तमः सर्गः ।

कालनेमिवचः श्रुत्वा रावणोऽमृतसन्निभम् ।
जज्वाल क्रोधताम्राक्षः सर्पिरद्भिरिवाग्निमत् ॥ १ ॥
निहन्मि त्वां दुरात्मानं मच्छासनपराङ्मुखम् ।
परैः किञ्चित् गृहीत्वा त्वं भाषसे रामकिङ्करः ॥ २ ॥
कालनेमिरुवाचेदं रावणं देव ! किं क्रुधा ? ।
न रोचते मे वचनं यदि ? गत्वा करोमि तत् ॥ ३ ॥
इत्युक्त्वा प्रययौ क्षिप्रं कालनेमिर्महासुरः ।
नोदितो रावणेनैव हनूमद्विघ्नकारणात् ॥ ४ ॥
स गत्वा हिमवत्पार्श्वे तपोवनमकल्पयत् ।
तत्र शिष्यैः परिवृतो मुनिवेशधरः खलः ॥ ५ ॥
गच्छतो मार्गमासाद्य वायुसूनोर्महात्मनः ।
ततो गत्वा ददर्शाथ हनूमानाश्रमं शुभम् ॥ ६ ॥
चिन्तयामास मनसा श्रीमान् पवननन्दनः ।
पुरा न दृष्टमेतन्मे मुनिमण्डलमुत्तमम्(१) ॥ ७ ॥

अग्निमत् अतितप्तं सर्पिर्घृतं जलसंयोगाद्यथा महाज्वालावद्भवति तथा जज्वालेत्यर्थः ॥ १ ॥

परैर्दत्तं किञ्चिद् गृहीत्वा धनलोभात् रामकिङ्करतां प्राप्त इव भाषसे ॥ २
यदि मे वचो न रोचते तदा गत्वा तत् त्वदाज्ञप्तमेव करोमि ॥ ३ ॥

रावणेनैव स्वयमेव नोदित इत्यर्थः ॥ ४ ॥

खलः दुष्टः अतएव मुनिवेशधरो न तु मुनिः ॥ ५ ॥

गच्छतो वायुसूनोर्मार्गमासाद्य तदीयमार्गमध्ये तपोवनमकल्पयदित्यर्थः ॥ ६—७ ॥

---

(१) मुनिमण्डलमण्डितम् इति वा पाठः ।

मार्गो विभ्रंशितो वा मे भ्रमो वा चित्तसम्भवः।
यद्वाविश्राममपरं दृष्ट्वा मुनिमशेषतः॥ ८॥
पीत्वा जलं ततो यामि द्रोणाचलमनुत्तमम्।
इत्युक्त्वा प्रविवेशाथ सर्वतो योजनालयम्॥ ९॥
आश्रमं कदलीशालखर्जूरपनसादिभिः।
समाहृतं पक्वफलैर्नम्रशाखैश्च पादपैः॥१०॥
वैरभावविनिर्मुक्तं शुभं निर्मलवर्चसम्।
तस्मिन्महाश्रमे रम्ये कालनेमिः स राक्षसः॥ ११॥
इन्द्रयोगं समास्थाय चकार शिवपूजनम्।
हनूमानभिवाद्याह गौरवेण महासुरम्॥ १२॥
भगवन्! रामदूतोऽहं हनूमान्नाम नामतः।
रामकार्येण महता क्षीराब्धिं गन्तुमुद्यतः॥ १३॥
तृषा मां बाधते ब्रह्मन्! उदकं कुत्र विद्यते।
यथेच्छं पातुमिच्छामि कथ्यतां मे मुनीश्वर!॥ १४॥
तच्छ्रुत्वा मारुतेर्वाक्यं कालनेमिस्तमब्रवीत्।
कमण्डलुगतं तोयं मम त्वं पातुमर्हसि॥ १५॥

मार्गो मे विभ्रंशितः त्यक्तः मार्गान्तरे आगतमिति यावत् उत अनाश्रमे आश्रमत्वभ्रमः अथवा किमनेन विचारेणेत्याह यद्वेति मुनिमिति जातावेकवचनं अशेषतो मुनीन् दृष्ट्वेत्यर्थः॥ ८–९॥

पक्वफलैः पादपैश्च समाहृतमाश्रमं प्रविवेशेत्यन्वयः॥ १०॥

वैरभावविनिर्मुक्तं यत्राश्रमे अहिनकुलादयोऽपि परस्परवैरभावं त्यक्त्वा तिष्ठन्ति तमित्याश्रमविशेषणम्॥ ११॥

इन्द्रयोगः कपटम्॥ १२–१४॥

मम कमण्डलुगतमित्यन्वयः॥ १५॥

भुंक्ष्व चेमानि पक्वानि फलानि तदनन्तरम् ।
निवसस्व सुखेनात्र निद्रामेहि त्वरास्तु मा ॥ १६ ॥
भूतं भव्यं भविष्यच्च जानामि तपसा स्वयम् ।
उत्थितो लक्ष्मणः सर्वे वानरा रामबोधिताः ॥१७॥
तच्छ्रुत्वा हनुमानाह कमण्डलुजलेन मे ।
न शाम्यत्यधिका तृष्णा ततो दर्शय मे जलम् ॥१८॥
तथेत्याज्ञापयामास बटुं मायाविकल्पितम् ।
बटो ! दर्शय विस्तीर्णं वायुसूनोर्जलाशयम् ॥ १९ ॥
निमील्य चाक्षिणी तोयं पीत्वागच्छ ममान्तिकम् ।
उपदेक्ष्यामि ते मन्त्रं येन द्रक्ष्यसि चौषधीः ॥ २० ॥
तथेति हर्षितं शीघ्रं बटुना सलिलाशयम् ।
प्रविश्य हनुमान् तोयमपिबन्मीलितेक्षणः ॥ २१ ॥
ततश्चागत्य मकरी महामाया(१)महाकपिम् ।
ग्रसन्तं महावेगात् मारुतिं घोररूपिणी ॥ २२ ॥
ततो ददर्श हनुमान् ग्रसन्तीं मकरीं रुषा ।
दारयामास हस्ताभ्यां वदनं सा ममार ह ॥२३॥

तदनन्तरं जलपानानन्तरं गमने त्वरा मास्तु ॥ १६–१७ ॥
जलं जलाशयम् ॥ १८ ॥
मायाविकल्पितं स्वमायया कल्पितं बटुं शिष्यम् ॥ १९ ॥
अथ हनूमन्तं प्रत्याह निमील्य चेति ॥ २० ॥
तथेति उक्त्वेति शेषः अपिबदिति च्छेदः ॥ २१ ॥
महामाया बहुमायावती मकरी मकराकारा ॥ २२–२३ ॥

(१) महाकाया इति पाठान्तरम् ।

ततोऽप्सरोमे दृदृशे दिव्यरूपधराङ्गना ।
धान्यमालीति विख्याता हनूमन्तमथाब्रवीत् ॥ २४
त्वत्प्रसादादहं शापाद्विमुक्तास्मि कपीश्वर ! ।
शप्ताहं मुनिना पूर्वमप्सरा कारणान्तरे ॥ २५ ॥
आश्रमे यस्तु ते दुष्टः कालनेमिर्महासुर ।
रावणप्रहितो मार्गे विघ्नं कर्त्तुं तवानघ ! ॥ २६ ॥
मुनिवेशधरो नासौ मुनिर्विप्रविहिंसकः ।
जहि दुष्टं गच्छ शीघ्रं द्रोणाचलमनुत्तमम् ॥२७॥
गच्छाम्यहं ब्रह्मलोकं त्वत्स्पर्शाद्धूतकल्मषा ।
इत्युक्त्वा सा ययौ स्वर्गं हनूमानप्ययाश्रमम् ॥ २८ ॥
आगतं तं समालोक्य कालनेमिरभाषत ।
किं विलम्बेन महता तव ? वानरसत्तम ! ॥ २९ ॥
गृहाण मत्तो मन्त्रांस्त्वं देहि मे गुरुदक्षिणाम् ।
इत्युक्तो हनुमान्मुष्टिं दृढं बद्ध्वाह राक्षसम् ॥ ३० ॥
गृहाण दक्षिणामेतामित्युक्त्वा निजघान तम् ।
विसृज्य मुनिवेशं सः कालनेमिर्महासुरः ॥ ३१ ॥
युयुधे वायुपुत्रेण नानामायाविधानतः ।
महामायिकदूतोऽसौ हनूमान्मायिनां रिपुः ॥ ३२ ॥
जघान मुष्टिना शीर्ष्णि भग्नमूर्धा ममार सः ।
ततः क्षीरनिधिं गत्वा दृष्ट्वा द्रोणं महागिरिम् ॥३३॥

इति विख्याता अप्सरा इति शेषः ॥ २४—२६ ॥
असौ न मुनिः किन्तु मुनिवेशधरः ॥ २७—२८ ॥
महता विलम्बेन किं कृतं अतिविलम्बः किं कृत इत्यर्थः ॥२९-३१॥
महामायिको रामः मायिनां दैत्यानाम् ॥ ३२—३५ ॥

अदृष्ट्वा चौषधीस्तत्र गिरिमुत्पाट्य सत्वरः।
गृहीत्वा वायुवेगेन गत्वा रामस्य सन्निधिम् ॥ ३४ ॥
उवाच हनुमान् राममानीतोऽयं महागिरिः।
यद्युक्तं कुरु देवेश! विलम्बो नात्र युज्यते ॥ ३५ ॥
श्रुत्वा हनूमतो वाक्यं रामः सन्तुष्टमानसः।
गृहीत्वा चौषधीः शीघ्रं सुषेणेन महामतिः ॥ ३६ ॥
चिकित्सां कारयामास लक्ष्मणाय महात्मने।
ततः सुप्तोत्थित इव बुद्धा प्रोवाच लक्ष्मणः ॥ ३७ ॥
तिष्ठ तिष्ठ क्व गन्तासि हन्मीदानीं दशानन!।
इति ब्रुवन् तमालोक्य मूर्ध्न्यवघ्राय राघवः ॥ ३८ ॥
मारुतिं प्राह वत्साद्य त्वत्प्रसादान्महाकपे!।
निरामयं प्रपश्यामि लक्ष्मणं भ्रातरं मम ॥ ३९ ॥
इत्युक्त्वा वानरैः सार्धं सुग्रीवेण समन्वितः।
बिभीषणमतेनैव युद्धाय समवस्थितः ॥४० ॥
पाषाणैः पादपैश्चैव पर्वताग्रैश्च वानराः।
युद्धायाभिमुखा भूत्वा ययुः सर्वे युयुत्सवः ॥ ४१ ॥
रावणो विव्यथे रामबाणैर्विद्धो महासुरः।

गृहीत्वा तासां तेजोऽभिज्ञत्वार्थं स्वयं गृहीत्वा सुषेणस्य वैद्यत्वात्तेन चिकित्सां कारयामास एतेन वैद्यकशास्त्राभिनिविष्टत्वेन प्रसिद्धस्यैव चिकित्साधिकार इति सूचितम् ॥ ३६ ॥

बुद्धा मोहं त्यक्त्वा ॥ ३७–३८ ॥

मम भ्रातरमहं निरामयं गतपीडं पश्यामीत्यन्वयः ॥ ३९ ॥

बिभीषणमतेनैव तस्य लङ्काभिज्ञत्वात् ॥ ४० ॥

युद्धायाभिमुखाः युद्धं कर्त्तुं रिपूणामभिमुखा इत्यर्थः ॥ ४१ ॥

मातङ्ग इव सिंहेन गरुडेनेव पन्नगः ॥ ४२ ॥
अभिभूतोऽगमद्राजा राघवेण महात्मना ।
सिंहासने समाविश्य राक्षसानिदमब्रवीत् ॥ ४३ ॥
मानुषेणैव मे मृत्युमाह पूर्वं पितामहः ।
मानुषो हि न मां हन्तुं शक्तोऽस्ति भुवि कश्चन ॥ ४४ ॥
ततो नारायणः साक्षान्मानुषोऽभून्न संशयः ।
रामो दाशरथिर्भूत्वा मां हन्तुं समुपस्थितः ॥ ४५ ॥
अनरण्येन यत्पूर्वं शप्तोऽहं राक्षसेश्वर ! ।
उत्पत्स्यते च मद्वंशे परमात्मा सनातनः ॥ ४६ ॥
तेन त्वं पुत्रपौत्रैश्च बान्धवैश्च समन्वितः ।
हनिष्यसे न सन्देह इत्युक्त्वा मां दिवं गतः ॥ ४७ ॥
स एव रामः सञ्जातो मदर्थे मां हनिष्यति ।
कुम्भकर्णस्तु मूढात्मा सदा निद्रावशं गतः ॥ ४८ ॥
तं विबोध्य महासत्त्वमानयन्तु ममान्तिकम् ।

मातङ्गो गजः ॥ ४२ ॥

राघवेणाभिभूतोऽगमत् स्वगृहमिति शेषः। समाविश्येति उपविश्ये-त्यर्थः ॥ ४३ ॥

मृत्युमेतद्देहप्राणवियोगम् ॥ ४४ ॥

समुपस्थितः सम्यगागत इत्यर्थः ॥ ४५–४६ ॥

हनिष्यसे इत्यन्तः शापः न सन्देह इति तत्रैव स्थिरीकरणं स चानरण्यो मामित्युक्त्वा दिवं गत इत्यन्वयः ॥ ४७ ॥

मदर्थे मद्वधार्थे इत्यर्थः स मां हनिष्यति हनिष्यत्येवेति स्वनिश्चया-भिलाषः इदं प्रागेव रजस्तमोजन्यत्वात्तोत्तमाय फलायेति बोध्यं मूढात्मा आत्मज्ञानतमःप्रकृतिः निद्राप्रियत्वात् ॥ ४८ ॥

इत्युक्तास्ते महाकायास्तूर्णं गत्वा तु यत्नतः ॥ ४९ ॥
विबोध्य कुम्भश्रवणं निन्यू रावणसन्निधिम् ।
नमस्कृत्य स राजानमासनोपरि संस्थितः ॥ ५० ॥
तमाह रावणो राजा भ्रातरं दीनया गिरा ।
कुम्भकर्ण ! निबोध त्वं महत्कष्टमुपस्थितम् ॥ ५१ ॥
रामेण निहताः शूराः पुत्राः पौत्राश्च बान्धवाः ।
किं कर्त्तव्यमिदानीं मे ? मृत्युकाल उपस्थिते(१) ॥ ५२ ॥
एष दाशरथी रामः सुग्रीवसहितो बली ।
समुद्रं सबलस्तीर्त्वा मूलं नः परिकृन्तति ॥ ५३ ॥
ये राक्षसा मुख्यतमास्ते हता वानरैर्युधि ।
वानराणां क्षयं युद्धे न पश्यामि कदाचन ॥ ५४ ॥
नाशयस्व महाबाहो ! यदर्थं परिबोधितः ।
भ्रातुरर्थे महासत्त्व(२) ! कुरु कर्म सुदुष्करम् ॥ ५५ ॥
श्रुत्वा तद्रावणेन्द्रस्य वचनं परिदेवितम् ।

महासत्त्वं महाबलम् ॥ ४९ ॥
निन्युः प्रापयामासुः ॥ ५०—५१ ॥
मृत्युकाले उपस्थिते इदानीं मे किं कर्त्तव्यं तद्वदेति शेषः ॥५२॥
सबलः ससैन्यः मूलं सेनाम् ॥ ५३ ॥
वानराः नाशनीया इति चेत्तत्राह वानराणां युद्धे क्षयं नाशं न पश्यामि अनन्तत्वात् हनूमतौषध्यानयनेन जीवनाच्च ॥ ५४ ॥
अतस्तद्वानराणां बलं हनूमत्सहितं नाशयस्व ॥ ५५ ॥
रावणेन्द्रस्य सर्वश्रेष्ठस्य रावणस्येत्यर्थः यद्वा लोकरावणानां श्रेष्ठस्य

(१) मृत्युकालः समागतः इति वा पाठः ।
(२) महाबाहो इति पाठान्तरम् ।

कुम्भकर्णो जहासोच्चैर्वचनं चेदमब्रवीत् ॥ ५६ ॥
पुरा मन्त्रविचारे ते गदितं यन्मया नृप !।
तदद्य त्वामुपगतं फलं पापस्य कर्मणः ॥ ५७ ॥
पूर्वमेव मया प्रोक्तो रामो नारायणः परः(१)।
सीता च योगमायेति बोधितोऽपि न बुध्यसे ॥ ५८ ॥
एकदाहं वने सानौ विशालायां स्थितो निशि।
दृष्टो मया मुनिः साक्षान्नारदो दिव्यदर्शनः ॥ ५९ ॥
तमब्रुवं महाभाग ! कुतो गन्तासि मे वद।
इत्युक्तो नारदः प्राह देवानां मन्त्रणे स्थितः ॥ ६० ॥
तत्रोत्पन्नमुदन्तं ते वक्ष्यामि शृणु तत्त्वतः।
युवाभ्यां पीड़िता देवाः सर्वे विष्णुमुपागताः ॥ ६१ ॥
ऊचुस्ते देवदेवेशं स्तुत्वा भक्त्या समाहिताः।
जहि रावणमक्षोभ्यं देव ! त्रैलोक्यकण्टकम् ॥ ६२ ॥

परिदेवितम् परिदेवनरूपं वचनम् ॥ ५६ ॥

यत्पापस्य कर्मणः फलं भावित्वेन ते मया गदितं तदद्योपगतं प्राप्तम्॥५७

रामो नारायण इति पूर्वमेव प्रोक्तः कथितः तवेति शेषः एवमनेक-प्रकारैः रामस्य नारायणत्वं न बुध्यसे तस्यैतत् फलमागतमिति शेषः॥५८

ननु त्वयेदं कथं ज्ञातं तत्राह एकदेति सानौ पर्वतशिखरे विशालायां शिलायामिति शेषः विशालायां नगर्य्यामित्यन्ये ॥ ५९ ॥

कुतो गन्तासि कुत आगतोऽसीत्यर्थे आर्षं देवानां मन्त्रणे देवानां विचारस्थाने इत्यर्थः तत्र स्थितोऽहं तत आगत इति प्राहेत्यन्वयः ॥ ६० ॥

युवाभ्यां रावणकुम्भकर्णाभ्याम् ॥ ६१ ॥

अक्षोभ्यं केनाप्यप्रापणीयक्षोभं जहीत्यत्र हेतुगर्भं विशेषणं त्रैलोक्य-कण्टकमिति ॥ ६२ ॥

(१) प्रभुः इति केचित् पठन्ति।

मानुषेण मृतिस्तस्य कल्पिता ब्रह्मणा पुरा ।
अतस्त्वं मानुषो भूत्वा जहि रावणकण्टकम् ॥ ६३ ॥
तथेत्याह महाविष्णुः सत्यसङ्कल्प ईश्वरः ।
जातो रघुकुले देवो राम इत्यभिविश्रुतः ॥ ६४ ॥
स हनिष्यति वः सर्वानित्युक्ता प्रययौ मुनिः ।
अतो जानीहि रामं त्वं परं ब्रह्म सनातनम् ॥ ६५ ॥
त्यज वैरं भजस्वाद्य मायामानुषरूपिणम् ।
भजतो भक्तिभावेन प्रसीदति रघूत्तमः ॥ ६६ ॥
भक्तिर्जनित्री ज्ञानस्य भक्तिर्मोक्षप्रदायिनी ।
भक्तिहीनेन यत्किञ्चित् कृतं सर्वमसत्समम् ॥ ६७ ॥
अवताराः सुबहवो विष्णोर्लीलानुकारिणः ।
तेषां सहस्रसदृशो रामो ज्ञानमयः शिवः(१) ॥६८ ॥
रामं भजन्ति निपुणा मनसा वचसानिशम् ।
अनायासेन संसारं तीर्त्वा यान्ति हरेः पदम् ॥ ६९ ॥

रावणकण्टकं रावणरूपं कण्टकम् ॥ ६३ ॥

विष्णोरीश्वरत्वद्योतकं सत्यसंकल्पत्वम् ॥ ६४—६५ ॥

मायया मानुषशरीरं न तस्य वस्तुतो मानुषः कश्चिज्जीव इत्यर्थः भजत इति द्वितीयाबहुवचनम् ॥ ६६ ॥

भक्तान् प्रसीदति इत्यस्योपपत्तये भक्तेरुत्कर्षमाह भक्तिरिति ज्ञानजनकत्वादेव तस्या मोक्षदत्वं किं बहुना कर्म भक्तिहीनं कृतं अपरमं असततुल्यं फलाजनकमित्यर्थः ॥ ६७ ॥

सर्वावतारेष्वयं मुख्योऽवतार इत्याहावतारा इति लीलानुकारिणस्तत्कालतिवेष्टानुकरणशीलस्तेत्यर्थः ॥ ६८ ॥

ये निपुणा रामं भजन्ति ते संसारं तीर्त्वा हरेः पदं यान्ति ॥ ६९ ॥

(१) ज्ञानवतांवरः इति वा पाठः ।

ये राममेव सततं भुवि शुद्धसत्त्वा
ध्यायन्ति तस्य चरितानि पठन्ति सन्तः ।
मुक्तास्त एव भवभोगमहाहिपाशैः
सीतापतेः पदमनन्तसुखं प्रयान्ति ॥ ७० ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
सप्तमः सर्गः ।

शुद्धसत्त्वाः शुद्धान्तःकरणाः भवः संसारो भोगः शरीरं यस्य तादृशो यो महानहिः कालसर्पस्तदीयैः पाशैर्बन्धनैर्मुक्ताः सीतापतेरनन्तसुखं पदं शुद्धं ब्रह्म प्रयान्ति प्राप्नुवन्ति ॥ ७० ॥

इति श्रीमत्कुकुरराजविपद्धरणसमर्थेत्यादिवि० श्रीरामवर्मकृतायामध्यात्मरामायणसेतौ युद्धकाण्डे
सप्तमः सर्गः ।

अथ अष्टमः सर्गः ।

कुम्भकर्णवधः श्रुत्वा भ्रुकुटीविकटाननः ।
दशग्रीवो जगादेदमासनादुत्पतन्निव ॥ १ ॥
त्वमानीतो न मे ज्ञानबोधनाय सुबुद्धिमान् ।
मया कृतं समीकृत्य युद्धस्व यदि रोचते ? ॥ २ ॥
नो चेद्गच्छ सुषुप्त्यर्थं निद्रा त्वां बाधतेऽधुना ।
रावणस्य वचः श्रुत्वा कुम्भकर्णो महाबलः ॥ ३ ॥
रुष्टोऽयमिति विज्ञाय तूर्णं युद्धाय निर्ययौ ।
स लङ्घयित्वा प्राकारं महापर्वतसन्निभः ॥ ४ ॥
निर्ययौ नगरात्तूर्णं भीषयन् हरिसैनिकान् ।
स ननाद महानादं समुद्रमभिनादयन् ॥ ५ ॥
वानरान् कालयामास बाहुभ्यां भक्षयन् तथा ।
कुम्भकर्णं तदा दृष्ट्वा सपक्षमिव पर्वतम् ॥ ६ ॥
दुद्रुवुर्वानराः सर्वे कालान्तकमिवाखिलाः ।
भ्रमन्तं हरिवाहिन्यां मुद्गरेण महाबलम् ॥ ७ ॥
कालयन्तं हरीन् वेगात् भक्षयन्तं समन्ततः ।

उत्पतन्निव क्रोधादिति शेषः ॥ १ ॥
समीकृत्य अङ्गीकृत्य मत्समव्यवहारो भूत्वा ॥ २ । ४ ॥
अभिनादयन् स्वनादप्रतिध्वनियुतं कुर्वन् ॥ ५ ॥
कालयामास पीडयामास ॥ ६ ॥
कालान्तकमिव कालमिवान्तकमिव च तं दृष्ट्वा दुद्रुवुरित्यर्थः ।
मुद्गरेण युतमिति शेषः ॥ ७ ॥

चूर्णयन्तं मुद्गरेण पाणिपादैरनेकधा ॥ ८ ॥
कुम्भकर्णं तदा दृष्ट्वा गदापाणिर्विभीषणः ।
ननाम चरणौ तस्य भ्रातुर्ज्येष्ठस्य बुद्धिमान् ॥ ९ ॥
विभीषणोऽहं भ्रातर्मे दयां कुरु महामते ! ।
रावणस्तु मया भ्रातर्बहुधा परिबोधितः ॥ १० ॥
सीतां देहीति रामाय रामः साक्षाज्जनार्दनः ।
न शृणोति च मां हन्तुं खड्गमुद्यम्य चोक्तवान् ॥ ११ ॥
धिक् त्वां गच्छेति मां हत्वा पदा पापिभिरावृतः ।
चतुर्भिर्मन्त्रिभिः सार्द्धं रामं शरणमागतः ॥ १२ ॥
तच्छ्रुत्वा कुम्भकर्णोऽपि ज्ञात्वा भ्रातरमागतम् ।
समालिङ्ग्य च(१) वत्स ! त्वं जीव रामपदाश्रयः ॥ १३ ॥
कुलसंरक्षणार्थाय राक्षसानां हिताय च ।
महाभागवतोऽसि त्वं पुरा मे नारदाच्छ्रुतम् ॥ १४ ॥

पाणिपादैश्च स्वीयैश्चूर्णयन्तं एकवचनाभाव आर्षः एवमनेकप्रकारेण चूर्णयन्तम् ॥ ८ ॥

बुद्धिमान् सर्वास्ववस्थासु ज्येष्ठो मन्तव्य इति सदाचाराभिज्ञः ॥ ९ ॥ १०

परिबोधनप्रकारमाह सीतामित्यादि इति बोधितस्तत्र शृणोति श्रुतवान् विपरीतं खड्गमुद्यम्य हन्तुमुद्यत इति शेषः ततः कथञ्चिन्निवृत्तो मां पदा हत्वा उक्तवांश्च ॥ ११ ॥

किमुक्तवांस्तदाह धिक् त्वां गच्छेति ततोऽहं चतुर्भिर्मन्त्रिभिरिति ॥ १२

समालिङ्ग्य चाहेति शेषः तदेवाह वत्सत्वमिति ॥ १३ ॥

ननु मे जीवनं कथं सम्भाव्यते तत्राह महाभागवतोऽसीति भगवद्भक्तस्य ते नाशः कथमपि न सम्भाव्य इति भावः ॥ १४ ॥

---

(१) समालिङ्ग्याह इति वा पाठः ।

गच्छ तात! ममेदानीं दृश्यते न च किञ्चन।
मदीयो वा परो वापि मदमत्तविलोचन:॥ १५॥
इत्युक्तोऽश्रुमुखो भ्रातुश्चरणावभिवन्द्य स:।
रामपार्श्वमुपागत्य चिन्तापर उपस्थित:॥ १६॥
कुम्भकर्णोऽपि हस्ताभ्यां पादाभ्यां पेषयन् हरीन्।
चचार वानरीं सेनां कालयन् गन्धहस्तिवत्॥ १७॥
दृष्ट्वा तं राघव: क्रुद्धो वायव्यं शस्त्रमादरात्।
चिक्षेप कुम्भकर्णाय तेन चिच्छेद राक्षस:॥ १८॥
समुद्गरं दक्षहस्तं तेन घोरं ननाद स:।
सहस्त: पतितो भूमावनेकानर्दयन् कपीन्॥ १९॥
पर्य्यन्तमाश्रिता: सर्वे वानरा भयवेपिता:।
रामराक्षसयोर्युद्धं पश्यन्त: पर्य्यवस्थिता:॥ २०
कुम्भकर्णश्छिन्नहस्त: शालमुद्यम्य वेगत:।
समरे राघवं हन्तुं दुद्राव तमथोऽच्छिनत्॥ २१॥
शालेन सहितं वामहस्तमैन्द्रेण राघव:।
छिन्नबाहुमथायातं नर्दन्तं वीक्ष्य राघव:॥ २२॥

यतोऽहं मद्येन मत्तनेत्रस्ततो मम स्वीयपरविभागेन किमपि न दृश्यतेऽतस्त्वं गच्छ कदाचित्त्वय्यपि प्रहारसम्भवात्॥ १५॥
चिन्तापर: कुम्भकर्ण: कथं नाशमेष्यतीति चिन्तापर:॥ १६॥
यस्य गन्धं समाघ्रायान्ये गजा: पलायन्ते स गन्धगज: स यथा क्षुद्रपशून् कालयन् चरति तद्वदयं चचार॥ १७॥
वायव्यं शस्त्रं वायव्यास्त्राभिमन्त्रितं शस्त्रम्॥ १८। १९॥
पर्यन्तमाश्रिता युद्धभूमध्ये स्थिता हस्तपातभयात्प्रान्तमाश्रिता इत्यर्थ:॥ २०—२४॥

तावच्चन्द्रौ निशितावादायास्य पदद्वयम् ।
चिच्छेद पतितौ पादौ लङ्काद्वारि महास्वनौ ॥ २३ ॥
निकृत्तपाणिपादोऽपि कुम्भकर्णोऽतिभीषणः ।
वडवामुखवद्वक्त्रं व्यादाय रघुनन्दनम् ॥ २४ ॥
अभिदुद्राव निनदन् राहुश्चन्द्रमसं यथा ।
अपूरयत् शिताग्रैश्च सायकैस्तद्रघूत्तमः ॥ २५ ॥
शरपूरितवक्त्रोऽसौ चुक्रोशातिभयङ्करः ।
अथ सूर्य्यप्रतीकाशमैन्द्रं शरमनुत्तमम् ॥ २६ ॥
वज्राशनिसमं रामश्चिक्षेपासुरमृत्यवे ।
स तत्पर्वतसङ्काशं स्फुरत्कुण्डलदंष्ट्रकम् ॥ २७ ॥
चकर्त्त रक्षोऽधिपतेः शिरो वृत्रमिवाशनिः ।
तच्छिरः पतितं लङ्काद्वारि कायो महोदधौ ॥ २८ ॥
शिरोऽस्य रोधयद्द्वारं कायो नक्रांश्च चूर्णयत् ।
ततो देवाः स ऋषयो गन्धर्वाः पन्नगाः खगाः ॥ २९ ॥
सिद्धा यक्षा गुह्यकाश्च अप्सरोभिश्च राघवम् ।
ईडिरे कुसुमासारैर्वर्षन्तश्चाभिनन्दिताः ॥ ३० ॥
आजगाम तदा रामं द्रष्टुं देवमुनीश्वरः ।

वडवामुखं नाम समुद्रे शतयोजनविस्तीर्णं वाडवाग्निवासस्थानम् । २५ । २६ ॥

स शरः तत् शिरः ॥ २७ ॥

शिरो लङ्काद्वारि पतितम् कायो महोदधौ पतित इति शेषः॥२८॥

अस्य शिरो द्वारं रोधयत् अरुन्धदित्यर्थः अडभाव आर्षः निकृत्त-पन्नगा स्थित् मकरादि समुद्रे कायपातात् खगाः पक्षिणः ॥ २९ ॥

अप्सरोभिः सहेति शेषः ईडिरे तुष्टुवुः कुसुमासारैः रामं वर्षन्त अभिनन्दयन्तो बभूवुरिति शेषः ॥ ३० ॥ ३१ ॥

नारदो गगनात्तूर्णं स्वभासा भासयन् दिशः॥ ३१॥
राममिन्दीवरश्यामसुदाराङ्गं धनुर्धरम्।
ईषत्ताम्रविशालाक्षमैन्द्रास्त्राञ्चितबाहुकम्॥ ३२॥
दयार्द्रदृष्ट्या पश्यन्तं वानरान् शरपीड़ितान्।
दृष्ट्वा गद्गदया वाचा भक्त्या स्तोतुं प्रचक्रमे॥ ३३॥

नारद उवाच।

देवदेव! जगन्नाथ! परमात्मन्! सनातन!।
नारायणाखिलाधार! विश्वसाक्षिन्! नमोऽस्तु ते॥३४॥
विशुद्धज्ञानरूपोऽपि त्वं लोकानतिवञ्चयन्।
मायया मनुजाकारः सुखदुःखादिमानिव॥ ३५॥
त्वं मायया गूह्यमानः सर्वेषां हृदि संस्थितः।
स्वयं ज्योतिःस्वभावस्त्वं व्यक्त एवामलात्मनाम्॥ ३६॥
उन्मीलयन् सृजस्येतन्नेत्रे राम! जगत्त्रयम्।
उपसंह्रियते सर्वं त्वया चक्षुर्निमीलनात्॥ ३७॥

ऐन्द्रास्त्रेण युक्तो बाहुर्यस्य तम्॥ ३२॥ ३३॥

देवानां हिरण्यगर्भादीनामपि देवपूज्य परमात्मन् सर्वे जीवा अंशा यस्य तादृश अतएव सनातन सदाभव नित्य सर्वः नारं जीवसमूहस्तस्यायनम् अखिलाधार जगदुत्पत्तिस्थितिनाशकारण विश्वसाक्षिन् अन्तर्यामिन्नित्येति भावः॥ २४॥

अतिवञ्चयन् स्वस्वरूपगोपनेन संसारपातिनः कुर्वन् एतदपि मायाकृतमेव तत्त्वतस्त्वय्यारोपितं बोध्यम्॥ २५॥

सर्वेषां हृदि स्थितोऽपि स्वप्रकाशोऽपि त्वं मायया गूह्यमानो भवसि तर्हीदृशत्वे किं मानमित्यत आह अमलात्मनां व्यक्त एवेति तदनुभव एव तव तादृशत्वे प्रमाणम् इति भावः॥ २६॥

उन्मीलयन्निति तव निमेषोन्मेषमात्रेण सृष्टिप्रलयाविति भावः॥२७॥

यस्मिन् सर्वमिदं भाति यतश्चैतच्चराचरम्।
यस्मान्न किञ्चिल्लोकेऽस्मिन् तस्मै ते ब्रह्मणे नमः॥ ३८॥
प्रकृतिं पुरुषं कालं व्यक्ताव्यक्तस्वरूपिणम्।
यं जानन्ति मुनिश्रेष्ठास्तस्मै रामाय ते नमः॥ ३९॥
विकाररहितं शुद्धं ज्ञानरूपं श्रुतिर्जगौ।
त्वां सर्वजगदाकारमूर्त्तिं चाप्याह सा श्रुतिः॥ ४०॥
विरोधो दृश्यते देव! वैदिको वेदवादिनाम्।
निश्चयं नाधिगच्छन्ति त्वत्प्रसादं विना बुधाः॥ ४१॥
मायया क्रीड़तो देव! न विरोधो मनागपि।
रश्मिजालं रवेर्यद्वद्दृश्यते जलवद्भ्रमात्॥ ४२॥
भ्रान्तिज्ञानात्तथा राम! त्वयि सर्वं प्रकल्प्यते।

यस्मिन्निति यदाधारत्वादिदं भातीति व्यवहारविषयः भानस्य त्वद्रूपत्वादिति भावः यत एतच्चराचरं जायते यस्मिन् लीयते येन तिष्ठति चेत्यर्थः सार्वविभक्तिकस्तसिः यस्मादधिकं न किञ्चित्तस्मै ब्रह्मरूपिणे नम इत्यर्थः॥ ३८॥

यं प्रकृतिं जानन्ति शक्तिशक्तिमतोरभेदात् यं पुरुषं जानन्ति अंशांशिनोरभेदात् 'ममैवांशो जीवलोके जीवभूतः सनातनः' इति गीतोक्तेः व्यक्तस्वरूपःकालो निमिषादिः अव्यक्तः चयरूपस्तदुभयरूपं कालं यं त्वां जानन्ति तस्मै नमः॥ ३९। ४०॥

विकाररहितत्वादसर्वाकारवादयोरापाततो विरोधो दृश्यते जगतो विकाररूपत्वात्॥ ४१॥

त्वत्प्रसादलभ्यं निश्चयमाह माययेति एवं च जगदाकाररूपत्वं मायिकमिति न विरोधः मायिकत्वज्ञानं च जगति त्वत्प्रसादं विना दुर्लभमिति भावः ननु मायिकत्वेऽपि जगत्स्वरूपत्वं भगवतः कथमित्यत्राह रश्मिजालमिति तथा तत्र मरुदेशावच्छिन्ने रविरश्मिजाले जलभ्रमो मृगाणाम्॥ ४२॥

तथा त्वयि जगत् भ्रान्तिज्ञानात् शुक्तौ रजतमिव प्रकल्प्यते जनैः

मनसो विषयो देव! रूपं ते निर्गुणं परम् ॥ ४३ ॥
कथं दृश्यं भवेद्देव! दृश्याभावे जपेत् कथम्?।
अतस्तवावतारेषु रूपाणि निपुणा भुवि ॥ ४४ ॥
भजन्ति बुद्धिसम्पन्नास्तरन्त्येव भवार्णवम् ।
कामक्रोधादयस्तत्र बहवः परिपन्थिनः ॥ ४५ ॥
शोषयन्ति सदा चेतो मार्जारा मूषकं यथा ।
त्वन्नाम स्मरतां नित्यं त्वद्रूपमपि मानसे ॥ ४६ ॥
त्वत्पूजानिरतानां ते कथामृतपरात्मनाम् ।
त्वद्भक्तसङ्गिनां राम! संसारो गोष्पदायते ॥ ४७ ॥
अतस्ते सगुणं रूपं ध्यात्वाहं सर्वदा हृदि ।
मुक्तश्चरामि लोकेषु पूज्योऽहं सर्वदैवतैः ॥ ४८ ॥

माययापि निरधिष्ठानकभ्रमोत्पादनासम्भवात् अतस्त्वं तद्रूप इत्युच्यसे यत्तु ते वास्तवं निर्गुणं रूपं तन्मनसः श्रवणमननिदिध्यासनादिसंस्कृतस्य मनसो विषयः 'दृश्यते परया बुद्ध्या' इति श्रुतेः ॥ ४३ ॥

तत्तव निर्गुणं रूपं दृश्यं चक्षुरादिविषयः कथं भवेत् दृश्याभावे दृश्यत्वाभावे कथं भजेत् सेवेत् अतः तज्ज्ञानासम्भवात् तद्रूपाविचारे-णावताररूपाणि भजन्ति तावतैव भवार्णवं तरन्त्येव ॥ ४४ ॥ ४५ ॥

शोषयन्ति त्वद्ध्यानान्निवर्त्तयन्ति ध्यानदार्ढ्योपायमाह त्वन्नामस्मरतां पुंसां त्वद्रूपमपि मानसे भवतीति शेषः नामस्मरणमेव भगवद्रूपध्याने दृढ उपाय इति भावः ॥ ४६ ॥

सगुणसेवापि मोक्षदेत्याह त्वत्पूजेत्यादि गोष्पदायते इत्यनेन तस्य अल्पतरत्वं सूच्यते ॥ ४७ ॥

अतो निर्गुणसेवाया दुष्करत्वात् सगुणसेवाया अपि मोक्षदत्वाच्चे-त्यर्थः मुक्तः संसारकलेशान् मुक्तावस्थत्वं स्वस्य सूचितम् अतएव सर्वदैवतैः पूज्यः ॥ ४८ ॥

राम! त्वया महत्कार्यं कृतं देवहितेच्छया।
कुम्भकर्णवधेनाद्य भूभारोऽयं गतः प्रभो!॥ ४८॥
श्वो हनिष्यति सौमित्रिरिन्द्रजितारमाहवे।
हनिष्यसेऽद्य रामस्त्वं परश्वो दशकन्धरम्॥ ५०॥
पश्यामि सर्वं देवेश! सिद्धैः सह नभो गतः।
अनुगृह्णीष्व मां देव! गमिष्यामि सुरालयम्॥ ५१॥
इत्युक्त्वा राममामन्त्र्य नारदो भगवान् ऋषिः।
ययौ देवैः पूज्यमानो ब्रह्मलोकमकल्मषम्॥ ५२॥
भ्रातरं निहतं श्रुत्वा कुम्भकर्णं महाबलम्।
रावणः शोकसन्तप्तो रामेणाक्लिष्टकर्मणा॥ ५३॥
मूर्च्छितः पतितो भूमावुत्थाय विललाप ह।
पितृव्यं निहतं श्रुत्वा पितरं चातिविह्वलम्॥ ५४॥
इन्द्रजित् प्राह शोकार्त्तं त्यज शोकं महामते!।

एवं स्वस्वरूपेण स्तुत्वा प्रकृतकर्मणापि स्तौति रामेति गतः गत-प्रायः॥ ४९॥

श्व इति इदं तद्वधसामयप्रकाशकतायोतकं वाल्मीक्युक्त्या अग्निवेश्योक्त्या च दिनत्रयेणेन्द्रजितो वधः प्रतीयते अध्यात्मापि वक्ष्यति 'अहोरात्रैस्त्रिभिर्वीरः कथञ्चिद्विनिपातित' इति एवं 'परश्वः' इत्यपि अग्निवेश्यरामायणे अष्टादशाहानि रामरावणयोर्द्वन्द्वयुद्धस्योक्तेः॥ ५०॥

नभोगतः नभःशब्देन भूर्लोकोर्द्ध्वलोकास्तदन्यतमस्थितः सर्वं युद्धवृत्तान्तं पश्यामि साक्षात्करोमि त्वद्भक्तिजनितज्ञानोत्कर्षेण ध्यानप्रतिबन्धकस्य सर्वेन्द्रियतमसो निरसनात् अनेन गमनानुमत्यर्थकं युद्धदर्शनार्थं स्थेयमित्यस्यावसरो निराकृतः॥ ५१।५२॥

रामेण निहतं श्रुत्वेत्यन्वयः॥ ५३॥

पितरं चातिविह्वलं दृष्ट्वेति शेषः॥ ५४॥

अयि जीवति राजेन्द्र! मेघनादे महाबले॥ ५५

दुःखस्यावसरः कुत्र देवान्तक! महामते!।
व्येतु ते दुःखमखिलं स्वस्थो भव महीपते!॥ ५६॥

सर्वं समीकरिष्यामि हनिष्यामि च वै रिपून्।
गत्वा निकुम्भिलां सद्यस्तर्पयित्वा हुताशनम्॥ ५७॥

लब्ध्वा रथादिकं तस्मादजेयोऽहं भवाम्यरेः।
इत्युक्ता त्वरितं गत्वा निर्द्दिष्टं हवनस्थलम्॥ ५८॥

रक्तमाल्याम्बरधरो रक्तगन्धानुलेपनः।
निकुम्भिलास्थले मौनी हवनायोपचक्रमे।

बिभीषणोऽथ तच्छ्रुत्वा मेघनादस्य चेष्टितम्॥५८॥
प्राह रामाय सकलं होमारम्भं दुरात्मनः।

समाप्यते चेद्धोमोऽयं मेघनादस्य दुर्मतेः।
तदाऽजेयो भवेद्राम! मेघनादः सुरासुरैः॥ ६०॥

अतः शीघ्रं लक्ष्मणेन घातयिष्यामि रावणिम्।
आज्ञापय मया सार्द्धं लक्ष्मणं बलिनां वरम्।

शोकार्त्तं रावणं प्राह अजेत्यादि॥ ५५॥

देवान्तकेति देवनाशकस्य मनुष्यमात्रात् दुःखावसरः कोऽयमर्थः॥५६॥२

समीकरिष्यामि त्वदीयपुत्रस्य हननेनागतोयं सर्वदुःखं दुःखेन समं करिष्यामीत्यर्थः तद्देशाच्च हनिष्यामीति तदुपायमाह गत्वेति॥ ५७॥

लब्ध्वेत्यस्य योत् स्यामीति शेषः तस्माद्रथादिलाभात् अजेयः युद्ध इति शेषः निर्द्दिष्टमुक्तं हवनायोपचक्रमे इत्यन्वयः॥ ५८। ५८॥

दुरात्मनः इन्द्रजितः तदा अजेय इति च्छेदः॥ ६०॥

शीघ्रं होमसमाप्तेः प्रागेव [illegible] [illegible] [illegible] तं [illegible]दिति

हनिष्यति न सन्देहो मेघनादं तवानुजः(१) ॥ ६१ ॥

श्रीरामचन्द्र उवाच ।

अहमेव गमिष्यामि हन्तुमिन्द्रजितं रिपुम् ।
आग्नेयेन महास्त्रेण सर्वराक्षसघातिना ॥ ६२ ॥
विभीषणोऽपि तं प्राह नासावन्यैर्निहन्यते ।
यस्तु द्वादशवर्षाणि निद्राहारविवर्जितः ॥ ६३ ॥
तेनैव मृत्युर्निर्दिष्टो ब्रह्मणास्य दुरात्मनः ।
लक्ष्मणस्तु अयोध्याया निर्गम्यायायात्त्वया सह ॥ ६४ ॥
तदादि निद्राहारादीन्न जानाति रघूत्तम ! ।
सेवार्थं तव राजेन्द्र ! ज्ञातं सर्वमिदं मया ॥ ६५ ॥
तदाज्ञापय देवेश ! लक्ष्मणं त्वरया मया(२) ।
हनिष्यति न सन्देहः शेषः साक्षाद्धराधरः ॥ ६६ ॥

त्वमेव साक्षाज्जगतामधीशो
नारायणो लक्ष्मण एव शेषः ।

सन्देहो नास्तीत्याह हनिष्यतीति ॥ ६१ ॥

रामो मायामानुष्यं नाटयन्नाह अहमेवेति ॥ ६२ ६३ ॥

लक्ष्मणस्तु तादृश इत्याह लक्ष्मणस्त्विति त्वया सह यत्प्रभृत्या-[illegible]र ॥ ६४ ॥

तदादि निद्रादीनि न जानाति न चरति चानुष्ठानं तु दूरापास्तमित्यर्थः तत् ज्ञाने हेतुः सेवार्थं ममेति ॥ ६५ ॥

मया सहेति शेषः ॥ ६६ ॥

---

(१) तवाग्रजा इति वा पाठः ।

(२) त्वं मया सह इति पाठान्तरम् ।

युवां धराभारनिवारणार्थं
जातौ जगन्नाटकसूत्रधारौ ॥ ६७ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
अष्टमः सर्गः ।

तस्य शेषत्वमेव दार्ढ्याय पुनराह त्वमेवेति जगतो निर्माणरूपं नाटकं तस्य सूत्रधारौ मुख्यकारणौ ॥ ६७ ॥

इति श्रीमत्सकलराजाधिपधुरन्धरसमर्थेत्यादिवि० श्रीरामवर्मणः
कृतौ श्रीमदध्यात्मरामायणे सेतौ युद्धकाण्डे
अष्टमः सर्गः ।

नवमः सर्गः ।

विभीषणवचः श्रुत्वा रामो वाक्यमथाब्रवीत् ।
जानामि तस्य रौद्रस्य मायां कृत्स्नां विभीषण ! ॥ १ ॥
स हि ब्रह्मास्त्रविच्छूरो मायावी च महाबलः ।
जानामि लक्ष्मणस्यापि स्वरूपं मम सेवनम् ॥ २ ॥
ज्ञात्वैवासमर्हं तूष्णीं भविष्यत्कार्यगौरवात् ।
इत्युक्त्वा लक्ष्मणं प्राह रामो ज्ञानवतां वरः ॥ ३ ॥
गच्छ लक्ष्मण ! सैन्येन महता जहि रावणिम् ।
हनूमत्प्रमुखैः सर्वैर्यूथपैः(१)सह लक्ष्मण ! ॥ ४ ॥
जाम्बवानृक्षराजोऽयं सह सैन्येन संवृतः ।
विभीषणश्च सचिवैः सह त्वामभियास्यति ॥ ५ ॥
अभिज्ञस्तस्य देशस्य जानाति विवराणि सः ।
रामस्य वचनं श्रुत्वा लक्ष्मणः सविभीषणः ॥ ६ ॥

विभीषणेति तस्य इन्द्रजितः रौद्रस्य अतितामसस्य ॥ १ ॥

मम सेवनं मत्परिचरणं निद्रादिराहित्यरूपम् ॥ २ ॥

पूर्वं वनवाससमयेऽहं तस्य निद्राहारादिराहित्यं ज्ञात्वापि भविष्यतः कार्यस्येन्द्रजिद्वधरूपस्य गुरुत्वात् तूष्णीमासं तं न निषिद्धवानित्यर्थः इत्युक्त्वा विभीषणमिति शेषः ॥ ३ ॥

लक्ष्मणेति द्विःसम्बोधनमादरपूर्वमन्यासाध्यत्वसूचनाय ॥ ४ ॥

ससैन्यसंवृत ऋक्षराजः सचिवसहितो विभीषणश्च त्वामभियास्यति अनुयास्यति ॥ ५ ॥

विभीषणस्यानुगमनं कार्यसाधकमित्याहाभिज्ञ इति तस्य इन्द्रजिद्धननदेशस्य विवराणि रिपूणां छिद्राणि ॥ ६ ॥

---

(१) कपिपतिना इति वा पाठः ।

जग्राह कार्मुकं श्रेष्ठमत्यद्भीमपराक्रमः।
रामपादाम्बुजं स्पृष्ट्वा हृष्टः सौमित्रिरब्रवीत्॥ ७॥
अद्य मत्कार्मुकान्मुक्ताः शरा निर्भिद्य रावणिम्।
गमिष्यन्ति हि पातालं स्नातुं भोगवतीजले॥ ८॥
एवमुक्त्वा स सौमित्रिः परिक्रम्य प्रणम्य तम्।
इन्द्रजिन्निधनाकाङ्क्षी ययौ त्वरितविक्रमः॥ ९॥
वानरैर्बहुसाहस्रैर्हनूमान् पृष्ठतोऽन्वगात्।
विभीषणश्च सहितो मन्त्रिभिस्त्वरितं ययौ॥ १०॥
जाम्बवत्प्रमुखा ऋक्षाः सौमित्रिं त्वरयान्वगुः।
गत्वा निकुम्भिलादेशं लक्ष्मणो वानरैः सह॥ ११॥
अपश्यद् बलसङ्घातं दूराद्राक्षससङ्कुलम्।
धनुरायम्य सौमित्रिर्यत्तोऽभूद्भूरिविक्रमः॥ १२॥
अङ्गदेन च वीरेण जाम्बवान् राक्षसाधिपः।
तदा विभीषणः प्राह सौमित्रिं पश्य राक्षसान्॥ १३॥
यदेतद्राक्षसानीकं मेघश्यामं विलोक्यते।
अस्यानीकस्य(१)महतो भेदने यत्नवान् भव॥ १४॥

स्पृष्ट्वेति कार्मं स्पृष्ट्वा इत्यर्थः॥ ७॥
भोगवती पातालगङ्गा॥ ८॥
संभ्रवालरूपः स्नातः सन्निवाकृत तं रामम्॥ ९—११॥
बलसङ्घातम् इन्द्रजिद्रक्षार्थं स्थितं राक्षससङ्घं राक्षसव्याप्तम्।
अङ्गदेन वीरेण जाम्बवान् यत्तोऽभूदित्यनुकर्षः राक्षसाधिप
इत्युत्तरान्वयः विभीषणोऽपि राक्षसान् इन्द्रजिद्रक्षकान्॥ १२। १४॥

(१) पद्मानीकस्य इति पाठान्तरम्।

राक्षसेन्द्रसुतोऽप्यस्मिन् भिन्ने हन्तो भविष्यति ।
अभिद्रवाशु यावद्वै नैतत्कर्म समाप्यते ॥ १५ ॥
जहि वीर ! दुरात्मानं हिंसापरमधार्मिकम् ।
विभीषणवचः श्रुत्वा लक्ष्मणः शुभलक्षणः ॥ १६ ॥
ववर्ष शरवर्षाणि राक्षसेन्द्रसुतं प्रति ।
पाषाणैः पर्वताग्रैश्च वृक्षैश्च हरियूथपाः ॥ १७ ॥
निजघ्नुः सर्वतो दैत्यान् तेऽपि वानरयूथपान् ।
परश्वधैः शितैर्बाणैरसिभिर्यष्टितोमरैः ॥ १८ ॥
निजघ्नुर्वानरानीकं तदा शब्दो महानभूत् ।
स संप्रहारस्तुमुलः सञ्जज्ञे हरिरक्षसाम् ॥ १९ ॥
इन्द्रजित् स्वबलं सर्वमर्द्यमानं विलोक्य सः ।
निकुम्भिलाया होमञ्च त्यक्त्वा शीघ्रं विनिर्गतः ॥ २० ॥
रथमारुह्य सधनुः क्रोधेन महतागमत् ।
समाह्वयित्वा सौमित्रिं (१) युद्धाय रथमूर्द्धनि ॥ २१ ॥

अस्मिन् रक्षोऽनीके भिन्ने त्वच्छरभेदेन पलायिते एतत्कर्म इन्द्रजिद्वधकर्म ॥ १६ ॥

राक्षसेन्द्रसुतं प्रति तन्नेगां प्रतीत्यर्थः ॥ १७ ॥

ते राक्षसाः ॥ १८ ॥

शब्दः शूराणां सिंहनादरूपः ॥ १९ ॥

निकुम्भिलां च होमं चेति केवलं कर्मत्याग एव न किन्तु तद्देशत्यागोऽपीत्यर्थः ॥ २० ॥

महता क्रोधेन युक्तो युद्धाय सौमित्रिं लक्ष्मणमाह्वयित्वा रथमूर्द्धनि रथमूर्धभागम् अगमत् प्राप्तः स्थवभाव इत्यर्थः ॥ २१ ॥

---

(१) समर्थयित्वा समरे इत्यपि पाठः ।

सौमित्रे ! मेघनादोऽहं मया जीवन्न मोक्ष्यसे ।
तत्र दृष्ट्वा पितृव्यं स प्राह निष्ठुरभाषणम् ॥ २२ ॥
इहैव जातः संवृद्धः साक्षाद्भ्राता पितुर्मम ।
स त्वं स्वजनमुत्सृज्य परभृत्यत्वमागतः ॥ २३ ॥
कथं द्रुह्यसि पुत्राय ? पापीयानसि दुर्मतिः ।
इत्युक्त्वा लक्ष्मणं दृष्ट्वा हनूमत्पृष्ठतः स्थितम् ॥ २४ ॥
उद्यदायुधनिस्त्रिंशे रथे महति संस्थितः ।
महाप्रमाणमुद्यम्य घोरं विस्फारयन् धनुः ॥ २५ ॥
अद्य वो मामका बाणाः प्राणान् पास्यन्ति वानराः ! ।
ततः शरं दाशरथिः सन्धायामित्रकर्षणः ॥ २६ ॥
ससर्ज राक्षसेन्द्राय क्रुद्धः सर्प इव श्वसन् ।
इन्द्रजिद्रक्तनयनो लक्ष्मणं समुदैक्षत ॥ २७ ॥
शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतः शरैः ।
मुहूर्त्तमभवन्मूढः पुनः प्रत्याहृतेन्द्रियः ॥ २८ ॥

समाह्वयन्नाह सौमित्रे इति निष्ठुरभाषणं निष्ठुरवाक्यम् ॥२२॥
परभृत्यत्वमागत इत्यस्नेहयं त्वां धिगिति शेषः ॥ २३ ॥
द्रुह्यसि मदीयं छिद्रं शत्रुभ्यो दर्शयसीत्यर्थः पृष्ठतः "सार्वविभक्तिकस्तसिः" षष्ठी इत्यर्थः ॥ २४ ॥
उद्यन्ति प्रकाशं स्थितानि आयुधानि निस्त्रिंशाश्च यस्मिन् तादृशे रथे इत्यर्थः महाप्रमाणं सार्धत्रयवितस्ति ॥ २५ ॥
भो वानरा युष्माकं प्राणान्मम बाणाः पास्यन्ति इति अवददिति शेषः दाशरथिर्लक्ष्मणः ॥ २६ ॥
इन्द्रजित् क्रोधाद्रक्तनयनो बाणमात्रप्रकाशं लक्ष्मणमपश्यत् ॥२७॥
ततः शरैराहतः पीडितो मूढः मूर्च्छितः अभवत् प्रत्याहृतेन्द्रियः प्राप्तेन्द्रियज्ञानः पुनर्व्यपगतमूर्च्छोऽभवदिति यावत् ॥ २८ ॥

ददर्शावस्थितं वीरं वीरो दशरथात्मजम् ।
सोऽभिचक्राम सौमित्रिं क्रोधसंरक्तलोचनः ॥ २९ ॥
शरान् धनुषि सन्धाय लक्ष्मणं चेदमब्रवीत् ।
यदि ते प्रथमे युद्धे न दृष्टो मे पराक्रमः ॥ ३० ॥
अद्य त्वां दर्शयिष्यामि तिष्ठेदानीं व्यवस्थितः ।
इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणम् ॥ ३१ ॥
दशभिश्च हनूमन्तं तीक्ष्णधारैः शरोत्तमैः ।
ततः शरशतेनैव संप्रयुक्तेन वीर्यवान् ॥ ३२ ॥
क्रोधद्विगुणसंरब्धो निर्बिभेद विभीषणम् ।
लक्ष्मणोऽपि तथा शक्रं शरवर्षैरवाकिरत् ॥ ३३ ॥
तस्य बाणैः सुसंविद्धं कवचं काञ्चनप्रभम् ।
व्यशीर्यत रथोपस्थे तिलशः पतितं भुवि ॥ ३४ ॥
ततः शरसहस्रेण संक्रुद्धो रावणात्मजः ।
बिभेद समरे वीरं लक्ष्मणं भीमविक्रमम् ॥ ३५ ॥
व्यशीर्यतापतद्दिव्यं कवचं लक्ष्मणस्य च ।
कृतप्रतिकृतान्योऽन्यं बभूवतुरभिद्रुतौ ॥ ३६ ॥
अभीक्ष्णं निश्वसन्तौ तौ युद्धे तां तुमुलं पुनः ।

सौमित्रिमभिचक्राम तत्संमुखं अगामेत्यर्थः ॥ २९—३१ ॥

संप्रयुक्तेन धनुषः सकाशात् प्रेरितेन ॥ ३२ । ३३ ॥

सुसंविद्धं सुतरां सम्यक् विद्धं रथमध्ये विशीर्णं तत्र पुनर्बाणैस्ति-
लशः खण्डितं भुवि पतितम् ॥ ३४ । ३५ ॥

दिव्यमपि लक्ष्मणस्य कवचं तद्बाणैर्व्यशीर्यतापतच्च अन्योऽन्यं कृत-
प्रतिकृतौ कृते प्रतिकृतं याभ्यां तादृशौ बभूवतुः ॥ ३६ ॥

शरसंवृतसर्वाङ्गौ सर्वतो रुधिरोक्षितौ ॥ ३७ ॥
सुदीर्घकालं तौ वीरावन्योऽन्यं निशितैः शरैः ।
अयुध्येतां महासत्त्वौ जयाजयविवर्ज्जितौ ॥ ३८ ॥
एतस्मिन्नन्तरे वीरो लक्ष्मणः पञ्चभिः शरैः ।
रावणेः सारथिं साश्वं रथं च समचूर्णयत् ॥ ३९ ॥
चिच्छेद कार्मुकं तस्य दर्शयन् हस्तलाघवम् ।
सोऽन्यत्तु कार्मुकं भद्रं सज्यं चक्रे त्वरान्वितः ॥ ४० ॥
तच्चापमपि चिच्छेद लक्ष्मणस्त्रिभिराशुगैः ।
तमेव च्छिन्नधन्वानं विव्याधानेकसायकैः ॥ ४१ ॥
पुनरन्यत् समादाय कार्मुकं भीमविक्रमः ।
इन्द्रजिल्लक्ष्मणं बाणैः शतैरादित्यसन्निभैः ॥ ४२ ॥
बिभेद वानरान् सर्वान् बाणैरापूरयन् दिशः ।
तत ऐन्द्रं समादाय लक्ष्मणो रावणिं प्रति ॥ ४३ ॥
सन्धायाकृष्य कर्णान्तं कार्मुकं दृढनिष्ठुरम् ।
उवाच लक्ष्मणो वीरः स्मरन् रामपदाम्बुजम् ॥ ४४ ॥
धर्म्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि ।
त्रिलोक्यामप्रतिद्वन्द्वस्तदेनं जहि रावणिम् ॥ ४५ ॥
इत्युक्त्वा बाणमाकर्णाद्विकृष्य तमजिह्मगम् ।
लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति ॥ ४६ ॥

उभयं चात्याश्चर्यं दृष्टिभिर्विस्मिय मातृमयक्यं च ॥ ३७ ॥
जयाजयविवर्ज्जितावित्यनेन समयुद्धतोक्ता ॥ ३८—४२ ॥
ऐन्द्रं ऐन्द्रास्त्राभिमन्त्रितं यद्वा अगस्त्यद्वारा इन्द्रदत्तं तूणीरा-
द्रामेण दत्तमित्यर्थः ॥ ४३—४५ ॥

सशरः सशिरस्त्राणं श्रीमज्ज्वलितकुण्डलम् ।
प्रमथ्येन्द्रजितः कायात् पातयामास भूतले ॥ ४७ ॥
ततः प्रमुदिता देवाः कीर्त्तयन्तो रघूत्तमम् ।
ववर्षुः पुष्पवर्षाणि स्तुवन्तश्च मुहुर्मुहुः ॥ ४८ ॥
जहर्ष शक्रो भगवान् सह देवैर्महर्षिभिः ।
आकाशेऽपि च देवानां शुश्रुवे दुन्दुभिस्वनः ॥ ४९ ॥
विमलं गगनं चासीत् स्थिराभूद्विश्वधारिणी ।
निहतं रावणिं दृष्ट्वा जयजल्पसमन्वितः ॥ ५० ॥
गतश्रमः स सौमित्रिः शङ्खमापूरयद्रवे ।
सिंहनादं ततः कृत्वा ज्याशब्दमकरोद्विभुः ॥ ५१ ॥
तेन नादेन संहृष्टा वानराश्च गतश्रमाः ।
वानरेन्द्रैश्च सहितः स्तुवद्भिर्हृष्टमानसैः ॥ ५२ ॥
लक्ष्मणः परितुष्टात्मा ददर्शाभ्येत्य राघवम् ।
हनूमद्राक्षसाभ्यां च सहितो विनयान्वितः ॥ ५३ ॥
ववन्दे भ्रातरं रामं ज्येष्ठं नारायणं विभुम् ।
त्वत्प्रसादाद्रघुश्रेष्ठ ! हतो रावणिराहवे ॥ ५४ ॥
श्रुत्वा तल्लक्ष्मणाद्वाक्यं तमालिङ्ग्य रघूत्तमः ।

तं बाणं ऐन्द्रबाणम् ॥ ४६ । ४७ ॥

रघूत्तमं कीर्त्तयन्तः तद्गुणान् कीर्त्तयन्तः तैरेव स्तुवन्तश्च त्वर्षः ॥ ४८ । ४९ ॥

स्थिराभूत् तावत्पर्यन्तं राक्षसभारेण कम्पमानैवासीदिति व्यङ्ग्यं जयजल्पः हृष्टो जयशब्दः ॥ ५० । ५१ ॥

गतश्रमा आसन्निति शेषः स्तुवद्भिर्लक्ष्मणमिति शेषः ॥ ५२ ॥

राक्षसो विभीषणः ॥ ५३ । ५४ ॥

मूर्द्ध्न्यवघ्राय मुदितः सस्नेहमिदमब्रवीत् ॥ ५५ ॥
साधु लक्ष्मण ! तुष्टोऽस्मि कर्म ते दुष्करं कृतम् ।
मेघनादस्य निधने जितं सर्वमरिन्दम ! ॥ ५६ ॥
अहोरात्रैस्त्रिभिर्वीरः कथञ्चिद्विनिपातितः ।
निःसपत्नः कृतोऽस्म्यद्य निर्यास्यति हि रावणः ॥ ५७ ॥
पुत्रशोकान्मया योद्धुं तं हनिष्यामि रावणम् ।
मेघनादं हतं श्रुत्वा लक्ष्मणेन महाबलम् ॥ ५८ ॥
रावणः पतितो भूमौ मूर्च्छितः पुनरुत्थितः ।
विललापातिदीनात्मा पुत्रशोकेन रावणः ॥ ५९ ॥
पुत्रस्य गुणकर्माणि संस्मरन् पर्यदेवयत् ।
अद्य देवगणाः सर्वे लोकपाला महर्षयः ॥ ६० ॥
हतमिन्द्रजितं ज्ञात्वा सुखं स्वप्स्यन्ति निर्भयाः ।
इत्यादिबहुशः पुत्रलालसो विललाप ह ॥ ६१ ॥
ततः परमसंक्रुद्धो रावणो राक्षसाधिपः ।
उवाच राक्षसान् सर्वान् निनाशयिषुराहवे ॥ ६२ ॥
स पुत्रवधसन्तप्तः शूरः क्रोधवशं गतः ।
संवीक्ष्य रावणो बुद्ध्या हन्तुं सीतां प्रदुद्रुवे ॥ ६३ ॥

लक्ष्मणात्तत् इन्द्रजिन्निधनं श्रुत्वेत्यर्थः ॥ ५५ ॥
सर्वराक्षसकुलम् ॥ ५६ । ५७ ॥
मया योद्धुं निर्यास्यतीत्यन्वयः ॥ ५८ । ५९ ॥
पर्यदेवयत् शोकं कृतवानित्यर्थः ॥ ६० ॥
पुत्रलालसः पुत्रे लालसा प्रीतिर्यस्य सः ॥ ६१ ॥
सर्वान् राक्षसान् निनाशयिषुरिच्छुः रणाय युद्धाय गच्छध्वमितीति
शेषः ॥ ६२ ॥

खड्गपाणिमथायान्तं क्रुद्धं दृष्ट्वा दशाननम्।
राक्षसीमध्यगा सीता भयशोकाकुलाभवत्॥ ६४॥
एतस्मिन्नन्तरे तस्य सचिवो बुद्धिमान् शुचिः।
सुपार्श्वो नाम मेधावी रावणं वाक्यमब्रवीत्॥ ६५॥
ननु नाम दशग्रीव! साक्षाद्वैश्रवणानुजः।
वेदविद्याव्रतस्नातः स्वकर्मपरिनिष्ठितः॥ ६६॥
अनेकगुणसम्पन्नः कथं स्त्रीवधमिच्छसि?।
अस्माभिः सहितो युद्धे हत्वा रामं च लक्ष्मणम्।
प्राप्स्यसे जानकीं शीघ्रमित्युक्तः स न्यवर्तत॥ ६७॥
ततो दुरात्मा सुहृदा निवेदितं
वचः सुधर्म्यं प्रतिगृह्य रावणः।
गृहं जगामाशु शुचा विमूढधीः
पुनः सभां च प्रययौ सुहृद्वृतः॥ ६८॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
नवमः सर्गः।

मृत्वा संवीक्ष्य सीतानाशे रामनाश इति विचार्येत्यर्थः॥ ६१–५६॥
हे दशग्रीव वैश्रवणानुजत्वादिभिर्ननु नाम अतिशयेन प्रसिद्धः
कथं स्त्रीवधमिच्छसीत्यन्वयः॥ ६६॥
इति सुपार्श्वेनोक्तः स रावणो न्यवर्तत निवृत्तः॥ ६७॥
शुचा शोकेन विमूढधीः सभागमनमेव तदवसरे युक्तम् तत्र
स्त्रीगमनं विमोहः॥ ६८॥

इति श्रीमत्पञ्चकोटराजवि० श्रीरामवर्मणः कृताव-
ध्यात्मरामायणसेतौ युद्धकाण्डे
नवमः सर्गः।

अथ दशमः सर्गः ।

स विचार्य सभामध्ये राक्षसैः सह मन्त्रिभिः ।
निर्ययौ येऽवशिष्टास्तै राक्षसैः सह राघवम्(१) ॥ १ ॥
शलभः शलभैर्युक्तः प्रज्वलन्तमिवानलम् ।
ततो रामेण निहताः सर्वे ते राक्षसा युधि ॥ २ ॥
स्वयं रामेण निहतस्तीक्ष्णबाणेन वक्षसि ।
व्यथितस्त्वरितं लङ्कां प्रविवेश दशाननः ॥ ३ ॥
दृष्ट्वा रामस्य बहुशः पौरुषं चाप्यमानुषम् ।
रावणो मारुतेश्चैव शीघ्रं शुक्रान्तिकं ययौ ॥ ४ ॥
नमस्कृत्य दशग्रीवः शुक्रं प्राञ्जलिरब्रवीत् ।
भगवन् ! राघवेणैवं लङ्का राक्षसयूथपैः ॥ ५ ॥
विनाशिता महादैत्या निहताः पुत्रबान्धवाः ।
कथं मे दुःखसन्दोहस्त्वयि तिष्ठति सद्गुरौ ? ॥ ६ ॥
इति विज्ञापितो दैत्यगुरुः प्राह दशाननम् ।
होमं कुरु प्रयत्नेन रहसि त्वं दशानन ! ॥ ७ ॥
यदि विघ्नो न चेद्धोमे तर्हि होमानलोत्थितः ॥ ८ ॥
महान् रथश्च वाहाश्च चापतूणीरसायकाः ।

॥ १ । २ । ३ ॥
चापी पादपूरणे मारुतेश्च पौरुषं दृष्ट्वेति सम्बन्धः ॥ ४ ॥
एवं प्रकारेण राक्षसयूथपैः सह लङ्का विनाशितेत्यन्वयः ॥ ५ ॥
तदेवाह महादैत्या इत्यादि दुःखसन्दोहो दुःखसमूहः ॥ ६—८ ॥

---

(१) निर्ययौ राक्षसो रामं शिष्टैश्च सह राक्षसैः इति पाठान्तरम् ।

सम्भविष्यन्ति तेयुद्धस्त्वमजेयो भविष्यसि ॥ ९ ॥
गृहाण मन्त्रानस्मत्तान् गच्छ होमं कुरु द्रुतम्।
इत्युक्तस्त्वरितं गत्वा रावणो राक्षसाधिपः॥ १० ॥
गुहां पातालसदृशीं मन्दिरे स्वे चकार ह।
लङ्काद्वारकपाटादिबद्धा सर्वत्र यत्नतः॥ ११ ॥
होमद्रव्याणि सम्पाद्य यान्युक्तान्याभिचारिके।
गुहां प्रविश्य चैकान्ते मौनी होमं प्रचक्रमे ॥१२॥
उत्थितं धूममालोक्य महात्मा रावणानुजः।
रामाय दर्शयामास होमधूमं भयाकुलः॥ १३ ॥
पश्य राम! दशग्रीवो होमं कर्तुं समारभत्।
यदि होमः समाप्तः स्यात्तदाजेयो भविष्यति ॥ १४ ॥
अतो विघ्नाय होमस्य प्रेषयाशु हरीश्वरान्।
तथेति रामः सुग्रीवसम्मतेनाङ्गदं कपिम्॥ १५ ॥
हनूमत्प्रमुखान् वीरान् आदिदेश महाबलान्।
प्राकारं लङ्घयित्वा ते गत्वा रावणमन्दिरम्॥ १६ ॥
दशकोव्यः प्लवङ्गानां गत्वा मन्दिररक्षकान्।
चूर्णयामासुरश्वांश्च गजांश्च न्यहनन् क्षणात्॥ १७ ॥
ततश्च सरमा नाम प्रभाते हस्तसंज्ञया।

तूष्णीरक्षावकाः तूष्णीरस्थिताः रावका इत्यर्थः सम्भविष्यन्ति त्वां
न्यथज् प्राप्स्यन्ति ॥९।१०॥

सर्वत्र सर्वदिक्षु आदिना अन्यान्यपि छिद्राणि ॥ ११ । १२ ॥

रावणानुजो विभीषणः॥ १३ ॥

समारभत् आरब्धवान् अजेय इति च्छेदः॥ १४-१७ ॥

विभीषणस्य भार्या सा होमस्थानमसूचयत् ॥ १८ ॥
गुहापिधानपाषाणमङ्गदः पादघट्टनैः ।
चूर्णयित्वा महासत्त्वः प्रविवेश महागुहाम् ॥ १९ ॥
दृष्ट्वा दशाननं तत्र मीलिताक्षं दृढासनम् ।
ततोऽङ्गदाज्ञया सर्वे वानरा विविशुर्द्रुतम् ॥ २० ॥
तत्र कोलाहलं चक्रुस्ताडयन्तश्च सेवकान् ।
सम्भारांश्चिक्षिपुस्तत्र होमकुण्डे समन्ततः ॥ २१ ॥
स्रुवमाच्छिद्य हस्ताच्च रावणस्य बलाद्रुषा ।
तेनैव सञ्जघानाशु हनूमान् प्लवगाग्रणीः ॥ २२ ॥
अग्निं हुत्वैव काष्ठं च वानरास्त्वमितस्ततः ।
न जहौ रावणो ध्यानं हतोऽपि विजिगीषया ॥ २३ ॥
प्रविश्यान्तःपुरे वेश्मन्यङ्गदो वेगवत्तरः ।
समानयत् केशबन्धे धृत्वा मन्दोदरीं शुभाम् ॥ २४ ॥
रावणस्यैव पुरतो विलपन्तीमनाथवत् ।
विददाराङ्गदस्तस्याः कञ्चुकं रत्नभूषितम् ॥ २५ ॥
मुक्ता विमुक्ताः पतिताः समन्ताद्रत्नसञ्चयैः ।
श्रोणिसूत्रं निपतितं त्रुटितं रत्नचित्रितम् ॥ २६ ॥

विभीषणस्य भार्या सरमा नाम हस्तसंज्ञया होमस्थानमसूचयत् ज्ञापितवती ॥ १८ ॥

पादघट्टनैः पादाघातैः ॥ १९ । २० ॥

सम्भारान् होमसाधनानि ॥ २१ ॥

हनूमान् स्रुवमाच्छिद्य तेनैव जघान ॥ २२—२४ ॥

विददार नखैः विदीर्णं कृतवान् ॥ २५ ॥

ततः कञ्चुकाद्विश्लिष्टा विभक्ता मुक्ताः रत्नसञ्चयैस्ततो विभक्तैः सह

कटिप्रदेशाद्विस्रस्ता नीवी तस्यैव पश्यतः ।
भूषणानि च सर्वाणि पतितानि समन्ततः ॥ २७ ॥
देवगन्धर्वकन्याश्च नीता हृष्टैः प्लवङ्गमैः ।
मन्दोदरी वरोदाथ रावणस्याग्रतो भृशम् ॥ २८ ॥
क्रोशन्ती करुणं दीना जगाद दशकन्धरम् ।
निर्लज्जोऽसि परैरेवं केशपाशे विकृष्यते ॥ २९ ॥
भार्य्या तवैव पुरतः किं जुहोषि न लज्जसे ? ।
हन्यते पश्यतो यस्य भार्य्या पापैश्च शत्रुभिः ॥ ३० ॥
मर्त्तव्यं तेन तत्रैव जीवितान्मरणं वरम् ।
हा मेघनाद ! ते माता क्लिश्यते बत वानरैः ॥ ३१ ॥
त्वयि जीवति मे दुःखमीदृशं च कथं भवेत् ? ।
भार्य्या लज्जा च सन्त्यक्ता भर्त्रा मे जीविताशया ॥ ३२ ॥
श्रुत्वा तद्देवितं राजा मन्दोदर्य्या दशाननः ।
उत्तस्थौ खड्गमादाय त्यज देवीमिति ब्रुवन् ॥ ३३ ॥
जघानाङ्गदमव्यग्रः कटिदेशे दशाननः ।

भूमौ पतिता रत्नार्थः त्रुटितं वानराणामाकर्षणेन मग्नम् ॥ २६ ॥

तस्य रावणस्य पश्यत एवेत्यर्थः ॥ २७ ॥

नीता रावणहोमस्थानमिति शेषः ॥ २८ ॥

करुणं यथा स्यात्तथा क्रोशन्ती जगादेत्यन्वयः त्वं निर्लज्जोऽसि यस्तव भार्य्या तवैवाग्रे परैर्वानरैः केशपाशे धृत्वा विकृष्यते च ॥ २९ ॥

अतः किं जुहोषि किन्न लज्जसे तदेवाह हन्यते पश्यत इत्यादि ॥ ३० । ३१ ॥

त्वयि जीवति ईदृशं दुःखं भवेत् न भवेदेव त्वद्घातात् मे इदं दुःखं प्राप्तं च यादृग्भूतेन मे भर्त्रा जीविताशया भार्य्या लज्जा चेत्युभयमपि त्यक्तमित्यर्थः ॥ ३२ । ३३ ॥

ततोत्सृज्य ययुः सर्वे विध्वंस्य हवनं महत् ॥ २४ ॥
रामपार्श्वमुपागम्य तस्थुः सर्वे प्रहर्षिताः ।
राघवस्तु ततो भार्य्यामुवाच परिसान्त्वयन् ॥ २५ ॥
दैवाधीनमिदं भद्रे! जीवता किन्न दृश्यते ? ।
त्यज शोकं विशालाक्षि! ज्ञानमालम्ब्य निश्चितम् ॥ २६ ॥
अज्ञानप्रभवः शोकः शोको ज्ञानविनाशकृत् ।
अज्ञानप्रभवाहंधीः शरीरादिष्वनात्मसु ॥ २७ ॥
तन्मूलः पुत्रदारादिसम्बन्धः संसृतिस्ततः ।
हर्षशोकभयक्रोधलोभमोहस्पृहादयः ॥ २८ ॥
अज्ञानप्रभवा ह्येते जन्ममृत्युजरादयः (१) ।

ततोत्सृज्य तत उत्सृज्येति च्छेदः आर्षः सन्धिः महत् महाफलजनकं हवनमित्यर्थः ॥ २४ ॥ २५

जीवता प्राणिना किं न दृश्यते असम्भावितमपि दृश्यत इत्यर्थः ततो ममेदृशमवस्थेति शोकं त्यज ज्ञानं भावि दुर्वारमिति ज्ञानम् ॥ २६ ॥

अज्ञानकृतस्य वस्तुनो ज्ञानेन नाश इति वेत्सूर्वेभिरमज्ञानकृतमेवेत्याहाज्ञानेति अतएव कर्त्तव्याकर्त्तव्यविषयज्ञाननाशकोऽतः सर्वथा ज्ञानालम्बेन त्वत्यक्तुं शक्य इति भावः किं बहुना सर्वः संसार एवाज्ञानमूलकस्तन्मूलस्य शरीरादिष्वहंज्ञानस्याज्ञानप्रभवत्वादित्याहाज्ञानप्रभवेति ॥ २७ ॥

पुत्रदारादिसम्बन्ध एते मदीया इत्यभ्यासः ततः संसृतिः जन्मकर्मोत्पत्तिः एवं हर्षादयो जन्माद्याश्चाज्ञानमूलाः तत्तज्जनककर्मणामज्ञानजन्यत्वात् इदं लब्धमिति हर्षजनकस्येदं मे नष्टमिति शोकजनकस्यार्थे वे हन्तेत्यादिभयादिजनकज्ञानस्याज्ञानमूलकत्वाच्च ॥ २८ ॥

(१) मोहमदादय इत्यपि पठनीयम् ।

आत्मा तु केवलः शुद्धो व्यतिरिक्तो ह्यलेपकः ॥ ३९ ॥
आनन्दरूपो ज्ञानात्मा सर्वभावविवर्जितः ।
न संयोगो वियोगो वा विद्यते केनचित् सतः ॥ ४० ॥
एवं ज्ञात्वा स्वमात्मानं त्यज शोकमनिन्दिते ।
इदानीमेव गच्छामि हत्वा रामं सलक्ष्मणम् ॥ ४१ ॥
आगमिष्यामि नो चेन्मां दारयिष्यति सायकैः ।
श्रीरामो वज्रकल्पैश्च ततो गच्छामि तत्पदम् ॥ ४२ ॥
तदा त्वया मे कर्तव्या क्रिया मच्छासनात्प्रिये ।
सीतां हत्वा मया सार्धं त्वं प्रवेक्ष्यसि पावकम् ॥ ४३ ॥
एवं श्रुत्वा वचस्तस्य रावणस्यातिदुःखिता ।
उवाच नाथ ! मे वाक्यं शृणु सत्यं तथा कुरु ॥ ४४ ॥
शक्यो न राघवो जेतुं त्वया चान्यैः कदाचन ।
रामो देववरः(१) साक्षात् प्रधानपुरुषेश्वरः ॥ ४५ ॥

आत्मना तु वास्तवो न केनापि सम्बन्ध इत्याह आत्मा त्विति सुगमो व्याख्यातमेतत् ॥ ३९ ॥

सर्वभावैः सुखदुःखैर्विवर्जितः तदेवाह न संयोग इति तद्बुद्धिरेव दुःखतया हर्षशोकादिकरणमिति भावः ॥ ४० ॥ ४१ ॥

दारयिष्यति दारणेन नाशयिष्यतीत्यर्थः वज्रकल्पैः सायकैर्दारयिष्यतीत्यन्वयः ततस्तत्पदं सर्वोत्तमं स्थानं वैकुण्ठं गमिष्यामि ॥ ४२ ॥

सीतां हत्वा त्वया मे क्रिया सपिण्डीकरणान्ता कर्त्तव्या 'पुत्राभावे पत्नी स्यात्' इति स्मृतेः यद्वा मया सार्द्धं पावकं प्रवेक्ष्यसि सत्यामिच्छायामिति शेषः ॥ ४३ ॥

सत्यं वाक्यं शृणु तथा कुरु च मद्वाक्यार्थमनुतिष्ठ चेत्यर्थः ॥ ४४ ॥

प्रधानस्य प्रकृतेः पुरुषाणां जीवानां चेश्वरः नियन्ता ॥ ४५ ॥

---

(१) रामो नारायणः इति पाठान्तरम् ।

मत्स्यो भूत्वा पुरा कल्पे मनुं वैवस्वतं प्रभुः ।
ररक्ष सकलापद्भ्यो राघवो भक्तवत्सलः ॥ ४६ ॥
रामः कूर्मोऽभवत्पूर्वं लक्षयोजनविस्तृतः ।
समुद्रमथने पृष्ठे दधार कनकाचलम् ॥ ४७ ॥
हिरण्याक्षोऽतिदुर्वृत्तो हतोऽनेन महात्मना ।
क्रोड़रूपेण वपुषा क्षोणीमुद्धरता क्वचित् ॥ ४८ ॥
त्रिलोककण्टकं दैत्यं हिरण्यकशिपुं पुरा ।
हतवान्नारसिंहेन वपुषा रघुनन्दनः ॥ ४९ ॥
विक्रमैस्त्रिभिरेवासौ बलिं बद्ध्वा जगत्त्रयम् ।
आक्रम्यादात् सुरेन्द्राय भृत्याय(१) रघुसत्तमः ॥ ५० ॥
राक्षसाः क्षत्रियाकारा जाता भूमेर्भरावहाः ।
तान् हत्वा बहुशो रामो भुवं जित्वा ह्यदान्मुनेः ॥ ५१ ॥
स एव साम्प्रतं जातो(२) रघुवंशे परात्परः ।
भवदर्थे रघुश्रेष्ठो मानुषत्वमुपागतः ॥ ५२ ॥
तस्य भार्या किमर्थं वा हृता सीता वनाद्बलात् ? ।
मम पुत्रविनाशार्थं स्वस्यापि निधनाय च (३) ॥ ५३ ॥

तद्देव बोधयन्ती तदवतारानाह मत्स्य इति द्वं पुराणे प्रसिद्धम् ॥ ४६ । ४७ ॥

क्रोडरूपेण वाराहरूपेण ॥ ४८ । ४९ ॥

जगत्त्रयमाक्रम्य पादैरिति शेषः ॥ ५० ॥

रामः परशुरामः मुनेः कश्यपस्य ॥ ५१ ॥

भवदर्थे भवन्नाशार्थम् ॥ ५२ । ५३ ॥

---

(१) त्रिदिवं इत्यपि पठनीयः । (२) साम्प्रतं रामो इति वा पाठः ।

(३) तत्रापि निधनाय च इति केचित् पठन्ति ।

हतः परं वा वैदेहीं प्रेषयस्व रघूत्तमे ।
विभीषणाय राज्यं तु दत्त्वा गच्छामहे वनम् ॥ ५४ ।
मन्दोदरीवचः श्रुत्वा रावणो वाक्यमब्रवीत् ।
कथं भद्रे ! रणे पुत्रान् भ्रातॄन्(१)राक्षसमण्डलम् ॥५५॥
घातयित्वा राघवेण जीवामि वनगोचरः ? ।
रामेण सह योत्स्यामि रामबाणैः सुतीक्ष्णगैः ॥ ५६ ॥
विदार्यमाणो यास्यामि तद्विष्णोः परमं पदम् ।
जानामि राघवं विष्णुं लक्ष्मीं जानामि जानकीम् ।
ज्ञात्वैव जानकी सीता मया नीता वनाद्बलात् ॥५७॥
रामेण निधनं प्राप्य यास्यामीति परं पदम् (२) ।
विमुच्य त्वां तु संसाराद्गमिष्यामि सह प्रिये ! ॥५८॥
परानन्दमयी शुद्धा सेव्यते या मुमुक्षुभिः ।
तां गतिं तु गमिष्यामि हतो रामेण संयुगे ॥ ५९ ॥

रघूत्तमे तत्समीपमित्यर्थः ॥ ५४ । ५५ ॥

राघवेण घातयित्वा कथं जीवामि जीवने प्रियताबुद्धिं करोमि मरणस्य सर्वहितत्वाद्विपरीतबुद्धिं रावणस्ताह रामेण सहेत्यादि जानामि राघवमिति च ॥ ५६ । ५७ ॥

रामेण निधनं प्राप्य परं पदं यास्यामीति ज्ञात्वैव जानकी मया-हृतेतिसम्बन्धः हे प्रिये! त्वां विमुच्य त्यक्त्वा संसारात् ल्यब्लोपे पञ्चमी संसारं त्यक्त्वा यतैर्मुमुक्षुभिः सह गमिष्यामि ॥ ५८ ॥

गम्यते प्राप्यते या गतिः स्थानं परानन्दमयी दुःखराहित्यात् ब्रह्म-लोकैकदेशवैकुण्ठरूपा शुद्धा रजस्तमोऽस्पृष्टसत्त्वमयी या मुमुक्षुभिः

(१) मित्रम् इति पाठान्तरम् ।
(२) ध्रुवं शिवं इति वा पाठः ।

प्रक्षाल्य कल्मषाणीह मुक्तिं यास्यामि दुर्लभाम् ॥६०॥

क्लेशादिपञ्चकतरङ्गयुगं भ्रमाढ्यं
दारात्मजाप्तधनबन्धुझषाभियुक्तम्।
और्वानलाभनिजरोषमनङ्गजालं
संसारसागरमतीत्य हरिं व्रजामि॥ ६१ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
दशमः सर्गः।

सेव्यते इहनाहं पापनाभिः प्राप्यते रामेण संयुगे हतानां गतिं गमिष्यामि ॥ ५९ ॥

इह कल्मषाणि राक्षसदेहेन कृतानि पापानि अन्तकाले रामनामस्मरणाद्रामसूर्तिदर्शनाच्च प्रक्षाल्य दूरीकृत्य मुक्तिं यास्यामि ॥ ६० ॥

क्लेशादीति अविद्यास्मिता रागद्वेषाभिनिवेशाः पञ्च क्लेशा इति योगशास्त्रोक्ताः तत्राविद्या अनित्याशुचिदुःखरूपा नात्मसु नित्यशुचिसुखात्मत्वख्यातिः शुक्तिरजतादिज्ञानानि च अस्मिता शरीराद्व्यतिरिक्त आत्मा नास्तीत्येवं प्रत्ययः रागद्वेषौ प्रसिद्धौ अभिनिवेशो मरणादित्रासः तज्जन्याः स्थूलवृत्तय आदिपदग्राह्याः यासां ज्ञानहेतुत्वं योगशास्त्रे उक्तं तद्रूपास्तरङ्गा यत्र तं शेषं सुगमं तत्परिहर्त्तिरूपभ्रमैराढ्यं दारादिरूपैर्झषैर्ग्राहैर्युक्तं तत्तत्वाशिनां रोष एवौर्वानलाभो यत्र शोषकत्वात्तं अनङ्गः कामएव जालं बन्धकत्वाद्यत्र तं कामेन हि तत्तद्विषये जनो बध्यते ॥ ६१ ॥

इति श्रीमत्कलकत्तराजविपद्दुद्धारणसमर्थेत्यादिबि० श्रीरामवर्म्मणः
कृतौ श्रीमदध्यात्मरामायणे सेतौ युद्धकाण्डे
दशमः सर्गः।

अथ एकादशः सर्गः ।

इत्युक्त्वा वचनं प्रेम्णा राज्ञीं मन्दोदरीं तदा ।
रावणः प्रययौ योद्धुं रामेण सह संयुगे ॥ १ ॥
दृढं स्यन्दनमास्थाय वृतो घोरैर्निशाचरैः ।
चक्रैः षोडशभिर्युक्तं सवरूथं सकूबरम् ॥ २ ॥
पिशाचवदनैर्घोरैः खरैर्युक्तं भयावहम् ।
सर्वास्त्रशस्त्रसहितं सर्वोपस्करसंयुतम् ॥ ३ ॥
निश्चक्रामाथ सहसा रावणो भीषणाकृतिः ।
आयान्तं रावणं दृष्ट्वा भीषणं रणकर्कशम् ॥ ४ ॥
सन्त्रस्ताभूत्तदा सेना वानरी रामपालिता ॥ ५ ॥
हनूमानथ चोत्प्लुत्य रावणं योद्धुमाययौ ।
आगत्य हनुमान् रक्षोवक्षस्यतुलविक्रमः ॥ ६ ॥
मुष्टिबन्धं दृढं बद्ध्वा ताड़यामास वेगतः ।
तेन मुष्टिप्रहारेण जानुभ्यामपतद्रथे ॥ ७ ॥
मूर्च्छितोऽथ मुहूर्त्तेन रावणः पुनरुत्थितः ।
उवाच च हनूमन्तं शूरोऽसि मम सम्मतः ॥ ८ ॥
हनूमानाह तं धिङ्मां यस्त्वं जीवसि रावण ! ।
त्वं तावन्मुष्टिना वक्षो मम ताड़य रावण ! ॥ ९ ॥
पश्चान्मया हतः प्राणान्मोक्ष्यसे नात्र संशयः ।

इत्युक्त्वेति ॥ १ ॥
वरूथो रथगुप्तिः ॥ २ ॥
उपस्करो युद्धसामग्री ॥ ३ ॥
रणकर्कशं अतिनिर्दयम् ॥ ४—१२ ॥

तथेति मुष्टिना वज्री रावणेनापि ताड़ितः ॥ १० ॥
विघूर्णमाननयनः किञ्चित्सम्भ्रममाययौ।
संग्राममवाप्य कपिराट् रावणं हन्तुमुद्यतः ॥ ११ ॥
ततोऽन्यत्र गतो भीत्या रावणो राक्षसाधिपः।
हनूमानङ्गदश्चैव नलो नीलस्तथैव च ॥ १२ ॥
चत्वारः समवेताग्रे दृष्ट्वा राक्षसपुङ्गवान्।
अग्निवर्णं तथा सर्परोमाणं खड्गरोमकम् ॥ १३ ॥
तथा वृश्चिकरोमाणं निजघ्नुः क्रमशोऽसुरान्।
चत्वारश्चतुरो हत्वा राक्षसान् भीमविक्रमान् ॥ १४ ॥
सिंहनादं पृथक् कृत्वा रामपार्श्वमुपागताः।
ततः क्रुद्धो दशग्रीवः सन्दश्य दशनच्छदम् ॥ १५ ॥
विवृत्य नयने क्रूरो राममेवान्वधावत।
दशग्रीवो रथस्थस्तु रामं वज्रोपमैः शरैः ॥ १६ ॥
आजघान महाघोरैर्धाराभिरिव तोयदः।
रामस्य पुरतः सर्वान् वानरानपि विव्यधे ॥ १७ ॥
ततः पावनसङ्काशैः शरैः काञ्चनभूषणैः।
अभ्यवर्षद्रणे रामो दशग्रीवं समाहितः ॥ १८ ॥
रथस्थं रावणं दृष्ट्वा भूमिष्ठं रघुनन्दनम्।
आहूय मातलिं शक्रो वचनञ्चेदमब्रवीत् ॥ १९ ॥

समवेताग्रे इति च्छेदः सन्धिरार्षः ॥ १३ । १४ ॥

पृथक् सिंहनादं कृत्वा प्रत्येकं सिंहनादं कृत्वेत्यर्थः दशनच्छदं ओष्ठम् ॥ १५ ॥

विवृत्य क्रोधवशाद्विस्तार्य ॥ १६ ॥

तोयदो धाराभिरिव पर्वतमिति शेषः विव्यधे व्यधयामास अनभ्यर्थितत्वार्थः ॥ १७–१९ ॥

रथेन मम भूमिष्ठं शीघ्रं याहि रघूत्तमम्।
त्वरितं भूतलं गत्वा कुरु कार्यं ममानघ! ॥ २० ॥
एवमुक्तोऽथ तं नत्वा मातलिर्देवसारथिः।
ततो हयैश्च संयोज्य हरितैःस्यन्दनोत्तमम् ॥ २१ ॥
स्वर्गाज्जयार्थं रामस्य ह्युपचक्राम मातलिः।
अब्रवीच्च ततो राममप्रतर्क्ये रथे स्थितः।
प्राञ्जलिर्देवराजेन प्रेषितोऽस्मि रघूत्तम! ॥ २२ ॥
रथोऽयं देवराजस्य विजयाय तव प्रभो!।
प्रेषितश्च महाराज! धनुरैन्द्रं च भूषितम् ॥ २३॥
अभेद्यं कवचं खड्गं दिव्यतूणीयुगं तथा।
आरुह्य च रथं राम! रावणं जहि राक्षसम् ॥ २४ ॥
मया सारथिना देव! वृत्रं देवपतिर्यथा।
इत्युक्तस्तं परिक्रम्य नमस्कृत्य रथोत्तमम् ॥ २५ ॥
आरुरोह रथं रामो लोकान् लक्ष्म्या नियोजयन्।
ततोऽभवन्महायुद्धं भैरवं रोमहर्षणम् ॥ २६ ॥
महात्मनो राघवस्य रावणस्य च धीमतः।

मम कार्यं रामस्य रथेन योजनरूपम् ॥ २० ॥

हरितैः हरितवर्णैः ॥ २१ ॥

उपचक्राम रामसमीपमाजगामेत्यर्थः अप्रतर्क्ये रथे अन्यैः सर्वैर-दृश्यरथे प्राञ्जलिरब्रवीदित्यन्वयः किमब्रवीत्तदाह देवराजेनेत्यादि ॥ २२ ॥

अयं देवराजस्य रथ इतिरूपबोधनं स च तव विजयाय तेन प्रेषितः ऐन्द्रं स्वीयं धनुश्च तेन प्रेषितम् ॥ २३—२५ ॥

लोकान् लक्ष्म्या नियोजयन् रावणवधसाध्यकार्यावधिसम्बोधने-नानन्दयन्नित्यर्थः ॥ २६—२८ ॥

आग्नेयेन च आग्नेयं दैवं दैवेन राघवः ॥ २७ ॥
अस्त्रं राक्षसराजस्य जघान परमास्त्रवित्।
ततस्तु ससृजे घोरं राक्षसं चास्त्रमस्त्रवित् ॥ २८ ॥
क्रोधेन महताविष्टो रामस्योपरि रावणः।
रावणस्य धनुर्मुक्ताः सर्पा भूत्वा महाविषाः।
शराः काञ्चनपुङ्खाभा राघवं परितोऽपतन् ॥ २९ ॥
तैः शरैः सर्पवदनैर्वमद्भिरनलं मुखैः।
दिशश्च विदिशश्चैव व्याप्तास्तत्र तदाभवन् ॥ ३० ॥
रामः सर्पांस्ततो दृष्ट्वा समन्तात्परिपूरितान्।
सौपर्णमस्त्रं तद् घोरं पुरः प्रावर्तयद्रणे ॥ ३१ ॥
रामेण मुक्तास्ते बाणा भूत्वा गरुड़रूपिणः।
चिच्छिदुः सर्पबाणांस्तान् समन्तात्सर्पशत्रवः। ॥३२॥
अस्त्रे प्रतिहते युद्धे रामेण दशकन्धरः।
अभ्यवर्षत्ततो रामं घोराभिः शरवृष्टिभिः ॥ ३३ ॥
ततः पुनः शरानीकै राममक्लिष्टकारिणम्।
अर्दयित्वा तु घोरेण मातलिं प्रत्यविध्यत ॥ ३४ ॥
पातयित्वा रथोपस्थे रथकेतुं च काञ्चनम्।
ऐन्द्रानश्वानभ्यहनद्रावणः क्रोधमूर्च्छितः ॥ ३५ ॥

अनलमग्निम् ॥ ३० ॥

पुरः रावणसम्मुखे ॥ ३१—३२ ॥

घोरेण बाणेनेति शेषः ॥ ३४ ॥

रथोपस्थे रथकेतुं पातयित्वेत्यनेन तस्य केतनादिवत् शरैर्भञ्जीकरणं विवक्षितं क्रोधमूर्च्छितः उच्छ्रितक्रोध इत्यर्थः ॥ ३५ ॥

विषेदुर्देवगन्धर्वाश्चारणाः पितरस्तथा ।
आर्त्ताकारं हरिं दृष्ट्वा व्यथिताश्च महर्षयः ॥ ३६ ॥
व्यथिता वानरेन्द्राश्च बभूवुः सविभीषणाः ।
दशास्यो विंशतिभुजः प्रगृहीतशरासनः ॥ ३७ ॥
ददृशे रावणस्तत्र मैनाक इव पर्वतः ।
रामस्तु भ्रुकुटिं बद्ध्वा क्रोधसंरक्तलोचनः ॥ ३८ ॥
कोपं चकार सदृशं निर्दहन्निव राक्षसम् ।
धनुरादाय देवेन्द्रधनुराकारमद्भुतम् ॥ ३९ ॥
गृहीत्वा पाणिना बाणं कालानलसमप्रभम् ।
निर्दहन्निव चक्षुर्भ्यां ददृशे रिपुमन्तिके ॥ ४० ॥
पराक्रमं दर्शयितुं तेजसा प्रज्वलन्निव ।
प्रचक्रमे कालरूपी सर्वलोकस्य पश्यतः ॥ ४१ ॥
विकृष्य चापं रामस्तु रावणं प्रतिविध्य च ।
हर्षयन् वानरानीकं कालान्तक इवाबभौ ॥ ४२ ॥
क्रुद्धं रामस्य वदनं दृष्ट्वा सर्वं प्रधावतः ।
तत्रसुः सर्वभूतानि चचाल च वसुन्धरा ॥ ४३ ॥
रामं दृष्ट्वा महारौद्रमुत्पातांश्च सुदारुणान् ।
त्रस्तानि सर्वभूतानि रावणं चाविशद्भयम् ॥ ४४ ॥

आर्त्ताकारं आर्त्तसदृशाकारं अभिनीततदाकारं न तु वस्तुतस्तदाकारम् ॥ ३६–३८ ॥

सदृशं कोपं आत्मनः सदृशं कोपं देवेन्द्रधनुर्वर्णाकाशे दृश्यमानमिन्द्रधनुरिति ख्यातं तत्सदृशम् ॥ ३९ ॥ (आत्मनेपदमार्षम्) ॥ ४० ॥

कालरूपी रामस्तद्रूपमनुसन्धाय प्रचक्रमे रावणवधार्थमिति शेषः ॥ ४१–४४ ॥

विमानस्थाः सुरगणाः सिद्धगन्धर्वकिन्नराः ।
ददृशुः सुमहायुद्धं लोकसम्वर्त्तकोपमम् ।
ऐन्द्रमस्त्रं समादाय रावणस्य शिरोऽच्छिनत् ॥ ४५ ॥
मूर्द्धानो रावणस्याथ बहवो रुधिरोक्षिताः ।
गगनात्प्रपतन्ति स्म तालादिव फलानि हि ॥ ४६ ॥
न दिनं न च वै रात्रिर्न सन्ध्या न दिशोऽपि वा ।
प्रकाशन्ते न तद्रूपं दृश्यते तत्र सङ्गरे ॥ ४७ ॥
ततो रामो बभूवाथ विस्मयाविष्टमानसः ।
शतमेकोत्तरं छिन्नं शिरसां चैकवर्चसाम् ॥ ४८ ॥
न चैव रावणः शान्तो दृश्यते जीवितक्षयात् ।
ततः सर्वास्त्रविद्वीरः कौशल्यानन्दवर्द्धनः ॥ ४९ ॥
अस्त्रैश्च बहुभिर्युक्तश्चिन्तयामास राघवः ।
यैर्यैर्बाणैर्हता दैत्या महाबलपराक्रमाः ॥ ५० ॥
त एते निष्फलं याता रावणस्य निपातने ।
इति चिन्ताकुले रामे समीपस्थो विभीषणः ॥ ५१ ॥
उवाच राघवं वाक्यं ब्रह्मदत्तवरो ह्यसौ ।

लोकसम्वर्त्तकोपमं सर्वलोकप्रलयकर ाडीवकादियुद्धसदृशम् ॥ ४५ ॥

मूर्द्धानः रामबाणकृत्ता इति शेषः ॥ ४६ ॥

न दिनमित्यादि अनेनानेकदिनं रामरावणयोर्निरन्तरं युद्धं वृत्तमिति सूचितम् तद्रूपं छिन्नमस्तकरावणरूपं पुनः पुनः शिरः प्रादुर्भावात् ॥ ४७ ॥

तदेवाह तत इति एकवर्चसां तुल्यतेजसाम् ॥ ४८ ॥

शान्तो गतचेष्टः ॥ ४९ । ५० ॥

निष्फलत्वं याताः प्राप्ताः निष्फला जाता इति क्वचित् पाठः ॥५१॥५२॥

विच्छिन्ना बाहवोऽप्यस्य(१)विच्छिन्नानि शिरांसि च॥५२।
उत्पत्स्यन्ति पुनः शीघ्रमित्याह भगवानजः।
नाभिदेशेऽमृतं तस्य कुण्डलाकारसंस्थितम्॥ ५३ ॥
तच्छोषयानलास्त्रेण तस्य मृत्युस्ततो भवेत्।
विभीषणवचः श्रुत्वा रामः शीघ्रपराक्रमः॥ ५४ ॥
पावकास्त्रेण संयोज्य नाभिं विव्याध रक्षसः।
अनन्तरं च चिच्छेद शिरांसि च महाबलः॥ ५५ ॥
बाहूनपि च संरब्धो रावणस्य रघूत्तमः।
ततो घोरां महाशक्तिमादाय दशकन्धरः॥ ५६ ॥
विभीषणवधार्थाय चिक्षेप क्रोधविह्वलः।
चिच्छेद राघवो बाणैस्तां शितैर्हेमभूषितैः॥ ५७ ॥
दशग्रीवशिरश्छेदात्तदा तेजो विनिर्गतम्।
म्लानरूपो बभूवाथ छिन्नैः शीर्षैर्भयङ्करैः॥ ५८ ॥
एकेन मुख्यशिरसा बाहुभ्यां रावणो बभौ।
रावणस्तु पुनः क्रुद्धो नानाशस्त्रास्त्रवृष्टिभिः॥ ५९ ॥
ववर्ष रामं तं रामस्तथा बाणैर्ववर्ष च।

कुण्डलाकारे गर्त्ते संस्थितम्॥५३॥
अनलास्त्रेणाग्नेयास्त्रेण॥ ५४-५६ ॥
शितैस्तीक्ष्णैः॥ ५७ ॥
तेजोपगमाच्च म्लानरूपो बभूव॥ ५८ ॥
मुख्यशिरसैवानेनाप्यानि युद्धादिकाले एव प्रादुर्भवन्तीति सूचितम्
॥ ५९-६१ ॥

(१) बाहवो राम ! इति वा पाठः।

ततो युद्धमभूत् घोरं तुमुलं लोमहर्षणम् ॥ १० ॥
अथ संस्मारयामास मातली राघवं तदा ।
विसृजास्मै वधायास्य ब्राह्मं शीघ्रं रघूत्तम ! ॥ ११ ॥
विनाशकालः प्रथितो यः सुरैः सोऽद्य वर्त्तते ।
उत्तमाङ्गं न चैतस्य छेत्तव्यं राघव ! त्वया ॥ १२ ॥
नैव शीर्षाणि प्रभो ! वध्यो वध्य एव हि मर्मणि ।
ततः संस्मारितो रामस्तेन वाक्येन मातलेः ॥ १३ ॥
जग्राह सशरं दीप्तं निःश्वसन्तमिवोरगम् ।
यस्य पार्श्वे तु पवनः फले भास्करपावकौ ॥ १४ ॥
शरीरमाकाशमयं गौरवे मेरुमन्दरौ ।
पर्वस्वपि च विन्यस्ता लोकपाला महौजसः ॥ १५ ॥
आज्वल्यमानं वपुषा शान्तभास्करवर्चसा ।
तमुग्रमस्त्रं लोकानां भवनाशनमद्भुतम् ॥ १६ ॥
अभिमन्त्र्य ततो रामस्तं महेषुं महाभुजः ।
वेदप्रोक्तेन विधिना सन्दधे कार्मुके बली ॥ १७ ॥
तस्मिन् सन्धीयमाने तु राघवेण शरोत्तमे ।
सर्वभूतानि वित्रेसुश्चचाल च वसुन्धरा ॥ १८ ॥

प्रथितः कथितः उत्तमाङ्गं शिरः ॥ १२ ॥
मर्मणि उरसवहृपे ॥ १३ । १४ ॥

आकाशमयमित्यनेनातिमहत्त्वं सूचितं आकाशपदेन व्यापकत्वाद्धिरण्यगर्भो वा गौरवे मेरुमन्दरौ यस्य गुरुत्वादिति शेषः ॥ १५ ॥

भास्करवर्चसा भातं तस्य स्वतेजः प्रकाशं भवनशब्दोऽर्थवाची शस्त्रपर्यायोऽत्र ॥ १६ ॥

वेदप्रोक्तेन ब्रह्मास्त्रविधिना अभिमन्त्र्येत्यन्वयः ॥ १७ ॥ १८ ॥

स रावणाय संक्रुद्धो भृशमानम्य कार्मुकम् ।
चिक्षेप परमायत्तस्तमस्त्रं मर्मघातिनम् ॥ ६९ ॥
स वज्र इव दुर्धर्षो वज्रपाणिविसर्जितः ।
कृतान्त इव घोरास्यो न्यपतद्रावणोरसि ॥ ७० ॥
स निमग्नो महाघोरः शरीरान्तकरः परः(१) ।
बिभेद हृदयं तूर्णं रावणस्य महात्मनः ॥ ७१ ॥
रावणस्याहरत्प्राणान् विवेश धरणीतले ।
स शरो रावणं हत्वा रामतूणीरमाविशत् ॥ ७२ ॥
तस्य हस्तात् पपाताशु सशरं कार्मुकं महत् ।
गतासुर्भ्रमिवेगेन राक्षसेन्द्रोऽपतद्भुवि ॥ ७३ ॥
तं दृष्ट्वा पतितं भूमौ हतशेषाश्च राक्षसाः ।
हतनाथा भयत्रस्ता दुद्रुवुः सर्वतो दिशम् ॥ ७४ ॥
दशग्रीवस्य निधनं विजयं राघवस्य च ।
ततो विनेदुः संहृष्टा वानरा जितकाशिनः ॥ ७५ ॥
वदन्तो रामविजयं रावणस्य च तद्वधम् ।
अथान्तरीक्षे व्यनदत् सौम्यस्त्रिदशदुन्दुभिः ॥ ७६ ॥

भृशमतिशयेन ॥ ६९ ॥

वज्रपाणिना त्यक्तो वज्र इव स बाणो रावणोरसि न्यपतत् ॥ ७० ॥ ७१ ॥

वेगवशाद्रावणप्राणहरणोत्तरं भूमौ प्रविश्य पुनः स्वाधिष्ठातृदेवतातेजोवशाद्रामतूणीरं प्रविष्टः ॥ ७२ ॥

भ्रमि इति शरपतनकालजातभ्रमिवेगेन ॥ ७३ ॥ ७४ ॥

दशग्रीवनिधनं रामविजयं च दृष्ट्वा विदुद्रुवुरित्यन्वयः ॥ ७५ ॥

ततो रामजयं रावणस्य तद्वधं-ततो रामाद्वधं च वदन्तो विनेदुरनेन

(१) शरः इत्यपि पाठान्तरम् ।

पपात पुष्पवृष्टिश्च समन्ताद्राघवोपरि।
तुष्टुवुर्मुनयः सिद्धाश्चारणाश्च दिवौकसः॥ ७७॥
ननृतुश्चाप्सरसश्चैव ननृतुः सर्वतोऽप्सरसो मुदा।
रावणस्य च देहोत्थं ज्योतिरादित्यवत् स्फुरत्॥ ७८॥
प्रविवेश रघुश्रेष्ठं देवानां पश्यतां सताम्।
देवा ऊचुरहो भाग्यं रावणस्य महात्मनः॥ ७९॥
वयं तु सात्त्विका देवा विष्णोः कारुण्यभाजनाः।
भयदुःखादिभिर्व्याप्ताः संसारे परिवर्त्तिनः॥ ८०॥
अयं तु राक्षसः क्रूरो ब्रह्महातीव तामसः।
परदाररतो विष्णुद्वेषी तापसहिंसकः॥ ८१॥
पश्यत्सु सर्वभूतेषु राममेव प्रविष्टवान्।।
एवं ब्रुवत्सु देवेषु नारदः प्राह सस्मितः॥ ८२॥
शृणुतात्र सुरा! यूयं धर्मतत्त्वविचक्षणाः।

नाकसः सिंहनादांश्चक्रुरित्यर्थः॥ ७६। ७७॥

सूर्यतुल्यं रावणस्य देहोत्थं तेजो रघुश्रेष्ठं प्रविवेश तं प्रविश्य तदात्मना वैकुण्ठलोकं जगामेति बोध्यम्॥ ७८। ७९॥

वयमिति वयं देवा अपि तेजसा दीप्यमाना अपि सात्त्विका अपि सत्त्वप्रधाना अपि विष्णोर्भगवतः करुणापात्रभूता अपि भय-दुःखादिव्याप्ताः पुनः पुनः संसारभाजश्च॥ ८०॥

अयं राक्षसः क्रूरोऽपि ब्रह्महापि अत्यन्ततामसोऽपि परदाररत-त्वादिगुणोऽपि॥ ८१॥

रामं प्रविष्टवान् तत्प्रवेशेन मोक्षद्वारं लब्धवान् वैकुण्ठगतानां प्रति-हारे स्थितिमवाप्त इत्याश्चर्यमित्यर्थः॥ ८२॥

रावणो द्वेषसंयुक्तोऽपि भक्तैः सह रामचरितं शुकसारणादिभिः

रावणो राघवद्वेषादनिशं हृदि भावयन् ॥ ८३ ॥
भृत्यैः सह सदा रामचरितं द्वेषसंयुतः ।
श्रुत्वा रामात् स्वनिधनं भयात् सर्वत्र राघवम् ॥ ८४ ॥
पश्यन्ननुदिनं स्वप्ने राममेवानुपश्यति ।
क्रोधोऽपि रावणस्याशु गुरुबोधाधिकोऽभवत् ॥ ८५ ॥
रामेण निहतश्चान्ते निर्धूताशेषकल्मषः ।
रामसायुज्यमेवाप(१) रावणो मुक्तबन्धनः ॥ ८६ ॥
पापिष्ठो वा दुरात्मा परधनपरदारेषु सक्तो यदि स्या-
न्नित्यं स्नेहात् भयाद्वा रघुकुलतिलकं भावयन् संस्मरेत्सः ।

श्रुत्वा तद्द्वेषानियन्त्रं हृदि भावयन् अत्र श्रुत्वा भावयन्नित्यनेन श्रव-
णमनननिदिध्यासनसम्पदुक्ता मननमनुक्तमपि अर्थाच्छिन्नं बोध्यम् तथा
रामात् स्वनिधनं श्रुत्वा भयात्सर्वत्र राघवं पश्यन् इदं फलं लब्धवानिति
शेषः तस्य च दर्शनस्य सार्वकालिकत्वमाह अनुदिनं स्वप्नेऽपि राममेव
पश्यति अनेन साक्षात्कार उक्तः एवं सगुणविषयत्वादेषां वैकुण्ठलोक-
प्राप्तिद्वारा मोक्षजनकत्वम् दहराद्युपासनावदिति बोध्यम् ॥ ८३।८४॥

उपसंहरति क्रोधोऽपीति अपिना यः प्रीत्यैवमाचरेत् तस्य
मुक्तिः सर्वथेति ध्वनितं गुरुबोधः गुरुसेवाजन्यो बोधस्तद्वत् अधिकः
सर्वधर्माधिकोऽभवदित्यर्थः ॥ ८५ ॥

भगवतो वृत्तान्तमत्युग्रमेवं फलक इत्याह रामेणेति सह समाने
देशे युक् तस्य भावः सायुज्यं समानलोकवास इत्यर्थः तदेवाभिप्रेत्याग्रे
वक्ष्यति वैकुण्ठं यातीति ॥ ८६ ॥

दुरात्मा परानिष्टादिचिन्तकः पापिष्ठत्वं कायिकपापवत्त्वं तदेव
स्फुटयति परधनपरदारेत्यादि स्नेहाद्भयाद्वेत्यादि स्नेहाद्भयाद्वेत्यने-
नोभयोस्तुल्यफलत्वं स्नेहाद्भ्यामादि भयाद्रावणादिवत् स्नेहवतामे-

(१) सैवाप इति वा पाठः ।

भूत्वा शुद्धान्तरङ्गो (१)भवशतजनिताम्नेकदोषैर्विमुक्तः
सद्यो रामस्य विष्णोः सुरवरविनुतं याति वैकुण्ठमाद्यम्॥८७॥
हत्वा युद्धे दशास्यं त्रिभुवनविषमं वामहस्तेन चापं
भूमौ विष्टभ्य तिष्ठन्नितरकरधृतं भ्रामयन् बाणमेकम् ।
आरक्तोपान्तनेत्रः शरदलितवपुः सूर्य्यकोटिप्रकाशो
वीरश्रीबन्धुराङ्गस्त्रिदशपतिनुतः पातु मां वीररामः ॥८८॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
एकादशः सर्गः ।

ऐहलौकिकसुखाधिक्यं विशेषः इति बोध्यं पारलौकिकं तु फलं तुल्य-मित्याशयेन वाशब्दः अन्तरङ्गं अन्तःकरणं तच्छुद्धं यस्य सः सुरवरो ब्रह्मा ॥ ८७ ॥

त्रिभुवनस्य विषमं दुःखदं शरैर्दलितं विदारितं वपुर्यस्य स बन्धु-राङ्गः यथोचितं नतोन्नताङ्गः एवं ध्यातस्त्वां सर्वभयापहमिति तत्त्वं तु प्रसिद्धम् ॥ ८८ ॥

इति श्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिवि० श्रीरामवर्मणः कृतावध्यात्मरामायणसेतौ युद्धकाण्डे
एकादशः सर्गः ।

---

(१) शुद्धान्तरात्मा इति पाठान्तरम् ।

अथ द्वादशः वर्गः ।

रामो विभीषणं दृष्ट्वा हनूमन्तं तथाङ्गदम् ।
लक्ष्मणं कपिराजं च जाम्बवन्तं तथापरान् ॥ १ ॥
परितुष्टेन मनसा सर्वानेवाब्रवीद्वचः ।
भवतां बाहुवीर्य्येण निहतो रावणो मया ॥ २ ॥
कीर्त्तिः स्थास्यति वः पुण्या यावच्चन्द्रदिवाकरौ ।
कीर्त्तयिष्यन्ति भवतां कथां त्रैलोक्यपावनीम् ॥ ३ ॥
ययोपेतां(१) कलिहरां यास्यन्ति परमां गतिम् ।
एतस्मिन्नन्तरे दृष्ट्वा रावणं पतितं भुवि ॥ ४ ॥
मन्दोदरीमुखाः सर्वाः स्त्रियो रावणपालिताः ।
पतिता रावणस्याग्रे शोचन्त्यः पर्य्यदेवयन् ॥ ५ ॥
विभीषणः शुशोकार्त्तो शोकेन महतावृतः ।
पतितो रावणस्याग्रे बहुधा पर्य्यदेवयत् ॥ ६ ॥
रामस्तु लक्ष्मणं प्राह बोधयस्व बिभीषणम् ।
करोतु भ्रातृसंस्कारं किं विलम्बेन ? मानद ! ॥ ७ ॥

राम इति ॥ १ ॥

तेषां वीराणामुत्साहार्थं वाक्यमाह भवतामिति एवंविधवाक्येन बोधिता वीरा रणे प्राणव्ययेनापि स्वाभीष्टं साधयन्तीति सूचितम् ॥ २॥

अथ पारितोषिकं ददाति कीर्त्तिरिति वः पुण्या कीर्त्तिः स्थास्यतीति किञ्च यया कीर्त्या संयुक्तामिमां भवतां विजयकथां ये कीर्त्तयिष्यन्ति ते परमाकृतिं यास्यन्ति ॥ ३—५ ॥

पर्य्यदेवयत् शोकेन विलापमेत्यर्थः ॥ ६ ॥

---

(१) ययोपेतामिति वा पाठः ।

स्त्रियो मन्दोदरीमुख्याः पतिता विलपन्ति च ।
निवारयतु ताः सर्वा राक्षसी रावणप्रियाः ॥ ८ ॥
एवमुक्तोऽथ रामेण लक्ष्मणोऽगाद्विभीषणम् ।
उवाच मृतकोपान्ते पतितं मृतकोपमम् ॥ ९ ॥
शोकेन महताविष्टं सौमित्रिरिदमब्रवीत् ।
यं शोचसि त्वं दुःखेन कोऽयं तव? विभीषण! ॥१०॥
त्वं वास्य कतमः सृष्टेः पुरेदानीमतःपरम् ।
यद्वत्तोयौघपतिताः सिकता यान्ति तद्दशा ॥ ११ ॥
संयुज्यन्ते वियुज्यन्ते तथा कालेन देहिनः ।
यथा धानासु वै धाना भवन्ति न भवन्ति च ॥ १२ ॥

बोधयस्व शोकापनयनवाक्यैः संसारानित्यत्वं बोधयेत्यर्थः ॥७।८॥
मृतकस्य रावणस्य समीपे मृतकतुल्यतया निश्चेष्टं पतितम् ॥९॥
अयं तव कः आत्मनः शुद्धबुद्धस्वभावत्वान्न केनापि सम्बन्ध इति भावः ॥ १० ॥

किञ्च सृष्टेः पुरा तवास्य कश्चित्सम्बन्धो नैवासीत् एवमतः परमिदानीं च न कश्चित्सम्बन्धः पूर्वापरकालयोः सम्बन्धाभावेन मध्येऽपि न वास्तवः सम्बन्धः किन्त्वाभिमानिक एवेति भावः तदेव दृष्टान्तेनाह यद्वदिति तोयौघे पतिताः सिकता जलवेगाहता किञ्चिद्दूरं मिलिता यान्ति ततः काश्चित् गुरुतया अधस्तिष्ठन्ति लघुतया विलीयन्ते वा अपरा गच्छन्ति तासां यथा न कश्चित् सम्बन्धः ॥ ११ ॥

एवं देहिनः कालेन तद्वेगेन संयुज्यन्ते वियुज्यन्ते च वस्तुतश्च तेषां न कश्चित्सम्बन्ध इत्यर्थः दृष्टान्तान्तरमाह यथेति धाना भृष्टयवाः तासु अध्याधिरभावेन काश्चिद्धानाः सघं भवन्ति ततः शुष्कतासां स्निग्धत्वात्ततो न भवन्ति वियुज्यन्ते ॥ १२ ॥

एवं भूतेषु भूतानि प्रेरितानीशमायया ।
त्वं चेमे वयमन्ये च तुल्याः कालवशोद्भवाः ॥ १३ ॥
जन्ममृत्यू यदा यस्मात्तदा तस्मान्नविष्यतः ।
ईश्वरः सर्वभूतानि भूतैः सृजति ह्यव्ययः ॥ १४ ॥
आत्मसृष्टैरस्वतन्त्रैरनपेक्षोऽपि बालवत् ।
देहेन देहिनो जीवा देहाद्देहोऽभिजायते ॥ १५ ॥
बीजादेव यथा बीजं देहान्य(१) इव शाश्वतः ।

एवमीशमायया प्रेरितानि भूतानि भूतेषु संयुज्यन्ते वियुज्यन्ते चेत्यर्थः एवमयं संयोगो वियोगश्च तवैवेति न किन्तु सर्वेषामस्माकं तुल्य इत्याह त्वं चेमे वयमित्यादि अस्माकमप्येवं वियोगो भावीति भावः॥१३॥

यदा यस्मिन् काले यस्माज्जन्ममृत्यू कर्मसहकृतौ भगवता कल्पितौ तदा तस्मिन् काले तौ भविष्यत एव न त्वन्यथेत्यर्थः ॥ १४ ॥

यथा बालो अनपेक्षोऽपि बाल्यस्वभावादेव सृष्टैर्मृण्मयादिभिश्चित्रैः स्वनिर्मितानि तादृशानि सृजति द्वे स्त्रीपुरुषाकारे कृत्वा तृतीयमेकं निर्मायेत इदं जातमनयोरपत्यमिति व्यवहरति परस्पराभिघातेन नाशयति चैवमीश्वर अनपेक्षोऽपि सर्जनजन्यफलानपेक्षोऽपि आत्मसृष्टैरेव भूतैः प्राणिभिः स्त्रीपुरुषपाख्यव्यवहारद्वारा पराणि सृजति ततः केनचित्कश्चिद्धन्ति च नतु तेषामेव तत्र कर्तृत्वमस्तीत्याह अस्वतन्त्रैरिति तत्रमात्मपालनेऽपि स्वातन्त्र्यरहितैः ननु तत् किं सृज्यमानदेह एव जीवो नेत्याह देहेनेति जीवास्तेन देहेन नतु देहिनो देहात्मान एव ते नतु देहः किमपि कारणमेव नेत्याह देहादिति कर्मद्वारेति शेषः ॥१५॥

अस्य व्यवहारस्यानादित्वे दृष्टान्तमाह बीजादेवेति स च देहादन्य इव अन्य एवेत्यर्थः भेदकं धर्ममाह शाश्वत इति तेन नित्यत्वानित्यत्वाभ्यां देहदेहिनोर्भेद उक्तः वस्तुतस्तस्य देहिव्यवहारप्रयोजको देह-

(१) देहेभ्य इति पाठान्तरम् ।

देहिदेहविभागोऽयमविवेककृतः पुरा ॥ १६ ॥
नानात्वं जन्मनाशश्च क्षयो वृद्धिः क्रियाफलम् ।
द्रष्टुराभान्त्यतद्धर्मा यथाऽग्नेर्दारुविक्रियाः ॥ १७ ॥
त इमे देहसंयोगादात्मना भान्त्यसद्ग्रहात् !
प्रथा यथा तथा चान्यत् ध्यायतो सदसद्ग्रहात् ॥१८ ॥
प्रसुप्तस्यानहं(१) भावात्तदा भाति न संसृतिः ।
जीवतोऽपि तथा तद्वद्विमुक्तस्यानहङ्कृतेः ॥ १९ ॥

सम्बन्धोऽपि कल्पित एवेत्याह देहीति अविवेककृतः अन्तःकरणेनात्मनोऽविवेकात् अहं ममेत्यादि बुद्धिरिति भावः एवञ्च देह एव ममताबुद्धेरवास्तवत्वे भ्रात्रादौ ममत्वबुद्धिः सुतरामवास्तवीति सूचितम् ॥ १६ ॥

वस्तुतो भ्रात्रादौ स्वातिरिक्तत्वबुद्धिर्मायादिबुद्धिश्च सर्वं मिथ्यैव शुक्तिरजतादिबुद्धिवदित्याह नानात्वमिति नानात्वं भेदः क्रियाफलं सुखदुःखे एते अतद्धर्मा अनात्मधर्मा द्रष्टुस्तद्दृश्यत्वेन भान्ति अन्तःकरणतत्कार्यधर्मा एवैते तदविवेकात् आत्मनि भान्ति यथा दारुगतवक्रत्वादिना तद्गताग्नेर्वक्रत्वादिति भावः ॥ १७ ॥

त इमे नानात्वादयः देहसंयोगाद्देहपदेनान्तःकरणमप्युपलक्ष्यते असद्ग्रहोऽहंममता बुद्धिः यथा सदसद्वान्यत्किञ्चिद्वस्तु अग्रहात् ध्यायतो भृङ्गकीटन्यायेन तथा प्रथा भवति ध्यायमानवस्तुसदसत्त्वाभ्यां ध्यातुरपि सदसत्त्वप्रथा भवति तद्वत् अनेन वास्तवता मायादीनां निराकृता एवं च मोक्षो निरालम्ब इति तात्पर्यम् ॥ १८ ॥

ज्ञानाच्च दुःखनिवृत्तिरित्याह प्रसुप्तस्येति यथा प्रसुप्तस्याहम्भावाभावात्संसृतिर्न भाति प्रस्वापोऽत्र सुषुप्तिः तथा विमुक्तस्य तत्त्वज्ञानाज्जीवन्मुक्तस्य जीवतोऽपि अनहङ्कृतेः अहङ्काराभावात्तथा संसाराभावात्तज्जन्यः दुःखशोकाद्यभाव इत्यर्थः ॥ १९ ॥

---

(१) विमुक्तस्यानहं इत्यपि पाठः ।

तस्मान्मायामनोधर्मं(१) जह्यहं ममताभ्रमम्।
रामभद्रे भगवति मनो धेह्यात्मनीश्वरे॥ २०॥
सर्वभूतात्मनि परे मायामानुषरूपिणि।
बाह्येन्द्रियार्थसम्बन्धात् त्याजयित्वा मनः शनैः॥ २१॥
तत्र दोषान् दर्शयित्वा रामानन्दे नियोजय।
देहबुद्ध्या भवेद्भ्राता पिता माता सुहृत्प्रियः॥ २२॥
विलक्षणं यदा देहात् जानात्यात्मानमात्मना।
तदा कः कस्य वा बन्धुर्भ्राता माता पिता सुहृत्?॥२३॥
मिथ्याज्ञानवशाज्जाता दारागारादयः सदा।
शब्दादयश्च विषया विविधाश्चैव सम्पदः॥ २४॥
बलं कोषो भृत्यवर्गो राज्यं भूमिः सुतादयः।
अज्ञानजत्वात्सर्वे ते क्षणसङ्गमभङ्गुराः॥ २५॥

उपसंहरति तस्मादिति मायामनोधर्मं मायापरिणाममनोधर्मं अ-
हंममताभ्रमञ्जहि अन्यधर्मस्यान्यनिष्ठत्वेन यद्वाहम्मत्वं मायापरिणाम-
त्वेन मनसो जडत्वमुक्तं मनोमात्रान्तःकरणम् आत्मनीश्वरे इत्यनेन तस्यैव
सुखमात्मत्वं मन्ये तत्प्रतिबिम्बत्वादात्मन्यध्यारोपमात्रमिति भावः॥२०॥
उक्तमेव पुनराह सर्वभूतात्मनीति बाह्येन्द्रियविषयसम्बन्धात् मनो
दूरीकृत्य भगवति नियोजय तत्सम्बन्धत्यागोपायमाह तत्र दोषानिति
ननु भगवति तदनुसन्धानेऽपि कथं संसारहानिस्तत्राह देहबुद्ध्येति देहे
अन्तःकरणादावात्मबुद्ध्येत्यर्थः भगवतो मनसानुसन्धाने तत्प्रसादाद्देहभि-
न्नात्मप्रतीतौ तदविवेककृतसंसारस्य स्वत एव हानिरिति भावः॥२१—२३॥
तदेव पुनर्द्रढयन्नाह मिथ्येति अगारं गृहम्॥ २४॥
अज्ञानस्याजस्रं परिणामस्वभावतया तज्जन्यानां क्षणसङ्गमभङ्गु-
रत्वम्॥ २५॥

(१) मनोमात्रमिति वा पाठः।

अथोत्तिष्ठ त्वदा रामं भावयन् भक्तिभावितम् ।
अनुवर्त्तस्व राज्यादि भुञ्जन् प्रारब्धमन्वहम् ॥ २६ ॥
भूतं भविष्यदभजन् वर्त्तमानमथाचरन् ।
विहरस्व यथान्यायं भवद्दोषैर्न लिप्यसे ॥ २७ ॥
आज्ञापयति रामस्त्वां यद्भ्रातुः साम्परायिकम् ।
तत् कुरुष्व यथाशास्त्रं रुदतीश्चापि योषितः ॥ २८ ॥
निवारय महाबुद्धे ! लङ्कां गच्छन्तु मा चिरम् ।
श्रुत्वा यथावद्वचनं लक्ष्मणस्य विभीषणः ॥ २९ ॥
त्यक्त्वा शोकं च मोहं च रामपार्श्वमुपागमत् ।
विमृश्य बुद्ध्या धर्मज्ञो धर्मार्थसहितं वचः ॥ ३० ॥
रामस्यैवानुवृत्त्यर्थमुत्तरं पर्य्यभाषत ।
नृशंसमनृतं क्रूरं त्यक्तधर्मव्रतं प्रभो ! ॥ ३१ ॥
नार्होऽस्मि देव ! संस्कर्त्तुं परदाराभिमर्शिनम् ।
श्रुत्वा तद्वचनं प्रीतो रामो वचनमब्रवीत् ॥ ३२ ॥
मरणान्तानि वैराणि निर्वृत्तं न प्रयोजनम् ।
क्रियतामस्य संस्कारो ममाप्येष यथा तव ॥ ३३ ॥

प्रारब्धं भोगं विना दुःखजमिति बुद्ध्वा राज्यादिभुञ्जन्ननुवर्त्तस्व तत्-पालने यतस्व ॥ २६ ॥

भूतं भविष्यच्चाभजन् कथमिदं गतं कथमग्रे भविष्यतीत्यविचारयन् एवं भवद्दोषैर्न लिप्यसे ॥ २७ । २८ ॥

यथावद्वचनं यथोक्तं वचनम् ॥ २९ ॥

विमृश्य भगवच्छत्रोः क्रियाकरणे भगवतो दुःखं स्यादिति विचार्य ॥ ३०—३२ ॥

निर्वृत्तं निष्पन्नं यथा तव भ्राता तथा ममापि मरणेन विरोध-स्यापगमात् ॥ ३३ ॥

रामाज्ञां शिरसा धृत्वा शीघ्रमेव बिभीषणः।
सान्त्ववाक्यैर्महाबुद्धिं राज्ञीं मन्दोदरीं तदा ॥ ३४ ॥
सान्त्वयामास धर्मात्मा धर्मबुद्धिर्विभीषणः।
त्वरयामास धर्मज्ञः संस्कारार्थं स्वबान्धवान् ॥ ३५ ॥
चित्यां निवेश्य विधिवत्पितृमेधविधानतः।
आहिताग्नेर्यथा कार्य्यं रावणस्य विभीषणः ॥ ३६ ॥
तथैव सर्वमकरोद्बन्धुभिः सह मन्त्रिभिः।
ददौ च पावकं तस्य विधियुक्तं विभीषणः ॥ ३७ ॥
स्नात्वा चैवार्द्रवस्त्रेण तिलान् दर्भाभिमिश्रितान्।
उदकेन च संमिश्रान् प्रदाय विधिपूर्वकम् ॥ ३८ ॥
प्रदाय चोदकं तस्मै मूर्द्ध्ना चैनं प्रणम्य च।
ताः स्त्रियोऽनुनयामास सान्त्वमुक्त्वा(१) पुनःपुनः॥३९॥
गम्यतामिति ताः सर्वा विविशुर्नगरं तदा।
प्रविष्टासु च सर्वासु राक्षसीषु बिभीषणः ॥ ४० ॥
रामपार्श्वमुपागत्य तदातिष्ठद्विनीतवत्।
रामोऽपि सह सैन्येन सुग्रीवः सह लक्ष्मणः ॥ ४१ ॥

सान्त्ववाक्यैः शोकापनोदकवाक्यैः ॥ ३४ । ३५ ॥

आहिताग्नेरग्निहोत्रिणो यथा कार्य्यं योग्यं तथैवोर्द्धदेहिकमकरोत् ॥ ३६ ॥

विधियुक्तं मन्त्रादियुक्तम् ॥ ३७ ॥ ३८ ॥

प्रदाय चोदकं तस्मै इति शुद्धं जलं करकादिपात्रे अश्वत्थशाखायां तदुद्देशेन दत्त्वेत्यर्थः अनुनयामास विगतशोकाश्चकार ॥ ३९ ॥

गम्यतामिति बिभीषणेनोक्ता इति शेषः ॥४० ॥

---

(१) सान्त्वयित्वा इति पाठान्तरम्।

हर्षं लेभे रिपून् हत्वा यथा वृत्रं शतक्रतुः।
मातलिश्च तदा रामं परिक्रम्याभिवन्द्य च ॥ ४२ ॥
अनुज्ञातश्च रामेण ययौ स्वर्गं विहायसा।
ततो हृष्टमना रामो लक्ष्मणं चेदमब्रवीत् ॥ ४३ ॥
विभीषणाय मे लङ्काराज्यं दत्तं पुरैव हि।
इदानीमपि गत्वा त्वं लङ्कामध्ये विभीषणम् ॥ ४४ ॥
अभिषिञ्चय विप्रैश्च मन्त्रवद्विधिपूर्वकम्।
इत्युक्तो लक्ष्मणस्तूर्णं जगाम सह वानरैः ॥ ४५ ॥
लङ्कां सुवर्णकलशैः समुद्रजलसंयुतैः।
अभिषेकं शुभं चक्रे राक्षसेन्द्रस्य धीमतः ॥ ४६ ॥
ततः पौरजनैः सार्द्धं नानोपायनपाणिभिः।
विभीषणः ससौमित्रिरुपायनपुरस्कृतः ॥ ४७ ॥
दण्डप्रणाममकरोद्रामस्याक्लिष्टकर्मणः।
रामो विभीषणं दृष्ट्वा प्राप्तराज्यं मुदान्वितः ॥ ४८ ॥
कृतकृत्यमिवात्मानममन्यत सहानुजः।
सुग्रीवं च समालिङ्ग्य रामो वाक्यमथाब्रवीत् ॥ ४९ ॥
सहायेन त्वया वीर ! जितो मे रावणो महान्।

युद्धभूमिं हतस्य सद्यः शीघ्रत्वाद्धरेव सर्वं प्रेतकृत्यं समाप्य राम-समीपमागमनम् ॥४१—४५ ॥

लङ्कां जगामेत्यन्वयः ततः स्वर्णकलशैः राक्षसेन्द्रस्याभिषेकं प्रचक्रे ॥४६

उपायनपुरस्कृतोऽग्रे कृतं उपायनं येन सः आहिताग्न्यादित्वात्पर-निपातः ॥४७ ॥

आगत्य दण्डप्रणामं दण्डवत्प्रणामम् ॥ ४८ ॥

कृतकृत्यमिव प्रतिज्ञातार्थसिद्ध्येति भावः ॥ ४९ ॥

विभीषणोऽपि लङ्कायामभिषिक्तो मयानघ ! ॥ ५० ॥
ततः प्राह हनूमन्तं पार्श्वस्थं विनयान्वितम्।
विभीषणस्यानुमतिं गच्छ त्वं रावणालयम् ॥ ५१ ॥
जानक्यै सर्वमाख्याहि रावणस्य वधादिकम्।
जानक्याः प्रतिवाक्यं मे शीघ्रमेव निवेदय ॥ ५२ ॥
एवमाज्ञापितो धीमान् रामेण पवनात्मजः।
प्रविवेश पुरीं लङ्कां पूज्यमानो निशाचरैः ॥ ५३ ॥
प्रविश्य रावणगृहं शिंशपामूलमाश्रिताम्।
ददर्श जानकीं तत्र कृशां दीनामनिन्दिताम् ॥ ५४ ॥
राक्षसीभिः परिवृतां ध्यायन्तीं राममेव हि।
विनयावनतो भूत्वा प्रणम्य पवनात्मजः ॥ ५५ ॥
कृताञ्जलिपुटो भूत्वा प्रह्वो भक्त्याग्रतः स्थितः।
तं दृष्ट्वा जानकी तूष्णीं स्थित्वा पूर्वस्मृतिं ययौ ॥ ५६ ॥
ज्ञात्वा तं रामदूतं(१) सा हर्षात्सौम्यमुखी भवत्।
स तां सौम्यमुखीं दृष्ट्वा तस्याः पवननन्दनः।
रामस्य भाषितं सर्वमाख्यातुमुपचक्रमे ॥ ५७ ॥

अन्यान् देवैरपि दुर्जयः विभीषणः पूर्वं प्रतिज्ञाताभिषेकः ॥ ५० ॥
विभीषणस्यानुमते लङ्काधीशत्वात् तदाज्ञां गृहीत्वा ॥ ५१–५२ ॥
अनिन्दितां रावणतिरस्कारादप्राप्तनिन्दाम् ॥ ५४ ॥ ५५ ॥
भक्त्येति प्रह्वत्वादेर्हेतुकथनं पूर्वमागतो यः स एवायमिति स्मृतिं
प्राप्तं ययौ प्राप्तवती ॥ ५६ ॥
भवत् अभवदित्यर्थः अडभाव आर्षः रामस्य भाषितं रामभाषितं
वृत्तान्तम् ॥ ५७ ॥

(१) ज्ञात्वा रामस्य दूतं इति केचित् वदन्ति।

देवि ! रामः ससुग्रीवो विभीषणसहायवान् ।
कुशली वानराणां(१)च सैन्यैश्च सह लक्ष्मणः ॥ ५८ ॥
रावणं ससुतं हत्वा सबलं सह मन्त्रिभिः ।
त्वामाह कुशलं रामो राज्ये कृत्वा विभीषणम् ॥ ५९ ॥
श्रुत्वा भर्त्तुः प्रियं वाक्यं हर्षगद्गदया गिरा ।
किं ते प्रियं करोम्यद्य ? न पश्यामि जगत्त्रये ॥ ६० ॥
समन्ते प्रियवाक्यस्य रत्नान्याभरणानि च ।
एवमुक्तस्तु वैदेह्या प्रत्युवाच प्लवङ्गमः ॥ ६१ ॥
रत्नौघाद्विविधाद्यापि देवराज्याद्विशिष्यते ।
हतशत्रुं विजयिनं रामं पश्यामि सुस्थिरम् ॥ ६२ ॥
तस्य तद्वचनं श्रुत्वा मैथिली प्राह मारुतिम् ।
सर्वे सौम्या गुणाः सौम्य ! त्वय्येव परिनिष्ठिताः ॥ ६३ ॥
रामं द्रक्ष्यामि शीघ्रं मामाज्ञापयतु राघवः ।
तथेति तां नमस्कृत्य ययौ द्रष्टुं रघूत्तमम् ॥ ६४ ॥
जानक्या भाषितं सर्वं रामस्याग्रे न्यवेदयत् ।

वानराणां सैन्यैः सहैव लक्ष्मणश्च कुशली सर्वे कुशलिन इत्यर्थः ॥ ५८
राज्ये विभीषणं कृत्वा इत्यनेन निरवशेषसर्वकार्यसिद्धिरुक्ता ॥ ५९ ॥
ते प्रियवाक्यस्य समं रत्नादिषु न किञ्चित्पश्यामि ॥ ६० । ६१ ॥
देवराज्यादित्यस्य अपीति शेषः प्राप्तजयस्य रामस्य सर्वतोऽप्यभिन्नं निरवधिफलदातृत्वादिति भावः ॥ ६२ ॥
सौम्याः सोमवत् चन्द्रवत्प्रियदर्शनाः शोभमाना इति यावत्सौम्य सोमवत्प्रियदर्शन ॥ ६३ । ६४ ॥

(१) कुशलं वानराणामिति पुस्तकान्तरे दृष्टम् ।

यन्निमित्तोऽयमारम्भः कर्मणां च फलोदयः ॥ ६५ ॥
तां देवीं शोकसन्तप्तां द्रष्टुमर्हसि मैथिलीम्।
एवमुक्तो हनुमता रामो ज्ञानवतां वरः ॥ ६६ ॥
मायासीतां परित्यक्तुं जानकीमनले स्थिताम्।
आदातुं मनसा ध्यात्वा रामः प्राह विभीषणम् ॥ ६७॥
गच्छ राजन्! जनकजामानयाशु ममान्तिकम्।
स्नातां विरजवस्त्राढ्यां सर्वाभरणभूषिताम् ॥ ६८ ॥
विभीषणोऽपि तच्छ्रुत्वा जगाम सह मारुतिः।
राक्षसीभिः सुवृद्धाभिः स्नापयित्वा तु मैथिलीम् ॥ ६९॥
सर्वाभरणसम्पन्नामारोप्य शिबिकोत्तमे।
याष्टीकैर्बहुभिर्गुप्तां कञ्चुकोष्णीषिभिः शुभाम् (१) ॥ ७०॥
तां द्रष्टुमागताः सर्वे वानरा जनकात्मजाम्।
तान् वारयन्तो बहवः सर्वतो वेत्रपाणयः ॥ ७१ ॥
कोलाहलं प्रकुर्वन्तो रामपार्श्वमुपाययुः।
दृष्ट्वा तां शिबिकारूढां दूरादथ रघूत्तमः ॥ ७२ ॥

कर्मणां युद्धादीनां फलोदयरूपां तां देवीमित्यन्वयः ॥ ६५ । ६६ ॥
अनले अग्नौ स्थितां जानकीमादातुं मनसा ध्यात्वा निश्चित्य प्राहेत्यन्वयः ॥ ६७ ॥
विरजवस्त्राणि निर्मलवस्त्राणि तदाढ्यां तैः शोभिताम् ॥ ६८ ॥
बहुमारुतिः समासेऽपि वैकल्पिकत्वात्तत्वाभावः ॥ ६९ ॥
शिबिकोत्तमे सर्वशिविकाश्रेष्ठ उत्तमे शिबिकारूपे वाहने याष्टीकैः आचारवशाद्यष्टिहस्तै रक्षकैः कञ्चुकैर्बहुभिर्गुप्ताम् ॥ ७० । ७१ ॥
कोलाहलं प्रकुर्वन्तः दूरे तिष्ठतेति वदन्तः ॥ ७२ ॥

---

(१) द्रष्टुं दृश्यापि पाठः।

विभीषण ! किमर्थं ते ? वानरान् वारयन्ति हि ।
पश्यन्तु वानराः सर्वे मैथिलीं मातरं यथा ॥ ७३ ॥
पादचारेण सा यातु जानकी मम सन्निधिम् ।
श्रुत्वा तद्रामवचनं शिबिकादवरुह्य सा ॥ ७४ ॥
पादचारेण शनकैरागता रामसन्निधिम् ।
रामोऽपि दृष्ट्वा तां मायासीतां कार्यार्थनिर्मिताम् ॥ ७५ ॥
अवाच्यवादान् बहुशः प्राह तां रघुनन्दनः ।
अमृष्यमाणा सा सीता वचनं राघवोदितम् ॥ ७६ ॥
लक्ष्मणं प्राह मे शीघ्रं प्रज्वालय हुताशनम् ।
विश्वासार्थं हि रामस्य लोकानां प्रत्ययाय च ॥ ७७ ॥
राघवस्य मतं ज्ञात्वा लक्ष्मणोऽपि तथैव हि ।
महाकाष्ठचयं कृत्वा ज्वालयित्वा हुताशनम् ॥ ७८ ॥
रामपार्श्वमुपागम्य तस्थौ तूष्णीमरिन्दमः ।
ततः सीता परिक्रम्य राघवं भक्तिसंयुता ॥ ७९ ॥
पश्यतां सर्वलोकानां देवराक्षसयोषिताम् ।
प्रणम्य देवताभ्यश्च ब्राह्मणेभ्यश्च मैथिली ॥ ८० ॥
बद्धाञ्जलिपुटा चेदमुवाचाग्निसमीपगा ।
यथा मे हृदयं नित्यं नापसर्पति राघवात् ॥ ८१ ॥

ते याष्टीकाः ॥ ७२ ॥

सा या सूर्यचन्द्रादिभिरपि तत्त्वतोऽज्ञाता तादृशीं वानराः सुखेन पश्यन्त्वित्याशयः शिविकात् शिविकायाः लिङ्गव्यत्ययश्च आर्षः ॥७४।७५॥

अवाच्यवादान् वक्तुमनर्हवचनानि परपुरुषमन्दिरे स्थितासि धिक् त्वामित्यादीनि ॥ ७६ ॥

प्रत्ययाय विश्वासाय ॥ ७७—८१ ॥

तथा लोकस्य साक्षी मां सर्वतः पातु पावकः ॥ ८२ ॥
एवमुक्त्वा तदा सीता परिक्रम्य हुताशनम् ।
विवेश ज्वलनं दीप्तं निर्भयेन हृदा सती (१) ॥ ८३ ॥

दृष्ट्वा ततो भूतगणाः ससिद्धाः
सीतां महावह्निगतां भयार्त्ताः ।
परस्परं प्राहुरहो स सीतां
रामः श्रियं स्वां कथमत्यजज्ज्ञः ? ॥ ८४ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
द्वादशः सर्गः ।

सर्वतः पातु सीतेति सर्वत्रान्वयः ॥ ८२ । ८३ ॥
ज्ञः सर्वज्ञोऽपि रामः कथं सीतामत्यजत् वह्निप्रवेशमनुज्ञातवा-
निति प्राहुः ॥ ८४ ॥

इति श्रीमत्सकलराजविपद्धरणसमर्थेत्यादिवि० श्रीरामवर्मणः
कृतावध्यात्मरामायणे सेतौ युद्धकाण्डे
द्वादशः सर्गः ।

---

(१) तदा सती इति वा पाठः ।

अथ त्रयोदशः सर्गः ।

ततः शक्रः सहस्राक्षो यमश्च वरुणस्तथा ।
कुबेरश्च महातेजाः पिनाकी वृषवाहनः ॥ १ ॥
ब्रह्मा ब्रह्मविदां श्रेष्ठो मुनिभिः सिद्धचारणैः ।
पितरो ऋषयः साध्या गन्धर्वाप्सरसोरगाः ॥ २ ॥
एते चान्ये विमानाग्र्यैराजग्मुर्यत्र राघवः ।
अब्रुवन् परमात्मानं रामं प्राञ्जलयश्च ते ॥ ३ ॥
कर्ता त्वं सर्वलोकानां साक्षी विज्ञानविग्रहः ।
वसूनामष्टमोऽसि त्वं रुद्राणां शङ्करो भवान् ॥ ४ ॥
आदिकर्त्तासि लोकानां ब्रह्मा त्वं चतुराननः ।
अश्विनौ घ्राणभूतौ ते चक्षुषी चन्द्रभास्करौ ॥ ५ ॥
लोकानामादिरन्तोऽसि नित्य एकः सदोदितः ।
सदा शुद्धः सदा बुद्धः सदा मुक्तोऽगुणोऽद्वयः ॥ ६ ॥
त्वन्मायासंवृतानां त्वं भासि मानुषविग्रहः ।
त्वन्नाम स्मरतां राम ! सदा भासि चिदात्मकः ॥ ७ ॥

तत इति ॥ १—३ ॥

साक्षी अन्तर्यामितया सर्वद्रष्टा अथ सर्वात्मत्वमाह वसूनामित्यादि ॥ ४ ॥

आदिकर्त्ता सृष्टेः प्रथमकर्त्ता विराड्रूपमाहाश्विनावित्यादि इदं पुराणान्तरोक्तस्य सर्वस्योपलक्षणम् ॥ ५ ॥

आदिरुत्पत्तिमत् अन्तो नाशवत् सदोदितः रात्रिदिनव्यवहारहीनः शुद्धः मायागुणास्पृष्टः अतएव सदा बुद्धः ज्ञानस्वरूपः अतएव मुक्तोऽसंसारी अगुणोऽद्वय इति च्छेदः ॥ ६ ॥

त्वन्मायया संवृतानां संवृतज्ञानानां चिदात्मकः शुद्धज्ञानस्वरूपः ॥ ७ ॥

रावणेन हृतं स्थानमस्माकं तेजसा सह।
त्वयाद्य निहतो दुष्टः पुनः प्राप्तं पदं स्वकम् ॥ ८ ॥
एवं स्तुवत्सु देवेषु ब्रह्मा साक्षात्पितामहः।
अब्रवीत्प्रणतो भूत्वा रामं सत्यपथे स्थितम् ॥ ९ ॥

ब्रह्मोवाच

वन्दे देवं विष्णुमशेषस्थितिहेतुं
त्वामध्यात्मज्ञानिभिरन्तर्हृदि भाव्यम्।
हेयाहेयद्वन्द्वविहीनं परमेकं
सत्तामात्रं सर्वहृदिस्थं दृशिरूपम् ॥ १० ॥
प्राणापानौ निश्चयबुद्ध्या हृदि रुद्ध्वा
छित्त्वा सर्वं संशयबन्धं विषयौघान्।
पश्यन्तीशं यं गतमोहा यतयस्तं
वन्दे रामं रत्नकिरीटं रविभासम् ॥ ११ ॥

तेजसा सह स्थानं हृतं तेजोऽपि हृतं स्थानं चेत्यर्थः ॥ ८।९ ॥

अशेषस्य स्थितिकारणं अध्यात्मज्ञानिभिः आत्मविषयतत्त्वज्ञानवन्तः हेये दुःखकृते तत्साधने तद्रूपद्वन्द्वविहीनं कूटस्थत्वात् सत्तामात्रं सर्वस्य हृदि तिष्ठतीति व्यवहारनियामकं दृशिरूपं 'दृक् कर्णादिभ्य' इति इक्प्रत्ययः ॥ १० ॥

निश्चयबुद्ध्या हठयोगेनावश्यं भगवन्तं साक्षात्करिष्यामीत्येवं रूपेण कुम्भकेन हृदि प्राणापानौ रुद्ध्वा सञ्चारहीनौ कृत्वा तत्र प्राण ऊर्ध्वसञ्चारी अपानोऽधश्चारी श्रवणादिभिरीश्वरविषयं संशयबन्धम् ईश्वरोऽस्ति न वा ज्ञानरूपो वा शरीरी वेत्यादिसंशयरूपं बन्धनं एवं संशयस्यैव संसारमूलकारणत्वात् विषयौघांश्च छित्त्वा ततोऽन्तःकरणं विशुद्धं कृत्वा तत्रेश्वरविषयसन्देहस्य श्रवणादिना छेदः विषयाणां चानित्याशुचित्वप्रतिसन्धानेन त्यागः गतमोहाश्च ज्ञातमयः यं पश्यन्ति तं रामं वन्दे इत्यन्वयः ॥ ११ ॥

मायातीतं माधवमाद्यं जगदादिं
मानातीतं मोहविनाशं मुनिवन्द्यम् ।
योगिध्येयं योगविधानं परिपूर्णं
वन्दे रामं रञ्जितलोकं रमणीयम् ॥ १२ ॥
भावाभावप्रत्ययहीनं भवमुख्यै-
र्भोगासक्तैरर्चितपादाम्बुजयुग्मम् ।
नित्यं शुद्धं बुद्धमनन्तं प्रणवाख्यं
वन्दे रामं वीरमशेषासुरदावम्(१) ॥ १३ ॥
त्वं मे नाथो नाथितकार्य्याखिलकारी
मानातीतो माधवरूपोऽखिलधारी ।

मायातीतं तद्गुणास्पृष्टम् आद्यमित्यस्यैव विवरणं जगदादिमिति मानातीतं देशकालवस्तुपरिच्छेदशून्यं मोहविनाशं सेवकानां मोहनाशकं योगविधानं योगविधातारं योगमार्गप्रवर्त्तकम् ॥ १२ ॥

भावाभावप्रत्ययहीनं संसारे मिथ्यात्वाच्च तस्य भावप्रत्ययो नाप्यभावप्रत्ययो दृश्यत्वात्तेनानिर्वचनीयत्वमाननविषयत्वस्य च इति सूचितं यद्वा अज्ञानां भावाभावप्रत्ययाविषयं शाश्वतः सत्त्वात् प्रत्यक्षेणानुपलम्भाच्च तत्त्वम् यद्वा भावो दृश्यमभावस्तुच्छं तद्विषयज्ञानाविषयं अदृश्यत्वादतुच्छत्वाच्च भोगासक्तैर्भोगेष्वसक्तैर्स्वक्भोगैर्भवमुख्यैः शिवादिभिः पूजितचरणकमलं नित्यं कालत्रयाबाध्यम् शुद्धं मायादोषास्पृष्टं बुद्धं ज्ञानस्वरूपम् अनन्तं देशाद्यपरिच्छेद्यं प्रणव आख्या नाम यस्य तं प्रणवाख्यं 'तस्य वाचकः प्रणव' इति पातञ्जलसूत्रात् अशेषासुरदावं सर्वदैत्यनाशकमित्यर्थः ॥ १२ ॥

मे अस्माकं त्वं नाथः नाथत्वमेवोपपादयति नाथितकार्याखिलकारी प्रार्थितसकलकार्यकर्त्ता अखिलपदस्य परनिपात आर्षः माना-

(१) मशेषं सुरभावमिति वा पाठः ।

भक्त्या गम्यो भावितरूपो भवहारी
योगाभ्यासैर्भावितचेतः सहचारी ॥ १४ ॥
त्वामाद्यन्तं लोकततीनां परमीशं
लोकानां नो लौकिकमानैरधिगम्यम्।
भक्तिश्रद्धाभावसमेतैर्भजनीयं
वन्दे रामं सुन्दरमिन्दीवरनीलम् ॥ १५ ॥
को वा ज्ञातुं त्वामतिमानं(१) गतमानं
मानासक्तो माधव! शक्तो मुनिमान्यम्।
वृन्दारण्ये वन्दितवृन्दारकवृन्दं
वन्दे रामं भवमुखवन्द्यं सुखकन्दम् ॥ १६ ॥

तीतः देशतः कालतो रूपतश्चेत्येवं त्रिविधपरिच्छेदशून्यः मा लक्ष्मी-स्तस्याः पतिः भक्त्यानन्यशरणत्वरूपया गम्यः प्राप्यः भावितरूपः सन् भवस्य संसारस्य हारी हर्त्ता योगाभ्यासैर्भावितं विहीनदोषं तथा शुद्धं यच्चेतोऽन्तःकरणं तत्र सहचारी तद्वृत्तिविषय इत्यर्थः 'दृश्यते त्वग्र्यया बुद्ध्या' इति श्रुतेः ॥ १४ ॥

लोकततीनां परम्पराणाम् आद्यन्तं सृष्टिनाशहेतुम् लोकानां परमीशं पालनहेतुम् लौकिकमानैर्लौकिकैः प्रमाणैर्न अधिगम्यं अपि तु यं शास्त्रैकगम्यमित्यर्थः भक्तिः परमेश्वरे तत्त्व आदौ प्रीतिः श्रद्धा ततः फलावश्यम्भावनिश्चयः तद्रूपैर्भावैश्चित्तधर्मैर्युक्तैः पुरुषैः सेव्यम् ॥ १५ ॥

हे माधव! अतिमानं सर्वतोऽतिव्यापकं गतमानं स्वगते यत्तया परिच्छेद्यम् ईदृशं त्वां ज्ञातुं मानासक्तः मानेषु प्रमाणेषु इन्द्रियेष्वसक्तः को वा शक्तः समर्थः कृष्णावतारे वृन्दारण्ये स्थित्वा मायया वन्दितं नमस्कृतं वृन्दारकाणां देवानां वृन्दं येन भवमुख्यैः शिवादिभिर्वन्द्यं सुखकन्दं सुखजनकं त्वां वन्दे ॥ १६ ॥

---

(१) त्वामभिमाना इति पाठान्तरम्।

नानाशास्त्रैर्वेदकदम्बैः प्रतिपाद्यं
नित्यानन्दं निर्विषयज्ञानमनादिम्(१) ।
मत्सेवार्थं मानुषभावं प्रतिपन्नं
वन्दे रामं मरकतवर्णं मथुरेशम् ॥ १७ ॥
अध्यायुक्तो यः पठतीमं स्तवमाद्यं
ब्राह्मं ब्रह्मज्ञानविधानं भुवि मर्त्यः ।
रामं श्यामं कामितकामप्रदमीशं
ध्यात्वा ध्याता पातकजालैर्विगतः स्यात् ॥ १८ ॥
श्रुत्वा स्तुतिं लोकगुरोर्विभावसुः
स्वाङ्के समादाय विदेहपुत्रिकाम् ।
विभ्राजमानां विमलारुणद्युतिं
रक्ताम्बरां दिव्यविभूषणान्विताम् ॥ १९ ॥
प्रोवाच साक्षी जगतां रघूत्तमं
प्रपन्नसर्वार्त्तिहरं हुताशनः ।

नानाशास्त्रैः निर्णीतार्था ये वेदकदम्बा वेदसमूहास्तैः प्रतिपाद्यम् निर्विषयज्ञानं निर्विकल्पकज्ञानविषयं बाह्यविषयाविषयकज्ञानविषयमित्यर्थः मत्सेवार्थं रावणादिवधेनेति शेषः मथुरेशं अपि मत्प्राय मथुराराज्यदानात्तत्त्वं कृष्णावताराभिप्रायेण च ॥ १७ ॥

ब्राह्मं ब्रह्मकृतं ब्रह्मज्ञानविधानं तज्जन्यं कामितकामप्रदम् अभीष्टवस्तुदातारं तादृशं ध्यात्वा यः पठति स ध्याता पुरुषः पातकजालैर्विगतः हीनः स्यात् ॥ १८ ॥

विभावसुरग्निः दिव्यविभूषणान्विता तद्युक्ताम् ॥ १९ ॥

---

(१) निर्विशेषज्ञानमनादिम् इति क्वचित् वदन्ति ।

गृहाण देवीं रघुनाथ! जानकीं
पुरा त्वया मय्यवरोपितां वने ॥ २० ॥
विधाय मायाजनकात्मजां हरे!
दशाननप्राणविनाशनाय च।
हतो दशास्यः सह पुत्रबान्धवै-
र्निराकृतोऽनेन भरो भुवः प्रभो! ॥ २१ ॥
तिरोहिता सा प्रतिबिम्बरूपिणी
कृता यदर्थं कृतकृत्यतां गता।
ततोऽतिहृष्टां परिगृह्य जानकीं
रामः प्रहृष्टः प्रतिपूज्य पावकम् ॥ २२ ॥
स्वाङ्के समावेश्य सदानपायिनीं
श्रियं त्रिलोकीजननीं श्रियः पतिः।
दृष्ट्वाथ रामं जनकात्मजायुतं
श्रिया स्फुरन्तं सुरनायको मुदा ॥ २३ ॥
भक्त्या गिरा गद्गदया समेत्य
कृताञ्जलिः स्तोतुमथोपचक्रमे।

जगतां साक्षी तत्त्वरूपापद्रष्टा मय्यवरोपितां स्थापिताम् ॥२०॥

मायाजनकात्मजां मायारूपां तां जनकात्मजासदृशीं मायया विधाय निर्मायेति यावत् पुरा मय्यवरोपिताम् इति पूर्वेणान्वयः इदानीं तन्निर्माणकृत्यम् आतत्वात् मायानिर्मिता मयि लीनेत्याह हत इति अनेन दशास्यवधेन ॥ २१ ॥

प्रतिबिम्बरूपिणी सीता प्रतिबिम्बरूपा यदर्थं सा कृता निर्मिता तद्विषयतः कृतकृत्यतां गता अतस्तिरोहिता सीता ॥ २२ ॥

सुरनायक इन्द्रः ॥ २३ ॥

इन्द्र उवाच।

भजेऽहं सदा राममिन्दीवराभं
भवारण्यदावानलाभाभिधानम्।
भवानीहृदा(१) भावितानन्दरूपं
भवाभावहेतुं भवादिप्रपन्नम्॥ २४॥
सुरानीकदुःखौघनाशैकहेतुं
नराकारदेहं निराकारमीड्यम्।
परेशं परानन्दरूपं वरेण्यं
हरिं राममीशं भजे भारनाशम्॥ २५॥
प्रपन्नाखिलानन्ददोहं प्रपन्नं
प्रपन्नार्त्तिनिःशेषनाशाभिधानम्।
तपोयोगयोगीशभावाभिभाव्यं
कपीशादिमित्रं भजे राममित्रम्॥ २६॥

भक्तरा समेत्य भक्तियुक्तो भूत्वा इन्दीवरं नीलोत्पलं तदाभं तत्कान्तिम् भवारण्यस्य संसारारण्यस्य दावानलाभं तत्तुल्यं तन्नाशकत्वाद्-भिधानं नाम यस्य तं भवानीहृदा पार्वतीहृदयेन भावितं ध्यातमानन्द-रूपं यस्य तं भवाभावहेतुं संसारनिराकरणं भवादिभिः प्रपन्नं सेवितम्॥ २४॥

सुरसमूहस्य यो दुःखौघो दुःखसमूहस्तन्नाशस्य मुख्यकारणं नराकारदेहं माययेति शेषः वस्तुतो निराकारं ईड्यं स्तुत्यम् परेशां ब्रह्मादीनामपीशं वरेण्यं श्रेष्ठं भारनाशं भूभारनाशकम्॥ २५॥

प्रपन्नेति शरणागतानामखिलानन्ददातारं प्रपन्नं भक्तैरिति शेषः प्रपन्नानामार्त्तीनां निःशेषं यथा भवति तथा नाशं नाशकत् अभिधानं नाम यस्य तपसा शमदमादिना योगो येषां तादृशैर्योगीशैर्भावेन सत्तया

(१) भवानी सदा इति वा पाठः।

सदा भोगभाजां सुदूरे विभान्तं
सदा योगभाजामदूरे विभान्तम् ।
चिदानन्दकन्दं सदा राघवेशं
विदेहात्मजानन्दरूपं प्रपद्ये ॥२७ ॥
महायोगमायाविशेषानुयुक्तो(१)
विभासीश ! लीलानराकारवृत्तिः ।
त्वदानन्दलीलाकथापूर्णकर्णाः
सदानन्दरूपा भवन्तीह लोके ॥२८ ॥
अहं मानपानाभिमत्तप्रमत्तो
न वेदाखिलेशाभिमानाभिमानः ।

तद्रूपेणाभिभाव्यं ध्येयं कपीशः सुग्रीवः आदिना विभीषणस्तन्मितं रामभिन्नं रामरूपं स्वयम् ॥ २६ ॥

भोगभाजां भोगिनां संसारिणां सुदूरे विभान्तं तज्ज्ञानाविषयमिति यावत् योगिनां सदा अदूरे विभान्तं तेषां सर्वदा आत्मत्वेन ज्ञानविषयमित्यर्थः चिदानन्दकन्दस्थितचैतन्यस्यानन्दस्य कन्दः सर्वचेतनानां सर्वानन्दानां तन्मूलकत्वात् 'अस्यैवानन्दस्य सर्वे मात्रामुपजीवन्ति' इति श्रुतेः राघवेशं रघुवंशस्वामिनं विदेहात्मजानन्दरूपम् जानक्या आनन्दरूपं सर्वानन्दप्रदम् ॥ २७ ॥

महेति महती योगमाया तद्गुणविशेषैः सत्त्वादिभिरनुयुक्तः यथा जवाकुसुमयुक्तः स्फटिको रक्तो भाति तथा तदनुयोगाल्लीलया नराकारा वृत्तिश्चेष्टा यस्य तादृशो विभासि तव या आनन्देन लीलास्तत्कथाभिः पूर्णाः कर्णा येषां ते सदा आनन्दरूपा इह लोके भवन्ति ॥ २८ ॥

अहंमानोऽहङ्कारस्तद्रूपं पानं सुरादि कर्मल्युडन्तस्तेनाभितो मत्तो तएव प्रकर्षेण मत्तः अखिला ये ईशा भूम्यादेः तदभिमानेन सुखो-

(१) महापापमायाविशेषार्थयुक्तो इति पाठान्तरम् ।

इदानीं भवत्पादपद्मप्रसादात्
त्रिलोकाधिपत्याभिमानो विनष्टः॥ २९॥
स्फुरद्रत्नकेयूरहाराभिरामं
धराभारभूतासुरानीकदावम्।
शरच्चन्द्रवक्त्रं लसत्पद्मनेत्रं
दुरावारपारं भजे राघवेशम्॥ ३०॥
सुराधीशनीलाभ्रनीलाङ्गकान्तिं
विराधादिरक्षोवधाल्लोकशान्तिम्।
किरीटादिशोभं पुरारातिलाभं
भजे रामचन्द्रं रघूणामधीशम्॥ ३१॥
लसच्चन्द्रकोटिप्रकाशादिपीठे
समासीनमङ्के समाधाय सीताम्।
स्फुरद्धेमवर्णां तडित्पुञ्जभासां
भजे रामचन्द्रं निवृत्तार्त्तितन्द्रम्॥ ३२॥

भिमानो यस्य तादृशोऽहं त्वां न वेद न जानामि त्रिलोके यदाधिपत्यं तत्प्रयुक्तोऽभिमानो विनष्टः गतः॥ २९॥

स्फुरद्रत्नकेयूरहारैरभिरामं जनमनोहरं धरायाः पृथ्व्या भारभूता ये असुरा दैत्यास्तदनीकस्य दावाग्निस्तुल्यं दुरापः दुःखेन प्राप्य अवारपारो यस्य तं पृषोदरादित्वाद्वर्णलोपः॥ ३०॥

सुराधीशनील इन्द्रनीलमणिः अभ्रं च तद्वन्नीला अङ्गकान्तिर्यस्य तं लोकशान्तिं लोकानां शान्तिः सुखं यस्मात्तं किरीटादिभिः शोभा यस्य तं पुरारातेर्लाभभूतं यत्प्राप्यमिष्यादि सदृशम्॥ ३१॥

लसच्चन्द्रकोटिप्रकाशादि यत्र तादृशे पीठे उक्तविशेषणां सीतामङ्के समाधाय स्थापयित्वा समासीनम् निवृत्ते आर्त्तितन्द्रे दुःखालस्ये यस्मात्तं सदाप्रकाशरूपमित्यर्थः॥ ३२॥

ततः प्रोवाच भगवान् भवान्या सहितो भवः।
रामं कमलपत्राक्षं विमानस्थो नभःस्थले॥ ३३॥
आगमिष्याम्ययोध्यायां द्रष्टुं त्वां राज्यसत्कृतम्।
इदानीं पश्य पितरमस्य देहस्य राघव!॥ ३४॥
ततोऽपश्यद्विमानस्थं रामो दशरथं पुरः।
ननाम शिरसा पादौ मुदा भक्त्या सहानुजः॥ ३५॥
आलिङ्ग्य मूर्ध्न्यवघ्राय रामं दशरथोऽब्रवीत्।
तारितोऽस्मि त्वया वत्स! संसाराद्दुःखसागरात्॥ ३६॥
इत्युक्त्वा पुनरालिङ्ग्य ययौ रामेण पूजितः।
रामोऽपि देवराजं तं दृष्ट्वा प्राह कृताञ्जलिम्॥ ३७॥
मत्कृते निहतान् संख्ये वानरान् पतितान् भुवि(१)।
जीवयाशु सुधावृष्ट्या सहस्राक्ष! ममाज्ञया॥ ३८॥
तथेत्यमृतवृष्ट्या तान् जीवयामास वानरान्।
ये ये मृता मृधे पूर्वं ते ते सुप्तोत्थिता इव।
पूर्ववद्बलिनो हृष्टा रामपार्श्वमुपाययुः॥ ३९॥
नोत्थिता राक्षसास्तत्र पीयूषस्पर्शनादपि।
विभीषणस्तु साष्टाङ्गं प्रणिपत्याब्रवीद्वचः॥ ४०॥

भवः शिवः नभःस्थले आकाशे विमाने स्थितः सन् प्रोवाचेत्यन्वयः॥३३
अस्य तव देहस्य पितरं जनयितारम्॥ ३४॥
सहानुजः भक्त्याप्यः पादौ स्पृष्ट्वा शिरसा ननामेत्यन्वयः॥३५—३८॥
पूर्ववदिति राक्षसानां तु नोत्थानं सर्वपक्षपातस्य भगवतः परैरङ्गना-
नाशित्यापने कृतस्यापि रामकर्माभावात् शरपातकाले पुनर्जीवनस्यैव भगवता

(१) पतितान् भुवि इति विभिन्नः पाठः।

देव ! मामनुगृह्णीष्व मयि भक्तिर्यदा तव ।
मङ्गलस्नानमद्य त्वं कुरु सीतासमन्वितः ॥ ४१ ॥
अलङ्कृत्य सह भ्रात्रा श्वो गमिष्यामहे वयम् ।
विभीषणवचः श्रुत्वा प्रत्युवाच रघूत्तमः (१) ॥ ४२ ॥
सुकुमारोऽतिभक्तो मे भरतो मामवेक्षते ।
जटावल्कलधारी स शब्दब्रह्मसमाहितः ॥ ४३ ॥
कथं तेन विना स्नानं अलङ्कारादिकं मम ? ।
अतः सुग्रीवमुख्यांस्त्वं पूजयाशु विशेषतः ॥ ४४ ॥
पूजितेषु कपीन्द्रेषु पूजितोऽहं न संशयः ।
इत्युक्तो राघवेणाशु स्वर्णरत्नाम्बराणि च ॥ ४५ ॥
ववर्ष राक्षसश्रेष्ठो यथाकामं यथारुचि ।
ततस्तान् पूजितान् दृष्ट्वा रामो रत्नैश्च यूथपान् ॥ ४६ ॥
अभिनन्द्य यथान्यायं विससर्ज हरीश्वरान् ।
विभीषणसमानीतं पुष्पकं सूर्यवर्चसम् ॥ ४७ ॥

अमृतस्रवणात् केचित्तु रक्षसामुत्थानार्थं रावणेन सहस्रं प्रक्षेपात्तोत्थानं यद्वा रावणदाहकाले सर्वेषां रक्षसां तत्सम्बन्धिभिर्दाहकरणेन भगवच्छक्तौ प्रक्षेपेण नोत्थानमित्याहुः ॥ ४० ॥

यदेति यदीत्यर्थे ॥ ४१ ॥

गमिष्यामहे अयोध्यायामिति शेषः ॥ ४२ ॥

शब्दब्रह्मप्रणवस्तत्र समाहितः शब्दतोऽर्थतश्च तद्ध्यानवान् ॥ ४३ ॥

सुग्रीवो मुख्यो येषां तान् कपीन्द्रानिति शेषः ॥ ४४–४६ ॥

अनुत्तमं न विद्यते उत्तमं यस्मात्तत् ॥ ४८ ॥

(१) शब्दब्रह्मसमाहितः पुरे इति केचित् पठन्ति ।

आरुरोह ततो रामस्तद्विमानमनुत्तमम्।
अङ्के निधाय वैदेहीं लज्जमानां यशस्विनीम् ॥ ४८ ॥
लक्ष्मणेन सह भ्रात्रा विक्रान्तेन धनुष्मता।
अब्रवीच्च विमानस्थः श्रीरामः सर्ववानरान् ॥ ४९ ॥
सुग्रीवं हरिराजं च अङ्गदं च विभीषणम्।
मित्रकार्य्यं कृतं सर्वं भवद्भिः सह वानरैः ॥ ५० ॥
अनुज्ञाता मया सर्वे यथेष्टं गन्तुमर्हथ।
सुग्रीव! प्रति याह्याशु किष्किन्ध्यां सर्वसैनिकैः ॥ ५१ ॥
स्वराज्ये वस लङ्कायां मम भक्तो विभीषण!।
न त्वां धर्षयितुं शक्ताः सेन्द्रा अपि दिवौकसः ॥ ५२ ॥
अयोध्यां गन्तुमिच्छामि राजधानीं पितुर्मम।
एवमुक्तास्तु रामेण वानरास्ते महाबलाः ॥ ५३ ॥
ऊचुः प्राञ्जलयः सर्वे राक्षसश्च विभीषणः।
अयोध्यां गन्तुमिच्छामस्त्वया सह रघूत्तम! ॥ ५४ ॥
दृष्ट्वा त्वामभिषिक्तं(१) तु कौशल्यामभिवाद्य च।
पश्चाद्व्रजामहे राज्यमनुज्ञां देहि नः प्रभो! ॥ ५५ ॥

लज्जमानां तामिव जनाग्रे भर्तृसमीपावस्थानात्तद्भिनयः विक्रान्तेन पराक्रमशालिना ॥ ४९ ॥

स्वयं विमानमारुह्य भूमिष्ठान् सर्ववानरादीनाह मित्रकार्य्यमिति वानरैः सह भवद्भिः सर्वं कार्यं कृतमित्यन्वयः ॥ ५० । ५१ ॥

हे विभीषण! मम भक्तः सन् स्वराज्ये लङ्कायां वसेत्यन्वयः ननु पूर्वविरोधेन देवा मां पीडयिष्यन्ति तत्कथमत्रावस्थितिरत आह न त्वामिति ॥ ५२—५४ ॥

(१) त्वामभिषेकार्द्रं इत्यपि पाठः।

रामस्तथेति सुग्रीव। वानरैः सविभीषण:।
पुष्पकं सहनूमांश्च शीघ्रमारोह साम्प्रतम्॥ ५६॥
ततस्तु पुष्पकं दिव्यं सुग्रीवः सह सेनया।
विभीषणश्च सामात्यः सर्वे चारुरुहुर्द्रुतम्॥ ५७॥
तेष्वारूढेषु सर्वेषु कौबेरं परमासनम्।
राघवेणाभ्यनुज्ञातमुत्पपात विहायसा॥ ५८॥
बभौ तेन विमानेन हंसयुक्तेन भास्वता।
प्रहृष्टश्च तदा रामश्चतुर्मुख इवापरः॥ ५९॥
ततो बभौ भास्करबिम्बतुल्यं कुबेरयानन्तपसानुलब्धम्।
रामेण शोभां नितरां प्रपेदे सीता समेतेन सहानुजेन॥ ६०॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
त्रयोदशः सर्गः।

इषीमहे सव्यजिघ्याम इत्यर्थः रामस्तथेत्युक्त्वा हे सुग्रीव! सविभीषण सहनूमान् वानरैः सह शीघ्रमारोह॥ ५५–५८॥
चतुर्मुख इव तस्य हंसवाहनत्वात्॥ ५९। ६०॥

इति श्रीमत्सकलराजवि० श्रीरामवर्मणः कृताव-
ध्यात्मरामायणे सेतौ युद्धकाण्डे
त्रयोदशः सर्गः।

अथ पञ्चदशः सर्गः ।

पातयित्वा ततश्चक्षुः सर्वतो रघुनन्दनः ।
अब्रवीन्मैथिलीं सीतां रामः शशिनिभाननाम् ॥ १ ॥
त्रिकूटशिखराग्रस्थां पश्य लङ्कां महाप्रभाम् ।
एतां रणभुवं पश्य मांसकर्दमपङ्किलाम् ॥ २ ॥
असुराणां प्लवङ्गानामत्र वैशसनं महत् ।
अत्र मे निहतः शेते रावणो राक्षसेश्वरः ॥ ३ ॥
कुम्भकर्णेन्द्रजिन्मुख्याः सर्वे चात्र निपातिताः ।
एष सेतुर्मया बद्धः सागरे सलिलाशये ॥ ४ ॥
एतच्च दृश्यते तीर्थं सागरस्य महात्मनः ।
सेतुबन्धमिति ख्यातं त्रैलोक्येन च पूजितम् ॥ ५ ॥
एतत्पवित्रं परमं दर्शनात् पातकापहम् ।
अत्र रामेश्वरो देवो मया शम्भुः प्रतिष्ठितः ॥ ६ ॥
अत्र मां शरणं प्राप्तो मन्त्रिभिश्च विभीषणः ।
एषा सुग्रीवनगरी किष्किन्ध्या चित्रकानना ॥ ७ ॥
तत्र रामाज्ञया ताराप्रमुखा हरियोषितः ।
आनयामास सुग्रीवः सीतायाः प्रियकाम्यया ॥ ८ ॥
ताभिः सहोत्थितं शीघ्रं विमानं प्रेक्ष्य राघवः ।

पातयित्वेति ॥ १ ॥
कर्दमोऽत्यन्तार्द्रद्रव्यं पङ्क ईषदार्द्र इति भेदः ॥ २ ॥
वैशसनम् बाधनं महायुद्धमिति यावत् मे मया त्वन्निमित्त
॥ ३–७ ॥
रामाज्ञया ताराप्रमुखाः सर्वा अयोध्यायामायान्त्विति रामाज्ञा ॥८॥

प्राह चाद्रिं ऋष्यमूकं पश्य वाल्यत्र मे हतः ॥ ९ ॥
एषा पञ्चवटी नाम राक्षसा यत्र मे हताः ।
अगस्त्यस्य सुतीक्ष्णस्य पश्याश्रमपदे शुभे ॥ १० ॥
एते ते तापसाः सर्वे दृश्यन्ते वरवर्णिनि ! ।
असौ शैलवरो देवि ! चित्रकूटः प्रकाशते ॥ ११ ॥
अत्र मां कैकयीपुत्रः प्रसादयितुमागतः ।
भरद्वाजाश्रमं पश्य दृश्यते यमुनातटे ॥ १२ ॥
एषा भागीरथी गङ्गा दृश्यते लोकपावनी ।
एषा सा दृश्यते सीते ! सरयूर्यूपमालिनी (१) ॥ १३ ॥
एषा सा दृश्यतेऽयोध्या प्रणामं कुरु भामिनि ! ।
एवं क्रमेण सम्प्राप्तो भरद्वाजाश्रमं हरिः ॥ १४ ॥
पूर्णे चतुर्दशे वर्षे पञ्चम्यां रघुनन्दनः ।
भरद्वाजं मुनिं दृष्ट्वा ववन्दे सानुजः प्रभुः ॥ १५ ॥
पप्रच्छ मुनिमासीनं विनयेन रघूत्तमः ।
शृणोषि कच्चिद्भरतः कुशल्यास्ते सहानुजः ॥ १६ ॥

प्राह सीतामिति शेषः ऋष्यमूकमद्रिं पश्य अत्र मे वाली हतस्त-त्स्थानं पश्य अत्र मे राक्षसा दृष्टा राक्षसी ॥ ९ ॥

आश्रमपदे आश्रमस्थाने ॥ १० । ११ ॥

दृश्यते भरद्वाजाश्रम इति शेषः सरयूरिति आतुराहेषसत्वाद्वि-मानस्य युगपत्सर्वदर्शनम् ॥ १२ । १३ ॥

एवं वदन्निति शेषः ॥ १४ । १५ ॥

कच्चिदिति प्रश्ने ॥ १६ ॥

---

(१) यूपमालिनी इति पाठान्तरम् ।

सुभिक्षा वर्त्ततेऽयोध्या जीवन्ति च हि मातरः (१)।
श्रुत्वा रामस्य वचनं भरद्वाजः प्रहृष्टधीः ॥ १७ ॥
प्राह सर्वं कुशलिनो भरतस्तु महामनाः।
फलमूलकृताहारो जटावल्कलधारकः ॥ १८ ॥
पादुके सकलं न्यस्य राज्यं त्वां सुप्रतीक्षते।
यत्यत्कृतं त्वया कर्म दण्डके रघुनन्दन ! ॥ १९ ॥
राक्षसानां विनाशं च सीताहरणपूर्वकम्।
सर्वं ज्ञातं मया राम ! तपसा ते प्रसादतः ॥ २० ॥
त्वं ब्रह्म परमं साक्षादादिमध्यान्तवर्ज्जितः।
त्वमग्रे सलिलं सृष्ट्वा तत्र सुप्तोऽसि भूतकृत् ॥ २१ ॥
नारायणोऽसि विश्वात्मन् ! नराणामन्तरात्मकः।
त्वन्नाभिकमलोत्पन्नो ब्रह्मा लोकपितामहः ॥ २२ ॥
अतस्त्वं जगतामीशः सर्वलोकनमस्कृतः।
त्वं विष्णुर्जानकी लक्ष्मीः शेषोऽयं लक्ष्मणाभिधः ॥ २३ ॥

चहौ पादपूरणे प्रहृष्टधीः प्रहृष्टचित्तः ॥ १७ । १८॥

पादुके पादुकयोः ॥ १९ ॥

सीताहरणपूर्वकं राक्षसानां विनाशं कर्म ॥ २० ॥

यदादिमध्यान्तवर्जितं ब्रह्म तत्त्वमेव 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः इति श्रुत्पत्तिं नारायणपदस्य दर्शयति त्वमिति ॥२१ ॥

नारं जीवसमूहस्तत्स्थानकत्वात् नारायण इति व्युत्पत्त्यन्तरमाह नराणामिति ॥ २२ । २३॥

(१) मम मातर इति वा पाठः।

आत्मना सृजसीदं त्वमात्मन्येवात्ममायया।
न सज्जसे नभोवत्त्वं चिच्छक्त्या सर्वसाक्षिकः॥ २४॥
बहिरन्तश्च भूतानां त्वमेव रघुनन्दन!।
पूर्णोऽपि(१)मूढदृष्टीनां विच्छिन्न इव लक्ष्यसे॥ २५॥
जगत्त्वं जगदाधारस्त्वमेव परिपालकः।
त्वमेव सर्वभूतानां भोक्ता भोज्यं जगत्पते!॥ २६॥
दृश्यते श्रूयते यद्यत् स्मर्यते वा रघूत्तम!।
त्वमेव सर्वमखिलं त्वद्विनान्यन्न किञ्चन॥ २७॥
माया सृजति लोकांश्च स्वगुणैरहमादिभिः।
त्वच्छक्तिप्रेरिता राम! तस्मात्त्वय्युपचर्य्यते॥ २८॥
यथा चुम्बकसान्निध्याच्चलन्त्येवायसादयः।
जडा तथा(२) त्वया दृष्टा माया सृजति वै जगत्॥२९॥

त्वमात्मना इदं सृजसि आत्मनि अधिष्ठाने एवं सर्वं सृष्ट्वा तत्र त्वं न सज्जसे आसक्तो न भवसि इतरजनवत् असङ्गे दृष्टान्तः नभोवत् चिच्छक्त्या सर्वस्य साक्षिकः साक्षी कः॥ २४॥

तदेवोपपादयति बहिरिति विच्छिन्न इव॥ २५॥

इदानीं भवतो रामस्य सार्वात्म्यमाह जगदिति जगत्त्वं त्वद्विवर्त्तत्वाज्जगत् इति भावः भोक्ता भोज्यम् अप्युभयमपि त्वमेवेति भावः॥ २६। २७॥

ननु तर्हि स्रष्टृत्वादिकमपि मयि वास्तवं नेत्याह मायेति अहमादयोऽहङ्कारादयः त्वच्छक्त्या त्वदिच्छया स्रष्टृप्रेरकत्वेन त्वयि स्रष्टृत्वमुपचार इति भावः॥ २८॥

तदेवाह यथेति अयः लोहम्॥ २९॥

---

(१) पूर्णोऽपि इति वा पाठः।

(२) जाता यथा इति वा पाठः।

देहद्वयमदेहस्य तव विश्वं चिदात्मनः ।
विराट् स्थूलं शरीरं ते सूत्रं सूक्ष्ममुदाहृतम् ॥३०॥
विराजः सम्भवन्त्येते अवताराः सहस्रशः ।
कार्यान्ते प्रविशन्त्येव विराजं रघुनन्दन ! ॥ ३१ ॥
अवतारकथां लोके ये गायन्ति स्मरन्ति च ।
अनन्यमनसो मुक्तिस्तेषामेव रघूत्तम ! (१) ॥ ३२ ॥
त्वं ब्रह्मणा पुरा भूमेर्भारहाराय राघव ! ।
प्रार्थितस्तपसा तुष्टस्त्वं जातोऽसि रघोः कुले(२)॥३३॥
देवकार्यमशेषेण कृतं ते राम ! दुष्करम् ।
बहुवर्षसहस्राणि मानुषं देहमाश्रितः ॥ ३४ ॥
कुर्वन् दुष्करकर्माणि लोकद्वयहिताय च ।
पापहारीणि भुवनं यशसा पूरयिष्यसि ॥ ३५ ॥

देहद्वयं स्थूलं ब्रह्माण्डं च सूक्ष्मं हिरण्यगर्भः ॥ ३० ॥

विराज एवावतारकार्यमाह विराज इति यतः सम्भवन्ति अत एव तत्र लय इति भावः ॥ ३१ ॥

स्मरन्ति ध्यायन्तीत्यर्थः ॥ ३२ ॥

तपसा तुष्टः ब्रह्मणस्तपसा तुष्टः इत्यर्थः ॥ ३३ ॥

जनानां पापहराणि अतएव तेषां लोकद्वये इहलोके परलोके च हितावाप्त्यै दुष्कराणि कर्माणि कुर्वन् भुवनं चतुर्दशसंख्यकं यशसा पूरयिष्यसि ॥ ३५ ॥

---

(१) शृण्वन्ति श्रद्धया नित्यं मुच्यन्ते ते नरा भुवि इत्यपि पाठान्तरम् ।

(२) ब्रह्मणा प्रार्थितस्त्वं हि भूमेर्भारापनुत्तये ।
तपसा तोषितः पूर्वं जातो दशरथात्मजः इत्यपि पाठान्तरम् ।

प्रार्थयामि जगन्नाथ !(१)पवित्रं कुरु मे गृहम्।
स्थित्वाद्य भुक्त्वा सबलः श्वो गमिष्यसि पत्तनम् ॥३६॥
तथेति राघवोऽतिष्ठत्तस्मिन्नाश्रम उत्तमे।
ससैन्यः पूजितस्तेन सीतया लक्ष्मणेन च ॥३७॥
ततो रामश्चिन्तयित्वा मुहूर्त्तं प्राह मारुतिम्।
इतो गच्छ हनूमंस्त्वमयोध्यां प्रति सत्वरः(२) ॥३८॥
जानीहि कुशली कच्चिज्जनो नृपतिमन्दिरे।
शृङ्गिवेरपुरं गत्वा ब्रूहि मित्रं गुहं मम ॥३९॥
जानकीलक्ष्मणोपेतमागतं मां निवेदय।
नन्दिग्रामं ततो गत्वा भ्रातरं भरतं मम ॥४०॥
दृष्ट्वा ब्रूहि सभार्य्यस्य सभ्रातुः कुशलं मम।
सीतापहरणादीनि रावणस्य वधादिकम् ॥४१॥
ब्रूहि क्रमेण मे भ्रातुः सर्वं तत्र विचेष्टितम्।
हत्वा शत्रुगणान् सर्वान् सभार्य्यः सह लक्ष्मणः॥४२॥
उपयाति समृद्धार्थः सह ऋक्षहरीश्वरैः।
इत्युक्त्वा तत्र वृत्तान्तं भरतस्य विचेष्टितम् ॥४३॥
सर्वं ज्ञात्वा पुनः शीघ्रमागच्छ मम सन्निधिम्।

पत्तनमयोध्यानगरम् ॥ ३६ ॥
तथेत्युक्त्वा तत्राश्रमे अतिष्ठत्सीतयेत्यादेः सहित इति शेषः॥३७।३८
नृपतिमन्दिरे अयोध्यायाम् ॥ ३९—४१ ॥
तत्र रणे ॥ ४२—४४ ॥

---

(१) प्रार्थयाम रघुश्रेष्ठ ! इति वा पाठः।
(२) मारुते ! गच्छ शीघ्रं त्वमयोध्यां भरतं प्रति इति विभिन्नः पाठः।

तथेति हनुमांस्तत्र मानुषं वपुरास्थितः ॥ ४४ ॥
नन्दिग्रामं ययौ तूर्णं वायुवेगेन मारुतिः ।
गरुत्मानिव वेगेन जिघृक्षन् भुजगोत्तमम् ॥ ४५ ॥
शृङ्गिवेरपुरं प्राप्य गुहमासाद्य मारुतिः ।
उवाच मधुरं वाक्यं प्रहृष्टेनान्तरात्मना ॥ ४६ ॥
रामो दाशरथिः श्रीमान् सखा ते सह सीतया ।
सलक्ष्मणस्त्वां धर्म्मात्मा क्षेमी कुशलमब्रवीत् ॥ ४७ ॥
अनुज्ञातोऽद्य मुनिना भरद्वाजेन राघवः ।
आगमिष्यति तं देवं द्रक्ष्यसि त्वं रघूत्तमम् ॥ ४८ ॥
एवमुक्त्वा महातेजाः संप्रहृष्टतनूरुहम् ।
उत्पपात महावेगो वायुवेगेन मारुतिः ॥ ४८ ॥
सोऽपश्यद्रामतीर्थं च सरयूं च महानदीम् ।
तामतिक्रम्य हनुमान्नन्दिग्रामं ययौ मुदा ॥ ५० ॥
क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनाम्बरम् ।
ददर्श भरतं दीनं कृशमाश्रमवासिनम् ॥ ५१ ॥
मलपङ्कविदिग्धाङ्गं जटिलं वल्कलाम्बरम् ।
फलमूलकृताहारं रामचिन्तापरायणम् ॥ ५२ ॥
पादुके ते पुरस्कृत्य शासयन्तं वसुन्धराम् ।
मन्त्रिभिः पौरमुख्यैश्च काषायाम्बरधारिभिः ॥ ५३ ॥

भुजगोत्तमं जिघृक्षन् गरुड इव वेगेन ययौ ॥ ४५—४८ ॥
संप्रहृष्टतनूरुहं गुहमिति शेषः ॥ ४९—५१ ॥
विदिग्धाङ्गं लिप्ताङ्गम् ॥ ५२ ॥
ते चित्रकूटे भगवता रामेण दत्ते काषायाम्बरधारिभिः प्रभुप्र-
स्थानशीलतयास्य रामोचितत्वेन मन्त्र्यादीनां तत्त्वम् ॥ ५३ ॥

हृतदेहं (१) मूर्त्तिमन्तं साक्षाद्धर्ममिव स्थितम्।
उवाच प्राञ्जलिर्वाक्यं हनूमान् मारुतात्मजः॥ ५४॥
यं त्वं चिन्तयसे रामं तापसं दण्डके स्थितम्।
अनुशोचसि काकुत्स्थः स त्वां कुशलमब्रवीत्॥ ५५॥
प्रियमाख्यामि ते देव! शोकं त्यज सुदारुणम्।
अस्मिन्मुहूर्त्ते भ्रात्रा त्वं रामेण सह सङ्गतः॥ ५६॥
समरे रावणं हत्वा रामः सीतामवाप्य च।
उपयाति समृद्धार्थः ससीतः सहलक्ष्मणः॥ ५७॥
एवमुक्तो महातेजा भरतो हर्षमूर्च्छितः।
पपात भुवि चास्वस्थः कैकेयीप्रियनन्दनः॥ ५८॥
आलिङ्ग्य भरतः शीघ्रं मारुतिं प्रियवादिनम्।
आनन्दजैरश्रुजलैः सिषेच भरतः कपिम्॥ ५९॥
देवो वा मानुषो वा त्वमनुक्रोशादिहागतः।
प्रियाख्यानस्य ते सौम्य! ददामि ब्रुवतः प्रियम्॥ ६०॥
गवां शतसहस्रञ्च ग्रामाणां च शतं वरम्।
सर्वाभरणसम्पन्ना मुग्धाः कन्यास्तु षोडश॥ ६१॥

तादृशैर्मन्त्रिभिः हृतः परिहृतो देहो यस्य तम्॥ ५४॥
यं रामं त्वं चिन्तयसेऽनुशोचसि च स काकुत्स्थस्त्वां कुशलमब्रवीत्॥ ५५॥
रामेण सह सङ्गतो भविष्यसीति शेषः॥ ५६—५८॥
सौम्य! सोमवत् प्रियदर्शन! प्रियं ब्रुवतस्ते प्रियाख्यानस्य प्रति प्रियं ददामीति शेषः॥ ६०॥
मुग्धाः सुन्दर्यः॥ ६१॥ ६२॥

(१) हृतं देहमिति पाठान्तरम्।

एवमुक्त्वा पुनः प्राह भरतो मारुतात्मजम्।
बहूनीमानि वर्षाणि गतस्य सुमहद्वनम्॥ ६२॥
शृणोम्यहं प्रीतिकरं मम नाथस्य कीर्त्तनम्।
कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे॥ ६३॥
एति जीवन्तमानन्दो नरं वर्षशतादपि।
राघवस्य हरीणाञ्च कथमासीत् समागमः॥ ६४॥
तत्त्वमाख्याहि भद्रं ते विश्वसेयं वचस्तव।
एवमुक्तोऽथ हनुमान् भरतेन महात्मना॥ ६५॥
आचचक्षेऽथ रामस्य चरितं कृत्स्नशः क्रमात्।
श्रुत्वा तु परमानन्दं भरतो मारुतात्मजात्॥ ६६॥
आज्ञापयच्छत्रुहणं मुदायुक्तं मुदान्वितः।
दैवतानि च यावन्ति नगरे रघुनन्दन!॥ ६७॥
नानोपहारबलिभिः पूजयन्तु महाधियः।
सूता वैतालिकाश्चैव बन्दिनस्तुतिपाठकाः॥ ६८॥
वारमुख्याश्च (१) शतशो निर्य्यान्त्वद्यैव सङ्घशः।
राजदारास्तथामात्याः सेनाहस्त्यश्वपत्तयः॥ ६९॥

कल्याणी सत्येत्यर्थः॥ ६२॥ ६४॥
तत्त्वमाख्याहि येन ते वचो विश्वसेयम्॥ ६५॥
परमानन्दं प्रापेति शेषः॥ ६६॥
शत्रुहणं शत्रुघ्नं रामकुशलश्रवणेन मुदायुक्तं तेनैव च स्वयं मुदान्वितः किमाज्ञापयत्तदाह दैवतानि चेति॥ ६७॥
उपहाराः गन्धधूपनैवेद्याद्याः॥ ६८॥
वारमुख्या वेश्याः हस्त्यश्वपत्तिरूपाः सेना इत्यर्थः॥ ६९॥

(१) राममुख्याश्च इति केचित् पठन्ति।

ब्राह्मणाश्च तथा पौरा राजानो ये समागताः।
निर्यान्तु राघवस्याद्य द्रष्टुं शशिनिभाननम्॥ ७० ॥
भरतस्य वचः श्रुत्वा शत्रुघ्नपरिचोदिताः।
अलञ्चक्रुश्च नगरीं मुक्तारत्नमयोज्ज्वलैः॥ ७१ ॥
तोरणैश्च पताकाभिर्विचित्राभिरनेकधा।
अलङ्कुर्वन्ति वेश्मानि नानावलिविचक्षणाः॥ ७२ ॥
निर्य्यान्ति वृन्दशः सर्वे रामदर्शनलालसाः।
हयानां शतसाहस्रं गजानामयुतं तथा॥ ७३ ॥
रथानां दशसाहस्रं स्वर्णसूत्रविभूषितम्।
पारमेष्ठ्यान्युपादाय द्रव्याण्युच्चावचानि च॥ ७४ ॥
ततस्तु शिविकारूढा निर्ययू राजयोषितः।
भरतः पादुके न्यस्य शिरस्येव कृताञ्जलिः॥ ७५ ॥
शत्रुघ्नसहितो रामं पादचारेण निर्ययौ।
तदैव दृश्यते दूराद्विमानञ्चन्द्रसन्निभम्॥ ७६ ॥
पुष्पकं सूर्य्यसङ्काशं मनसा ब्रह्मनिर्मितम्।
एतस्मिन् भ्रातरौ वीरौ वैदेह्या रामलक्ष्मणौ॥ ७७ ॥

शशिनिभाननं शशिसदृशमुखमित्यर्थः॥ ७० ॥
मुक्तारत्नमयोज्ज्वलैरिति तोरणविशेषणम्॥ ७१ ॥
अलं कुर्वन्ति शत्रुघ्नप्रेरिता जना इति शेषः॥ ७२ ॥
वृन्दशः सङ्घशः॥ ७३ ॥
पारमेष्ठीनि ऐश्वराङ्गानि॥ ७४ ॥ ७५ ॥
राममवलोकयितुमिति शेषः तदैव तस्मिन्नेव काले भरतयात्राकाले इत्याह पवनात्मज इत्यनेनान्वयः यदुक्तं वाचा तदाह दृश्यते इत्यादि॥ ७६ — ७८ ॥

सुग्रीवश्च कपिश्रेष्ठो मन्त्रिभिश्च विभीषणः ।
दृश्यते पश्यत जना इत्याह पवनात्मजः ॥ ७८ ॥
ततो हर्षसमुद्भूतो निःस्वनो दिवमस्पृशत् ।
स्त्रीबालयुववृद्धानां रामोऽयमिति कीर्त्तनात् ॥ ७९ ॥
रथकुञ्जरवाजिस्था अवतीर्य्य महीं गताः ।
ददृशुस्ते विमानस्थं जनाः सोममिवाम्बरे ॥ ८० ॥
प्राञ्जलिर्भरतो भूत्वा प्रहृष्टो राघवोन्मुखः ।
ततो विमानाग्रगतं भरतो राघवं मुदा ॥ ८१ ॥
ववन्दे प्रणतो रामं मेरुस्थमिव भास्करम् ।
ततो रामाभ्यनुज्ञातं विमानमपतद्भुवि ॥ ८२ ॥
आरोपितो विमानं तद्भरतः सानुजस्तदा ।
राममासाद्य मुदितः पुनरेवाभ्यवादयत् ॥ ८३ ॥
समुत्थाप्य चिरात् दृष्टं भरतं रघुनन्दनः ।
भ्रातरं स्वाङ्कमारोप्य मुदा तं परिषस्वजे ॥ ८४ ॥
ततो लक्ष्मणमासाद्य वैदेहीं नाम कीर्त्तयन् ।

अयं रामोऽयं राम इति निस्वनो दिवमस्पृशत् ॥ ७९ ॥

अम्बरे सोममिव रामं ददृशुः ॥ ८० ॥

अत्यानन्दवतो भरतस्य वर्णने कवेरपि तन्मयभावेनानन्दमग्नतया भरतपदपौनरुक्त्यं न दोषाय ॥ ८१ ॥

अत्यूर्द्ध्वस्थविमानस्य गत्वा रामस्य मेरुस्थभास्करोपमा ॥ ८२ ॥
॥ ८३ ॥ ८४ ॥

ततो लक्ष्मणमासाद्याभ्यवादयतेत्यन्वयः अनयोः शास्त्रोक्तविधिना नामगोत्रोच्चारणपूर्वकमभिवादनं वैदेह्यास्तु स्त्रीत्वात्स्वनाममात्रकीर्त्तनपूर्व्वकमभिवादनमित्याह नाम कीर्त्तयन्निति भरतोऽहमभिवादये मैथिलीति रामस्य तु भरतशर्म्मा अमुकगोत्रोऽहं त्वामभिवादये इत्येवमिति शेषः यद्यपि

अभ्यवादयत प्रीतो भरतः प्रेमविह्वलः ॥ ८५ ॥
सुग्रीवं जाम्बवन्तं च युवराजं तथाङ्गदम्।
मैन्दद्विविदनीलांश्च ऋषभञ्चैव सस्वजे ॥ ८६ ॥
सुषेणं च नलं चैव गवाक्षं गन्धमादनम्।
शरभं पनसं चैव भरतः परिषस्वजे ॥ ८७ ॥
सर्वे ते मानुषं रूपं कृत्वा भरतमादृताः।
पप्रच्छुः कुशलं सौम्याः प्रहृष्टाश्च प्लवङ्गमाः ॥ ८८ ॥
ततः सुग्रीवमालिङ्ग्य भरतः प्राह भक्तितः।
त्वत्सहायेन रामस्य जयोऽभूद्रावणो हतः ॥ ८९ ॥
त्वमस्माकं चतुर्णां तु भ्राता सुग्रीव! पञ्चमः।
शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणम् ॥ ९० ॥
सीतायाश्चरणौ पश्चाद्ववन्दे विनयान्वितः।
रामो मातरमासाद्य विवर्णां शोकविह्वलाम् ॥ ९१ ॥
जग्राह प्रणतः पादौ मनो मातुः प्रसादयन्।
कैकेयीं च सुमित्राञ्च ननामेतरमातरः ॥ ९२ ॥
भरतः पादुके ते तु राघवस्य सुपूजिते।
योजयामास रामस्य पादयोर्भक्तिसंयुतः ॥ ९३ ॥

लक्ष्मणो भरतात्कनिष्ठो वयसा स्पष्टं चेदं जन्मप्रकरणे तथापि ज्येष्ठानुव-र्तनेन स्वापेक्षयाधिकगुणत्वेन सव्यवहारेण ज्येष्ठानुवृत्तिरेवं कर्तव्येति भरतं प्रत्युपदेशदानेन च गुरुत्वबुद्ध्या तस्य नतिरुचितैव किं च कौशल्यायै प्रथमं दत्तपायसांशत्वात् लक्ष्मणस्य ज्येष्ठत्वं ततो हि कैकेय्यै पायसा-र्द्धदानं तदंशजश्च शत्रुघ्न इति स एव भरतात्कनिष्ठः अतएव वैदेहीं चेति चकारः स्वरसः सङ्गच्छते अतएव च शत्रुघ्नस्ततो लक्ष्मणनमस्कार उपप-द्यते तयोर्युगपदुत्पन्नत्वादित्याहुः ॥ ८५ ॥

सस्वजे मिलितवान् ॥ ८६—९१ ॥

राज्यमेतन्न्यासभूतं मया निर्यातितं तव।
अद्य मे सफलं जन्म फलितो मे मनोरथः ॥ ९४ ॥
यत्पश्यामि समायातमयोध्यां त्वामहं प्रभो!।
कोष्ठागारं बलं कोशं कृतं दशगुणं मया ॥ ९५ ॥
त्वत्तेजसा जगन्नाथ! पालयस्व पुरं स्वकम्।
इति ब्रुवाणं भरतं दृष्ट्वा सर्वे कपीश्वराः ॥ ९६ ॥
मुमुचुर्नेत्रजं तोयं प्रशशंसुर्मुदान्विताः।
ततो रामः प्रहृष्टात्मा भरतं स्वाङ्कगं मुदा ॥ ९७ ॥
ययौ तेन विमानेन भरतस्याश्रमं तदा।
अवरुह्य तदा रामो विमानाग्र्यान्महीतलम् ॥ ९८ ॥
अब्रवीत्पुष्पकं देवो गच्छ वैश्रवणं वह।
अनुगच्छानुजानामि कुबेरं धनपालकम् ॥ ९९ ॥

रामो वशिष्ठस्य गुरोः पदाम्बुजं
नत्वा यथा देवगुरोः शतक्रतुः।
दत्त्वा महार्हासनमुत्तमं गुरो-
रुपाविवेशाथ गुरोः समीपतः ॥ १०० ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
चतुर्दशः सर्गः।

प्रसादयन् ॥ ९२ ॥ ९३ ॥ निर्यातितं प्रतिदत्तम् ॥ ९४ ॥
कोष्ठागारम् अन्नादिस्थापनगृहं कोशं धनगृहम् ॥ ९५ ॥
त्वत्तेजसेति पूर्वान्वयि नेत्रजं तोयं मुमुचुः एवं सौभ्रात्रं किलानयोरिति हर्षात् स्वस्य तद्वैपरीत्येन शोकाच्च ॥ ९६ ॥
स्वाङ्कगं कृत्वेति शेषः ॥ ९७ ॥ ९८ ॥
धनपालकं कुबेरमनुगच्छेत्येतदहमनुजानामीत्यर्थः ॥ ९९ ॥ १०० ॥

इति चतुर्दशः सर्गः।

अथ पञ्चदशः सर्गः ।

ततस्तु कैकयीपुत्रो भरतो भक्तिसंयुतः ।
शिरस्यञ्जलिमाधाय ज्येष्ठं भ्रातरमब्रवीत् ॥ १ ॥
माता मे सत्कृता राम ! दत्तं राज्यं त्वया मम ।
ददामि तत्ते च पुनर्यथा त्वमददा मम ॥ २ ॥
इत्युक्त्वा पादयोर्भक्त्या साष्टाङ्गं प्रणिपत्य च ।
बहुधा प्रार्थयामास कैकेय्या गुरुणा सह ॥ ३ ॥
तथेति प्रतिजग्राह भरताद्राज्यमीश्वरः ।
मायामाश्रित्य सकलां नरचेष्टामुपागतः ॥ ४ ॥
स्वाराज्यानुभवो यस्य सुखज्ञानैकरूपिणः ।
निरस्तातिशयानन्दरूपिणः परमात्मनः ॥ ५ ॥
मानुषेण तु राज्येन किं तस्य जगदीशितुः ? ।

ततस्त्विति ॥ १ ॥

सत्कृता मत्पुत्राय राज्यदानपूर्वकं वनवासं कुर्विति तद्वाक्यपालनेन सत्कृता ॥ २ ॥

इत्युक्त्वा रामपादयोर्भक्त्या प्रणम्य मातृत्वाद्गुरुणा कैकेय्या सह प्रार्थयामास मद्वाक्यपालनेनाहं सन्तुष्टा अतः परं स्वेच्छया पुनस्तद्ददामि तत्सर्वथा स्वीकार्येति प्रार्थयामास ॥ ३ ॥

मायामाश्रित्येति अन्यथा सच्चिदानन्दरूपस्य भगवतो दानप्रतिग्रहयोरनुपपत्तेरिति भावः सकलं राज्यं प्रतिजग्राहेत्यन्वयः ॥ ४ ॥

मायाश्रयणे हेतुमाह स्वाराज्येति स्वाराज्यमात्मनः सुखरूपतानिरस्तातिशय इतराभिभावकतारूपो यस्मात्तादृशानन्दरूपस्य आनन्दवल्ल्यां मनुष्यानन्दादुत्तरोत्तरगतगुणानन्दक्रमेणानन्दकथनस्य ब्रह्मानन्दे समाप्तेस्तदभिभावकत्वरूपातिशयस्य क्वाप्यभावादिति भावः ॥ ५ ॥

यस्य भ्रूभङ्गमात्रेण त्रिलोकी नश्यति क्षणात् ॥ ६ ॥
यस्यानुग्रहमात्रेण भवन्त्याखण्डलश्रियः।
लीलासृष्टमहासृष्टेः कियदेतद्रमापतेः ॥ ७ ॥
तथापि भजतां नित्यं कामपूरविधित्सया।
लीलामानुषदेहेन सर्वमप्यनुवर्त्तते ॥ ८ ॥
ततः शत्रुघ्नवचनान्निपुणः श्मश्रुकृन्तकः।
सम्भाराश्चाभिषेकार्थं आनीता राघवस्य हि ॥ ९ ॥
पूर्वं तु भरते स्नाते लक्ष्मणे च महात्मनि।
सुग्रीवे वानरेन्द्रे च राक्षसेन्द्रे विभीषणे ॥ १० ॥
विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः।
महार्हवसनोपेतस्तस्थौ तत्र श्रिया ज्वलन् ॥ ११ ॥
प्रतिकर्म च रामस्य लक्ष्मणस्य महामतिः।
कारयामास भरतः सीताया राजयोषितः ॥ १२ ॥

जगदीशितृत्वमेव दर्शयति यस्येति ॥ ६ ॥

लीलया सृष्टा महासृष्टिरनेककोटिब्रह्माण्डात्मिका येन तस्य एतत् अयोध्याराज्यम् ॥ ७ ॥

भजतां भक्तानां कामपूरस्य अभिलाषसमूहस्य विधित्सया पूरणेच्छया लीलया स्वहीनमानुषदेहेन सर्वमपि मानुषव्यवहारं अनुवर्तते लोकशिक्षणाय करोति ॥ ८ ॥

श्मश्रुकृन्तको नापितः सम्भाराः समुद्रजलादिरूपाः ॥ ९ ॥

स्नाते केशसंस्कारोद्वर्तनादिपूर्वकं कृतस्नाने ॥ १० ॥

विशोधितजटः केशरूपतां प्रापित जटः महार्हवसनोपेतः इतस्ततः बहुमूल्यवस्त्रः ॥ ११ ॥

प्रतिकर्म उद्वर्तनादिसंस्कारः राजयोषितः दशरथस्त्रियः ॥ १२ ॥

महार्हवस्त्राभरणैरलञ्चक्रुः सुमध्यमाम् ।
ततो वानरपत्नीनां सर्वासामेव शोभना ॥१३॥
अकारयत कौशल्या प्रहृष्टा पुत्रवत्सला ।
ततः स्यन्दनमादाय शत्रुघ्नवचनात् सुधीः ॥ १४ ॥
सुमन्त्रः सूर्य्यसङ्काशं योजयित्वाग्रतः स्थितः ।
आरुरोह रथं रामः सत्यधर्मपरायणः ॥ १५ ॥
सुग्रीवो युवराजश्च हनूमांश्च बिभीषणः ।
स्नात्वा दिव्याम्बरधरा दिव्याभरणभूषिताः ॥१६॥
राममन्वीयुरग्रे च रथाश्वगजवाहनाः ।
सुग्रीवपत्न्यः सीता च ययुर्यानैः पुरं महत् ॥ १७ ॥
वज्रपाणिर्यथा देवैर्हरिताश्वरथे स्थितः ।
प्रययौ रथमास्थाय तथा रामो महत्पुरम् ॥१८॥
सारथ्यं भरतश्चक्रे रत्नदण्डं महाद्युतिः ।
श्वेतातपत्रं शत्रुघ्नो लक्ष्मणो व्यजनं दधे(१) ॥ १९॥
चामरं च समीपस्थो न्यवीजयदरिन्दमः ।
शशिप्रकाशं(२) त्वपरं जग्राहासुरनायकः ॥२०॥

सुमध्यमां जानकीम् ॥ १३ ॥
अकारयत प्रतिकर्मेति शेषः ॥ १४ ॥
सूर्य्यसङ्काशं स्यन्दनमित्यन्वयः ॥ १५ ॥ १६ ॥
अन्वीयुः अनुजग्मुः पुरमयोध्यापुरम् ॥ ॥ १७ ॥ १८ ॥
रत्नदण्डमिति श्वेतातपत्रव्यजनचामराणां विशेषणम् ॥ १९ ॥
अरिन्दमः सुग्रीवः असुरनायको बिभीषणः ॥ २० ॥

---

(१) व्यजनं महत् इति केचित् पठन्ति ।
(२) चन्द्रप्रकाशं इति वा पाठः ।

द्विजैः सिद्धसङ्घैश्च ऋषिभिर्दिव्यदर्शनैः।
स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः॥ २१॥
मानुषं रूपमास्थाय वानरा गजवाहनाः।
भेरीशङ्खनिनादैश्च मृदङ्गपणवानकैः॥ २२॥
प्रययौ राघवश्रेष्ठस्तां पुरीं समलङ्कृताम्।
दृदृशुस्ते समायान्तं राघवं पुरवासिनः॥ २३॥

दूर्वादलश्यामतनुं महार्ह-
किरीटरत्नाभरणाचिताङ्गम्।
आरक्तकञ्जायतलोचनान्तं
दृष्ट्वा ययुर्मोदमतीव पुण्याः॥ २४॥
विचित्ररत्नाञ्चितसूत्रनद्ध-
पीताम्बरं पीनभुजान्तरालम्।
अनर्घ्यमुक्ताफलदिव्यहारै-
र्विरोचमानं रघुनन्दनं प्रजाः॥ २५॥
सुग्रीवमुख्यैर्हरिभिः प्रशान्तै-
र्निषेव्यमाणं रवितुल्यभासम्

स्तूयमानस्य रामस्य स्तुतिवाक्यानामिति शेषः॥ २१॥

वानरा इत्यस्य प्रययुरिति शेषः॥ २२॥

ते पुरवासिनः ये वनगमनकाले दुःखिता बभूवुस्ते इत्यर्थः॥ २३॥

आचिताङ्गं व्याप्ताङ्गं कञ्जं कमलं पुण्याः पुण्यवन्तः अयोध्याजनाः आययुः प्रापुः॥ २४॥

विचित्ररत्नैरचितं युक्तं यत्सूत्रं स्वर्णमयं कटिसूत्रं तेन बद्धः पीताम्बरो यस्य तं अमूल्यमुक्ताफलकृतैः दिव्यहारैः॥ २५॥

हरिभिर्वानरैः रवितुल्यभासं तत्तुल्यकान्तिं निश्रीताकण्ठकवचमध्य-

कस्तूरिकाचन्दनलिप्तगात्रं
निवीतकल्पद्रुमपुष्पमालम् ॥ २६ ॥
श्रुत्वा स्त्रियो राममुपागतं मुदा
प्रहर्षवेगोत्कलिताननश्रियः।
अपास्य सर्वं गृहकार्य्यमाहितं
हर्म्याणि चैवारुरुहुः स्वलङ्कृताः ॥ २७ ॥
दृष्ट्वा हरिं सर्वदृगुत्सवाकृतिं
पुष्पैः किरन्त्यः स्मितशोभिताननाः।
दृग्भिः पुनर्नवमनोरसायनं
स्वानन्दमूर्त्तिं मनसाभिरेभिरे ॥ २८ ॥
रामः स्मितस्निग्धदृशा प्रजास्तथा
पश्यन् प्रजानाथ इवापरः प्रभुः।
शनैर्जगामाथ पितुः स्वलङ्कृतं
गृहं महेन्द्रालयसन्निभं हरिः ॥ २९ ॥
प्रविश्य वेश्मान्तरसंस्थितो मुदा
रामो ववन्दे चरणौ स्वमातुः।

धृता कल्पद्रुमपुष्पमाला येन तम् ॥ २६ ॥

प्रहर्षवेगेनोत्कलितानि अतिप्रहृष्टानि आननानि यासां ताः आ-
हितमत्यावश्यकमपि गृहकार्य्यमपास्येत्यर्थः ॥ २७ ॥

सर्वदृशामुत्सवभूता आकृतिर्यस्य तं नेत्रमनसोः रसायनभूतमत्यानन्दक-
रत्वात्ताद्दृशं रामं दृग्भिर्दर्शनव्यापारैर्मनसा चाभिरेभिरे आलिङ्गितवत्यः।२८।

स्मितयुतया अतएव स्निग्धया दृशा प्रजाः पश्यन् दर्शनेन सर्वस-
न्माननं कुर्वन् प्रजानाथ इव ब्रह्मेव ॥ २९ ॥

स्वमातुश्चरणौ ववन्दे अनेनाग्रे सर्वमातृप्रवेशानन्तरं सर्वप्रजासम्मानर्थं

क्रमेण सर्वाः पितृयोषितः प्रभु-
र्ननाम भक्त्या रघुवंशकेतुः ॥ २० ॥
ततो भरतमाहेदं रामः सत्यपराक्रमः।
सर्वसम्पत्समायुक्तं मम मन्दिरमुत्तमम् ॥ २१ ॥
मित्राय वानरेन्द्राय सुग्रीवाय प्रदीयताम्।
सर्वेभ्यः सुखवासार्थं मन्दिराणि प्रकल्पय ॥ २२ ॥
रामेणैवं समादिष्टो भरतश्च तथाऽकरोत्।
उवाच च महातेजाः सुग्रीवं राघवानुजः ॥ २३ ॥
राघवस्याभिषेकार्थं चतुःसिन्धुजलं शुभम्।
आनेतुं प्रेषयस्वाशु दूतांस्त्वरितविक्रमान् ॥ २४ ॥
प्रेषयामास सुग्रीवो जाम्बवन्तं मरुत्सुतम्।
अङ्गदं च सुषेणं च ते गत्वा वायुवेगतः ॥ २५ ॥
जलपूर्णाञ्छातकुम्भकलशांश्च समानयन् ॥
आनीतं तीर्थसलिलं शत्रुघ्नो मन्त्रिभिः सह ॥ २६ ॥
राघवस्याभिषेकार्थं वशिष्ठाय न्यवेदयत्।
ततस्तु प्रयतो वृद्धो वशिष्ठो ब्राह्मणैः सह ॥ २७ ॥
रामं रत्नमये पीठे ससीतं संन्यवेशयत्।
वशिष्ठो वामदेवश्च जाबालिर्गौतमस्तथा ॥ २८ ॥
वाल्मीकिश्च तथा चक्रुः सर्वे रामाभिषेचनम्।
कुशाग्रतुलसीयुक्तपुण्यगन्धजलैर्मुदा ॥ २९ ॥

विलम्बेन पश्चाद्गणपप्रवेश इति सूचितम् ॥ २० ॥ २१ ॥
सर्वेभ्यः अन्येभ्यो वानरविभीषणादिभ्यः ॥ २२–२५ ॥
शातकुम्भं जाम्बूनदम् ॥ २६–४० ॥

अभ्यषिञ्चन् रघुश्रेष्ठं वासवं वसवो यथा ।
ऋत्विग्भिर्ब्राह्मणैः श्रेष्ठैः कन्याभिः सह मन्त्रिभिः॥४०॥
सर्वौषधीरसैश्चैव दैवतैर्नभसि स्थितैः ।
चतुर्भिर्लोकपालैश्च सुवह्निः सगणैस्तथा ॥ ४१ ॥
छत्रं च तस्य जग्राह शत्रुघ्नः पाण्डुरं शुभम् ।
सुग्रीवराक्षसेन्द्रौ तौ दधतुः श्वेतचामरे ॥ ४२ ॥
मालां च काञ्चनीं वायुर्ददौ वासवचोदितः ।
सर्वरत्नसमायुक्तं मणिकाञ्चनभूषितम्(१) ॥ ४३ ॥
ददौ हारं नरेन्द्राय स्वयं शक्रस्तु भक्तितः ।
प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोगणाः ॥४४॥
देवदुन्दुभयो नेदुः पुष्पवृष्टिः पपात खात् ।
नवदूर्वादलश्यामं पद्मपत्रायतेक्षणम् ॥ ४५ ॥
रविकोटिप्रभायुक्तकिरीटेन विराजितम् ।
कोटिकन्दर्पलावण्यं पीताम्बरसमावृतम् ॥ ४६ ॥
दिव्याभरणसम्पन्नं दिव्यचन्दनलेपनम् ।
अयुतादित्यसङ्काशं द्विभुजं रघुनन्दनम् ॥ ४७ ॥
वामभागे समासीनां सीतां काञ्चनसन्निभाम् ।
सर्वाभरणसम्पन्नां वामाङ्के समुपस्थिताम् ॥ ४८ ॥

सर्वौषधीरसैरभ्यषिञ्चन् इत्यन्वयः नभः स्थितैर्दैवतैः सह सुवह्निः सगणैश्चतुर्भिर्लोकपालैश्च सह वशिष्ठादयोऽभ्यषिञ्चन्नित्यन्वयः ॥ ४१—४४॥
खात् आकाशात् ॥ ४५—४७ ॥
वामाङ्के वामभागे स्थिताम् ॥ ४८ ॥

---

(१) दिव्याभरणभूषितं इत्यपि पाठनीयम् ।

रक्तोत्पलकराम्भोजां वामेनालिङ्ग्य संस्थितम्।
सर्वातिशयशोभाढ्यं दृष्ट्वा भक्तिसमन्वितः ॥ ४९ ॥
उमया सहितो देवः शङ्करो रघुनन्दनम्।
सर्वदेवगणैर्युक्तः स्तोतुं समुपचक्रमे ॥ ५० ॥

श्रीमहादेव उवाच।

नमोऽस्तु रामाय सशक्तिकाय
नीलोत्पलश्यामलकोमलाय।
किरीटहाराङ्गदभूषणाय
सिंहासनस्थाय महाप्रभाय ॥ ५१ ॥
त्वमादिमध्यान्तविहीन एकः
सृजस्यवस्यत्सि च लोकजातम्।
स्वमायया तेन न लिप्यसे त्वं
यत् स्वे सुखेऽजस्ररतोऽनवद्यः ॥ ५२ ॥
लीलां विधत्से गुणसंवृतस्त्वं
प्रपन्नभक्तानुविधानहेतो ! ।

ईदृशीं सीतां वामेन करेणालिङ्ग्य संस्थितं दृष्ट्वा शिवः स्तोतुमुपचक्रमे इत्यन्वयः ॥ ४९ । ५० ॥

सशक्तिकाय मायाशक्त्यवतारसीतासहिताय ॥ ५१ ॥

आद्यन्तौ उत्पत्तिनाशौ तद्राहित्यादेव मध्यहीनः यतो मायया सृजसि अतएव तेन न लिप्यसे तत्कार्यादिकृतदोषभाग् न भवसीत्यर्थः यथैन्द्रजालिकः स्वमायानिर्मितजीवादिनाशेऽपि तद्दोषभाग् भवति ॥५२॥

गुणसंवृतः गुणसमूहया मायया संवृतः गुणशब्दोऽत्र तत्समूह-मायापरः प्रपन्नाः शरणागता ये भक्तास्तेषां यदनुविधानं मोक्षस्तन्नि-मित्तमित्यर्थः त्वदवतारलीलाश्रवणादिभिस्तेषां पापक्षयद्वारा मोक्षो

नानावतारैः सुरमानुषाद्यैः
प्रतीयसे ज्ञानिभिरेव नित्यम्॥ ५३॥
स्वांशेन लोकं सकलं विधाय तं
बिभर्षि च त्वं तदधः फणीश्वरः।
उपर्य्यधो भान्वनिलोडुपौषधी-
प्रवर्षरूपोऽवसि नैकधा जगत्॥ ५४॥
त्वमिह देहभृतां शिखिरूपः
पचसि भक्तमशेषमजस्रम्।
पवनपञ्चकरूपसहायो
जगदखण्डमनेन बिभर्षि॥ ५५॥
चन्द्रसूर्य्यशिखिमध्यगतं य-
त्तेज ईश! चिदशेषतनूनाम्।
प्राभवत्तनुभृतामिह धैर्य्यं
शौर्य्यमायुरखिलं तव सत्त्वम्॥ ५६॥

भवतीत्याशयः सुरमानुषादिरूपैर्नानावतारैर्लीलां विधत्से इत्यन्वयः सुरावतारा उपेन्द्राद्याः मानुषा रामकृष्णाद्याः एवम्भूतस्त्वं ज्ञानिभिरेव नित्यं प्रतीयसे न त्वन्यैस्ते तु मनुष्योऽयं कश्चिदित्येवं प्रतियन्ति॥ ५३॥

सकलं लोकं स्वांशेन विधाय तं लोकं तदधः फणीश्वरो भूत्वा त्वं बिभर्षि भानुः सूर्य्यः अनिलो वायुः उडुपश्चन्द्रः औषध्यो व्रीह्याद्याः प्रवर्षो मेघः नैकधा अनेकप्रकारेण॥ ५४॥

प्रकारान्तरेणापि रक्षकत्वमाह त्वमिति शिखिरूपो जाठराग्निरूपः पवनपञ्चकम् प्राणापानसमानोदानव्यानाः तदुक्तं गीतायां 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्' इति॥ ५५॥

हे ईश चन्द्रादिगतं यत्तेजो यच्चाशेषशरीरिणां चित्चैतन्यं यच्च

त्वं विरिञ्चिशिव(१)विष्णुविभेदा-
त्कालकर्मशशिसूर्य्यविभागात् ।
वादिनां पृथगिवेश ! विभासि
ब्रह्मनिश्चितमनन्यदिहैकम् ॥ ५७ ॥
मत्स्यादिरूपेण यथा त्वमेकः
श्रुतौ पुराणेषु च लोकसिद्धः ।
तथैव सर्वं सदसद्विभाग-
स्त्वमेव नान्यद्भवतो विभाति ॥५८ ॥
यद्यत्समुत्पन्नमनन्तसृष्टौ
उत्पत्स्यते यच्च भवच्च यच्च ।

तनुभृतां शौर्य्यं धैर्य्यमायुश्च तदखिलं तव सत्त्वं त्वद्रूपा सत्तैव प्राभवत् तत्तद्रूपेण प्रादुर्भूतेत्यर्थः ॥ ५६ ॥

विरिञ्चिर्ब्रह्मा विभागो भेदः हे ईश ! वादिनां तत्तद्भक्तत्वेन तत्र तत्रेश्वरत्वाभिमानवतां त्वं तत्तद्रूपेण परस्परमाक्षिप्त इव भासि तत्त्वमाह अनन्यत् भेदशून्यमत एवैकमीदृशं ब्रह्मैव त्वं त्वमेव च ब्रह्मादयस्ततो नैषां भेद इति भावः ॥ ५७ ॥

प्रकारान्तरेणापि सर्वस्य ब्रह्मरूपतां स्थापयति मत्स्यादीति एकस्यैव यथा दशरूपत्वं तथैकस्यैव सदसद्विभागरूपता सत् ब्रह्म विश्वादिकमसत् तदितरत्सर्वम् स एकस्त्वमेव यतो भवतोऽन्यत् न विभाति वस्तुतः पर्य्यालोचनेऽपि न ज्ञानविषयो भवतीत्यर्थः ॥ ५८ ॥

अनन्तसृष्टौ अन्तरहितायां सृष्टौ तदुक्तं पातञ्जले 'सर्वथा स्वव्याख्यर्च्छेदो नैव कृतार्थंप्रत्युक्तं प्रत्येव तु तच्छिद्रशक्तिः' इति 'अनादिर्भगवान् कालो नान्तोऽस्य द्विज ! विद्यते । अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसं-

---

(१) ब्रह्मार्चित इति विभिन्नः पाठः ।

न दृश्यते स्थावरजङ्गमादौ
त्वया विनातः परतः परस्त्वम् ॥ ५९ ॥
तत्त्वं न जानन्ति परात्मनस्ते
जनाः समस्तास्तव माययातः।
त्वद्भक्तसेवामलमानसानां
विभाति तत्त्वं परमेकमैशम् ॥ ६० ॥
ब्रह्मादयस्तेन विदुः स्वरूपं
चिदात्मतत्त्वं बहिरर्थभावाः।
ततो बुधस्त्वामिदमेव रूपं
भक्त्या भजन्मुक्तिमुपैत्यदुःखः ॥ ६१ ॥
अहं भवन्नाम गृणन् कृतार्थो
वसामि काश्यामनिशं भवान्या।
मुमूर्षमाणस्य विमुक्तयेऽहं
दिशामि मन्त्रं तव रामनाम ॥ ६२ ॥

मया' इति स्मृतिश्च तादृश्यां दृष्टौ यज्जातं यद्भावि यच्च वर्त्तमानं तत्त्वया विना न दृश्यते सर्वं तद्रूपमेव दृश्यते अतस्त्वं परतः सर्वोत्कृ-ष्टाद्धिरण्यगर्भादपि पर इत्यर्थः ॥ ५९ ॥

नन्वेवं रूपं मां सर्वे जनाः किमिति न जानन्ति तत्राह तत्त्वमिति परमात्मनस्ते एतत्तत्त्वं एते समस्ता जनास्तव मायया संवृता इति शेषः अतो न जानन्ति तर्हि सर्वथा मामेवं कोऽपि न जानन्ति नेत्याह तद्भक्तेति ते तवैवं तत्त्वं जानन्तीत्यर्थः ॥ ६० ॥

ते तव चैतन्यरूपमात्मतत्त्वं ब्रह्मादयोऽपि न विदुः यतस्ते बहिर-र्थेषु भावश्चित्तं येषां तादृशाः ततो बुधः त्वद्रूपज्ञानसमर्थोऽपि इदं रूपमेव त्वां प्रकृतदृश्यमानरूपमेव त्वां भजन् ध्यायन् अदुःखः निवृत्तस-कलदुःखः सन्मुक्तिमुपैति ॥ ६१ ॥

अपरमपि सुलभं साधनं स्वानुष्ठितत्वेनानुपादेयत्वं च तत्र स्व-

इमं स्तवन्नित्यमनन्यभक्त्या
शृण्वन्ति गायन्ति लिखन्ति ये वै।
ते सर्वसौख्यं परमं च लब्ध्वा
भवत्पदं यान्तु भवत्प्रसादात् ॥ ६३ ॥

इन्द्र उवाच।

रक्षोऽधिपेनाखिलदेवसौख्यं
हृतं च मे ब्रह्मवरेण देव!।
पुनश्च सर्वं भवतः प्रसादात्
प्राप्तं हतो राक्षसदुष्टशत्रुः ॥ ६४ ॥

देवा ऊचुः।

हृता यज्ञभागा धरादेवदत्ता
मुरारे! खलेनादिदैत्येन विष्णो!।
हतोऽद्य त्वया नो वितानेषु भागाः
पुरावद्भविष्यन्ति युष्मत्प्रसादात् ॥ ६५ ॥

पितर ऊचुः।

हतोऽद्य त्वया दुष्टदैत्यो महात्मन्!
गयादौ नरैर्दत्तपिण्डादिकाद्यः

यत्नाद् अहमिति अनिशं रटन् उच्चारयन् मरणसमये जन्तूनां मुक्तये हे राम! तव नामरूपं मन्त्रं दिशामि उपदिशामि ॥ ६२ । ६३ ॥

अखिलदेवसौख्यं अखिलदेवराज्यरूपं सौख्यम् यतस्त्वया राक्षसरूपोऽस्माकं दुष्टशत्रुर्हतः ॥ ६४ ॥

धरादेवा भूदेवा विद्वांसस्तैर्यज्ञेषु दत्ता यज्ञभागा येन खलेन हृताः स त्वया हतस्तेन ते भागा नोऽस्माकं पुरावद्रावणोत्पत्तिप्राक्काल इव भविष्यन्ति ॥ ६५ ॥

बलादृत्तिं हृत्वा गृहीत्वा समस्ता-
निदानीं पुनर्लब्धसत्त्वा भवामः ॥ ६६ ॥

यक्षा ऊचुः।

सदा विष्टिकर्मण्यनेनाभियुक्ताः।
वहामो दशास्यं बलात् दुःखयुक्ताः।
दुरात्मा हतो रावणो राघवेश !
त्वया ते वयं दुःखजाताद्विमुक्ताः ॥ ६७ ॥

गन्धर्वा ऊचुः।

वयं सङ्गीतनिपुणा गायन्तस्ते कथामृतम्।
आनन्दामृतसन्दोहयुक्ताः पूर्णाः स्थिताः पुरा ॥ ६८॥
पश्चाद्दुरात्मना राम ! रावणेनाभिविद्रुताः।
तमेव गायमानाश्च तदाराधनतत्पराः ॥ ६९ ॥
स्थितास्त्वया परित्राता हतोऽयं दुष्टराक्षसः।
एवं महोरगाः सिद्धाः किन्नरा मरुतस्तथा ॥ ७० ॥
वसवो मुनयो गावो गुह्यकाश्च पतत्रिणः।
सप्रजापतयश्चैते तथा चाप्सरसां गणाः ॥७१॥

लब्धसत्त्वास्त्वत्प्रसादप्राप्त्या लब्धबलाः ॥ ६६ ॥

विष्टिकर्मणि वेतनदानं विना बलात्कर्मकारणं विष्टिस्तत्कर्मणि अभियुक्ताः प्रेरिताः दशास्यं वहामस्तदीयपल्लक्यादिवहनेनेति शेषः दुःखजाताद्दुःखसमूहात् ॥ ६७ ॥

पुरा रावणराज्यात्पूर्वम् ॥ ६८ ॥

अभिविद्रुता बलेन स्ववशतां नीताः ॥ ६९ ॥

यतोऽयं हतो त एवं स्थितास्त्वया तद्दुःखमोचनेन परित्राताः ॥ ७०—७२ ॥

सर्वे रामं समासाद्य दृष्ट्वा नेत्रमहोत्सवम्।
स्तुत्वा पृथक् पृथक् सर्वे राघवेणाभिवन्दिताः॥ ७२॥
ययुः स्वं स्वं पदं सर्वे ब्रह्मरुद्रादयस्तथा।
प्रशंसन्तो मुदा रामं गायन्तस्तस्य चेष्टितम्॥ ७३॥
ध्यायन्तस्त्वभिषेकार्द्रं सीतालक्ष्मणसंयुतम्।
सिंहासनस्थं राजेन्द्रं ययुः सर्वे हृदिस्थितम्॥ ७४॥
खे वाद्येषु ध्वनत्सु प्रमुदितहृदयैर्देववृन्दैः स्तुवद्भिः
वर्षद्भिः पुष्पवृष्टिं दिवि मुनिनिकरैरीड्यमानं समन्तात्।
रामः श्यामः प्रसन्नः स्मितरुचिरमुखः सूर्यकोटिप्रकाशः
सीतासौमित्रिवाय्वात्मजमुनिहरिभिः सेव्यमानो विभाति॥ ७५॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
पञ्चदशः सर्गः।

हृदि अन्तर्यामितया स्थितमेव राजेन्द्रं दृश्यमानराजेन्द्ररूपं ध्यायन्तो ययुरित्यन्वयः॥ ७४। ७५॥

इति श्रीमत्पुरुकच्छराजविपदुद्धरणसमर्थस्यादित्रि० श्रीरामवर्मणः कृतौ श्रीमदध्यात्मरामायणसेतौ युद्धकाण्डे
पञ्चदशः सर्गः।

अथ षोड़शः सर्गः ।

श्रीमहादेव उवाच ।

रामेऽभिषिक्ते राजेन्द्रे सर्वलोकसुखावहे ।
वसुधा शस्यसम्पन्ना फलवन्तो महीरुहाः ॥ १ ॥
गन्धहीनानि पुष्पाणि गन्धवन्ति चकाशिरे ।
सहस्रशतमश्वानां धेनूनां च गवां तथा ॥ २ ॥
ददौ शतवृषान् पूर्वं द्विजेभ्यो रघुनन्दनः ।
त्रिंशत्कोटिं सुवर्णस्य ब्राह्मणेभ्यो ददौ पुनः ॥ ३ ॥
वस्त्राभरणरत्नानि ब्राह्मणेभ्यो मुदा तथा ।
सूर्य्यकान्तिसमप्रख्यां सर्वरत्नमयीं स्रजम् ॥ ४ ॥
सुग्रीवाय ददौ प्रीत्या राघवो भक्तवत्सलः ।
अङ्गदाय ददौ दिव्ये अङ्गदे रघुनन्दनः ॥ ५ ॥
चन्द्रकोटिप्रतीकाशं मणिरत्नविभूषितम् ! ।
सीतायै प्रददौ हारं प्रीत्या रघुकुलोत्तमः ॥ ६ ॥
अवमुच्यात्मनः कण्ठात् हारं जनकनन्दिनी ।
अवैक्षत हरीन् सर्वान् भर्त्तारं च मुहुर्मुहुः ॥ ७ ॥
रामस्तामाह वैदेहीमिङ्गितज्ञो विलोकयन् ।
वैदेहि ! यस्य तुष्टासि देहि तस्मै वरानने ! ॥८॥

रामे इति उत्तरार्द्धे जातेति जाता इति च शेषः ॥ १ ॥
निर्गन्धा निर्गन्धयुतानि अश्वानां धेनूनां गवां च बहुशतं ददौ ॥२॥
शतवृषानित्यत्र शतशब्दोऽनन्तवाची ॥ ३ ॥ ४ ॥
अङ्गदे बाहुभूषणे ॥ ५ ॥ ६ ॥
अवमुच्य भर्त्रा कण्ठे प्रतिमुक्तं पुनः कण्ठादवतार्य्येत्यर्थः ॥ ७ ॥
विलोकयन् वैदेहीं पश्यन् ॥ ८ ॥

हनूमते ददौ हारं पश्यतो राघवस्य च।
तेन हारेण शुशुभे मारुतिर्गौरवेण च॥ ९॥
रामोऽपि मारुतिं दृष्ट्वा कृताञ्जलिमुपस्थितम्।
भक्त्या परमया तुष्ट इदं वचनमब्रवीत्॥१०॥
हनुमंस्ते प्रसन्नोऽस्मि वरं वरय काङ्क्षितम्।
दास्यामि देवैरपि यद् दुर्लभं भुवनत्रये॥ ११॥
हनूमानपि तं प्राह नत्वा रामं प्रहृष्टधीः।
त्वन्नामस्मरतो राम! न तृप्यति मनो मम॥१२॥
अतस्त्वन्नाम सततं स्मरन् स्थास्यामि भूतले।

गौरवेण सीताकृतादरेण॥ ९॥ १०॥

यद्वस्तु देवैरपि दुर्लभं तदपि तव वररूपं च दास्याम्येवेत्यर्थः उक्तं चान्यत्र "राज्योत्सवागतजनाय रघुप्रवीरः प्रीत्या ददावनेकमणिरत्नविभूषणानि। दत्त्वानिलात्मजमपास्य विदेहजायै मालां ददौ रघुपतिः परमादरेण॥ तया हनुमते दत्ता सैव माला ह्यमूल्यिका। दशनैः शकलीकृत्य त्यक्ता तेन जलाशये॥ हाहेति जल्पितं सर्वैस्तदा सद्वरवानरैः स्वजातीयभरे कर्म त्वया कृतमरिन्दम॥ रामस्ततो मारुतिमत्युदारमाहूय चारादभिवर्त्तमानम्। पप्रच्छ कस्मान्महती सुमाला त्यक्ता त्वया ब्रूहि विदेहजार्पिता॥ ब्रह्मेति यद्ब्रह्मविदो वदन्ति ह्यात्मेश्वरश्चेति वदन्ति सन्तः। सीतापते! त्वं तदसीति बुद्ध्वा त्यक्ता मयेयं सकलार्त्तिहृत्या॥ हनूमन्यदि मत्तस्त्वं वरं किमपि नेच्छसि तवेच्छां तर्हि निर्मुक्तां करिष्यामि च निष्फलाम्॥ श्रीरामश्रवणे दासे ममास्तु सफला स्पृहा। तस्मा विरोधिनी वाञ्छा निर्मूलां क्रियतां प्रभो!॥ मम स्वान्ते सदैव त्वं सीतया सह तिष्ठसि। अद्यैव सर्वे पश्यन्तु स्थितं त्वां जानकीपते!॥ विदीर्य वक्षस्स्थलमञ्जनीसुतः प्रदर्शयामास च राममद्वयम्। हृदम्बुजे संस्थितमञ्जलोचनं महीसुताराधितपादपङ्कजम्॥ मारुतेर्वैभवं दृष्ट्वा सर्वे सन्तोषमागताः। रामेणालिङ्गितः श्रीमान् हनूमानञ्जनीसुतः॥ जयशब्दो महानासीत्तदा राघव-

यावत् स्थास्यति ते नाम लोके तावत्कलेवरम् ॥१३॥
मम तिष्ठतु राजेन्द्र! वरोऽयं मेऽभिकाङ्क्षितः।
रामस्तथेति तं प्राह मुक्तस्तिष्ठ यथासुखम् ॥ १४ ॥
कल्पान्ते मम सायुज्यं प्राप्स्यसे नात्र संशयः।
तमाह जानकी प्रीता यत्र कुत्रापि मारुते! ॥ १५ ॥
स्थितं त्वामनुयास्यन्ति भोगाः सर्वे ममाज्ञया।
इत्युक्तो मारुतिस्ताभ्यां ईश्वराभ्यां प्रहृष्टधीः ॥ १६ ॥
आनन्दाश्रुपरीताक्षो भूयोभूयः प्रणम्य तौ।
कृच्छ्रादययौ तपस्तप्तुं हिमवन्तं महामतिः ॥ १७ ॥
ततो गुहं समासाद्य रामः प्राञ्जलिमब्रवीत्।
सखे! गच्छ पुरं रम्यं शृङ्गिवेरमनुत्तमम् ॥ १८ ॥
मामेव चिन्तयन्नित्यं भुंक्ष्व भोगान्निजार्जितान्।
अन्ते ममैव सारूप्यं प्राप्स्यसे त्वं न संशयः॥ १९ ॥
इत्युक्त्वा प्रददौ तस्मै दिव्यान्याभरणानि च।
राज्यं च विपुलं दत्त्वा विज्ञानं च ददौ विभुः ॥२०॥
रामेणालिङ्गितो हृष्टो ययौ स्वभवनं गुहः।

मण्डपे। सीतामस्तदिता तस्मै वरान् अभयदान्ददौ ॥ रामलीलाकृतं चैतत् परमानन्ददायकम्। श्रोतॄणां वाचकानां पापसङ्घविदारकम्" ॥११।१२॥

तं तयोदारचरितम् ॥ १३ ॥

मुक्तः सततं मम नामस्मरणाद् जीवन्मुक्तः सन् तिष्ठ ॥ १४।१५ ॥

ईश्वराभ्यां सीतारामाभ्याम् ॥ १६ ॥

कृच्छ्रादिति रामदर्शनवियोगतः कृच्छ्रम् ॥ १७ ॥ १८ ॥

मामेव चिन्तयन्नित्यनेन भोगेष्वनासक्तो भवेति सूच्यते ॥ १९ ॥

विद्यमानराज्यादधिकदेशराज्यं विज्ञानमात्मतत्त्वज्ञानम् ॥ २० ॥

ये चान्ये वानराः श्रेष्ठा अयोध्यां समुपागताः ॥२१॥
अमूल्याभरणैर्वस्त्रैः पूजयामास राघवः।
सुग्रीवप्रमुखाः सर्वे वानराः सविभीषणाः ॥ २२ ॥
यथार्हं पूजितास्तेन रामेण परमात्मना।
प्रहृष्टमनसः सर्वे जग्मुरेव यथागतम् ॥ २३ ॥
सुग्रीवप्रमुखाः सर्वे किष्किन्ध्यां प्रययुर्मुदा।
विभीषणस्तु सम्प्राप्य राज्यं निहतकण्टकम् ॥२४॥
रामेण पूजितः प्रीत्या ययौ लङ्कामनिन्दितः।
राघवो राज्यमखिलं शशासाखिलवत्सलः॥ २५ ॥
अनिच्छन्नपि रामेण यौवराज्येऽभिषेचितः।
लक्ष्मणः परया भक्त्या राममेवापरोऽभवत् ॥२६॥
रामस्तु परमात्मापि कर्माध्यक्षोऽपि निर्मलः।
कर्तृत्वादिविहीनोऽपि निर्विकारोऽपि सर्वदा ॥ २७ ॥
स्वानन्देनापि तुष्टः सन् लोकानामुपदेशकृत्।
अश्वमेधादियज्ञैश्च सर्वैर्विपुलदक्षिणैः ॥ २८ ॥
अयजत्परमानन्दो मानुषं वपुराश्रितः।

आलिङ्गितः बहिःशरीरेण सर्वदा स्वानुसन्धानदामेनान्तश्चालिङ्गितः॥२१॥

पूजयामास तानिति शेषः॥ २२—२५ ॥

अनिच्छन्नितस्य यौवराज्यमिति कर्म ॥ २६ ॥

कर्माध्यक्षः सर्वकर्मसाक्षी कर्तृत्वादिविहीनो निरभिमानित्वात् अतएव निर्विकारः ॥ २७ ॥

स्वानन्देन तुष्ट इत्यनेन लौकिकानन्दसामग्रीनिरपेक्षत्वमुक्तम् लोकानामुपदेशकृत् अनेन लोकोपदेश एव यज्ञाद्यनुष्ठानप्रयोजनमुक्तम् ॥ २८ ॥

न पर्य्यदेवन्विधवा न च व्यालकृतं भयम् ॥ २९ ॥
न व्याधिजं भयं चासीद्रामे राज्यं प्रशासति।
लोके दस्युभयं नासीदनर्थो नास्ति कश्चन ॥ ३० ॥
वृद्धेषु सत्सु बालानां नासीन्मृत्युभयं तथा।
रामपूजापराः सर्वे सर्वे राघवचिन्तकाः ॥ ३१ ॥
ववर्षुर्जलदास्तोयं यथाकालं यथारुचि।
प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः ॥ ३२ ॥
औरसानिव रामोऽपि जुगोप पितृवत्प्रजाः।
सर्वलक्षणसंयुक्ताः सर्वधर्मपरायणाः ॥ ३३ ॥
दशवर्षसहस्राणि रामो राज्यमुपास्त सः ॥ ३४ ॥

इदं रहस्यं धनधान्यऋद्धिमत्
दीर्घायुरारोग्यकरं सुपुण्यदम्।
पवित्रमाध्यात्मिकसंज्ञितं पुरा
रामायणं भाषितमादिशम्भुना ॥ ३५ ॥

रामो राज्यमिति सौराज्यमाह न पर्य्यदेवन्निति व्यालाः सर्पा व्याघ्राश्च ॥ २९ ॥

दस्यवश्चौराः ॥ ३० ॥

अनर्थाभावमेव प्रपञ्चयति वृद्धेष्विति ॥ ३१ ॥

वर्णाश्रमाणां ये गुणाः धर्माः पुराणेयुक्तास्तैरन्विताः ॥ ३२ ॥

औरसानिव स्वस्मिन् प्रीतिमतीः प्रजा रामः पितृवज्जुगोप पितरि पुत्राणामिव प्रजानां रामे स्नेहः पितुः पुत्रेष्विव प्रजासु रामस्नेहेति बोधितम् ॥ ३३ ॥

उपास्त अकरोदिति यावत् ॥ ३४ ॥

धनधान्यऋद्धिमत् तद्युक्तं दीर्घमायुरारोग्यं च तयोः कारकमात्मानमधिकृत्य भवमाध्यात्मिकम् ॥ ३५ ॥

शृणोति भक्त्या मनुजः समाहितो
भक्त्या पठेद्वा परितुष्टमानसः।
सर्वाः समाप्नोति मनोगताशिषो
विमुच्यते पातककोटिभिः क्षणात् ॥ २६ ॥
रामाभिषेकप्रयतः शृणोति यो
धनाभिलाषी लभते महद्धनम्।
पुत्राभिलाषी सुतमार्यसम्मतं
प्राप्नोति रामायणमादितः पठन् ॥ २७ ॥
शृणोति योऽध्यात्मिकरामसंहितां
प्राप्नोति राजा भुवमृद्धसम्पदम्।
शत्रून्विजित्यारिभिरप्रधर्षितो
व्यपेतदुःखो विजयी भवेन्नृपः ॥ २८ ॥
स्त्रियोऽपि शृण्वन्त्यधिरामसंहितां
भवन्ति ता जीवसुताश्च पूजिताः।
वन्ध्याऽपि पुत्रं लभते सुरूपिणं
कथामिमां भक्तियुता शृणोति या ॥ २९ ॥
श्रद्धान्वितो यः शृणुयात्पठेन्नरो
विजित्य कोपं च तथा विमत्सरः।

समाहितस्तदेकचित्तः परितुष्टमानसः भगवत्कथापठनजानन्देनेति भावः मनोगताशिषः मनसा आशास्यमानानर्थान् ॥ २६ ॥

रामाभिषेकं रावणजयपूर्वकं प्राप्तं आर्यसम्मतं शिष्टसम्मतं तेन स्वयं शिष्टमिति यावत् ॥ २७ ॥

अ आध्यात्मिकीत्यत्र सन्धिरार्षः ॥ २८ ॥

अधिरामसंहितां राममधिकृत्य प्रवृत्तामध्यात्मरामायणाख्याम् ॥ २९

दुर्गाणि सर्वाणि विजित्य निर्भयो
भवेत् सुखी राघवभक्तिसंयुतः ॥ ४० ॥

सुराः समस्ता अपि यान्ति तुष्टतां
विघ्नाः समस्ता अपयान्ति शृण्वताम् ।
अध्यात्मरामायणमादितो नृणां
भवन्ति सर्वा अपि सम्पदः पराः ॥ ४१ ॥

रजस्वला वा यदि रामतत्परा
शृणोति रामायणमेतदादितः ।
पुत्रं प्रसूते ऋषभश्चिरायुषं
पतिव्रता लोकसुपूजिता भवेत् ॥ ४२ ॥

पूजयित्वा तु ये भक्त्या नमस्कुर्वन्ति नित्यशः
सर्वैः पापैर्विनिर्मुक्ता विष्णोर्यान्ति परं पदम् ॥ ४३ ॥

अध्यात्मरामचरितं कृत्स्नं शृण्वन्ति भक्तितः ।
पठन्ति वा स्वयं वक्त्रात्तेषां रामः प्रसीदति ॥ ४४ ॥

राम एव परं ब्रह्म तस्मिंस्तुष्टेऽखिलात्मनि ।
धर्मार्थकाममोक्षाणां यद्यदिच्छति तद्भवेत् ॥ ४५ ॥

श्रोतव्यं नियमेनैतद्रामायणमखण्डितम् ।
आयुष्यमारोग्यकरं कल्पकोट्यघनाशनम् ॥ ४६ ॥

कोपमित्युपलक्षणं कामादीनाम् विमत्सरः अमोर्ष्यः सर्वाणि दुर्गाणि दुःखस्थानानि ॥ ४० ॥

शृण्वतां पुंसां सुरास्तुष्यन्ति विघ्ना नश्यन्ति सम्पदश्च भवन्ति ॥४१॥

रामतत्परा रामैकचित्ताः रजस्वलायाः श्रवणं चतुर्थेऽह्न्यारभ्य द्वादशरात्रान्तम् ॥ ४२ ॥

पूजयित्वेत्यादेः पुस्तकमिति शेषः ॥ ४३–४५ ॥

देवाश्च सर्वे तुष्यन्ति यक्षाः सर्वे महर्षयः ।
रामायणस्य श्रवणे तुष्यन्ति पितरस्तथा ॥ ४७ ॥

अध्यात्मरामायणमेतदद्भुतं
वैराग्यविज्ञानयुतं पुरातनम् ।
पठन्ति शृण्वन्ति लिखन्ति ये नरा-
स्तेषां भवेऽस्मिन्न पुनर्भवो भवेत् ॥ ४८ ॥

आलोड्याखिलवेदराशिमसकृद्यत्तारकं ब्रह्म त-
द्रामो विष्णुरहस्यमूर्त्तिरिति यो विज्ञाय भूतेश्वरः ।
उद्धृत्याखिलसारसंग्रहमिदं संक्षेपतः प्रस्फुटं
श्रीरामस्य निगूढतत्त्वमखिलं प्राह प्रियायै भवः ॥ ४९ ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे
षोडशः सर्गः ।

अयं काण्डः समाप्तः ।

आयुष्यं आयुर्जनकम् कल्पकोटिपर्यन्तं कृतमघम् ॥ ४६ । ४७ ॥

वैराग्यविज्ञानयुतं श्रोतॄणां तदुभयदायकमादिति भावः अस्मिन् भवे संसारे इत्यर्थः ॥ ४८ ॥

यो भूतेश्वरो भवः शिवो सकृदखिलवेदराशिमालोड्य यत्तारकं ब्रह्म तदेव रामः विष्णुरहस्यमूर्त्तिः षु अत्यन्तरहस्यमूर्तिः गुह्यामूर्त्तिरिति विज्ञायाखिलवेदानां सारभूता उपनिषदस्तदर्थसंग्रहमुद्धृत्य संक्षेपत इदं रामस्य निगूढतत्त्वं प्रियायै प्राह तस्मै नम इति शेषः अयं श्लोकस्तत्त्वश्रोतुः शिवशिष्यस्येति बोध्यम् ॥ ४९ ॥

इति श्रीमत्सकलराजविपद्धुरन्धरसमर्थेत्यादिवि० श्रीरामवर्म्मणः
कृतावध्यात्मरामायणे टीकौ युद्धकाण्डे
षोडशः सर्गः ।

उत्तरकाण्डम् ।

प्रथमः सर्गः ।

जयति रघुवंशतिलकः कौशल्याहृदयनन्दनो रामः ।
दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः ॥ १ ॥

पार्वत्युवाच ।

अथ रामः किमकरोत्कौशल्यानन्दवर्द्धनः ।
हत्वा मृधे रावणादीन् राक्षसान् भीमविक्रमः ? ॥ २ ॥
अभिषिक्तस्त्वयोध्यायां सीतया सह राघवः ।
मायामानुषतां प्राप्य कतिवर्षाणि भूतले ? ॥ ३ ॥
स्थितवान् लीलया देवः परमात्मा सनातनः ।
अत्यजन्मानुषं लोकं कथमन्ते रघूद्वहः ?(१) ॥ ४ ॥
एतदाख्याहि भगवन् ! श्रद्दधत्या मम प्रभो ! ।
कथापीयूषमास्वाद्य तृष्णा मेऽतीव वर्द्धते ।
रामचन्द्रस्य भगवन् ! ब्रूहि विस्तरशः कथाम् ॥ ५ ॥

मृधे युद्धे ॥ १–२ ॥

कथं केन प्रकारेण ॥ ४ ॥

श्रद्दधत्याः एतच्छ्रवणे श्रद्धावत्याः कथामृतमास्वाद्य मे मम तदास्वादनविषया तृष्णा अत्यन्तं वर्द्धते ॥ ५ ॥

---

(१) रघूत्तम इति वा पाठः ।

श्रीमहादेव उवाच ॥

राक्षसानां वधं कृत्वा राज्यं राम उपस्थिते।
आययुर्मुनयः सर्वे श्रीराममभिवन्दितुम् ॥ ६ ॥
विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरङ्गिराः।
कश्यपो वामदेवोऽत्रिस्तथा सप्तर्षयोऽमलाः ॥ ७ ॥
अगस्त्यः सह शिष्यैश्च मुनिभिः सहितोऽभ्यगात्।
द्वारमासाद्य रामस्य द्वारपालमथाब्रवीत् ॥ ८ ॥
ब्रूहि रामाय मुनयः समागत्य बहिःस्थिताः।
अगस्त्यप्रमुखाः सर्वे आशीर्भिरभिनन्दितुम् ॥ ९ ॥
प्रतिहारस्ततो राममगस्त्यवचनाद्द्रुतम्।
नमस्कृत्याब्रवीद्वाक्यं विनयावनतः प्रभुम् ॥ १० ॥
कृताञ्जलिरुवाचेदमगस्त्यो मुनिभिः सह।
देव! त्वद्दर्शनार्थाय प्राप्तो बहिरुपस्थितः ॥ ११ ॥
तमुवाच द्वारपालं प्रवेशय यथासुखम्।
पूजिता विविशुर्वेश्म नानारत्नविभूषितम् ॥ १२ ॥

रामे राज्यमुपस्थिते राज्यं प्राप्तवतीत्यर्थः अभिवन्दितुं नन्तुं स्तोतुं च ॥ ६ ॥

तानेव ऋषीनाह विश्वामित्र इति ॥ ७ ॥

मुनिभिः शिष्यैः सहित इत्यर्थः ॥ ८ ॥

अगस्त्यप्रमुखा मुनय आशीर्भिरभिनन्दितुं समागत्य बहिःस्थिताः सन्तीति रामाय ब्रूहीत्यन्वयः ॥ ९ । १० ॥

कृताञ्जलिः प्रतिहार इति शेषः प्राप्तः स्वाश्रमादागतः बहिर्द्वारि उपस्थितोऽस्मीति शेषः ॥ ११ ॥

पूजिताः प्रतिहारेण मार्गप्रदर्शनादिना पूजिताः कृतादरा इति यावत् ॥ १२ ॥

दृष्ट्वा रामो मुनीन् शीघ्रं प्रत्युत्थाय कृताञ्जलिः।
पाद्यार्घ्यादिभिरापूज्य गां निवेद्य यथाविधि ॥ १३ ॥
नत्वा तेभ्यो ददौ दिव्यान्यासनानि यथार्हतः।
उपविष्टाः प्रहृष्टाश्च मुनयो रामपूजिताः ॥ १४ ॥
संपृष्टकुशलाः सर्वे रामं कुशलमब्रुवन्।
कुशलं ते महाबाहो! सर्वत्र रघुनन्दन! ॥ १५ ॥
दिष्ट्येदानीं प्रपश्यामो हतशत्रुमरिन्दम!।
नहि भारः स ते राम! रावणो राक्षसेश्वरः ॥ १६ ॥
सधनुस्त्वं हि लोकांस्त्रीन् विजेतुं शक्त एव हि।
दिष्ट्या त्वया हताः सर्वे राक्षसा रावणादयः ॥ १७ ॥
सह्यमेतन्महाबाहो! रावणस्य निबर्हणम्।
असह्यमेतत्सम्प्राप्तं रावणेर्यन्निषूदनम् ॥ १८ ॥
अन्तकप्रतिमाः सर्वे कुम्भकर्णादयो मृधे।
अन्तकप्रतिमैर्बाणैर्हतास्ते रघुसत्तम! (१) ॥ १९ ॥

गां मधुपर्कार्थं 'महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्' इति स्मृतेः ॥ १३ ॥

यथार्हतः आर्हो योग्यता तदनतिक्रमादित्यर्थः भगवतः सकाशात् पूजालाभेन प्रहर्षः ॥ १४ ॥

अब्रुवन् अपृच्छन् तमेवाभिनयति कुशलमित्यादि ॥ १५ ॥

स रावणस्तेन भारः क्लेशवध्यो न किन्तु सुकरवध इत्यर्थः ॥ १६ ॥

सुकरत्वमेव दर्शयति सधनुरिति इन्द्रजित स्मृत्वा आह दिष्ट्येति ॥ १७ ॥

तदेव स्पष्टयति सह्यमिति रावणेर्मेघनादस्य ॥ १८ ॥

या दक्षिणा पुरा दत्ता दातुं प्रतिज्ञाता सा रक्षोगणान् हत्वा

---

(१) रघुनन्दन इति पाठान्तरम्।

दत्ता चेयं त्वयाऽस्माकं पुरा ह्यभयदक्षिणा।
हत्वा रक्षोगणान् सङ्ख्ये कृतकृत्योऽद्य जीवसि॥२०॥
श्रुत्वा तु भाषितं तेषां मुनीनां भावितात्मनाम्।
विस्मयं परमं गत्वा रामः प्राञ्जलिरब्रवीत्॥ २१॥
रावणादीनतिक्रम्य कुम्भकर्णादिराक्षसान्।
त्रिलोकजयिनो हित्वा किं प्रशंसथ रावणिम्?॥२२॥
ततस्तद्वचनं श्रुत्वा राघवस्य महात्मनः।
कुम्भयोनिर्महातेजा रामं प्रीत्या वचोऽब्रवीत्॥ २३॥
शृणु राम! यथा वृत्तं रावणे रावणस्य च।
जन्मकर्मवरादानं सङ्क्षेपाद्वदतो मम॥ २४॥
पुरा कृतयुगे राम! पुलस्त्यो ब्रह्मणः सुतः।
तपस्तप्तुं गतो विद्वान् मेरोः पार्श्वं महामतिः॥ २५॥
तृणबिन्दोराश्रमेऽसौ न्यवसन् मुनिपुङ्गवः।
तपस्तेपे महातेजाः स्वाध्यायनिरतः सदा॥ २६॥
तत्राश्रमे महारम्ये देवगन्धर्वकन्यकाः।
गायन्त्यो नृत्तुस्तत्र हसन्त्यो वादयन्ति च॥ २७॥
पुलस्त्यस्य तपो विघ्नं चक्रुः सर्वा अनिन्दिताः।
ततः क्रुद्धो महातेजा व्याजहार वचो महत्॥ २८॥
या मे दृष्टिपथं गच्छेत् सा गर्भं धारयिष्यति।

पूर्णा कृता अतः कृतकृत्यः सन् जीवसि त्वमेव जीव तव जीवनमेव श्लाघ्यं जीवनमित्यर्थः॥ १९—२४॥

यथा वृत्तं जातं तथा शृणु॥ २५॥

मुनिपुङ्गवः मुनिश्रेष्ठः सन् अवसत् तपस्तेपे च॥ २६। २७॥

विघ्नं चक्रुः गायननृत्यादिभिरिति शेषः॥ २८। २९॥